सकलजगत्प्रसिद्धैः सायणाचार्यैः **सुभाषितसुधानिधिः** इति ग्रन्थे १४ पद्धतयः सन्ति । उपोद्घातपद्धत्यामुक्तरीत्या कम्पराजस्य मन्त्रिः मायणः इति, मायणस्य पुत्रौ माधवसायणौ इति ज्ञायते । तौ श्लोकौ -

भारद्वाजान्वय भुवा तेन सायणमन्त्रिणा ।
व्यरच्यत विशिष्टार्थः सुभाषितसुधानिधिः ।
स कदाचित्समाजेऽथ कम्पभूपं कलानिधिः ।
अश्रावयदनूनश्रीः निश्रेयसंकरं परम् ।। इति ।।

जैनपण्डितेन श्रीमदाचार्यसकलकीर्तिपण्डितेन कृता **सुभाषितावलिः** । सोमप्रभाचार्येण निर्मितं सिंदूरप्रकरणमिति **सूक्तिमुक्तावलिः** ग्रन्थश्चात्यन्तमनोहरौ।

विश्वगुणादर्शकर्तृणा वेङ्कटध्वरिणा कृतं **सुभाषितकौस्तुभम्** । विवेकपद्धतिः, सज्जनपद्धतिः, दुर्जनपद्धतिः, वद्यानपद्धतिः, पिशुनपद्धतिश्चेति पञ्चपद्धतयः अस्मिन् ग्रन्थे उक्ताः ।

सूक्तिसूभाषितशब्दपूर्वग्रन्थाः बहवः श्रूयन्ते । आन्ध्रदेशीयेन एलेश्वरपुरवरम-होपाध्यायवंशजेन पेद्दिभट्टेन कृता **सूक्तिवारिधिः** । त्रयोदशाध्यायात्मकोऽयं ग्रन्थः। भर्त्रुहरिनीतिशतकमनुसृत्यायं ग्रन्थः निर्मितः इति मल्लादि सूर्यनारायणशास्त्रिभिः उक्तम् । सरसकवितायाः निदर्शनश्लोकोऽयं -

आशायाः दासाः ये दासास्ते सर्वलोकस्य

आशा दासी येषां तेषां दासायते लोकः।। इति।

श्रीकुमारिलभट्टेन मीमांसापण्डित इति कीर्तितः सुन्दरपाण्ड्यः। तेन कृता **आर्या** इति। आर्याछन्दसि सुष्ठुनीतिवाक्यानि सुन्दरपाण्ड्येनोक्तानि। **आर्यावलिः , नीतिद्विषष्ठिका** इति च नामान्तरे श्रूयेते। पञ्चतन्त्रकारेण इतरनीतिसङ्कलकर्त्रुभिश्च **आर्याः स्वीकृताः। इमां काञ्चनपीठस्थां समेत्य कवयो भुवि आर्यां सुन्दरपाण्ड्यस्य स्नापयन्ति वधूमिव** इति ग्रन्थान्तश्लोकेन आर्य नाम ज्ञायते। काञ्चनपीठे स्नुतिस्नाता आर्या । सुन्दरपाण्ड्यवचोऽलङ्कृता आर्या आर्यावर्तनं निरूपयति । आर्यभावनया कान्तासम्मिततया स्त्रीत्वस्फोरकेन सर्वजनादरणीयाः आर्योक्तयः ।

आर्या ग्रन्थे नीतिषु सामाजिकस्पृहा विद्यते। **'अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम् '** इत्युक्तरीत्या कृता आर्या। उज्जिजीविषु जनजीवातु आर्या इति, कविहृदयान्तरेषु सुविशालविश्वविहारवीथिषु भावनापौष्कल्येन प्रसिद्धा आर्या। सूक्तिवैशिष्ट्यं, मित्रस्य वैशिष्ट्यं, धनस्य वैशिष्ट्यं, शीलस्य प्राधान्यं, क्षमा, दया, दान, उपकारबुद्धि, कृतज्ञतादयः सद्गुणाः, सज्जनदुर्जनयोः भेदाः, नीतिप्रबोधकाः सुष्टु प्रतिपादिताः। सामाजिक, धार्मिक, आर्थिकसम्बन्धव्यवहाररीतयः नीतिग्रन्थेषु दृश्यन्ते।

ननु याज्ञवल्क्यनारदपराशरशुक्रबृहस्पतिभिः कृताणां नीतिशास्त्राणां प्रसक्तिः अर्थशास्त्रे विद्यते। एतदनुसृत्य नीतिग्रन्थरचनापरम्परा अत्यन्तप्राचीनतमा इति ज्ञायते। संस्कृतवाङ्मये वेदवेदान्तपुराणेतिहासागमकाव्यनाटकादिषु अन्तर्लीना नीतिः जनानामुज्जीवनसन्मार्गसञ्चरणाय प्रत्येकनीतिसूक्तिसुभाषितग्रन्थरूपैः सुष्टु व्याप्ता। संघे राज्ये नीतिः, सदाचरणं, राजनीतिः, आर्थिकनीतिः, धार्मिकनीतिः, कामनीतिः इत्येवं प्रकारेण रक्षणबद्धकङ्कणधारणानां विद्यते। सामाजिकोन्नतिः, विचारौन्नत्यं, विश्वकल्याणाभिरुचिश्च नीतिशास्त्रेणैव सिद्ध्यति। नीतिग्रन्थेषु वैराग्यबोधनेन इहलौकिकसुखानामतीतया परलोकसौख्यमपि बोध्यते।

मानवजीवनारम्भदशायां नीतिबोधनाय नीतिशतकं, यौवनावस्थायां शृङ्गारशतकं, वृद्धावस्थायां वैराग्यशतकं चात्यन्तोपकारकाणि भवन्ति। प्राचीनभारतीयसम्प्रदायानुसारेण भर्तृहरिः विक्रमादित्यस्याग्रजः। भार्यायाः पिङ्गलायाः दुश्चर्यामसह्यमानः अरण्यं गतः भर्तृहरिः इति ज्ञापयति अयं श्लोकः -

विप्रेणाभूतपूर्वं फलमधितपसालम्बिसूर्यप्रसादात्
लब्ध्वा तस्मात् स्वयं तत्प्रचुरतरजरापञ्चताकुञ्चनाढ्यम्।
हित्वा मोहं स्वकान्तास्वतिविमलधिया तं निषेव्याक्तभव्यो
योगीन्द्रो भर्त्रुहर्याह्वय इह कुरुते यद्यपि विद्याविलासम् ।। इति।।

अनुभवज्ञानेन भर्तृहरिणा कृते नीतिशतके जीवनपरिशीलनाशक्तिः सम्यक् दृश्यते। पण्डितानां प्रशंसा, मूर्खाणां निन्दा, सदाचारमहापुरुषसत्पुरुषाणां वर्तनं, धनेन मानवे परिणामाः, परोपकारबुद्धेः प्रशंसा, सेवाधर्मस्य स्वरूपं, दुर्जनानां निन्दा च विद्यन्ते।

शृङ्गारशतके स्त्रीप्रशंसनं, स्त्रीसौन्दर्यं, संयोगशृङ्गारः, वेश्यायाः निन्दा, विविधऋतुषु मानवानां कामासक्तिश्च वर्णिताः।

वैराग्यशतके मानवस्य तृष्णा, अज्ञानं, विषयत्यागः, आत्मगौरवं, परब्रह्मध्यानं, कालमहिमा, व्यर्थजीवितं च वर्णिताः।

गोवर्धनस्य **आर्यासप्तशति** ग्रन्थे कोमलपादविन्यासेन मन्दमन्दगमनश्लोकाः सज्जनहृदयाधीनाः । विविधनायिकानायकयोः वर्णनानि नायिकानायकयोः प्रेमसंयोगवियोगशृङ्गाराः, नायिकायाः ईर्ष्यासूयादयः, सहजसुन्दरतया वर्णिताः। व्यङ्ग्यार्थेन नीतयः बोधिताः।

सोमेश्वरेण कृते **'अभिलषितार्थचिन्तामणि '** ग्रन्थे राजधर्माः, राजनीतिश्चोक्ताः।

बेङ्गाल् प्रान्ते लक्ष्मणसेनस्यास्थानकविना श्रीधरदासेन **सदुक्तिकर्णामृतम्** इति कृतः। अस्मिन् ग्रन्थे ४४६ कवीनां २३६८ श्लोकाः विद्यन्ते।

जल्हणेन **सूक्तिमुक्तावलिः** निर्मिता। अस्मिन् ग्रन्थे २४३ कवीनां २७९० श्लोकाः सन्ति। विविधविषयाणां सम्बन्धश्लोकाः शास्त्रीयपद्धत्या निर्मिताः।

कलिङ्गरायसूर्येण **सूक्तिरत्नहारः** इति श्लोकसङ्ग्रहग्रन्थः निर्मितः।

शाङ्र्गधरेण कृते **शाङ्र्गधरपद्धति** ग्रन्थे १६३ विभागाः सन्ति। विषयानुसारेण विभागाः कृताः। अस्मिन् ग्रन्थे ४६८९ श्लोकाः सन्ति। २६४ कवीनां श्लोकाः विद्यन्ते।

सकलकीर्तिना कृते **'सुभाषितावलि '** ग्रन्थे ३८० कवीनां श्लोकाः सन्ति।

पोतरायेण प्रसङ्गरत्नावलिः इति ग्रन्थे विविधविषयाणां सम्बन्धश्लोकाः ७२ पद्धतिषु सङ्कलिता। अस्य ग्रन्थस्य **प्रसङ्गरत्नावलिसङ्ग्रहः** इति नामापि विद्यते।

वल्लभदेवस्य **सुभाषितावलि** ग्रन्थे ३५२७ श्लोकाः ३५० कविभिः कृताः सङ्कलिताः। विषयानुसारेण १०१ भागैः विभक्तोऽयं ग्रन्थः। अस्मिन् ग्रन्थे उत्तरभारतदेशकविभिः कृताः श्लोकाः अधिकाः सन्ति।

पेद्दिभट्टीयमिति **सूक्तिवारिधि** ग्रन्थे षडध्यायेषु वैराग्यशतकम्, दानशतकम्, राजशतकम्, सज्जनशतकम्, दुर्जनशतकमिति नीतिश्लोकाः उक्ताः। अस्मिन् ग्रन्थे विक्रमार्क, भोजराज, कृष्णदेवराय, वेमभूपालाः साहित्यपोषकाः स्मृताः।

अक्बर् चक्रवर्तिनः आस्थानकविः हरिहरकविः अक्बरीयकालिदास इति अन्वर्थनाम्ना प्रसिद्धः **हरिहरसुभाषितम्** इति श्लोकसङ्ग्रहग्रन्थं कृतवान्।

हरिहरसुभाषितस्य हरिहरावलिः इति नाम सिद्धम् । हरिहरस्य अन्या श्लोकसङ्ग्रहकृतिः **सूक्तिमुक्तावलिः** विद्यते ।

हरिकविः नाम अन्यः कविः **सुभाषितहारावलिः** इति समीकृता।

शरभोजीकविना **बुद्धिभूषण**मिति श्लोकसङ्ग्रहः कृतः।

सुमति नाम पण्डितेन **सुभाषितावलिः** इति सङ्कलिता । वेणीदत्तेन **पद्यवेणी** इति सङ्कलिता । भास्करेण **पद्यामृततरङ्गिणी** इति सङ्कलिता। कविभट्टेन **पद्यसङ्ग्रहः** कृतः ।

कृष्णपाण्डुरङ्गपण्डितेन **सुभाषितरत्नभाण्डागारः** सङ्कलितः।

कृष्णशास्त्रिणा **सुभाषितरत्नाकरः** सङ्कलितः। विशालविजयजी पण्डितेन **सुभाषितपद्यरत्नहारः** निर्मितः ।

शिवदत्तकविना **सुभाषितरत्नभाण्डागारः** कृतः ।

ओटो व्योटिलिक् नाम जर्मन् संस्कृतपण्डितः ८००० श्लोकान् संगृह्य, जर्मन् भाषानुवादेन (इण्डिश्चेस्पृचे) इति नाम्ना प्रकटितवान् । नीतिधर्मबोधकाः ग्रन्थाः सर्वेऽपि **नीतिविज्ञानसर्वस्वमिति** नाम्ना सर्वासु भाषासु अनुवादाः करणीयाः । तदानीं नीतिसुभाषितवाक्यानां ज्ञानेन सर्वेषां मानवानां सत्कर्माचरणेन, सत्प्रवर्तनेन सुखसिद्धिः स्यात् । साधारणतया शिष्याः गुरुजनशीलमनुसरन्ति । नवेषु मृद्भाजनेषु लग्नः संस्कारः ब्रह्मणापि अन्यथा कर्तुं न शक्यते। ज्ञानलवदुर्विदग्धराज्ञः अन्ध इव परप्रणेयो राजा वरम् । नीलीरक्ते वस्त्रे इव दुर्विदग्धे राज्ञि रागान्तरमाधत्ते । राजा यथार्थवादश्चेत् विदुषां श्रेयस्करः । स्वामिषु अहितोपदेशात् आत्मनः मरणं वरम् इति विद्यावृद्धसमुद्देशः ।

विदुरनीतिः

पण्डितस्य लक्षणानि (qualities of scholar)

आत्मज्ञानं, कार्येषु शक्तिः, तितिक्षा, धर्मनित्यता च यं पुरुषार्थात् नापकर्षन्ति सः पण्डितः उच्यते । निषेवते प्रशस्तानि, न सेवते निन्दितानि , अनास्तिकः, श्रद्धधानः एतत् पण्डितलक्षणम् । क्रोधः, हर्षः, दर्पः, ह्रीस्तम्भः, मान्यमानिता च यं पुरुषार्थात् नापकर्षन्ति सः पण्डितः उच्यते । मन्त्रं मन्त्रितं वा यस्य कृत्यं न जानन्ति कृतमेवास्य जानन्ति सः पण्डितः इत्युच्यते । शीतमुष्णं भयं रतिः समृद्धिः असमृद्धिर्वा यस्य कृत्यं न विघ्नन्ति सः पण्डितः उच्यते । यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते यः कामादर्थं वृणीते सः पण्डितः इत्युच्यते । पण्डितबुद्धयः यथाशक्ति चिकीर्षन्ति, यथाशक्ति च कुर्वते । पण्डितस्य प्रथमं प्रज्ञानं किमित्युक्ते - क्षिप्रं विजानाति, चिरं श्रुणोति, विज्ञायचार्थं भजते, न कामात् । परार्थे नासंपृष्ठः व्युपयुङ्क्ते । पण्डितबुद्धयः नराः अप्राप्यं न अभिवाञ्छन्ति नष्टं शोचितुं नेच्छन्ति । आपत्सु च न मुह्यन्ति । यः निश्चित्य प्रक्रमते कर्मणः नान्तर्वसति अवन्ध्यकालः वश्यात्मा सः पण्डितः उच्यते । पण्डिताः आर्य कर्मणि रज्यन्ते । भूतिकर्माणि कुर्वते । हितं च नाभ्यसूयन्ति । यः आत्मसंमानेन ह्रष्यन्ति । अवमानेन न तप्यते । गाङ्गो ह्रद इव अक्षोभ्यः सः पण्डितः उच्यते । तत्त्वज्ञः, सर्वभूतानां, योगज्ञः सर्वकर्मणाम् , उपायज्ञः मनुष्याणां नरः पण्डितः उच्यते । यः प्रवृत्तवाक् चित्रकथ ऊहवान्, प्रतिभानवान् , आशुग्रन्थस्य वक्ता च सः पण्डितः उच्यते । यस्य श्रुतं प्रज्ञानुगं यस्य प्रज्ञाचैव श्रुतानुगा, असंभिन्नार्यमर्यादः सः पण्डिताख्यां लभेत ।

मूढस्य लक्षणानि (qualities of fool)

अश्रुतश्च समुन्नद्धः, दरिद्रश्च महामनाः, अकर्मणा अर्थां प्रेप्सुः बुधैः मूढः इत्युच्यते । यः स्वमर्थं परित्यज्य परार्थमनुतिष्ठति, मित्रार्थे मिथ्या चरति सः मूढः

उच्यते । यः अकामान् कामयति, कामयमानान् परित्यजेत् , बलवन्तं च द्वेष्टि, तं मूढचेतसमाहुः । यः अमित्रं मित्रं कुरुते, मित्रं द्वेष्टि हिनस्ति च दुष्टं कर्मचारभते तं मूढचेतसमाहुः । यः कृत्यानि संसारयति, सर्वत्र विचिकित्सते, क्षिप्रार्थे चिरं करोति सः मूढः इत्युच्यते । यः पितृभ्यः श्राद्धं न ददाति, दैवतानि न चार्चति, सुहृन्मित्रं न लभते तं मूढचेतसमाहुः । अनाहूतः प्रविशति, अपृष्टः बहुभाषते, अविश्वस्ते विश्वसिति सः नराधमः मूढचेता । यः स्वयं दोषेण वर्तमानः परं क्षिपति, अनीशानः कृध्यति सः मूढतमः नरः । यः आत्मनः बलमज्ञाय धर्मार्थपरिवर्जितम् , नैष्कर्म्यात् अलभ्यमिच्छन् सः मूढबुद्धिः उच्यते । यः अशिष्यं शास्ति, शून्यमुपासते, कदर्यं भजते तं मूढचेतसमाहुः।

पण्डितः (scholar)

यः विद्यामर्थमैश्वर्यमेव महान्तमासाद्यः असमुन्नद्धः विचरति सः पण्डितः उच्यते।

क्रूरः (cruel person)

एकः सम्पन्नमश्नाति वस्ते वासश्च शोभनम् भृत्येभ्यः किमपि न ददाति । तस्मात् क्रूरतरः कोऽपि नास्ति । एकः पापानि कुरुते । महाजनः फलं भुङ्क्ते । भोक्तारः विप्रमुच्यन्ते । कर्तादोषेण लिप्यते । धनुष्मता मुक्तः इषुः एकं हन्यात् न हन्यात् वा । बुद्धिमता उत्सृष्टा बुद्धिः सराजकं हन्यात् । एकया द्वे विनिश्चित्य, त्रीन् चतुर्भिः वशे कुरु । पञ्च जित्वा, षट् विदित्वा, सप्त हित्वा सुखी भव । विषरसः एकं हन्ति । शस्त्रेण एकश्च वध्यते । मन्त्रविप्लवः सराष्ट्रं सप्रजं राजानं हन्ति । एकः स्वादु न भुञ्जीत । एकश्चार्थान् न चिन्तयेत् । एकः न गच्छेदध्वानम्। नैकः सुप्तेषु जागृयात् । एकमेवाद्वितीयं तत् यत् सत्यं पारावारस्य नौरिव स्वर्गस्य सोपानम्। क्षमावतां दोषः एकः एव । द्वितीयः नोपपद्यते । यदेनं क्षमया युक्तमशक्तं मन्यते । सोऽस्य दोषः न मन्तव्यः । क्षमा हि परमं बलम् अशक्तानां गुणः क्षमा । शक्तानां भूषणं क्षमा । लोके वशीकृतिः क्षमा । क्षमया किं न साध्यते ? सर्वं साध्यते । यस्य करे शान्ति खड्गः विद्यते, तर्हि दुर्जनः किं करिष्यति? अतृणे पतितो वह्निः स्वयमेवोपशाम्यति । परम् अक्षमावान् दोषैः आत्मानं योजयेत् । परं श्रेयः एको धर्मः। क्षमैका शान्तिरुत्तमा । विद्यैका परमा तृप्तिः । अहिंसैका सुखावहा ।

पृथिव्यां सागरान्तायां द्वाविमौ पुरुषाधमौ । गृहस्थश्च निरारम्भः । भिक्षुकः सारम्भश्चैव । बिले शयान् सर्प इव भूमिः द्वाविमौ ग्रसते । अविरोद्धारं राजानम् । अप्रवासिनं ब्राह्मणम् । अस्मिन् लोके पुरुषः द्वेकर्मणी कुर्वन् उत्तमो भवति । परुषं न ब्रुवन् , असतो अनर्चयन् च द्वाविमौ परप्रत्ययकारिणौ । स्त्रियः कामितकामिन्यः । जनः पूजित पूजकः । द्वा विमौ कण्टक तीक्ष्णौ शरीरपरिशोषिणौ । यश्च अधनः कामयते, अनीश्वरः कुप्यति । विपरीतेन कर्मणा द्वाविमौ न विराजेते । गृहस्थश्च निरारम्भः, कार्यवांश्चैव भिक्षुकः । स्वर्गस्योपरि तिष्ठतः द्वाविमौ पुरुषौ । क्षमया युक्तः प्रभुः । दरिद्रश्च प्रदानवान् । न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ । अपात्रे प्रतिपत्तिः, पात्रे चाप्रतिपादनम् । अदातारं धनवन्तम् , अतपस्विनं दरिद्रं च दृढां शिलां गले बद्ध्वा द्वावम्भसि निवेष्टव्यौ । योगयुक्तश्च परिव्राट्,रणे चाभिमुखो हतः द्वाविमौ सूर्यमण्डलभेदिनौ परमपुरुषं गच्छन्ति मनुष्याणां त्रयोपायाः श्रूयन्ते कनीया मध्यमः श्रेष्ठः इति वेदविदो विदुः । उत्तममध्यमाधमाः पुरुषाः त्रिविधाः । यथावत्तान् त्रिविधेषु कर्मसु नियोजयेत् । भार्या, दासः, सुतः त्रय एव अधनाः । यस्य यते समधिगच्छन्ति तस्य तद्धनम् परस्वानां हरणं, परदाराभिमर्शनं, सुहृदश्च परित्यागः त्रयः दोषाः क्षयावहाः । आत्मनः नाशनं नरकस्य द्वारमिदं त्रिविधम् । कामः क्रोधः तथा लोभः तस्मात् एतत् त्रयं त्यजेत् । वरप्रदानं, राज्यं, पुत्रजन्म च त्रीणि च एकम्। शत्रोः मोक्षणं तत्समम् । भक्तं भाजमानं तवास्मीति च वादिनं त्रीन् एतान् शरणं प्राप्तान् विषमेऽपि न सन्त्यजेत् । महाबलेन राज्ञा चत्वारि वर्ज्यानि । पण्डितः तानि विद्यात् । अल्पप्रज्ञैः सह मन्त्रं न कुर्यात् । तथैव दीर्घसूत्रैः अभसैः चारणैश्च मन्त्रं न कुर्यात् । श्रियाभिजुष्टस्य गृहस्थ धर्मे वृद्धो ज्ञातिः अवसन्नः कुलीनः सखा दरिद्रः, अनपत्या भगिनी च चत्वारि गृहे वसन्तु ।

साद्यस्कानि (these give immediate result)

देवतानां च सङ्कल्पम् , धीमतामनुभावं , कृतविद्यानां विनयं, पापकर्मणां विनाशं च सद्यः फलानि इति बृहस्पतिः देवेन्द्राय आह ।

चत्वारि कर्माणि (four acts)

मानाग्निहोत्रं, मानमौनं, मानाध्ययनं , मानयज्ञः इति चत्वारि कर्माणि अभयंकराणि अन्यथा कृतानि भयं प्रयच्छन्ति ।

पञ्चाग्नयः (the five fires)

पिता, माता , अग्निः, आत्मा, गुरुश्च पञ्चाग्नयः मनुष्येण प्रयत्नतः परिचर्याः।

पञ्चातिथयः (the five tithis)

देवान् , पितॄन् , मनुष्यान् , भिक्षून् , अतिथीन् च पञ्चमान् पूजयन् लोके यशः प्राप्नोति ।

त्वानुगमिष्यन्ति (these follow you)

मित्राणि , अमित्राणि , मध्यस्थाः उपजीव्यः जीविनः पञ्च भवान् यत्र यत्र गमिष्यसि तत्र त्वानुगमिष्यन्ति ।

प्रज्ञा स्रवति (wisdom slips)

पञ्चेन्द्रियस्य मर्त्यस्य एकमिद्रियं छिद्रं चेत् ततोऽस्य स्रवति प्रज्ञा दृतेः पात्रादिवोदकम् ।

हातव्याः षड्दोषाः (six mistakes that must be avoided)

निद्रा, तन्द्रा, भयं, क्रोधः, आलस्यं, दीर्घसूत्रता इति षड्दोषाः भूतिमिच्छता पुरुषेण हातव्याः ।

जह्यात् षट् (these six must be avoided)

आर्णवे भिन्नां नावमिव, अप्रवक्तारमाचार्यम्, अनधीयानम् ऋत्विजम्, अरक्षितारं राजानम् , अप्रियवादिनीं भार्यां च, ग्रामकामं गोपालं, वनकामं नापितं च षडिमान् पुरुषः जह्यात्।

न हातव्याः षडेव गुणाः (six qualities that one shouldn't leave)

सत्यं, दानम्, अनालस्यम्, अनसूया, क्षमा, धृतिः इति षडेव गुणाः कदाचन पुंसा न हातव्याः।

जीवलोकस्य सुखानि (pleasures of the World)

अर्थागमः, नित्यमरोगिता, प्रिया प्रियवादिनी च भार्या, वश्यश्च पुत्रः, अर्थकरी च विद्या षट् जीवलोकस्य सुखानि ।

विजितेन्द्रियः (the conquerer of the senses)

आत्मनि नित्यानां षडिन्द्रियाणाम् ऐश्वर्यं यः अधिगच्छति सः विजितेन्द्रियः पापैः अनर्थैः न युज्यते ।

षडिमे षट्सु जीवन्ति (because of these six.six are living)

प्रमत्ते चोराः , व्याधितेषु चिकित्सकाः, कामयानेषु प्रमदाः, यजमानेषु याजकाः, विवदमानेषु राजा, मूर्खेषु पण्डिताः, नित्यं षडिमे षट्सु जीवन्ति । सप्तमो नोपलभ्यते।

षडिमानि विनश्यन्ति (these six perish)

मुहूर्त्तमनवेक्षणात् गावः , सेवा, कृषिः, भार्या, विद्या, वृषलसंगतिः षडिमानि विनश्यन्ति।

षडेते ह्यवमन्यन्ते (these six are not respected taken seriously)

शिक्षिताः शिष्याः आचार्यं,कृतदाराश्च मातरं, विगतकामास्तु नारीं, कृतार्थाश्च प्रयोजकं, निस्तीर्णकान्तारा नावं, आतुराश्च चिकित्सकं नित्यं षडेते हि अवमन्यन्ते ।

जीवलोकस्य सुखानि (these give happiners to man)

आरोग्यम्, आनृण्यम्, अविप्रवासः, सद्भिमनुष्यैः सह संप्रयोगः, स्वप्रत्यया वृत्तिः, अभीतवासः, षट् जीवलोकस्य सुखानि भवन्ति ।

षडेते नित्यदुःखिता (these six cause unhappiness always)

ईर्षुः, घृणी, न सन्तुष्टः, क्रोधन, नित्यशङ्कितः, परभाग्योपजीवी च षडेते नित्यदुःखिताः ।

हातव्याः सप्तदोषाः (those with these seven mistakes perish)

व्यसनोदयाः सप्तदोषाः सदा हातव्याः। प्रायशः कृतमूला अपि विनश्यन्ति स्त्री, अक्षा, मृगया, पानं, वाक्पारुष्यं, महत् दण्डपारुष्यम्, अर्थदूषणमिति सप्तैते ।

नरस्य विनशिष्यत (eight omens that appear before one's death)

अष्टौ पूर्वनिमित्तानि - प्रथमं ब्राह्मणान् द्वेष्टि, ब्राह्मणैश्च विरुद्ध्यते, ब्राह्मणस्वानि चादत्ते , ब्राह्मणांश्च जिघांसति, ब्राह्मणानां निन्दया रमते , प्रशंसां नाभिनन्दति, कृत्येषु नैनान् स्मरति, याचितश्चाभ्यसूयति, एतान् दोषान् प्राज्ञः नरः बुद्ध्येत् । बुद्ध्या विसर्जयेत्।

हर्षस्य नवनीतानि अष्टौ (the eight are the essence of happiness)

सखिभिः समागमः महांश्चैव धनागमः, पुत्रेण च परिष्वङ्गः, मैथुने सन्निपातः, समरे प्रियालापः, स्वयूथ्येषु समुन्नतिः, अभिप्रेतस्य लाभः जनसंसदि पूजा च आष्टाविमानि हर्षस्य नवनीतानि वर्तमानानि दृश्यन्ते । तान्येव स्वसुखान्यपि ।

पुरुषं दीपयन्ति (these enhance the personality of a man)

प्रज्ञा, कौल्यं, दमः, श्रुतं, पराक्रमः, मितभाषिता, यथाशक्तिदानं, कृतज्ञता च अष्टौ गुणाः पुरुषं दीपयन्ति ।

परः कविः (the poet who surpasses all)

नवद्वारात्मकमिदं देहम् । त्रिस्थूणं, पञ्चसाक्षिकं, क्षेत्रज्ञाधिष्ठितं, तत्त्वमिदं यः वेद स परः कविः ।

धर्मं न जानन्ति दश (these ten donot know dharma)

मत्तः, प्रमत्तः, उन्मत्तः, शान्तः, कृद्धः, बुभुक्षितः, त्वरमाणः, लुब्धः, भीतः, कामी च ते दश धर्मं न जानन्ति । तस्मादेतेषु न प्रसज्जेत पण्डितः ।

कुरुते प्रमाणम् (accepted as instrument of knowledge)

यः काममन्यू प्रजहाति, धनं च पात्रे प्रतिष्ठापयते, विशेषवित् श्रुतवान् क्षिप्रकारी तं सर्वलोकः प्रमाणं कुरुते ।

श्रीः जुषते समग्रा (attains all types of wealth)

यः मनुष्यान् विश्वासयितुं जानाति, विज्ञातदोषेषु दण्डं दधाति, मात्रां तथा क्षमां च जानाति, तं तादृशं समग्रा श्रीः जुषते ।

धीरः (a braveman a learned man)

यः सुदुर्बलं नावजानाति, कञ्चिद्युक्तो बुद्धिपूर्वं रिपुं सेवते, बलस्थैः विग्रहं न रोचयते , काले च विक्रमते सः धीरः इत्युच्यते । कदाचिदपि आपदं प्राप्य न व्यथते। अप्रमत्तः उद्योगमिच्छति । दुःखं च काले सहते महात्मा, तथा धुरन्धरः तस्य जिताः सपत्नाः ।

सुखी सदैव (he is always happy)

अनर्थकं विप्रवासं गृहेभ्यः, पापैः सन्धिं, परदाराभिमर्शं, दम्भं, स्तैन्यं, पैशुनं, मद्यपानं, च यः न सेवते सः सदा सुखी एव।

प्रशंसान् लभते (he gets praises)

न संरंभेणारभते त्रिवर्गमाकारितः तत्त्वमेव शंसति, मित्रार्थे विवादं न रोचयते, नापूजितश्चापि अमूढः कुप्यति, न योऽभ्यसूयत्यनुकम्पते च, दुर्बलः प्रातिभाव्यं न करोति, नात्याह किञ्चित् विवादं क्षमते तादृक् सर्वत्र प्रशंसान् लभते ।

सदा तं प्रियं कुरुते (he makes him lovable all the time)

यः जातु वेषं नोद्धतं कुरुते, पौरुषेणापि अन्यान् न विकत्थते, मूर्छितः न किञ्चित् कटुकान्याह तं जनः सदा प्रियं कुरुते ।

आर्यशीलः (a noble man)

प्रशान्तं वैरं न उद्दीपयति, न दर्पमारोहति, नास्तमेति, दुर्गतोऽस्मीति यः

अकार्यं न करोति तमार्याः आर्यशीलमाहुः । यः स्वे सुखे प्रहर्षं न कुरुते अन्यस्य दुःखे न प्रहृष्टः भवति, दत्वा पश्चात् तापं न कुरुते सः सत्पुरुषः आर्यशीलः कथ्यते। देशाचारान् समयान् जातिधर्मान् यः बुभूषते सः परावरज्ञः । यत्र तत्राभिमतः सः सदैव महाजनः स्यात् । आधिपत्यं करोति ।

बुद्धिमान् (the intelligents man)

दम्भं, मोहं, मत्सरं, पापकृत्यं, राजद्विष्टं, पैशुनं, पूगवैरं , मत्तोन्मत्तैः द र्जनस्यापि वादं यः वर्जयेत् सः प्रज्ञावान् प्रधानः ।

देवताः राधयन्ति (the dities bestow the desires)

दानं, होमं, दैवतं, मङ्गलानि, प्रायश्चित्तान्, विधिवल्लोकवादान् एतान् नैत्यकानि यः कुरुते तस्योत्थानं देवताः राधयन्ति ।

सुनीताः नयाः (the morals will become fulfiled)

यः समैः विवाहं कुरुते न हीनैः, समैः सख्यं व्यवहारं कथां च कुरुते, गुणैः विशिष्टांश्च पुरो दधाति तस्य विपश्चितः नयाः सुनीताः भवन्ति ।

प्रजाहत्यनर्थाः (miseries donot come near)

आश्रितेभ्यः संविभज्य यः मितं भुङ्क्ते, अमितं कर्म कृत्वा मितं स्वपिति, याचितः अमित्रेष्वपि संददाति, तमात्मवन्तमनर्थाः प्रजहति ।

न च्यवते कश्चिदर्थः (good conduct doesnot ship away)

यस्य चिकीर्षितं विप्रकृतं च कर्म अन्ये जनाः न कञ्चित् जानन्ति, मन्त्रे गुप्ते सम्यगनुष्ठिते च अस्याल्पोपि न च्यवते कश्चिदर्थः ।

जात्यमहामणिः (the best of the clean)

यः सर्वभूतप्रशमे निविष्टः, सत्यः मृदुः, मानकृत् , शुद्धभावः, अतीव ज्ञायते सः ज्ञाति मध्ये महामणिः जात्य इव प्रसन्नः भवति ।

सूर्य इवावभासते (shines like the sun)

यः आत्मना अपत्रपते भृशं नरः सः सर्वलोकस्य गुरुः भवति । अनन्ततेजाः, सुमनाः, समाहितः, सः तेजसा सूर्य इव अवभासते ।

तस्य ब्रूयात् (should instruct such person)

शुभं वा यदि पापं वा, द्वेष्यं वा यदि प्रियं वा, यस्य पराभवं नेच्छेत् तस्य तत् ब्रूयात् । मिथ्योपेतानि तेषु मनः मास्म कृथाः ।

न ग्लपयेन्मनः (one shouldn't demoralize oneself)

योगविहितं कर्म यत्तु न सिध्यति तथापि उपाययुक्तं मेधावी न तत्र मनः ग्लपयेत्।

न वेगेन समाचरेत् (one shouldn't perform an action in haste)

सानुबन्धेषु कर्मसु अनुबन्धानवेक्षत । संप्रधार्य च कुर्वीत । न वेगेन समाचरेत्। कर्मणां विपाकमनुबन्धं च सम्प्रेक्ष्य धीरः आत्मनः उत्थानं कुर्वीत वा न वा । स्थाने वृद्धौ तथा क्षये कोशे, जनप्रदे, दण्डे च यः प्रमाणं न जानाति सः राज्ये नावतिष्ठते। यस्त्वेतानि प्रमाणानि यथोक्तानि अनुपश्यति, धर्मार्थयोः ज्ञाने युक्तः सः राज्यमधिगच्छति।

श्रियं हि अविनयो हन्ति (disobdience chases away wealth)

राज्यं प्राप्तमित्येव असाम्प्रतं न वर्तितव्यम् । जरा उत्तमं रूपमिवाविनयः श्रियं हन्ति । भक्ष्योत्तमप्रतिच्छन्नं मत्स्यो बडिशमायसम् । लोभानुपाती ग्रसते नानुबन्धमवेक्षते।

आद्यं भूतिमिच्छता (one derious happiness should listen)

ग्रसितुं ग्रस्यं च यच्छक्यं, यत् ग्रस्तं परिणमेत्, परिणामे च हितं यत् तदाद्यं भूतिमिच्छता । वनस्पतेः अपक्वानि फलानि यः प्रचिनोति सः तेभ्यः रसं नाप्नोति । अस्य बीजं च विनश्यति । यः कलं परिणतं पक्वं फलमुपादत्ते सः फलाद्रसं लभते। बीजात् पुनः फलं च लभते।

अविहिंसया आदद्यात् (should acquire without hurting)

यथा षट्पदः पुष्पाणि रक्षन् मधुरसमादत्ते तद्वत् मनुष्येभ्यः अविहिंसया अर्थान् आदद्यात् । मालाकार इव आरामे पुष्पं पुष्पं विचिन्वीत । मूलच्छेदं न कारयेत् । न यथाङ्गारकारकः ।

संचिन्त्य कुर्यात् (should act after proper thought)

इदं कृत्वा किन्नु मे स्यात् ? अकुर्वतः किन्नु मे स्यात् । इति संचिन्त्य कुर्यात् वा कुर्यात् , न कुर्याद्वा न कुर्यात् । अफलदायकानि कार्याणि अनारम्भणीयानि । कृतः पुरुषकारः निरर्थक एव ।

न तं भर्तारमिच्छन्ति (no one likes him as a king)

यस्य प्रसादः निष्फलः क्रोधश्चापि निरर्थकः तं षण्डं पतिमिव स्त्रियः न भर्तारमिच्छन्ति ।

क्षिप्रमारभते कर्तुम् (performs the work immeditely)

लघुमूलान् महाफलान् प्राज्ञः नरः कर्तुं क्षिप्रमारभते । तादृशान् न विघ्नयति।

तूष्णीकमनुरज्यन्ति (simply get attached)

यः सर्वं चक्षुषा अनुपिबन्निव ऋजु पश्यति तं प्रजाः आसीनमपि तूष्णीकमनुरज्यन्ति।

न तु शीर्येत कर्हिचित् (never gets destoryed)

सुपुष्पितः स्यादफलः फलितः स्याद्दुरारुहः, अपक्वः पक्वसंकाशः तु शीर्येत कर्हिचित् ।

लोकोऽनुप्रसीदति (the world gets pleased)

चक्षुषा मनसा वाचा कर्मणा च चतुर्विधं यः लोकं प्रसादयति तं लोकः अनुप्रसीदति ।

स परिहीयते (he gets venquished)

यस्मात् त्रस्यन्ति भूतानि मृगव्याधात् मृगा इव सागरान्तामपि महीं लब्ध्वा सः परिहीयते ।

भ्रंशयत्यनये स्थितः

पित्रुपैतामहं राज्यं प्राप्तवान् स्वेन कर्मणा वायुरभ्रमिवासाद्य भ्रंशयत्यनये स्थितः।

वर्धते वसुधा (the earth gets expanded)

सद्भिश्चारितमादितः धर्ममाचरतः राज्ञः वसुसम्पूर्णा भूतिवर्धनी वसुधा वर्धते।

प्रतिसंवेष्टते भूमिः (the earth gets contrated)

धर्मं सन्त्यजतः अधर्मं चानुतिष्ठतः भूमिः प्रतिसंवेष्टते यथाग्नौ चर्माहितम् ।

कर्तव्यः स्वराष्ट्रपालने (protecting one's country is one's duty)

परराष्ट्रविमर्दने य एव यत्नः क्रियते स एव यत्नः स्वराष्ट्र परिपालने कर्तव्यः।

धर्ममूलाश्रीः (wealth acquired by the rightous way)

धर्मेण राज्यं विन्देत । धर्मेण परिपालयेत् । धर्ममूलां श्रियं प्राप्य न जहाति न हीयते ।

सर्वतः सारमादद्यात् (essence should be collected from every source)

उन्मत्तात् प्रलपतः बालात् परिजल्पतः अश्मभ्यः काञ्चनमिव सर्वतः सारमादद्यात्।

धीर आसीत (one should be brave)

शिलाहारी शिलं यथा ततस्ततः सुव्याहृतानि सूक्तानि सुकृतानि संचिन्वन् धीर आसीत ।

पश्यन्ति (they observe ; they're observing / seeing)

गन्धेन गावः पश्यन्ति । वेदैः पश्यन्ति ब्राह्मणाः । चारैः पश्यन्ति राजानः । इतरे जनाः चक्षुर्भ्यां पश्यन्ति।

नैव वितुदन्ति (they never cause pain to others)

या गौः दुर्दुहा भवति सा गौः भूयांसं क्लेशं लभते । या गौः सुदुहा तां नैव वितुदन्ति ।

बान्धवाः (relatives)

पशूनां बन्धु पर्जन्यः । राज्ञाः बान्धवाः मन्त्रिणः । स्त्रीणां बान्धवाः पतयः । ब्राह्मणाः वेदबान्धवाः ।

रक्ष्यते (it is being protected)

सत्येन रक्ष्यते धर्मः । विद्या योगेन रक्ष्यते। मृजया रक्ष्यते रूपम् । वृत्तेन रक्ष्यते कुलम् । मानेन रक्ष्यते धान्यम् । अश्वान् रक्षति अनुक्रमः । अभीक्ष्णदर्शनं गाः रक्षति। स्त्रियो रक्ष्याः कुचे लतः ।

वृत्तमेव विशिष्यते (it is being protected)

न कुलं वृत्तहीनस्य प्रमाणम् अन्त्यष्वपि जातानां वृत्तमेव विशिष्यते ।

ईर्षुः व्याधिः अनन्तकः (the disease of jealously knows no bounds)

परवित्तेषु, रूपे, वीर्ये, कुलान्वये, सुखसौभाग्यसत्कारे यः ईर्षुः तस्य व्याधिः अनन्तकः ।

सतां दमाः

विद्यामदः, धनमदः, अभिजनो मदः, एते एव सतां दमाः ।

गतिः (movement)

आत्मवतां गतिः सत्पुरुषाः । सतां गतिः सज्जनाः एव । असतां च गतिः सज्जनाः । दुर्जनाः न कदापि गतिः सज्जनानाम् ।

सर्वं शीलवता जितम् (person of character wins)

जिता सभा वस्त्रवता । मिष्टाशा गोमता जिता अध्वाजितो यानवता । सर्वं शीलवता जितम् ।

शीलं प्रधानम् (character is important)

पुरुषस्य प्रधानं शीलम् । यस्यास्मिन् लोके तत् प्रणस्यति, तस्य जीविते नार्थः न धनेन न बन्धुभिश्च फलम् ।

भोजनम् (food)

आढ्यानां मांसपरमं भोजनम् । मध्यानां गोरसोत्तरं भोजनम् । दरिद्राणां तैलोत्तरं भोजनम् । दरिद्राः सदा सम्पन्नतरमेवान्नं सदा भुञ्जते । क्षुत् स्वादुतां जनयति । सा च सम्पन्नेषु नामाद्येषु सुदुर्लभा । प्रायेण श्रीमतां लोके भोक्तुं शक्तिः न विद्यते । दरिद्राणां काष्ठानि अपि जीर्यन्ति ।

भयम् (fear)

अन्त्यानाम् अवृत्तिः भयम् । मध्यानां मरणाद् भयम् । उत्तमानां तु मर्त्यानामवमानात् परं भयम् ।

मदः (arrogance)

पानमदादयः ऐश्वर्यमदपापिष्ठा मदाः । कुत इत्युक्ते ऐश्वर्यमदमत्तः नापतित्वा विबुध्यते ।

लोकः तापितः (the world is being burnt)

शब्दस्पर्शरूपरसगन्धविषयेषु इन्द्रियार्थेषु वर्तमानैः अनिग्रहैः इन्द्रियैः अयं लोकः ग्रहैः नक्षत्राणि इव तापितः।

वर्धन्ते आपदः (difficulties increase)

सहजेनात्मकर्षिणा पञ्चेन्द्रियवर्गेण यो जितः तस्य शुक्लपक्षे चन्द्र इव आपदः वर्धन्ते ।

अवशः परिहीयते (the uncontrolled gets destoryed)

यः आत्मानमविजित्य अमात्यान् विजिगीषते, अजितामात्यः अमित्रान् विजिगीषते सः अवशः परिहीयते।

न मोघम् (it is not waste)

प्रथमम् आत्मानमेव द्वेष्यरूपेण योजयेत् ततः अमात्यान् अमित्रांश्च विजिगीषते मोघम् न भवति ।

श्रीः निषेवते (wealth adheres to this)

वश्येन्द्रियं, यतात्मानं, विकारिषु धृतदण्डं परीक्ष्यकारिणं धीरम् अत्यन्तं श्रीः निषेवते ।

याति रथीव धीरः (the intelligent moves like a chario)

पुरुषस्य शरीरं रथः । आत्मा नियन्तेन्द्रियाणि च अस्य अश्वाः । तैः अप्रमत्तः कुशली सदश्वैः दान्तैः सुखं याति रथीव धीरः ।

अदान्ताः हयाः (the exuberant horses)

अनिगृहीतानि एतानि इन्द्रियाणि अविधेयाः हयाः अदान्ताः पथि कुसारथिमिव व्यापादयितुमप्यलम् ।

दुःखं मन्यते सुखम् (mistaking unhappiness for happiness)

अर्थतः अनर्थम्, अनर्थतः अर्थं च पश्यन् अजितैः इन्द्रियैः बालः सुदुःखं मन्यते सुखम्।

क्षिप्रं परिहीयते (loses immediately)

यः इन्द्रियवशानुगः धर्मार्थौ परित्यज्य, सः श्रीप्राणधनदारेभ्यः क्षिप्रं परिहीयते।

ऐश्वर्यात् भ्रश्यते (falls off from wealth)

यः अर्थानामीश्वरः इन्द्रियाणामनीश्वरः स्यात् सः इन्द्रियाणामनैश्वर्यात् ऐश्वर्यात् भ्रश्यते ।

आत्मानमन्विच्छेत् (one should strive for atma)

मनोबुद्धीन्द्रियैः यतैः आत्मना आत्मानमन्विच्छेत् । आत्माह्येव आत्मनः बन्धुः । आत्मैव आत्मनः रिपुः । ये नैवात्मा आत्मना जितः तस्यात्मनः बन्धुः आत्मा स एव नियतो बन्धुः । स एव नियतो रिपुः ।

प्रज्ञानं विलुम्पतः (these destory intelligence)

उन्नतौ मत्स्यौ जालेन क्षुद्राक्षिणेव कामक्रोधौ प्रज्ञानं विलुम्पतः ।

सुखमेधते (he develops happily)

इह धर्मार्थौ समवेक्ष्य संभारान् यो अधिगच्छति सः सम्भृतसम्भारः सततं सुखमेधते ।

रिपवः अभिभवन्ति (the enemies destroy)

यः मनोमयान् पञ्चाभ्यन्तरान् शत्रून् अविजित्य, अन्यान् रिपून् जिगीषति तं रिपवः नाशयन्ति ।

राज्यविभ्रमाः (those who lost controp over their)

ऐश्वर्यविलासैः स्वकर्मभिः इन्द्रियाणामनीशत्वात् महात्मानः राजानः राज्यविभ्रमैः दृश्यन्ते ।

पापैः सह सन्धिं न कुर्यात् (friendship shouldn't be done with the sinful)

अपापामसंत्यागात् पापकृतास्तुल्यो दण्डः मिश्रभावात् स्पृशते । शुष्केण मिश्रभावात् आर्द्रं दह्यते। तस्मात् पापैः सह सन्धिं न कुर्यात् ।

आपद्ग्रसते (difficulties swallow)

पञ्चप्रयोजनान् पञ्चशत्रून् निजानुत्पतत यः मोहात् न निगृण्हाति तं नरम् आपद्ग्रसते ।

न भवन्ति दुरात्मनाम् (it is not attained by the wicked)

अनसूया, आर्जवं, शौचं, सन्तोषः, प्रियवादिता, दमः, सत्यम्, अनायासः, दुरात्मनां न भवन्ति ।

नैतान्यन्त्येषु (these donot exist in the rogues)

आत्मज्ञानम्, अनायासः, तितिक्षा, धर्मनित्यता, वाक्चैव गुप्ता, दानं च नैतान्यन्त्येषु।

बुधः अबुधः (the intellectual and the fool)

आक्रोशपरिवादाभ्यां अबुधाः जनान् विहिंसन्ति । वक्ता पापमुपादत्ते । क्षममाणः बुधः विमुच्यते ।

बलम् (strength)

असाधूनां बलं हिंसा एव । राज्ञां बलं दण्डविधिः एव । स्त्रीणां बलं शुश्रूषा एव। गुणवतां बलं क्षमा एव ।

सुभाषिता (the well-said word)

वाक्संयमः सुदुष्करतमो मतः । अर्थवच्च विचित्रं च बहुभाषितुं न शक्यम् । सुभाषिता वाक् विविधं कल्याणम् अभ्यावहति । दुर्भाषिता सैव अनर्थाय उपपद्यते ।

न संरोहति वाक् क्षतम् (that which is spoiled by wrong words cannot grow again)

परशुना सायकैः हतं वनं विद्धं रोहते । वाचा दुरुक्तं बीभत्सं वाक् क्षतं न संरोहति ।

नावसृजेत् परेभ्यः (shouldnot employ on others)

वदनात् वाक्सायका निष्पतन्ति । तैः आहतः रात्र्यहानि शोचति । ते परस्य मर्मसु पतन्ति । पण्डितः तान् परेभ्यः नावसृजेत् । देवाः यस्मै पुरुषाय पराभवं प्रयच्छन्ति तस्य बुद्धिमपकर्षन्ति । सः अवाचीनानि पश्यति ।

हृदयात् नापसर्पति (doesnot get away from the heart)

बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते अनयोः नयसङ्काशः हृदयात् नापसर्पति।

आर्जवम् (straight forwardness)

सर्वतीर्थेषु स्नानं वा सर्वभूतेषु चार्जवम् उभेत्वेते समे स्याताम् । आर्जवं विशिष्यते । आर्जवेन कीर्तिः प्राप्यते । प्रेत्य स्वर्गमवाप्यते । यावत् कीर्तिः लोके गीयते तावत् स्वर्गलोके महीयते ।

दुर्विवक्ता (the teller of the wrong)

अधिविन्ना स्त्री, अक्षपराजितः, भाराभितप्ताङ्गः, यां रात्रिं आप्नुवन्ति, दुर्विवक्तापि तामेव रात्रिं वसेत् ।

अनृतसाक्षी (the witness who lies)

यः नगरे प्रतिरुद्धः सन् बहिर्द्वारे बुभुक्षितः भूयसः अमित्रान् पश्येत्, सः कीदृशीमवस्थामाप्नोति, अनृतसाक्षी अपि तादृशीमवस्थामाप्नोति ।

असत्यफलम् (the witness who lies)

पश्वनृते पञ्च हन्ति । गवानृते दश हन्ति । अश्वानृते शतं हन्ति । पुरुषानृते सहस्रं हन्ति । हिरण्यार्थे अनृतं वदन् जातानजातांश्च हन्ति । भूम्यनृते सर्वं हन्ति । अतः भूम्यनृतं न वक्तव्यम् ।

बुद्ध्या संविभजन्ति (separates them with their intellect)

देवाः पशुपालवत् दण्डमादाय न रक्षन्ति । यं रक्षितुमिच्छन्ति तं बुद्ध्या संविभजन्ति।

मनः कल्याणे (mind focussed on the auspicious)

यथा यथा हि पुरुषः कल्याणे मनः कुरुते, तथा तथा अस्य सर्वार्थाः सिद्ध्यन्ति नात्र संशयः ।

वर्ज्यानि (mind focussed on the auspicious)

मद्यपानं, कलहं, पूगवैरं, भार्यापत्योरन्तरं ज्ञातिभेदं, राजद्विष्टं, स्त्रीपुंसयोर्विवादं, प्रदुष्टः पन्थाश्च वर्ज्यान्याहुः ।

सप्तसाक्षिणः नाधिकुर्वीत (these seven shouldnot be used as witness)

सामुद्रिकं, चोरपूर्वं, वणिजं, शलाकधूर्तं, चिकित्सकम्, अरिं, मित्रं, कुशीलवं, च नैतान् सप्त साक्ष्येत्वधिकुर्वीत ।

अभयङ्कराणि (those that protect from fear)

मानाग्निहोत्रं, मानमौनं, मानेनाधीतं, मानयज्ञः एतानि चत्वारि अभयङ्कराणि। अयथाकृतानि भयं प्रयच्छन्ति ।

ब्रह्महत्यापातकसमाः (these are equal to the sin of brahmahatya)

अगारदाही, गरदः, कुण्डाशी, सोमविक्रयी, पर्वकारः, सूची, मित्रधृक्, पारदारिकः, भ्रूणहा, गुरुतल्पी, पानपो द्विजः, अतितीक्ष्णः, काकः, नास्तिकः, वेदनिन्दकः, स्रुवप्रग्रहणः, व्रात्यः, कीनाशः, आत्मवानपि रक्षेत्यक्तश्च यो हिंस्यात् ते सर्वेऽपि ब्रह्महभिः समाः।

ज्ञायन्ते (these are being known)

तृणोल्कया जातरूपं, वृत्तेन भद्रः, व्यवहारेण साधुः, भयेषु शूरः, अर्थकृच्छ्रेषु धीरः, कृच्छेषु आपत्सु सुहृदः चारयश्च ज्ञायन्ते ।

हरति (these are being known)

जरा रूपं हरति, आशा धैर्यं हरति, मृत्युः प्राणान् हरति, धर्मचर्यामसूया हरति, क्रोधः श्रियं हरति, अनार्यसेवा शीलं हरति, कामः ह्रियं हरति, अभिमानः सर्वं हरति ।

श्रीः (wealth)

मङ्गलात् प्रभवति श्रीः । प्रागल्भ्यात् सम्प्रवर्धते, दाक्षात्तु कुरुते मूलं, संयमात् प्रतितिष्ठति ।

पुरुषं दीपयन्ति (these highlight a person)

प्रज्ञा, कौल्यं, दमः, श्रुतं, पराक्रमः, अबहुभाषिता, यथाशक्ति दानं, कृतज्ञता च अष्टौ गुणाः पुरुषं दीपयन्ति। एतान् गुणान् एको गुणः प्रसह्य संश्रयते । मनुष्यं राजा यदा सत्कुरुते, सर्वान् गुणान् एषः गुणः विभाति ।

सन्तः चत्वारि अनुयान्ति (the noble persons acquire these four)

अष्टाविमानि मनुष्यलोके स्वर्गस्य लोकस्य निदर्शनानि। चत्वारि एषामन्ववेतानि, सद्भिः चत्वारि च एषामनुयान्ति सन्तः । यज्ञः, दानम्, अध्ययनं, तपश्च चत्वारि एतानि अन्ववेतानि सद्भिः । दमः, सत्यम्, आर्जवम्, आनृशंस्यं चत्वारि एतानि अनुयान्ति सन्तः।

धर्मस्याष्टविधः (eight types of dharms)

इज्या, अध्ययनं, दानं, तपः, सत्यं, क्षमा, घृणा, अलोभ इति मार्गोऽयं धर्मस्य अष्टविधः स्मृतः । तत्र पूर्वचतुर्वर्गः दम्भार्थमपि सेव्यते । उत्तरश्च चतुर्वर्गः महात्मसु तिष्ठति । अमहात्मसु न तिष्ठति ।

स्वर्गयोनयः (the causes to attain swarga)

यत्र वृद्धाः न सन्ति, सा सभा न भवति । ये धर्मे न वदन्ति ते वृद्धाः न भवन्ति। यत्र सत्यं नास्ति नासौ धर्मः । यत् छलेनाभ्युपेतं तत् न सत्यं भवति । सत्यं, रूपं, श्रुतं, विद्या, कौल्यं, शीलं, बलं, धनं, शौर्यं, चित्रभाष्यं च दशमे स्वर्गयोनयः।

पापं - पुण्यम् (sin and merit religious)

पापं कुर्वन् पापकीर्तिः पापमेव फलमश्नुते । पुण्यं कुर्वन् पुण्यकीर्तिः अत्यन्तं पुण्यमश्नुते । तस्मात् शंसितव्रतः पुरुषः पापं न कुर्यात् । पुनः पुनः पापं क्रियमाणं प्रज्ञां नाशयति । नष्टप्रज्ञः नरः पापमेव नित्यमारभते । पुण्यं प्रज्ञां वर्धयति । पुनः पुनः क्रियमाणं पुण्यं वृद्धप्रज्ञः नरः नित्यं पुण्यमेवारभते । पुण्यं कुर्वन् पुण्यकीर्तिः पुण्यं स्थानं गच्छतिस्म । तस्मात् सुसमाहितः पुरुषः पुण्यं निषेवेत । असूयकः, दन्दशूकः, निष्ठुरः, वैरकृच्छठः, न चिरात् पापमाचरन् स कृच्छ्रं महदाप्नोति । अनसूयुः कृतप्रज्ञः सदा शोभनान्याचरन् महत् सुखमाप्नोति । सर्वत्र च विरोचते ।

पण्डितः (scholar)

यः प्राज्ञेभ्यः प्रज्ञामेवावगमयति सः पण्डितः । प्रज्ञः धर्मार्थौ अवाप्य, सुखमेधितुं शक्नोति । येन रात्रौ सुखं वसेत् तत् दिवसेनैव कुर्यात् । येन वर्षाः सुखं वसेत् तत् अष्टमासेन कुर्यात् । येन वृद्धः सुखं वसेत् पूर्वे वयसि तत् कुर्यात् । येन प्रेत्य सुखं वसेत् यावज्जीवेन तत्कुर्यात् । स एव पण्डितः ।

प्रशंसन्ति (being praised)

जीर्णम् अन्नं, गतयौवनां भार्यां, विजितसंग्रामं शूरं, गतपारं तपस्विनं प्रशंसन्ति।

अधर्मधनम् (wealth wrongly acquired)

अधर्मलब्धेन धनेन यच्छिद्रमपि धीयते, तत् असंवृतं भवति । ततः अन्यत् अवदीयते ।

शास्ता (one who commands / order)

आत्मवतां शास्ता गुरुः । दुरात्मनां शास्ता राजा । प्रच्छन्नपापानां शास्ता वैवस्वतो यमः।

नाधिगन्तव्यम् (not possible to know)

ऋषीणां च नदीनां च कुलानां च महात्मनां च स्त्रीणां दुश्चरितस्य च प्रभवः नाधिगन्तव्यः।

महीपालकः (king)

द्विजातिपूजाभिरतः, दाता, ज्ञातिषु चार्जवी शीलभाक् क्षत्रियः महीं चिरं पालयते।

सुवर्णपुष्पाणि चिन्वन्ति (they plunk golden flowers)

शूरः, कृतविद्यः, सेवितुं जानाति यः स च पुरुषास्त्रयः पृथिव्याः सुवर्णपुष्पाणि चिन्वन्ति ।

श्रेष्ठानि कर्माणि (noble acts)

नरैः करणीयानि कर्माणि बुद्धिश्रेष्ठानि, बाहुमध्यानि, जङ्घाजघन्यानि, भारप्रत्यवराणि च नीचानि । धृतिः, श्रमः, सत्यधर्मानुवृत्तिः, हृदयस्य सर्वं ग्रन्थिं विनीय प्रियप्रिये चात्मसमं नयीत ।

निन्दाफलम् (result of censure)

आकृश्यमानः नाक्रोशेत् । तितिक्षतः मन्युः एव आक्रोष्टारं निर्दहति । सकृतं चास्य विन्दति । परस्य नाक्रोशी स्यात्, नावमानी च । न मित्रद्रोही, न नीचोपसेवी, न चाभिमानी, न च हीनवृत्तः । ऋक्षां वाचं रुषतीं वर्जयीत ।

रूक्षावाचः निर्दहन्ति (harsh words burn)

रूक्षावाचः मर्माण्यस्थीनि हृदयं तथासून् पुंसां निर्दहन्ति । तस्मात् धर्मारामः नित्यशः रूक्षरूपां वाचमुषतीं वर्जयीत ।

अलक्ष्मीकतमः (pauper)

अरुंतदं, परुषं रूक्षवाचं, वाक्कणकैः मनुष्यान् वितुदन्तं जनानामलक्ष्मीकतमं विद्यात् । सः मुखे निबद्धां निर्ऋतिं वहति ।

देवाः स्पृहयन्ति (the gods wait for him)

अतिवादं न प्रवदेत्, न वादयेत्, यो अनाहतः प्रतिहन्यात् न घातयेत्, पातकं हन्तुं यो नेच्छति तस्मै आगताय देवाः स्पृहयन्ति ।

अव्याहृतं श्रेयः (silence is golden)

व्याहृतात् श्रेयः अव्याहृतम् । व्याहृतं सत्यं वदेत् तत् द्वितीयम् । व्याहृतं प्रियं वदेत् तत् तृतीयम् । धर्म्यं व्याहृतं वदेत् तत् चतुर्थम् ।

यादृगिच्छेत् तादृग् भवति (what one wishes, so it happens)

पुरुषः याहशैः संनिविशते यादृशांश्चोपसेवते, यादृगिच्छेत् भवितुं तादृग्भवति। यतो यतो निवर्तते ततस्ततो विमुच्यते । सर्वतः निवर्तनात् अण्वपि दुःखं न वेत्ति ।

समस्वभावः (equanimity)

निन्दाप्रशंसासु समस्वभावः न शोचते, नैव हृष्यति, न जीयते, नानुजिगीषते अन्यान्, न वैरकृत्, न प्रतिघातकश्च ।

उत्तमपुरुषः (the noble man)

यः सर्वस्य भावमिच्छति, अभावे मनः न कुरुते, सत्यवादी, मृदुः, दान्तः सः उत्तमपुरुषः ।

मध्यमपुरुषः (man of mediocre character)

अनर्थकं न सान्त्वयति, प्रतिज्ञाय ददाति, परस्य रन्ध्रं जानाति यः सः मध्यमपुरुषः।

अधमपुंसः (man of mean character)

यः अभिशस्तः, उपहतः, कृतघ्नः, मन्युवशात् नानुवर्तते, न कस्यचिन्मित्रं, दुरात्माकलाश्च सः अधमः पुंसः । सः आत्मशंकितः परेभ्यः कल्याणं न श्रद्धधाति । मित्राणि निराकरोति अधमपुरुषः ।

न सेवेत अधमान् (one shouldn't serve a man of low character)

उत्तमानेव सेवेत । प्राप्ते काले मध्यमान् सेवेत । यः आत्मनः भूतिमिच्छति सः अधमान् न सेवेत ।

असद्बलम् (bad strength)

मानवः असद्बलेन नित्योत्थानात् प्रज्ञया पौरुषेण वित्तमाप्नोति । सम्यक् प्रशंसां न लभते महाकुलानां वृत्तं नाप्नोति।

महाकुलानि (belonging to noble families)

तपः, दमः, ब्रह्मवित्तं, वितानाः नाम यज्ञक्रियाः, पुण्याः विवाहाः, सततान्नदानं, सम्यग्वृत्ताः एते सप्तगुणाः येषु वसन्ति तानि महाकुलानि । येषां वृत्तं न व्यथते , योनिः न व्यथते , चित्तप्रसादेन धर्मं चरन्ति, ये कुले विशिष्टां कीर्तिमिच्छन्ति, त्यक्तानृताः तानि महाकुलानि ।

कुलान्याकुलतां यान्ति (families are decaying)

अनिज्यया , कुविवाहैः, वेदस्योत्सादनेन, धर्मस्यातिक्रमेण च कुलानि अकुलतां यान्ति । ब्राह्मणानां परिभावात्, परीवादात् च न्यासापहरणेन च कुलानि अकुलतां यान्ति । गोभिः, पुरुषतः, अर्थतः कुलानि समुपेतानि । यानि वृत्ततः हीनानि तानि कुलसङ्ख्यां न गच्छन्ति । अल्पधनान्यपि वृत्ततः अविहीनानि कुलानि कुलसङ्ख्यां गच्छन्ति महद्यशः कर्षन्ति च ।

वृत्तं यत्नेन संरक्षेत् (character should be protected with effort)

वृत्तं नाम प्रवर्तनं प्रयत्नेन संरक्षणीयम् । तदानीं वित्तमेति याति च । वित्ततः क्षीणः अक्षीणः । वृत्ततः हतः हत एव ।

वृत्ततः हीनानि (these with decaying character)

गोभिः पशुभिः अश्वैश्च कृष्या च सुसमृद्धया च वृत्ततः हीनानि कुलानि न प्ररोहन्ति ।

नोच्छिद्यन्ते कदाचन (always remain)

तृणानि, भूमिः, उदकं, वाक्, सत्यवाक्परिपालनं च सतां गेहेषु कदाचन नोच्छिद्यन्ते। धर्मिणां पुण्यकर्मिणां प्रवृत्तानि परया श्रद्धया सत्कृतिमुपनीतानि ।

महाकुलीनाः (born in great families)

रथः सूक्ष्मोऽपि भारं वहते । वृक्षाः तथा वोढुं न शक्ताः । महाकुलीनाः महीजाः युक्ताः भारसहा भवन्ति । अन्ये मनुष्याः तथा न भवन्ति ।

मित्रम् (friend)

यस्य कोपात् बिभेति तन्मित्रं न वदन्ति । यद्वा शंकिते नोपचर्यं मित्रं न वदन्ति। पितरीव यस्मिन् आश्वसीत सः मित्रमित्याहुः ।

बन्धुः (relative)

यः कश्चिदपि असम्बद्धः मित्रभावेन वर्तते । स एव बन्धुः तन्मित्रं परायणं गतिश्च ।

मित्रसंग्रहः (circle of friends)

चपलचित्तस्य पुंसः वृद्धाननुपसेवतः पारिप्लवमतेः मित्रसंग्रहः नित्यमधृवः ।

चपलचित्तः (man of wavering mind)

इन्द्रियाणां वशानुगं चपलचित्तमनात्मानं यथा हंसाः शुष्कं सरः तथा अर्थाः समभिवर्तन्ते ।

असाधूनां शीलम् (character of the wicked)

यथा पारिप्लवं मेघं तथा असाधूनां शीलम् । ते अकस्मादेव कुप्यन्ति, अनिमित्ततः प्रसीदन्ति ।

कृतघ्नान् नोपभुञ्जते (wouldn't devour the cheaters)

ये सत्कृताश्च कृतार्थाश्च मित्राणां न भवन्ति तान् मृतानपि क्रव्यादाः नाम क्रूरमृगाः शुनकाः अपि नोपभुञ्जते ।

मित्राणां सारफल्गुताम् (essence and chaff in the context of friendship)

धने सति वा असति वा मित्राणि अर्चयेदेवा नानर्थयन् एव मित्राणां सारफल्गुतां प्रजानाति।

सन्तापः (greif, sorrow)

सन्तापात् भ्रश्यते रूपम् । सन्तापात् भ्रश्यते बलम् । सन्तापात् भ्रश्यते ज्ञानम् । सन्तापात् व्याधि मृच्छति । शोकेन अनवाप्यं, शरीरं चोपतप्यते । अमित्राश्च प्रहृष्यन्ति । तस्मात् शोके मनः मा कृथाः ।

न शोचेत् (shouldnot feel remoarse)

सुखं च दुःखं च भवाभवौ च लाभालाभौ मरणं जीवितं च पर्यायशः सर्वमेते स्पृशन्ति । तस्मात् धीरः न च हृष्येत् न शोचेत् ।

चलानि षडिन्द्रियाणि (the six wavering senses)

इमानि षडिन्द्रियाणि चलानि तेषां यत् यत् यत्र यत्र वर्धते अस्य बुद्धिः तत्र तत्र स्रवते छिद्रोदकुम्भादिवाम्भ नित्यम् ।

शान्तिः (attainment of peace)

विद्यातपसोः इन्द्रियनिग्रहात् लोभसंत्यागात् अन्यत्र शान्तिः न सिद्ध्यति । बुद्ध्या भयं प्रणुदति । तपसा महत् विन्दते । गुरुशुश्रूषया ज्ञानं विन्दति । योगेन शान्तिं विन्दति ।

विचरन्तीह मोक्षिणः (the liberated move around here)

दानात् पुण्यं, वेदात् पुण्यं चानाश्रिताः रागद्वेषविनिर्मुक्ताः मोक्षिणः विचरन्ति ।

अन्ते सुखमेधते (attains happiness at the end)

स्वधीतस्य, युद्धस्य, सुकृतस्य कर्मणः सुतप्तस्य तपसश्च तस्यान्ते सुखमेधते।

भिन्नाः तृप्तिं नाप्नुवन्ति (those with wrong perception cannot be happy)

स्वास्तीर्णानि शयनानि प्रपन्नाः, भिन्नमनस्काः निद्रां न लभन्ते । स्त्रीषु रतिं नाप्नुवन्ति । सूतैः मागधैः स्तूयमाना अपि तृप्तिं नाप्नुवन्ति । भिन्नमनस्काः धर्मं नाचरन्ति । अस्मिन् लोके सुखं न प्राप्नुवन्ति । प्रशमं न रोचयन्ति । तेषां न स्वदते उक्तं पथ्यम् । योगक्षेमं नैव कल्पते । भिन्नानां विनाशादन्यात् परायणं न किञ्चित् विद्यते ।

सम्भाव्यम्

गोषु सम्पन्नं, ब्राह्मणे तपः, स्त्रीषु चापलं, ज्ञातितो भयं च सम्भाव्यम् ।

ज्ञातयः (kinsmen, Paternal relations)

व्यपेतानि उल्मुकानीव धूमायन्ते । सहितानि च ज्वलन्ति ज्ञातयः ।

पतन्ति शूराः (the brave are falling down)

ब्राह्मणेषु, स्त्रीषु, ज्ञातिषु, गोषु च ये शूराः ते वृन्तात् पक्वं फलमिव पतन्ति ।

प्रसह्य एव (roots away)

एकजः वृक्षः बलवान् महान् सुप्रतिष्ठितः अपि वा तेन सस्कन्धः क्षणात् मर्दितुं प्रसह्य एव।

सहन्ते अन्योन्यसंश्रयात् (bears with because of association)

सङ्घशः सुप्रतिष्ठिताः सहिताः वृक्षाः ये ते शीघ्रतमान् वातान् अन्योन्य-संश्रयात् सहन्ते ।

मन्यन्ते द्विषन्तः (the enemies think so)

सर्वगुणैः समन्वितमपि एकं मनुष्यं दृममेकं वायुः इव परिहर्तुं शक्यमिति मन्यन्ते द्विषन्तः ।

उत्पलानीव संप्रवर्धन्ते (they develop like the blue lotuses)

अन्योन्य समुपष्टम्भात् अन्योन्यापाश्रयेण ज्ञातयः सरसि उत्पलानीव सम्प्रवर्धन्ते।

अवध्याः (those who shouldn't be killed)

ब्राह्मणाः, गावः, ज्ञातयः, शिशवः, स्त्रियः, येषां चान्नानि भुञ्जीत, शरणागताः ये च स्युः ते अवध्याः ।

मन्युः

अव्याधिजं, कटुकं, शीर्षरोगी, पापानुबन्धं, परुषं, तीक्ष्णं, उष्णं, सतां पेयं, न पिबन्त्यसन्तः प्रशाम्य मन्युं पीतव्यम्।

रोगिणः (the diseased)

रोगार्दिता न फलानि आद्रियन्ते । विषयेषु तत्त्वं न लभन्ते । रोगिणः दुःखोपेता नित्यमेव । धनभोगान्न सौख्यं न बुध्यन्ते ।

निरयं नयन्ति पाशहस्ताः (attented yama drag them away to hell with the rope)

यः अशिष्यं शास्ति, स्वल्पेन तुष्येत्, अतिवेलं द्विषन्तं भजते, स्त्रियश्च रक्षति भद्रमश्नुते, अयाच्यं याचते, कथ्यते वा, अभिजातः अकार्यं प्रकरोति, अबली बलिना नित्यवैरी, अश्रद्धधानाय ब्रवीति, अकाम्यं कामयते, वध्वापहासं मन्यते श्वशुरः, वध्वासन्नभयो मानकामः, परक्षेत्रेबीजं निर्वपति, स्त्रियमतिवेलं परिवदते, लब्ध्वापि न स्मरामीति वादी, दत्वा च कथ्यति याच्यमानः, असतः सत्त्वमुपानयीत, एतान् पाशहस्ताः निरयं नयन्ति ।

धर्मः (dharma, Rightousness)

यो मनुष्यः यस्मिन् यथा वर्तते तस्मिन् तथा वर्तितव्यम् । सः धर्मः । मायाचारः मायया वर्तितव्यः साध्वाचारः साधुना प्रत्युपेयः ।

सर्वं हरति (steals away everything)

जरा रूपं हरति । धैर्यम् आशा हरति । मृत्युः प्राणान् हरति । असूया धर्मचर्यां हरति । कामः ह्रियं हरति । अनार्यसेवा वृत्तं हरति । क्रोधः श्रियं हरति। अभिमानैः सर्वमेव हरति ।

एतानि मानवान् घ्नन्ति (these kill the humans)

अतिमानः, अतिवादः अत्यागः, क्रोधः, आत्मविधित्सा, मित्रद्रोहश्च षट् एत एव तीक्ष्णाः असयः । देहिनामायूंषि कृन्तन्ति । एतानि मानवान् घ्नन्ति । न मृत्युः।

ब्रह्मणः समाः (equal to those who committed brahmahatya)

विश्वस्तस्यैति दारान्, गुरुतल्पगः, वृषलीपतिः द्विजः, पानपः, आदेशकृत्, वृत्तिहन्ता द्विजानां प्रेषकः, शरणागतः, सर्वे ब्रह्मणः समाः । एतैः समेत्य कर्तव्यं प्रायश्चित्तमिति श्रुतिः ।

स्वर्गमुपैति विद्वान् (the knower of this attains heaven)

गृहीतवाक्यः, नयवित्, वदान्यः शेषान्नभोक्ता, अविहिंसकः, नानर्थकृत्, आकुलितः, कृतज्ञः, सत्यः, मृदुः, विद्वान् स्वर्गमुपैति ।

वक्ता श्रोता च दुर्लभः (such speaker and listener are difficult to get)

सततं प्रियवादिनः पुरुषाः । अप्रियस्य पथ्यस्य वक्ता श्रोता च दुर्लभः।

सहायवान् (the helper)

यो हि धर्मं समाश्रित्य, हित्वा, भर्तुः प्रियाप्रिये पथ्यानि अप्रियान्याह सः सहायवान्।

त्यजेत् (should be abandoned)

कुलार्थे पुरुषं त्यजेत् । ग्रामार्थे कुलं त्यजेत् । जनपदस्यार्थे ग्रामं त्यजेत् । आत्मार्थे पृथिवीं त्यजेत्।

रक्षेत् (should be protected)

आपदर्थे धनं रक्षेत् । धनैः दारान् रक्षेत् । धनैरपि दारैरपि सततमात्मानं रक्षेत्।

द्यूतम् (gambling)

पुराकल्पे द्यूतमेतत् नृणां वैरकरं दृष्टम् । तस्मात् बुद्धिमान् हास्यार्थमपि द्यूतं न सेवेत ।

आपत्सु न परित्यजन्ति (wouldnot desert in difficulities)

यः सर्वकालं न क्रुध्यति, हिते रतस्य भक्तस्य भृत्यस्य तस्मिन् भर्तरि भृत्याः विश्वसन्ति तमापत्सु न परित्यजन्ति ।

त्यजन्ति अमात्याः (the ministers would leave them)

भृत्यानां वृत्तिसंरोधनेन राज्यं, धनम् अपूर्वं संजिघृक्षेत् । वञ्चिताः विरुद्धाः स्निग्धाः परिहीनभोगाः अमात्याः एनं त्यजन्ति ।

दुष्कराणि सहायसाध्यानि (difficult works can be completed in the help of others)

कृत्यानि सर्वाणि पूर्वं परिसंख्याय अप्यव्यये अनुरूपां च वृत्तिं सहायान् अनुरूपान् संगृह्णीयात् । दुष्कराणि सहायसाध्यानि खलु ।

आत्मेव अनुकम्प्यः

भर्तुः अभिप्रायं विदित्वा यः सर्वाणि कार्याणि करोति, हितानां वक्ता, अनुरक्तः, आर्यः, शक्तिज्ञः आत्मेव सोऽनुकम्प्यः ।

त्याज्यः भृत्यः (such servant should be removed)

यः अनुशिष्टः वाक्यं नाद्रियते, नियुज्यमानः प्रत्याह, प्रज्ञाभिमानी, प्रतिकूलवादी भृत्यः तादृक् त्वरयैव त्याज्यश्च ।

अष्टगुणोपपन्नः (one posessed of eight qualities)

अस्तब्धम्, अक्लीबम्, अदीर्घसूत्रं, सानुक्रोशं, श्लक्ष्णम् अष्टगुणोपपन्नं दूतम् इत्याहुः ।

बुद्धिमान् (wise man)

विश्वासात् जातु परस्य गेहे न गच्छेत् । विकाले चत्वरे निशिनिगूढः न तिष्ठेत् चेत् यानः । राजकाम्यां योषितं न प्रार्थयीत । मन्त्रगतस्य निहवं संसृष्टमन्त्रस्य कुसङ्गतस्य न गच्छेत् । नाश्वसिमि त्वयीति न च ब्रूयात् । सकारणं व्यपदेशं तु कुर्यात् । घृणी राजा, पुंश्चली, राजभृत्यः, पुत्रः, भ्राता, विधवा, बालपुत्रा, सेनाजीवी, उद्धृतभूतिः एते व्यवहारेषु वर्जनीयाः स्युः एव।

पुरुषं दीपयन्ति (these enhance a man)

प्रज्ञा, कौल्यं, श्रुतं, दमः, पराक्रमः, अबहुभाषिता, यथाशक्तिदानं, कृतज्ञता च अष्टौ गुणाः पुरुषं दीपयन्ति।

एकगुणः बिभर्ति (this single quality bears all)

सकलान् गुणान् विशिष्य पूर्वोक्तान् अष्टगुणान् एकगुणः प्रसह्य संश्रयते । राजा यदा मनुष्यं सत्कुरुते सर्वान् एषः गुणः बिभर्ति ।

स्नानशीलं भजन्ते (they serve the one who baths)

बलं, रूपं, स्वरवर्णप्रशुद्धिः स्पर्शः, गन्धः, विशुद्धता, श्रीः, सौकुमार्यं, प्रवराः, नार्यः दशगुणाः स्नानशीलं भजन्ते ।

मितभुक्तं भजन्ते (these serve the man who eats less)

आरोग्यम्, आयुः, बलं, सुखं च अनाविलमपत्यं , नचैनमाद्यून क्षिपन्ति इति षड्गुणाः मितभुक्तं भजन्ते ।

गृहे न प्रतिवासयीत (these should not be allowed to stay in the house)

अकर्मशीलं, महाशनं, लोकद्विष्टं, बहुमायं, नृशंसम्, अदेशकालज्ञम्, अनिष्टवेषमेतान् गृहे न प्रतिवासयीत ।

न जातु याचेत् (should never beg these people)

कदर्यम्, आक्रोशकम्, अश्रुतं, वनौकसं, धूर्तम्, अमान्यमानिनं, निष्ठूरिणं, कृतवैरं, कृतघ्नम् एतान् भृशार्तोऽपि न जातु याचेत् ।

षट् नराधमान् न सेवेत (one should serve these six wretched people)

संक्लिष्टकर्माणम्, अतिप्रमादं, नित्यानृतं, अदृढभक्तिकं, विसृष्टरागं, पटुमानिनं च एतान् षट् नराधमान् अपि न सेवेत ।

सहायबन्धनाह्यर्थाः (riches set attached to the helpers)

सहायाश्चार्थबन्धनाः । अर्थाः सहायबन्धनाः । अन्योन्यबन्धनावोतौ विनान्योन्यं न सिद्ध्यतः।

मुनिर्बुभूषेत् (should follow the path of a sage)

पुत्रान् उत्पाद्य, अनृणांश्च कृत्वा, तेभ्यः काञ्चित् वृत्तिमनुविधाय, सर्वा कुमारीः स्थाने प्रतिपाद्य अथारण्यसंस्थः मुनिः बुभूषेत् ।

सुखावहं कुर्यात् (one should perform acts that give happiness)

सर्वभूतानां हितं यत् आत्मनश्च सुखावहं यत् ईश्वरे हि एतन्मूलं सर्वार्थ सिद्धये कुर्यात् ।

कुतः वृत्तिभयम् (why be afraid of the sinful)

वृद्धिः, प्रभावः, तेजः, सत्त्वम्, उत्थानं, व्यवसायः यस्य स्यात् तस्य वृत्तिभयं कुतः ?

वनं व्याघ्रं च (forest and the tiger)

न स्याद्वनमृते व्याघ्रान्, व्याघ्राः न स्युः ऋते वनम्। वनं हि रक्ष्यते व्याघ्रैः । व्याघ्रान् रक्षति काननम् ।

पापचेतसाः (mind of the sinful)

इतरेषां नैर्गुण्यं ज्ञातुमिच्छन्ति, कल्याणगुणान् वेदितुं तथा नेच्छन्ति पापचेतसः।

न हि धर्मा दपैत्यर्थः (wealth dosenot move away from dharma)

परामर्थसिद्धिमिच्छन् आदितः धर्ममेवाचरेत् । स्वर्गलोकादमृतमिव न हि धर्मादपैति अर्थः ।

सर्वमिदं बुद्धम् (knows all this)

यस्यात्मा पापात् विरतः कल्याणो च निवेशितः या प्रकृतिः विकृतिश्च सर्वमिदं तेन बुद्धम् ।

अमुत्रेह च विन्दति (experiences / in this and the other world)

धर्ममर्थं कामं च यः यथाकालं निषेवते सः धर्मार्थकामसंयोगममुत्रेह च विन्दति।

श्रियोभाजनम् (the abode of riches)

यः वेगमुत्थितं क्रोधहर्षयोः संनियच्छति सः श्रियोभजनं न मुह्यति आपत्सु ।

बलं पञ्चविधम् (the five types of strength)

बाहुबलं कनिष्ठं बलमुच्यते । अमात्यलाभः द्वितीयं बलमुच्यते । धनलाभं तृतीयं बलमाहुः मनीषिणः । पितृपैतामहं बलम् अभिजातबलं नाम चतुर्थं बलं स्मृतम्। एतानि सर्वाणि संगृहीतानि श्रेष्ठं बलानां बलं प्रज्ञाबलं पञ्चममुच्यते ।

दूरस्थोऽस्मीति नाश्वसेत् (one shouldn't complalent because one is for away)

महते अपकाराय नरस्य नरः प्रभवेत् । तेन वैरं समासज्य दूरस्थोरस्मीति नाश्वसेत् ।

कः कर्तुमर्हति (who is fit to place faith in ?)

स्त्रीषु, राजसु, सर्पेषु, शत्रुषु, स्वाध्याये, प्रभौ, भोगेषु, आयुषि कः प्राज्ञः विश्वासं कर्तुमर्हति।

प्रज्ञाशराभिहतः (one struck with the arrow of intelligence)

प्रज्ञाशरेण अभिहतस्य प्राणिनः चिकित्सकाः न सन्ति । औषधानि न सन्ति । होममन्त्राः न सन्ति । मङ्गलानि च न सन्ति । नाधर्वणाः, नाप्यगदाः सुसिद्धाश्च ।

एते अतितेजसः (these have great lustre)

सर्पः, अग्निः, सिंहः, कुलपुत्रश्च एते सर्वे अतितेजसः मनुष्येण नावज्ञेयाः। अग्निस्तेजो महल्लोके गूढस्तिष्ठति दारुषु । परैः यावत् न उद्दीप्यते तावत् न चोपयुंक्ते । स एव यदा दारुभ्यः निर्मथ्य दीप्यते तदा आशुतेजसा दारु वनं च निर्दहति ।

सिंहवनन्यायः (these have great lustre)

सिंहैर्विहीनं हि वनं विनश्येत् । ऋते वनेन सिंहाः विनश्येयुः ।

बुद्धिमान् (the intellectual)

यूनस्य प्राणाः ऊद्र्ध्वमुत्क्रामन्ति स्तविर आयति । प्रत्युत्थानाभिवादाभ्यां पुनः तान् प्रतिपद्यते । अभ्यागताय साधवे पीठं दत्वा आपः आनीय, पादौ परिनिर्णिज्य, सुखं पृष्ट्वा आत्मसंस्थां प्रतिवेद्य ततः अन्नमवेक्ष्य दद्यात् ।

अनर्थं जीवितम् (worthless life)

लोभात्, भयात्, कार्पण्यतः, वा उदकं मधुपर्कं गां च यस्य गेहे मन्त्रवित् न प्रतिगृह्णाति तस्य जीवितमनर्थमाहुः आर्याः ।

भृशम् अतिथि प्रियः (one who is affectionate towards guests)

चिकित्सकः, शल्यकर्ता, अवकीर्णी, स्तेनः, क्रूरः, मद्यपः, भ्रूणहा, सेनाजीवी, श्रुतिविक्रायकः नोदकार्हः अपि भृशं प्रियो अतिथिः।

भिक्षुकः (mendicant)

यः अरोषणः, समलोष्टामकाञ्चनः, प्रहीणशोकः, गतसन्धिविग्रहः, निन्दाप्रशंसोपरतः, प्रियाप्रिये त्यजन् उदासीनवत् एषः भिक्षुकः ।

तापसः (sage)

नीवारमूलेङ्गुदशाकवृत्तिः, सुसंयुतात्मा, अग्निकार्येषु चोद्यः, वने वसन् अतिथिषु अप्रमत्तः धुरंधरः पुण्यकृत् एषः तापसः ।

बुद्धिमान् हिंसितः हिंसति (the wise torments the tormentor)

बुद्धिमतः अपकृत्य दूरस्थोरस्मीति नाश्वसेत् । बुद्धिमतः बाहू दीर्घौ याभ्यां हिंसति हिंसितः ।

मूलान्यपि निकृन्तति (he uproots the very foundation)

अविश्वस्ते न विश्वसेत् । विश्वस्ते नातिविश्वसेत् । विश्वासात् उत्पन्नं भयं मूलान्यपि निकृन्तति ।

पुरुषः (man)

अनीर्षुः, गुप्तदारश्च, संविभागी, प्रियंवदः, श्लक्ष्णः, स्त्रीणां मधुरवाक्, पुरुषः न चासां वशगो भवेत् ।

विशेषतः रक्ष्याः स्त्रियः (women in partcular should be protected)

पूजनीयाः, महाभागाः, पुण्याः, गृहदीप्तयः, श्रियः गृहस्योक्ताः । तस्मात् विशेषतः रक्ष्याः स्त्रियः ।

स्वयमेव कृषिं व्रजेत् (one must go to the field oneself)

पितुः अन्तःपुरं दद्यात्, मातुः महानसं दद्यात्, गोषु आत्मसमं दद्यात्, कृषिं स्वयमेव व्रजेत् । भृत्यैः वाणिज्यचारं पुत्रैः द्विजान् च सेवेत ।

तेजः योनिषु शाम्यति (brillience lies in the origin)

अद्भ्यः अग्निः, ब्रह्मतः क्षत्रम्, अश्मनः लोहं च उत्थितम् । सर्वत्रगं तेषां तेजः स्वासु योनिषु शाम्यति । पावकोपमतेजसः क्षमावन्तः निराकाराः नित्यं काष्ठे अग्निरिव शेरते ।

चिरमैश्वर्यमश्नुते (enjoys riches for a long time)

बाह्याभ्यन्तराश्च यस्य मन्त्रं न जानन्ति सः सर्वतः चक्षुः चिरमैश्वर्यमश्नुते । धर्मार्थकामकार्याणि करिष्यन् न प्रभाषेत । कृतान्येव दर्शयेत् । तथा मन्त्रः न भिद्यते।

असुहृत् नार्हति (a man without friends it is not worthwhile)

गिरिपृष्ठमुपारुह्य, अहोगतः प्रसादं वा अरण्ये निःशलाके वा तत्र मन्त्रमभिधीयते असुहृत् परमं मन्त्रं वेदितुं नार्हति ।

परीक्ष्य कुर्यात् (should do after proper exmination)

अपण्डितो वापि सुहृत्, पण्डितोवापि अनात्मवान् महीपालः न अपरीक्ष्य, आत्मनः सचिवं कुर्यात् । गूढमन्त्रस्य नृपतेः असंशयं कार्यसिद्धिः स्यात् ।

भ्रश्यते जीवितादपि (falls away from life)

अप्रशस्तानि कार्याणि यः मोहादनुतिष्ठति सः तेषां विपरिभ्रंशात् जीवितादपि भ्रश्यते ।

पश्चात्तापकरं मतम् (causes remoarse)

प्रशस्तानां कर्मणामनुष्ठानं सुखावहम् । तेषामेवाननुष्ठानं पश्चात्तापकरं मतम्।

मन्त्रं श्रोतुं नार्हति (uneligible to hear the mantra)

यथा वेदान् अनधीत्य श्राद्धं नार्हति, एवमश्रुतषाड्गुण्यः मन्त्रं श्रोतुं नार्हति।

स्वाधीना पृथिवी (the earth comes under control)

आत्मनः स्थानवृद्धिक्षयज्ञस्य, षाड्गुण्यविदितात्मनः अनवज्ञातशीलस्य स्वाधीना भवति पृथिवी ।

वसुधैव वसुन्धरा (the earth yeilds all riches)

अमोघक्रोधहर्षस्य कृत्वा स्वयमन्ववेक्षिणः आत्मप्रत्ययकोशस्य वसुन्धरा वसुधैव।

नैकः सर्वहरो भवेत् (a single man shouldn't take it all)

महीपतिः छत्रेण नाममात्रेण तुष्येत । अर्थान् भृत्येभ्यः विसृजेत् । नैकः सर्वहरो भवेत् ।

राजा राजानं वेद (only a king knows a king)

ब्राह्मणं ब्राह्मणो वेद, तथा भर्ता स्त्रियं वेद, नृपतिः अमात्यं वेद, राजा राजानमेव वेद ।

शत्रुः न मोक्तव्यः (enemy shouldn't be left free)

वध्यतां गतः शत्रुः वशमापन्नः न मोक्तव्यः । न्यग्भूत्वा पर्युपासीत । बले सति वध्यं हन्यात्। तस्मात् अहतात् न चिरादिव भयं जायते ।

सदा नियन्तव्यः (should always have them in control)

दैवतेषु राजसु ब्राह्मणेषु च वृद्धबालातुरेषु च क्रोधः प्रयत्नेन सदा नियन्तव्यः।

बुद्धिमान् (the intellectual)

निरर्थं कलहं मूढसेवितं वर्जयेत् प्राज्ञः तस्मात् कीर्तिं च लभते । लोके न चानर्थेन युज्यते ।

षण्ढं न भर्तारमिच्छन्ति (they will not a enuch as a husband)

यस्य प्रसादः निष्फलः क्रोधश्चापि निरर्थकः तं षण्ढं स्त्रियः पतिमिव न भर्तारमिच्छन्ति ।

जानाति प्राज्ञः (the wise knows it)

न बुद्धिः धनलाभाय, न जाड्यमसमृद्धये, लोकपर्यायवृत्तान्तं प्राज्ञः जानाति नेतरः ।

मूढः अवमन्यते (the fool insults)

विद्याशीलवयोवृद्धान् बुद्धिवृद्धांश्च धनाभिजातवृद्धांश्च नित्यं मूढः अवमन्यते।

अनर्थाः क्षिप्रमायान्ति (miseries come quickly)

अनार्यवृत्तम्, अप्राज्ञम्, असूयकम्, अधार्मिकम्, वाग्दुष्टं, तथा क्रेधनम् अनर्थाः क्षिप्रमायान्ति।

सम्यक् प्रणिहिता च वाक् (a word that is well-said)

अविसंवादनं दानं, समयस्याव्यतिक्रमः, सम्यक् प्रणिहिता च वाग्भूतानि आवर्तयन्ति ।

लभते परिवारणम् (will have others support)

अविसंवादकः दक्षः कृतज्ञः मतिमान् ऋजुः संक्षीणकोशोऽपि परिवारणं लभते।

समिधः श्रियः (these increase wealth)

धृतिः, शमः, दमः, शौचं, कारुण्यं, वागनिष्ठुरा, मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ।

वर्जनीयः नराधिपः (the king one should leave)

असंनिभागी, दुष्टात्मा, कृतघ्नः निरपत्रपः तादृङ्नराधिपः लोके वर्जनीयः।

न च रात्रौ सुखं शेते (he will not proper sleep)

यः सदोषः अभ्यन्तरं जनं निर्दोषं कोपयति सः वेश्मनि सर्प इव रात्रौ न सुखं शेते ।

सदा प्रसादनमाचरेत् (we should make them always plaesed)

येषु दुष्टेषु उद्योगक्षेमस्य दोषः स्यात्, तेषां देवतानामिव सदा प्रसादनमाचरेत्।

संशयं गताः (they doubt)

स्त्रीषु प्रमत्तपतितेषु अनार्येषु समायुक्ताः समासक्ताः अर्थाः सर्वे ते संशयं गताः।

अवशाः मज्जन्ति (not being in control, they sink

यत्र स्त्री, कितवः बालः अनुशासिताः, ते नद्यामश्मप्लवा इव मज्जन्ति ।

विशेषा हि प्रसङ्गिनः (men of vainful behaviour)

प्रयोजनेषु ये सक्ताः ते पण्डिताः । विशेषेषु न सक्ताः पण्डिताः । केवल विशेषाः प्रसङ्गिनः ।

न स जीवति (he will not live)

कितवाः, चारणाः बन्धक्यः यं प्रशंसन्ति सः मानवः न जीवति ।

अवमानं लभते (he will be insulted)

अप्राप्तकालवचनं ब्रुवन् बृहस्पतिरपि बुद्ध्यवज्ञानमवमानं च लभते ।

यः प्रियः स एव प्रियः (one who is dear, himself is the lover)

एकः दानेन प्रियो भवति । अपरः प्रियवादेन प्रियो भवति । अन्यः मन्त्रमूलबलेन प्रियो भवति । यः प्रियः स एव प्रियः ।

द्वेष्ये पापानि सर्वाणि (all acts of an enemy seem sinful)

द्वेष्यः साधुर्न भवति । न मेधावी, न पण्डितः । प्रिये कार्याणि शुभानि। द्वेष्ये सर्वाणि पापानि ।

क्षयो वृद्धिमावहेत् (even that which is decaying may grow / develop)

वृद्धिः न बहुमन्तव्या । या वृद्धिः क्षयमावहेत् । क्षयोऽपि बहुमन्तव्यः क्षयः वृद्धिमावहेत् ।

क्षयः (decays, degenerate)

यः क्षयः वृद्धिमावहेत् न स क्षयः । यं लब्ध्वा बहुनाशयेत् स तु क्षयः मन्तव्यः।

धनवृद्धान् हीनान् विवर्जयेत् (one should leave away dharaminas and the wretched)

केचित् गुणतः समृद्धाः भवन्ति । अपरे धनतः सम्पन्नाः भवन्ति। धनवृद्धान् गुणैर्हीनान् विवर्जयेत् ।

न अपमर्दमुपेक्षते (even a small pain shouldnot neglected)

अतीवगुणसम्पन्नः विनयान्वितः सुसूक्ष्ममपि भूतानाम् उपमर्दं न जातु उपेक्षते।

यतन्ते सततोत्थिताः (being ever ready, they strive)

केचन परापवादनिरताः, परदुःखोदयेषु परस्परविरोधे च सततोत्थिताः यतन्ते। तेषां दर्शनं पापदायकं भवति । संवादे महत् भयं भवति । अर्थादाने महान् दोषः । प्रदाने च महद् भयम् ।

संवासे परिगर्हिताः (one shouldnotget associated with these)

ये वै भेदनशीलास्तु स कामा निस्त्रपाः शठाः पापा इति विख्याताः ते संवासे परिगर्हिताः ।

नीचे प्रीतिः प्रणश्यति (affection towards a rogue gets destoryed)

महादोषैः युक्ताश्चान्त्यैः नराः ये तान् विवर्जयेत् । सौहार्दे निवर्तमाने नीचे प्रीतिः प्रणश्यति । या चैव फलनिर्वृत्तिः, साहृदे चैव यत्सुखं तदपि नश्यति । नीचः अपवादाय यतते । क्षये यत्नमारभते । अल्पेऽपि अपकृते मोहात् शान्तिं नाधिगच्छति। तादृशैः नीचैः नृशंसैः अकृतात्मभिः सङ्गतं निपुणं निशम्य, बुद्ध्या विद्वान् दूरात् विवर्जयेत् ।

श्रेयश्चानन्त्यमश्नुते (he will attain endless prosperious)

दरिद्रं दीनमातुरं ज्ञातिं यो अनुगृह्णाति सः पुत्रपशुभिः वृद्धिः श्रेयश्चानन्त्यमश्नुते। ज्ञातयः वर्धनीयाः .आत्मनः शुभं कुलवृद्धिं च कांक्षन्ति तस्मात् साधु समाचरन्ति । ज्ञातिसत्क्रियां कुर्वाणः श्रेयसा योक्ष्यते । विगुणाह्यपि ज्ञातयः संरक्ष्याः । शुभार्थिना विग्रहः ज्ञातिभिः न कर्तव्यः । ज्ञातिभिः सुखानि सहभोज्यानि । सम्भोजनं, संकथनं परस्परं सम्प्रीतिश्च ज्ञातिभिः सहकार्याणि । न कदाचन विरोधः ।

ज्ञातयः (cousius)

ज्ञातयः तारयन्ति । ज्ञातयः मज्जयन्ति । सुवृत्ताः तारयन्ति । दुर्वृत्ताः मज्जयन्ति। श्रीमन्तं ज्ञातिमासाद्य यो ज्ञातिः अवसीदति सः दिग्धहस्तं मृग इव एनं तस्य विन्दति ।

बुद्धिमत्स्वेव तिष्ठति (it stays only in the wise)

न कश्चित् नापनयते पुमान् । शेषसम्प्रतिपत्तिस्तु बुद्धिमत्स्वेव तिष्ठति ।

चिरं यशसि तिष्ठति (he will be famous for a long time)

धीराणां सुव्याहृतानि फलतः परिचिन्त्य यः कार्येषु अध्यवस्यति सः चिरं यशसि तिष्ठति । विद्वान् पापोदयफलं यः नारभति सः वर्धते ।

विषमे विनिपात्यते (he falls into troubles)

पूर्वकृतं पापमविमृश्य यः अनुवर्तते सः दुर्मेधा अगाधपंके विषमे विनिपात्यते।

रक्षेदेतानि नित्यशः (these should be protected always)

प्राज्ञः, अर्थसन्ततिकामश्च मन्त्रभेदस्य षट् द्वाराणि लक्षयेत् । नित्यशः एतानि रक्षेत् । मदं, स्वप्नम्, अविज्ञानम्, आकारं, आत्मसम्भवं, दुष्टामात्येषु विश्रम्भं, अकुशलदूता च षट् द्वाराणि । एतानि द्वाराणि यः ज्ञात्वा सदा संवृणोति, त्रिवर्गाचरणे युक्तः सः शत्रून् अधितिष्ठति ।

धर्मार्थौ वेदितुं न शक्यौ (they willnot understand dharma and artha)

श्रुतमविज्ञाय, वृद्धाननुपसेव्य धर्मार्थौ वेदितुं बृहस्पति समैरपि न शक्यौ ।

नष्टम् (it is a waste)

समुद्रे पतितं वस्तु नष्टम्, अश्रुण्वति वाक्यं नष्टम् । अनात्मनि श्रुतं नष्टम् । अनग्निकं हुतं नष्टम् ।

प्राज्ञैः मैत्रीं समाचरेत् (one should have friendship with the wise)

मेधावी मत्या परीक्ष्य, बुद्ध्या सम्पाद्य, श्रुत्वा, दृष्ट्वा विज्ञाय प्राज्ञैः मैत्रीं समाचरेत् ।

आचारो हन्त्यलक्षणम् (good habits destory the bad ones)

विनयः अकीर्तिं हन्ति, पराक्रमः अनर्थं हन्ति। क्षमा नित्यं क्रोधं हन्ति । आचारः अलक्षणं हन्ति।

कुलं परीक्षेत (one should protect the family)

परिच्छदेन क्षेत्रेण वेश्मना परिचर्यया भोजनाच्छादनेन च कुलं परीक्षेत ।

कामरक्तः (one full of desires)

उपस्थितस्य कामस्य, निर्मुक्तदेहस्यापि प्रतिवादः न विद्यते । कामरक्तस्य किं पुनः ?

सुहृदं परिपालयेत् (a friend i.e friendship should always be maintained)

प्राज्ञोपसेवितं, वैद्यं, धार्मिकं, प्रियदर्शनं, मित्रवन्तं, सुवाक्यं, सुहृदं च परिपालयेत्।

कुलीनताद्वरः (he is better than those born in a noble families)

दुष्कुलीनः, कुलीनो वा मर्यादां यः न लङ्घयेत्, धर्मापेक्षे मृदुः, ह्रीयान् सः कुलीनताद्वरः।

तयोर्मैत्री न जीर्यति (their friendship will not be spoiled)

ययोः चित्तेन चित्तं, निभृतेन निभृतं, प्रज्ञया प्रज्ञा समेति तयोः मैत्री न जीर्यति।

तस्मिन् मैत्री प्रणश्यति (friendship in him fades away)

दुर्बुद्धिम्, अकृतप्रज्ञं, छन्नं, कूपं, तृणैरिव, मेधावी विवर्जयीत । तस्मिन् मैत्री प्रणश्यति । अवलिप्तेषु मूर्खेषु रौद्रसाहसिकेषु च अपेतधर्मेषु न मैत्रीमाचरेत् बुधः ।

मित्रम् (a friend)

कृतज्ञं, धार्मिकं, सत्यम्, अक्षुद्रं, दृढभक्तिकं, जितेन्द्रियं, स्थितं स्थित्यां मित्रम् अत्यागीचेष्यते ।

इन्द्रियाणामनुत्सर्गः (control of senses)

इन्द्रियाणामनुत्सर्गः मृत्युनापि विशिष्यते । अत्यर्थं पुनरुत्सर्गः दैवतान्यपि सादयेत्।

आयुष्याणि (these increase life)

सर्वभूतानां मार्दवम्, अनसूया क्षमा धृतिः, मित्राणाम् अविमानना च आयुष्याणि इति बुधाः प्राहुः ।

उत्तमपुरुषाणां व्रतम् (the vow of the noble persons)

अपनीतमर्थं यः सुनीतेन प्रत्यानिनीषते सुदृढां मतिमास्थाय तत् उत्तमपुरुषाणां व्रतम् ।

अर्थैः न प्रहीयते (the benefits will not be lost)

आयत्यां प्रतिकारज्ञः, तदात्वे दृढानिश्चयः, अतीते कार्यशेषज्ञः नरः अर्थैः न प्रहीयते ।

कल्याणमाचरेत् (one should perform only meritrious acts)

कर्मणा मनसा वाचा यदभीक्ष्णं निषेवते तदेवापहरत्येनं तस्मात् कल्याणमाचरेत्। मङ्गलालम्भनं योगः, श्रुतम्, उत्थानम्, आर्जवम्, सतां चाभीक्ष्णदर्शनमेतानि भूतिं कुर्वन्ति ।

सुखं चानन्त्यमश्नुते (he enjoys endlesrs happiness)

लाभस्य च शुभस्य च श्रियोमूलमनिर्वेदः । अनिर्वण्णः महान् भवति । आनन्त्यं सुखं चाश्नुते ।

क्षमा सर्वत्र सर्वदा (patience / forgiveness is beneficial everywhere/ always)

प्रभविष्णोः सर्वत्र सर्वदा क्षमा श्रीमत्तरम् । न किञ्चिदन्यत् पथ्यतमं मतम्। अशक्तः क्षमे सर्वस्य । शक्तिमान् धर्मकारणात् क्षमा एव आश्रयणीया । अर्थानर्थौ समौ यस्य तस्य नित्यं क्षमा हिता ।

न मूढव्रतमाचरेत् (one shouldn't behave stubbornly)

यत् सुखं सेवमानोऽपि धर्मार्थाभ्यां न हीयते । कामं तदुपसेवेत । न मूढव्रतमाचरेत्।

न श्रीः वसति अदान्तेषु (wealth doesnot stay in people who lack enthusiasm)

दुःखार्तेषु प्रमत्तेषु नास्तिकेषु अलसेषु अदान्तेषु च ये चोत्साहविवर्जिताः तेषु श्रीः न वसति।

धर्षयन्ति कुबुद्धयः (threatening is the method of the crooks)

आर्जवेन युक्तं नरम्, आर्जवात् सव्यपत्रपम् अशक्तं मन्यमानास्तु कुबुद्धयः धर्षयन्ति ।

श्रीः भयात् नोपसर्पति (wealth moves away from fear)

अत्यार्यम्, अतिदातारम्, अतिशूरम्, अतिव्रतम्, प्रज्ञाभिमानिनं च श्रीः भयात् नोपसर्पत्येव । न चातिगुणवत्सु, एषा लक्ष्मी नात्यन्तं निर्गुणेषु च नैषा गुणान् कामयते। नैर्गुण्यात् नानुरज्यते । उन्मत्ता गौरिव अन्धा श्रीः क्वचिदेवावतिष्ठते ।

फलदायकानि (these give results)

वेदाः अग्निहोत्रफलाः । श्रुतं शीलवृत्तफलम् । नारी रतिपुत्रफला । धनं दत्तभुक्तफलम् ।

अधर्मोपार्जनम् (earned through wrong means)

अधर्मोपार्जितैः अर्थैः यः करोति और्ध्वदैहिकं, सः तस्य फलं प्रेत्य न भुंक्ते अर्थस्य दुरागमात्।

नास्ति सत्त्ववतां भयम् (there is no fear for the noble men)

कान्तारे वनदुर्गेषु कृच्छ्रास्वापत्सु सम्भ्रमे उद्यतेषु शस्त्रेषु च सत्त्ववतां भयं नास्ति ।

भवस्य मूलम् (the root of wealth)

उत्थानम्, संयमः, दाक्ष्यम्, अप्रमादः, धृतिः, स्मृतिः, समारम्भः च समीक्ष्य भवस्य मूलं विद्धि।

बलम् (power , strength)

तापसानां बलं तपः । ब्रह्मविदां बलं ब्रह्मा । असाधूनां बलं हिंसा । गुणवतां बलं क्षमा ।

अव्रतघ्नानि अष्टौ (these eight donot spoil a vow)

आपः, मूलं, फलं, पयः, हविः, ब्राह्मणकाम्या, गुरोर्वचनम्, औषधम् अष्टौ तानि अव्रतघ्नानि।

धर्मः (dharma)

यदात्मनः प्रतिकूलं, तत् परस्य न संदध्यात् । सङ्ग्रहेण एषः धर्मः स्यात् । कामादन्यः प्रवर्तते ।

जयेत् (one should conquer)

अक्रोधेन जयेत् क्रोधम् । असाधुं साधुना जयेत् । दानेन कदर्यं जयेत् । सत्येन चानृतं जयेत् ।

विश्वासो न कार्यः (one shouldnot believe)

स्त्रीधूर्तके, अलसो, भीरौ, चण्डे, पुरुषमानिनि, चौरे, कृतघ्ने, नास्तिके च विश्वासः न कार्यः ।

चत्वारि सम्प्रवर्धन्ते (these four develop)

नित्यमभिवादनशीलस्य वृद्धोपसेविनः कीर्तिः, आयुः, यशः, बलं चत्वारि सम्प्रवर्धन्ते।

मास्म मनः कृथाः (donot think of wrong earnings)

अतिक्लेशेन ये अर्थाः स्युः धर्मस्यातिक्रमेण वा अरेर्वा प्रणिपातेन मास्म तेषु मनः कृथाः ।

शोच्यं राष्ट्रमराजकम् (a country without a king is miserable)

अविद्यः पुरुषः शोच्यः, शोच्यं मैथुनमप्रजम् । निराहाराः प्रजाः शोच्याः। शोच्यं राष्ट्रमराजकम् ।

जरा (old age)

देहवतामध्वा जरा, पर्वतानां जलं जरा , असम्भोगः स्त्रीणां जरा, वाक्शल्यं मनसः जरा ।

मलम् (excretion)

अनाम्नायमलाः वेदाः, ब्राह्मणव्रतं मलम्, पृथिव्याः मलं बाह्लीकाः, पुरुषस्यानृतं मलम् । कौतूहलमला साध्वी, विप्रवासमलाः स्त्रियः । सुवर्णस्य मलं रूप्यम् । रूप्यस्यापि मलं त्रपु । त्रपुमलं ज्ञेयं सीसम्। सीसस्यापि मलं मलम् ।

न जयेत् (not possible to win)

स्वप्नेन निद्रां न जयेत्, कामेन स्त्रियः न जयेत् । इन्धनेनाग्निं न जयेत् । पानेन सुरां न जयेत् ।

सफलं तस्य जीवितम् (his life is worthwhile)

यस्य दानजितं मित्रं शत्रवो युधि निर्जिताः अन्नपानजिता दाराः सफलं तस्य जीवितम्। सहस्रिणोऽपि जीवन्ति । तदा शतिनः जीवन्ति । कथञ्चित् जीव्यते ।

न मुह्यति (he is not infactuated)

यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः नालमेकस्य । तत्सर्वमिति पश्यन् न मुह्यति ।

प्रसन्ना हि सुखाय सन्तः (those who are pleased, give happiness)

यः अभ्यर्चितः सद्भिः असज्जमानः शक्ति महापयित्वा अर्थं करोति तं क्षिप्रं यशः समुपैति । यस्मात् कारणात् प्रसन्नाः सुजनः सुखाय सन्तः ।

सन्त्यजति अनपाकृष्ट एव (he leaves it, without others saying it)

महान्तमपि अर्थम् अधर्मयुक्तं यः अनपाकृष्ट एव सन्त्यजति सः सुदुःखानि जीर्णां त्वचं सर्प इवावमुच्य सुखं शेते ।

ब्रह्महत्यया समानि (these are equal to brahmahatya)

अनृते च समुत्कर्षः, राजगामिपैशुनं, गुरोः चालीकनिर्बन्धः ब्रह्महत्यया समानि।

विद्यायाः शत्रवस्त्रयः (these three are enemies to learning)

असूयैकपदं , मृत्युः, अतिवादः, श्रियोवधः, अशुश्रूषा, त्वरा, श्लाघा त्रयः विद्यायाः शत्रवः ।

सप्तदोषाः (the seven mistakes)

आलस्यं, मदमोहौ, चापलं, गोष्ठिः, स्तब्धता, अभिमानित्वं, त्यागित्वं, एते सप्तदोषाः विद्यार्थिनां सदा मताः ।

विद्यार्थिनः सुखम् (the happiness of students)

सुखार्थिनः विद्या नास्ति । विद्यार्थिनः सुखं नास्ति । सुखार्थी वा त्यजेत् विद्याम्, विद्यार्थी वा त्यजेत् सुखम् ।

न तृप्यति (he is not content)

काष्ठानां न तृप्यति अग्निः, आपगानां न तृप्यति महोदधिः, सर्वभूतानां न तृप्यति अन्तकः, वामलोचना पुंसां न तृप्यति ।

हन्ति (they destory it)

आशा धृतिं हन्ति, अन्तकः समृद्धिं हन्ति, क्रोधः श्रियं हन्ति, कदर्यता यशः हन्ति, पशून् अपालनं हन्ति, एकः कृद्धः ब्राह्मणः राष्ट्रं हन्ति ।

एतानि गृहे सन्तु (these should be in the house)

अजाः, कांस्यं, रजतं, मधु, आकर्षः, शकुनिः, श्रोत्रियः, वृद्धः, ज्ञातिः, अवसन्नः, कुलीनः एतानि सदैव गृहे सन्तु ।

गृहे स्थापयितव्यानि (these should be stocked in the house)

देव, ब्राह्मण, पूजार्थमतिथीनां मङ्गलद्रव्याणि अजोक्षाचन्दनं वीणा आदर्शः मधु सर्पिषी, विषमौदुम्बरं, शङ्खः स्वर्णनाभः, रोचना धान्यानि गृहे स्थापयितव्यानि इति मनुः अब्रवीत् ।

धर्मं न जह्यात् (one shouldnot leave dharma)

कामात्, भयात्, लोभात्, जीवितस्यापि हेतोः धर्मं न जह्यात् । अग्नौ प्रास्तं पुरुषं स्वयं कृतं कर्मान्वेति । तस्मात् पुरुषः यत्नात् शनैः धर्मं संचिनुयात् ।

पुण्यो ह्यात्मा नित्यमलोभ एव (not being greedy itself leads to nobleness)

पुण्यतीर्था आत्मा नदी, सत्योदया, धृतिकूला, दयोर्मिः, तस्यां स्नातः पुण्यकर्मा पूयते । पुण्यो ह्यात्मा नित्यमलोभ एव ।

न समुह्येत् कदाचित् (he will never commit this mistake)

प्रज्ञावृद्धं, धर्मवृद्धं, स्वबन्धुं, विद्यावृद्धं, वयस्यापि वृद्धं कार्याकार्ये पूजयित्वा, प्रसाद्य यः संपृच्छेत् सः न कदाचित् मुह्येत् ।

रक्षेत् (it should be protected)

धृत्या शिश्नोदरं, पाणिपादं, चक्षुषा, चक्षुः श्रोत्रे च मनसा, मनोवाचं च कर्मणा रक्षेत् ।

ब्रह्मलोकात् न च्यवते (he will not fall out from the brahmaloka)

नित्योदकी, नित्ययज्ञोपवीती, नित्यस्वाध्यायी, पतितान्नवर्जी, सत्यं ब्रुवन्, गुरवे

कर्मकुर्वन् ब्राह्मणः ब्रह्मलोकात् न च्यवते ।

क्षत्रियः स्वर्गमेति (the Kshtriya attains the heaven)

वेदानधीत्य, अग्नीन् परिसंस्तीर्य, यज्ञैः निष्ट्वा, प्रजाश्च पालयित्वा, शस्त्रपूतान्तरात्मा गोब्राह्मणार्थं संग्रामे हतः क्षत्रियः स्वर्गमेति ।

वैश्यः दिव्यसुखानि भुंक्ते (the Vaisya enjoys the divine pleasures)

वैश्यः वेदशास्त्राण्यधीत्य, ब्राह्मणान् क्षत्रियांश्च आश्रितांश्च धनैः काले संविभाज्य, त्रेतापूतं पुण्यं धूममाघ्राय प्रेत्य, स्वर्गे दिव्यसुखानि भुंक्ते ।

शूद्रः स्वर्गसुखानि भुंक्ते (the shudra enjoys the heavenly pleasures)

शूद्रः ब्रह्मक्षत्रं वैश्यवर्णं च क्रमेणैतान् न्यायतः पूजयानः तुष्टेष्वेतेषु अव्यथः दग्धपापः देहं त्यक्त्वा स्वर्गसुखानि भुंक्ते ।

(विदुरनीतिः समाप्ता) ।

दण्डनीतिः

ईश्वरश्च महादण्डः दण्डे सर्वं प्रतिष्ठितम् । देवतानाम् ऋषीणां पितृणां महात्मनां, यक्षरक्षः पिशाचानां साध्यानां च विशेषतः सर्वेषां प्राणिनां लोके तिर्यग्योनिनिवासिनां सर्वव्यापी महातेज श्रेयान् दण्डः । सचराचरं, ससुरासुरमानुषं लोकमासक्तं दण्डे ।

दण्डव्यवहारः (administration punishment)

को दण्डः ? कीदृशो दण्डः ? किं रूपः ? किं परायणः ? किमात्मकः ? कथं भूतः ? कथं मूर्तिः ? प्रजासु अवहितात्मकः दण्डः कथं च जागर्ति ? इति युधिष्ठरप्रश्नानामुवाच भीष्मः - यो दण्डो व्यवहारो यथा च सः यस्मिन् सर्वमायत्तं स दण्ड इह केवलः ? धर्मस्य प्रकाशः व्यवहार इतीष्यते । तस्य लोपः कथं न स्यात् लोकेषु अवहितात्मनः इत्येवं व्यवहारस्य व्यवहारत्वमिष्यते । एतत्पुरा आदितः मनुना प्रोक्तम् ।सुप्रणीतेन दण्डेन प्रियाप्रियसमात्मना यः सम्यक् प्रजाः रक्षति सः केवलः धर्मः एव । प्रागिदं वचनं प्रोक्तम् । अतः प्राग्वचनं विदुः । व्यवहारस्य चाख्यानात् व्यवहारः इहोच्यते । सुप्रणीते दण्डे सततं त्रिवर्गः धर्मार्थकामाः प्रवर्तन्ते । रूपतोऽग्निरिवोत्थितः परमो दण्डः दैवं खलु।

दण्डरूपम् (the form of punishment)

नीलोत्पलदलश्यामः, चतुर्दष्ट्रः, चतुर्भुजः, अष्टपात्, नैकनयनः, शंकुकर्णः, ऊर्ध्वरोमवान्, जरी, द्विजिह्वः, ताम्रास्यः, मृगराजतनुच्छदः, दण्डः दुराधरः नित्यमुग्ररूपमेतत् बिभर्ति ।

दण्डः लोके चरति (fear of punishment exists in world)

असिर्धनुर्गदा शक्तिस्त्रिशूलमुद्गरः, शरः मुसलं परशुः, चक्रं, पाशं, दण्डर्ष्टितोमराः कानिचित् यानीह सर्वप्रहरणीयानि सन्ति स सर्वात्मा दण्ड एव मूर्तिमान् लोके चरति। भिन्दं, छिन्दन्, रुजन्, कृन्तन्, दारयन् तथा पाटयन्, घातयन्, अभिधावंश्च दण्ड एव चरति ।

दण्डस्य नामानि (different names of danda)

असिः, विशसनः, धर्मः, तीक्ष्णवर्मा, दुराधरः, श्रीगर्भः, विजयः, शास्ता, व्यवहारः, सनातनः, शास्त्रं, ब्राह्मणमन्त्राश्च, शास्ता, प्राग्वदतां वरः, धर्मपालः, अक्षरः, देवः, सत्यगः, नित्यगः, अग्रजः, असङ्गः, रुद्रतनयः, मनुः, ज्येष्ठः, शिवंकरः, एतानि नामानि दण्डस्य कीर्तितानि ।

दण्डो हि भगवान् (danda is verily the God)

दण्डो हि भगवान् विष्णुः । दण्डो नारायणः प्रभुः । शश्वद्रूपं महद्बिभ्रन् महान् पुरुष उच्यते । तथोक्ता ब्रह्मकन्येति, लक्ष्मीः, वृत्तिः, सरस्वती, दण्डनीतिः, जगद्धात्री, दण्डो हि बहुविग्रहः ।

दण्डस्य रूपाणि (the forms of danda)

अर्थानर्थौ, सुखंदुःखं, धर्माधर्मौ, बलाबले, दौर्भाग्यं, भागधेयं, पुण्यापुण्ये, गुणागुणौ, कामः, अकामः, ऋतुः, मासः, रात्रिः, दिवसः, क्षणः, अप्रमादः, प्रमादः, हर्षः, क्रोधः, शमः, दमः, दैवं, पुरुषकारः, मोक्षः, बन्धः, भयः, अभयः, हिंसा, अहिंसा, तपः, यज्ञः, संयमः, विषम, अविषम, एतानि सर्वाणि दण्डस्य बहुस्वरूपाणि । अन्तश्चादिश्च मध्यं च कृत्यानां च प्रपञ्चनं, मदः, प्रमादः, दर्पः, दम्भः, धैर्यं, नयानयौ, अशक्तिः, शक्तिः, मानः, स्तम्भः, व्ययः, अव्ययः, विनयः, विसर्गः, कालाकालौ च दण्डस्य बहुरूपाणि। अनृतं, ज्ञानिता, सत्यं, श्रद्धा, अश्रद्धा, क्लीबता, व्यवसायः, लाभः, अलाभः, जयः, अजयः, तीक्ष्णता, मृदुता, मृत्युः, आगमः, अनागमः, विरोधः, अविरोधः, कार्यम्, अकार्यं, बलं, अबलं, असूया, अनसूया, धर्मः, अधर्मः, अपत्रपानपत्रपे, ह्रीश्च, सम्पत्, विपत् च दण्डस्य बहुरूपाणि । तेजः, कर्माणि, पाण्डित्यं, वाक्शक्तिः, सत्त्वबुद्धिता एवं दण्डस्य बहुरूपता लोकेऽस्मिन् दृश्यते ।

दण्डस्य प्रयोजनानि (benefits of danda)

यदीह न स्यात् दण्डः जनाः परस्परं प्रमथेयुः । दण्डस्य भयात् अन्योन्यं न

घ्नन्ति । अहरहः प्रजाः दण्डेन रक्षमाणाः । तस्मात् दण्डः परायणं राजानं वर्धयन्तीह। क्षिप्रमिमं लोकं व्यवस्थापयति दण्डः । सत्ये व्यवस्थितः धर्मः ब्राह्मणेषु अवतिष्ठते । धर्मयुक्ताः द्विजश्रेष्ठाः देवयुक्ताः भवन्ति । यज्ञः देवेभ्यः बभूव । यज्ञः देवताः प्रीणाति। प्रीताश्च देवताः नित्यमिन्द्रे परिवदन्ति । शक्रश्चापि अन्नं ददाति । इमाः प्रजाः अनुगृह्णाति ।

दण्डो जागर्ति तासु

सर्वभूतानां प्राणाश्च नित्यमन्ने प्रतिष्ठिताः । तस्मात्प्रजाः प्रतिष्ठन्ते । तासु दण्डो जागर्ति ।

प्रजाः रक्षन् जागर्ति

प्रयोजनः दण्डः नित्यं स्ववहितोऽक्षरः प्रजाः रक्षन् क्षत्रियतां गतः जागर्ति।

अष्टभिः नामभिः प्रोच्यते (it is known by eight names)

ईश्वरः, पुरुषः, प्राणः सत्त्वं, चित्तं, प्रजापतिः, भूतात्मा, जीवः इत्येवम् अष्टभिः नामभिः प्रोच्यते ।

राजबलम् (the power of king)

बलेन संयुक्तः सदा पञ्चविधात्मकः राजा । तस्मै धृतमैश्वर्यं दण्डमेव चाददत्। कुलं, बहुधनामात्यः, प्रज्ञा, बलानि, अष्टकैः द्रव्यैः बलमाहार्यम् । हस्तिनः, अश्वाः, रथाः, पत्तिः, नावः, विष्टिः, दैशिकाः, चाविकाश्चाष्टाङ्गबलं स्मृतम् ।

राज्यस्याङ्गं दण्डमेव (danda is part of kingdom)

अङ्गस्य युक्तस्य रथिनः हस्तियायिनः अश्वारोहाः पदाताश्च मन्त्रिणः रसदाश्च भिक्षुकाः प्राड्विवाकाश्च मौहूर्ता दैवचिन्तकाः कोशः मित्राणि धान्यं सर्वोपकरणानि च सप्तप्रकृति चाष्टाङ्गं शरीरमिह विदुः । राज्यस्य दण्डमेवाङ्गं दण्डः प्रभव एव च ।

दण्डोहीदं सनातनम् (danda is very ancient)

ईश्वरेण प्रयत्नेन कारणात् समानात्मा दण्डः क्षत्रियस्य दत्तः । दण्डोहीदं

सनातनम् । राज्ञां पूज्यतमः नान्यः धर्मः यथा प्रदर्शितः, तथा लोकरक्षार्थं स्वधर्मस्थापनाय च भर्तृप्रत्यय उत्पन्नः व्यवहारः तथा अपरः, लोकरक्षार्थं स्वधर्मस्थापनाय च ब्रह्मणा दण्डः उत्पादितः। व्यवहारः, वेदात्मा वेदप्रत्ययः मौलः नरशार्दूलः शास्त्रोक्तः दण्डः असौ भर्तृप्रत्ययलक्षणः नः ज्ञेयः । सः नरेन्द्रस्थः दण्डः भर्तृप्रत्ययलक्षणः ।

वेदविषयात्मकः दण्डः (danda is a subject of veda)

दण्डप्रत्ययोऽपि व्यवहारात्मकः स्मृतः । यः स्मृतः व्यवहारः सः वेदविषयात्मकः। यश्च वेदप्रसूतात्मा स धर्मः गुणदर्शनः । धर्मप्रत्ययः उद्दिष्टः । व्यवहारः प्रजागोप्ता ब्रह्मदिष्टः सत्यात्मा भूतिवर्धनः त्रीन् लोकान् धारयति । व्यवहारश्च दृष्टः यः स वेद इति निश्चितम् । सनातनः व्यवहारः नः यः दृष्टः सः दण्डः । यश्च वेदः स वैधर्मः। यश्च धर्मः स सत्पथः । पितामहः ब्रह्मा पूर्वं बभूव । अथ प्रजापतिः बभूव । व्यवहारोऽयं भर्तृप्रत्ययलक्षणः । तस्मात् व्यवहारनिदर्शनम् । यः स्वधर्मेण तिष्ठति माता पिता भ्राता भार्या पुरोहितश्च नादण्ड्यः विद्यते । प्रजाविनयरक्षार्थं धर्मस्यात्मा सनातनः दण्डः सम्भूतः । भगवन् चिरं ध्यात्वा आत्मानमात्मना दण्डं ससृजे ।

दण्डनीतिः (law for the administration of justice)

धर्मचरणात् सरस्वतीदेवी दण्डनीतिं ससृजे । सा त्रिषु लोकेषु विश्रुता । धर्मेण विभज्य दण्डः कर्तव्यः । न यदृच्छया । दुष्टानां निग्रहः दण्डः । रक्षणार्थकः दण्डोऽयं प्रजाः पालयन् जागर्ति । धर्मवित् भूमिपालः यथान्यायं दण्डेन वर्तेत ।

नीतिशतकम्

मूर्खपद्धतिः

बोद्धारः मत्सरग्रस्ताः । प्रभवः स्मयदूषिताः । अन्ये च अबोधोपहताः । सुभाषितं जीर्णमन्तरङ्गे । अज्ञः सुखमाराध्यः । विशेषज्ञः सुखतरमाराधते ज्ञानलवदुर्विदग्धं नरं ब्रह्मापि न रञ्जयति । मकरवक्त्रदंष्ट्रान्तरात् प्रसह्य मणिमुद्धरेत् । प्रचलदूर्मिमालाकुलं समुद्रमपि सन्तरेत् । कोपितं भुजङ्गमपि शिरसि पुष्पवत् धारयेत् । प्रतिनिविष्टमूर्खजनचित्तं नाराधयेत् ।

मूर्खस्य चित्तं न प्रसादयेत् -

यत्नतः सिकतासु अपि तैलं लभेत । किञ्च पिपासार्पितः मृगतृष्णिकासु सलिलं पिबेत् । पर्यटन् कदाचिदपि शशविषाणमासादये । किन्तु प्रतिनिविष्टमूर्खजनचित्तं नाराधयेत् ।

अत्यन्तदुष्करं मूर्खप्रसादनम् (pleasing a stupid is most difficult)

यः सुधास्यन्दिभिः सूक्तैः मूर्खान् प्रतिनेतुम् इच्छति असौ व्यालं बालमृणालतन्तुभिः रोद्धुं समुज्जृम्भते । शिरीषकुसुमप्रान्तेन वज्रमणिं भेत्तुं सन्नह्यति । क्षाराम्बुधेः मधुबिन्दुना माधुर्यं रचयितुमीहते ।

अपण्डितानां विभूषणं मौनमेव (silence is the ornament of the uneducated)

विधात्रा अपण्डितानां स्वायत्तम् अज्ञातायाः छादनं विशेषतः सर्वविदां समाजे भूषणं मौनं विनिर्मितम् ।

अल्पविद्यो महागर्वी (a person of little learning , is high in arrogence)

अहं यदा किञ्चिद्ज्ञः सन् गज इव मदान्धः समभवं, तदा सर्वज्ञोऽस्मि इति मम मनः अवलिप्ताभवत् । यदा किञ्चित् किञ्चित् बुधजनसकाशात् अवगतं तदा

मूर्खोऽस्मीति ज्वरः इव मे मदः व्यपगतः ।

मूर्खस्यातिनैच्यम् (the wretchedness of the rogue)

श्वा क्रिमिकुलचितं लालाकिलन्नं विगन्धि जुगुप्सितं निरामिषं श्वरास्थिनिरुपमरसप्रीत्या स्वादन् पार्श्वस्थं सुरपतिमपि विलोक्य न शंकते । क्षुद्रः जन्तुः परिग्रहफल्गुतां न गणयति खलु

अविवेकस्यानर्धपरम्परा (succession of calamities for the foolish)

सेयं गङ्गास्वर्गात् शार्वं शिरः, पशुपतिशिरस्तः क्षितिधरम् उत्तुङ्गात् महीध्रात् अवनिं अवनेश्चापि जलधिम् अधस्तोकं पदमुपगता । विवेकभ्रष्टानां शतमुखः विनिपातः भवति ।

मौर्ख्यस्य निवारणे शास्त्राभावं हेत्वाभवं च (there is no science nor reason to control stupidity)

हुतभुक्जलेन वारयितुं शक्यः । सूर्यातपः छत्रेण वारयितुं शक्यः । समदः नागेन्द्रः निशतांकुशेन वारयितुं शक्यः, गौः, गर्दभः दण्डेन वारयितुं शक्यः, व्याधिः भेषजसंग्रहहैः वारयितुं शक्यः, विविधैः मन्त्रप्रयोगैः वारयितुं शक्यः । एवं सर्वस्य शास्त्रविहितं औषधमस्ति । मूर्खस्य नास्ति ।

विद्वत्पद्धतिः

विद्वद्भिः प्रभुसमाश्रयेणैव स्थातव्यम् (the Learning must always be under the patroroge of kings)

शास्त्रोपस्कृत शब्दसुन्दरगिरः शिष्यप्रदेयागमाः विख्याताः कवयः निर्धनाः यस्य प्रभोः विषये वसन्ति तत् वसुधाधिपस्य जाड्यम् । सुधियस्तु अर्थं विनापि समर्थाः । मणयः यैः कुपरीक्षकैः अर्घतः पातिताः ते कुत्स्याः । न मणयः ।

पण्डिताः सर्वदा गौरवेण बहुमाननीयाः (scholars must always be honoured with gifts)

यत् हर्तुः गोचरं नयाति सर्वदा किमपि शं पुष्णाति, अनिशमर्थिभ्यः प्रतिपाद्यमानमपि

परां वृद्धिं प्राप्नोति, कल्पान्तेषु अपि निधनं न प्रयाति, तत् विद्याख्यम् अन्तर्धनं येषामस्ति, तान् प्रति हे नृपाः मानमुज्झत कः तैः सह स्पर्धते ।

पण्डितेषु बहुमानाचरणतत्परत्वेनैव वर्तितव्यम् -

परिगतपरमार्थान् पण्डितान् मा अवमंस्थाः। तृणमिव लघुलक्ष्मीः नैव संरुणद्धि। अभिनवमदरेखा श्यामगण्डस्थलानां वारणानां बिसतन्तुः वारणं न भवति ।

ब्रह्मापि न समर्थः (even Lord Brahma isn't capable)

विधाता कुपितः हंसस्य अम्भोजनीवनविहारविलासमेव हन्तु । दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्य कीर्तिमपहर्तुं न समर्थः ।

वाग्भूषणं भूषणम् (the ornament called speech is the best ornament)

पुरुषं केयूराणि न भूषयन्ति । चन्द्रोज्वलाः हाराः न भूषयन्ति । स्नानं न भूषयति । विलेपनं न भूषयति । कुसुमं न भूषयति । अलंकृताः मूर्धजाः न भूषयन्ति। या संस्कृता धार्यते सा एकवाणी पुरुषं समलंकरोति । अखिलभूषणानि क्षीयन्ते । वाग्भूषणं सततं भूषणं भवति।

विद्याविहीनः पशुः (an uneducated person is similar to an animal)

विद्यानाम नरस्य अधिकं रूपं, प्रच्छन्नगुप्तं धनम् । विद्या भोगकरी, यशस्सुखकरी विद्या गुरूणां गुरुः । विद्या परादेवता । विद्या राजसु पूज्यते, न हि धनम् । विद्याविहीनः पशुः भवति ।

विद्या एव प्रकृष्टैश्वर्यम् (learning is the excellent wealth)

देहिनां क्षान्तिः अस्ति चेत्, कवचेन किं फलम् ? क्रोधः अस्ति चेत् अरिभिः किं फलम् ? ज्ञातिः अस्ति चेत् अनलेन किं फलम् ? सुहृदस्ति यदि दिव्यौषधैः किं फलम् ? दुर्जनाः सन्ति चेत्, सर्पैः किं फलम् ? अनवद्या वद्या अस्ति यदि धनैः किं फलम् ? व्रीडास्ति चेत् भूषणैः किं फलम् ? सुकविता अस्ति यदि राज्येन किं फलम्?

विदुषामेव लोकस्थितिः (the world order lies in Schlors)

स्वजने दाक्षिण्यं, परिजने दया, दुर्जने शाठ्यं, साधुजने प्रीतिः, नृपजने नयः, विद्वज्जने आर्जवं, शत्रुषु शौर्यं, गुरुजने क्षमा, कान्ताजने धृष्टता, एवं कलासु ये च पुरुषाः कुशलाः, तेषु एव लोकस्थितिः अस्ति ।

सज्जनसाङ्गत्यम् (the association of the Learned)

सत्सङ्गतिः पुंसां धियः जाड्यं हरति । वाचि सत्यं सिञ्चति । मानोन्नतिं दिशति । पापम् अपाकरोति । चेतः प्रसादयति । दिक्षु कीर्तिं तनोति । किं न करोति ?

रससिद्धाः कवीश्वराः (poets are those who realised the rasa)

सुकृतिनः रससिद्धाः ते कवीश्वराः जयन्ति । तेषां यशःकाये जरामरणजं भयं नास्ति ।

मानशौर्यपद्धतिः

मानशौर्यसम्पन्नेन भवितव्यम् (one should lead a life of self respect and courage)

मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः मानमहतामग्रेसरः केसरी क्षुत्क्षामः अपि जराकृशः अपि शिथिलप्रायः अपि कष्ठां दशामापनन्नोऽपि विपन्न दीधितीः अपि प्राणेषु नश्यत्सु अपि जीर्णं तृणं नात्ति ।

वाञ्छति सत्त्वानुरूपं फलम् (expects results in conformity to the effort)

श्वा स्वल्पस्नायुवसावसेकमलिनं निर्मांसमपि गोः अस्थि लब्ध्वा परितोषमेति । तत् च तस्य क्षुधाशान्तये न । सिंहः अंकं गतमपि जम्बुकं त्यक्त्वा द्विपं हन्ति । कृच्छ्रगतः अपि सर्वः जनः सत्त्वानुरूपं फलं वाञ्छति ।

नीचानीचजनयोः दृष्टान्तौ (similies for mean and noble persons)

श्वा पिण्डदस्य लाङ्गूलचालनम् अधश्चरणावघातं, भूमौ निपत्यवदनोदरदर्शनं

च कुरुते । गजपुङ्गवस्तु धीरं विलोकयति । चाटुशतैः भुंक्ते ।

मानशौर्यसम्पन्नतया वंशवर्धनः (prosperity of family lies in living with honour)

परिवर्तिनि संसारे मृतः को वा न जायते ? येन जातेन वंशः समुन्नतिं याति, सः जातः ।

मानवतः वर्तनम् (humane)

कुसुमस्तबकस्येव मनस्विनः वृत्तिः द्वयी । सर्वलोकस्य मूर्ध्नि स्थीयते वा वने एव शीर्यते वा।

महत्कार्यमेव कर्तुं व्यवस्यन्ति (they expert to excel)

अन्ये बृहस्पति प्रभृतयः पञ्चषाः सम्भाविः सन्ति । तान् प्रति विशेषविक्रमरुचिः एषः राहुः न वैरायते । भास्वरौ दिवाकरनिशाप्राणेश्वरौ द्वावेव शीर्षावशेष कृतिः दानवपतिः पर्वणि ग्रसते ।

अनन्तं महतां माहात्म्यम् (the greatness of the great is limitless)

शेषः पणाफलकस्थितां भुवनश्रेणिं वहति । स च कमठपतिना मध्ये पृष्ठं सदा धार्यते । तमपि पयोधिः अनादरात् क्रोडाधीनं कुरुते । अहह ! महतां चरित्रविभूतयः नस्सीमानः ।

मानशौर्यशालिनः महत्त्वम् (the greatness of the people of honour and courge)

तुषाराद्रेः सूनोऽपि उद्गच्चद्बहुलदहनोद्गारगुरुभिः समदमघवत् मुक्तकुलिशप्रहारैः प्राणोच्छेदः वरम् । अहह ! पितरि क्लेशविवशे पयसां पत्युः पयसि सम्पातः नोचितः ।

तेजस्वी पुरुषः परकृतनिकृतिं न सहते (a man of respect dosen't accept the help of others)

अचेतनः अपि इनकान्तः सवितुः पादैः स्पृष्टः प्रज्वलति, तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ?

न वयस्तेजसां हेतुः (age is not a reason for honorable)

सिंहः शिशुरपि मदमलिनकपोलभित्तिषु गजेषु निपतति । इयं सत्त्वततां प्रकृतिः । वयः तेजसां हेतुः न भवति ।

अर्थपद्धतिः

मानशौर्ययोः मूलः अर्थः (the basic meaning of honor and course)

जातिः रसातलं यातु । गुणगणः अधः गच्छतात् । शीलं शैलतटात् पततु । अभिजनः वह्निना संदह्यताम् । वैरिणि शौर्ये आशु वज्रं पततु । येन एकेन विना इमे समस्ताः तृणलवप्रायाः । अर्थः केवलं नः अस्तु ।

सर्वे गुणाः काञ्चनमाश्रयन्ति (all qualities reside in wealth)

यस्य वित्तम् अस्ति सः नरः कुलीनः । सः पण्डितः । सः श्रुतवान् । स एव वक्ता। सः दर्शनीयः । सर्वे गुणाः काञ्चनमाश्रयन्ति ।

द्रव्यनाशनकारणानि (reasons for the loss of wealth)

नृपतिः दौर्मन्त्र्यात् विनश्यति । यतिः सङ्गात् विनश्यति । सुतः लालनात् विनश्यति । विप्रः अनध्ययनात् विनश्यति । कुलं कुतनयात् विनश्यति । शीलं खलोपासनात् विनश्यति । ह्री मद्यात् विनश्यति । कृषिः अनवेक्षणात् विनश्यति । स्नेहः प्रवासाश्रयात् विनश्यति । मैत्री अप्रणयात् विनश्यति । धनं तु अतित्यागात् द्यूतात् प्रमादात् च विनश्यति ।

वित्तस्य त्रैविध्यम् (the three ways of wealth)

दानं भोगः नाशः इति वित्तस्य तिस्रः गतयः भवन्ति । यत् न ददाति, न भुंक्ते, तस्य तृतीया गतिः भवति ।

वित्तव्ययं शोभावहम् (spending money is good sign)

शाणउल्लीढः मणिः हेतिदलितः समरविजयी मदक्षीणः नागः शरदि अस्यानपुलिना सरित् कलाशेषः चन्द्रः सुरतमृदिताबालवनिता अर्धिषु गलितविभवाः नराश्च तनिम्ना शोभन्ते ।

धनाभावतत्सद्भाव समयावस्था (equanimity inspite of lacking in money)

कश्चित् परिक्षीणः यवानां प्रसृतये स्पृहयति सः पश्चात् सम्पूर्णः धरित्रीं तृणसमां कलयति । अतः अर्थेषु गुरुलघुतया अनेकान्ता धनिनामवस्था वस्तूनि प्रधयति च संकोचयति च ।

अर्थसाधनोपायः (methods of acquiring wealth)

एतां क्षितिधेनुं दुधुक्षसि यदि तेनाद्यामुं लोकं वत्समिव पुषाण । किञ्च तस्मिन् अनिशं सम्यक् परिपुष्यमाणे भूमिः कल्पलतेव नानाफलं फलति ।

राजनीतेः बहुविधत्वम् (the many sidedners of policy)

राजनीतिः वाराङ्गना इव सत्या, असत्या, परुषा, प्रियभाषिणी, च हिंस्रा दयालुः, अपि च अर्थपरा, वदान्या, नित्यव्ययी, प्रचुरनित्यधनागमः अनेकरीतिः ।

गुणसम्पन्नराजा समाश्रयणीयः (should seek refuge a king of qualities)

पार्थिवः आज्ञा कीर्तिः ब्राह्मणानां पालनं, दानं, भोगः, मित्रसंरक्षणं च एते षट्गुणाः येषां प्रवृत्ताः ते उपाश्रयणीयाः ।

लाभालाभयोः दैवायत्तमूलकत्वम् (gain or loss is due to

धाता स्तोकं महत् वा यत् निजफालपट्टलिखितं तत् मरुस्थलेऽपि अतः अधिकं न प्राप्नोति । तत् धीरः भव । वित्तवत्सु कृपणां वृत्तिं वृधा मा कृधाः घटः कूपे पयोनिधावपि तुल्यं जलं गृह्णाति ।

दुर्जनपद्धतिः (the method of the wicked)

दुरात्मस्वभावः (the nature of the wicked)

अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा, सुजनबन्धुजनेषु असहिष्णुता च इदं दुरात्मनां प्रकृतिसिद्धम् ।

दुर्जनस्य परित्याज्यत्वम् (quitting of the wicked)

दुर्जनः विद्यया अलंकृतोऽपि परिहर्तव्यः । यथा सर्पः मणिना भूषितोऽपि भयंकरः तादृशः दुर्जनः ।

दुर्जनस्य सर्वदूषकत्वम् (all blemishes lie in the wicked)

दुर्जनैः ह्रीमति जाड्यं व्रतशुचौ दम्भः शुचौ कैतवं, शूरे निर्घृणता, मुनौ विमतिता, प्रियालापनि दैन्यं, तेजस्विनि अवलिप्तता, वक्तव्या शक्तिः स्थिरे मुखरता गण्यते । तत् दुर्जनैः यः न अंकितः सः गुणिनां गुणः को नाम भवेत् ?

गुणावगुणप्रणालिका (the method of vice and virtue)

लोभः अस्ति चेत्, अगुणेन किम् ? पिशुनता यद्यस्ति पातकैः किम् ? सत्यमस्ति चेत्, तपसा च किम् ? यद्यस्ति शुचि मनः बलेन किम् ? यद्यस्ति महिमा तीर्थेन किम्? यद्यस्ति सौजन्यं मण्डनैः किम् ? यद्यस्ति सद्विद्या धनैः किम् ? यद्यस्ति अपयशः मृत्युना किम् ?

निजकष्टाभिवेदनम् (expressing one's difficulities)

दिवस धूसरः शशी, गतयौवनाकामिनी, विगतवारिजं सरः, सु आकृतेः अनक्षरं मुखं, धनपरायणः प्रभुः, सततदुर्गतिः सज्जनः, नृपाङ्गणगतः खलः, सप्तचेमे मे मनसि शल्यानि ।

दुष्टराजलक्षणम् (the quality of a wicked king)

चण्डकोपानां भूभुजां कश्चित् आत्मीयः नास्ति खलु । जुह्वानमपि होतारं पावकः स्पृष्टःसन् दहति ।

सेवायाः दुष्करत्वम् (to serve is very difficult)

मौनात् मूकः भवति । प्रवचनपटुः वाचकः जल्पको वा भवति । पार्श्वे वसन् च धृष्टः भवति । दूरतः वसन् अपि अप्रगल्भः भवति । क्षान्त्या भीरुः भवति । यदि न सहते प्रायशः अभिजातः न भवति । परमगहनः सेवाधर्मः योगिनामपि अगम्यः ।

न नीचाश्रयः कर्तव्यः (shouldn't approach the crooked)

उद्भासिताखिलखलस्य विशृङ्खलस्य प्रोद्गाढविस्मृतनिजाधमकर्मवृत्तेः दैवादवाप्तविभवस्य गुणद्विषः अस्य नीचस्य गोचरगतैः कैः सुखमास्यते ? अतः न नीचाश्रयः कर्तव्यः ।

दुर्जनसुजनमैत्रीरीतिः (the method of friendship of good and evile persons)

खलसज्जनानां मैत्री दिवस्य पूर्वार्धपरार्धभिन्ना छायेव आरम्भगुर्वी क्रमेण क्षयिणी, पुरा लघ्वी पश्चात् वृद्धिमुपैति ।

निर्हेतुकमेव विद्वेषिणः (harted without any reason)

तृणजलसन्तोषविहितवृत्तीनां मृगमीनसज्जनानां लुब्धकधीवरपिशुनाः जगति निष्कारणमेव वैरिणः।

सुजनपद्धतिः

निर्मलगुणसम्पन्नैः अलंकृता भू (the world is ornamented with persons of noble qualities)

सज्जनसङ्गतौ वाञ्छा परगुणे प्रीतिः, गुरौ नम्रता, स्वयोषिति रतिः, लोकापवादात् भयं, शूलिनि भक्तिः, आत्मदमने शक्तिः, खलैः संसर्गमुक्तिः, एते निर्मलगुणाः येषु वसन्ति, तेभ्यः महद्भ्यः नमः कुर्महे ।

सज्जनस्य स्वभावसिद्धगुणाः (the natural qualities of a nable person)

विपदि धैर्यम्, अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि अभिरतिः, श्रुतौ व्यसनम् इदं महात्मनां प्रकृतिसिद्धं खलु ।

महतां मण्डनमिदम् (this is the emblishment of the great people)

करे श्लाघ्यः त्यागः, शिरसि गुरुपादप्रणयिता, मुखे सत्या वाणी, भजयोः अतुलं विजयवीर्यम्, हृदि स्वच्छावृत्तिः, श्रवणयोः अधिगतं श्रुतम्, इदं सर्वं महतां स्वतस्सिद्धमाभरणम्।

श्रेयसामेषपन्थाः (the path of the virtuous)

प्राणाघातात् निवृत्तिः, परधनहरणे संयमः, सत्यवाक्यं, काले शक्त्या प्रदानं, परेषां युवति जनकथामूकभावः, तृष्णाश्रोतो विभङ्गः, गुरुषु विनयश्च, सर्वभूतासु कम्पा, सर्वशास्त्रेषु सामान्यम् अनुपहतविधिः एषः श्रेयसां पन्थाः ।

आपत्सम्पदोः सुजनमनोवृत्तिः (the mind of the great during difficulties and happiness)

सम्पत्सु महतां चित्तम् उत्पलकोमलं भवेत् । किञ्च आपत्सु महाशैलशिलासङ्घितकर्कशं भवेत् ।

सुजनजीवनम् (the life of the noble)

न्याय्या वृत्तिः प्रिया । अनुभङ्गेऽपि मलिनम् अनुकरम्, असन्तस्तु नाभ्यर्ध्याः, सुहृदपि कृशधनः न याच्यः विपदि इच्छैः धैर्यं महतामनुविधेयं पदमिदं विषयम् असिधारातं सतां केनोद्दिष्टम् ? प्रच्छन्नं प्रदानं गृहमुपगते सम्भ्रमविधिः प्रियं कृत्वा, मौनम्, अपि च सदसि उपकृतेः कथनं लक्ष्म्याम् अनुत्सेकः निरभिभवसाराः परकथाः सतां केनोपदिष्टाः ?

कर्तव्यो महदाश्रयः (should seek refuge of the great)

सन्तप्तायसि संस्थितस्य पयसः नामापि न श्रूयते । तदेव नलिनीपत्रस्थितं सत्, मुक्ताकारतया दृश्यते । तदेव अन्तस्सागरशुक्तिमध्यपतितं सत् मौक्तिकं जायते। प्रायेणाधममध्यमोत्तमजुषां वृत्तयः एवं विधाः ।

सत्पुत्रकलत्रसम्पत्तिः पुण्यकृदधीना (goodson, goodwife and wealth are caused by punya)

यः सुचरितैः पितरं प्रीणयेत् सः पुत्रः । यत् भर्तुः एव हितमिच्छति तत् कलत्रं यदापदि सुखे च समक्रियं तत् मित्रं भवति । एतत् त्रयं जगति पुण्यकृतो लभन्ते ।

सतामसाधारणगरिमा (the magnanimity of the noble)

नम्रत्वेनोन्नमन्तः, परगुणकथनैः स्वान् गुणान् ख्यापयन्तः परार्धे विततपृथुतरारम्भयत्नाः, स्वार्धान् सम्पादयन्तः, आक्षेपरूक्षाक्षरमुखरमुखान् दुर्जनान् क्षान्त्या एव दुःखयन्तः साश्चर्यचर्याः सन्तः जगति बहुमताः सर्वैः अभ्यर्चनीयाः ।

परोपकारपद्धतिः

परोपकारिणां स्वभावः (the nature of helpers)

तरवः फलोद्गमैः नम्राः भवन्ति । घनाः नवाम्बुभिः दूरविलम्बिनः भवन्ति । सत्पुरुषाः समृद्धिभिः अनुद्धताः भवन्ति । परोपकारिणामेषः स्वभावः एव ।

करुणापराणां मुख्यमण्डनसम्पत्तिः (the chief ornament of the compassionate)

दयालुनां श्रोत्रं श्रुतेन एव विभाति । कुण्डलेन न । पाणिः दानेन विभाति । न तु कंकणेन । कायः परोपकारेण विभाति । न तु चन्दनेन । महात्मनां श्रवणादिकमेव स्वाभाविकमण्डनम् ।

सज्जनैः हिताचरणम् (the meritorious act of the good people)

दिनकरः नाभ्यर्धितः अपि पद्माकरं विकचं करोति । चन्द्रः अनभ्यर्धितः अपि कैरवचक्रवालं विकासयति । जलधरः अनभ्यर्धितः अपि जलं ददाति । सन्तः स्वयं परहिते विहिताभियोगाः अतः युक्तमेनं हिताचरणम् ।

व्यापारतारतम्येन पुरुषाणां भेदः (difference in men due to difference of activity)

ये स्वार्धान् परित्यज्य परार्धघटकाः, एते सत्पुरुषाः । ये तु स्वार्धाविरोधेन परार्धम् उद्यमभृतः ते तु सामान्याः मध्यमाः । ये स्वार्धाय परहितं विघ्नन्ति, ते अमी मानुषराक्षसाः । ये तु निरर्धकं परहितं निघ्नन्ति ते के इति न जानीमहे ।

सन्मित्रलक्षणम् (the qualities of a good friend)

पापात् निवारयति । हिताय योजयते गुह्यं निगूहति । गुणान् प्रकटीकरोति। आपद्गतं च न जहाति । काले ददाति । इदं सन्तः सन्मित्रलक्षणं प्रवदन्ति ।

क्षीरनीरसदृशाः सन्मित्राणि (good friends that are like water and milk)

क्षीरेणात्मगतोदकाय पुरा ते अखिलाः गुणाः दत्ताः खलु । क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृषानौ हुतः । तत्तु मित्रापदं दृष्ट्वा पावकं गन्तुमुन्मनः अभवत्। तेन जलेन युक्तं सत् रौद्युति । सतां मैत्री ईदृशी ।

सत्पुरुषाणां माहात्म्यम् (the significance of having good friends)

केशवः इतः स्वपिति । इतः तदीयद्विषां कुलम् अस्ति । इतश्च शरणार्थिनां शिखरिणां गुणाः शेरते । इतोऽपि अन्यत्र च समस्तसंवर्तकैः सह बडबानलः अस्ति। सिन्धोः वपुः विततमूर्जितं भरसहं चाभवत् ।

परहिताचरणपराकाष्ठया जन्मसफलम् (the worthiners of life due to extreme helping nature)

येन पुथुभुवनभाराय पृष्टमर्पितं पुथुपृष्टं, सः कूर्मनाथः एकः एव जातः । यत्र तेजस्वि चक्रं नियमितं सत् भ्रमति सः धृवस्य जन्म श्लाघ्यम् । इतरे जन्तवः परहितकरणे सञ्जातव्यर्थपक्षाः उपरिष्ठात् न, अधश्च न। उदुम्बर ब्रह्माण्डोऽन्तः मशकवत् जातनष्टाः ।

सतां चेष्टितम् (the acts of the noble)

तृष्णां छिन्दि क्षमां भज । मदं जहि । पापे रतिं मा कृधाः । सत्यं ब्रूहि । साधुपदवीम् अनुयाहि । विद्वत् जनं सेवस्व । मान्यान् मानय । विद्विषः अपि अनुनय। प्रश्रयं प्रख्यापय । स्वान् गुणान् प्रच्छादय । कीर्तिं पालय । दुःखिते दयां कुरु । एतत् सतां चेष्टितम् ।

सत्पुरुषाः विरलाः (good people are scarce)

मनसि वचसि काये पुण्यपीयूषपूर्णाः त्रिभुवनं उपकारश्रेणिभि प्रीणयन्तः परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्तः कियन्तः सन्ति ?

धैर्यपद्धतिः

आफलोदयं प्रयतन्त एव (efforting until obtaining the result)

देवाः महाब्धेः रत्नैः न तुतुषुः । भीमविषेण भीतिं न भेजिरे । सुधां विना विरामं न प्रययुः । धीराः निश्चितार्थात् न विरमन्ति ।

प्रारब्धं न परित्यजन्ति (willnot abondon that which was started)

नीचैः विघ्नभयेन न प्रारभ्यते । मध्याः प्रारभ्य विघ्नविहताः सन्तः विरमन्ति। उत्तमगुणाः विघ्नैः मुहुर्मुहुः प्रतिहन्यमानाः अपि प्रारब्धं न परित्यजन्ति ।

कार्यसाधकस्य सुखदुःखयोः अपरिगणनम् (man of action doesn't corides pain or pleasure)

क्वचित् पृथ्वीशय्यः, क्वचित् च पर्यंकशयनः अपि, क्वचित् शाकाहारः, क्वचित् च शाल्योदनशुचिः अपि, क्वचित् कन्धाधारी, क्वचित् च दिव्याम्बरधरः अपि, कार्यार्धी मनस्वी दुःखं च न गणयति सुखं च न गणयति ।

धीराः नीतिमार्गात् न भ्रश्यन्ति (the brave dosen't leave the path of morality)

नीतिनिपुणाः निन्दन्तु । यदि वा स्तुवन्तु । लक्ष्मीः समाविशतु । यथेष्टं गच्छतु वा । मरणमद्य एव वा, युगान्तरे वा अस्तु । धीराः न्याय्यात् मार्गात् पदं न प्रविचलन्ति ।

धीरस्य लक्षणम् (the quality of the brave)

यस्य चित्तं कान्ताकटाक्षविशिखाः न श्वनन्ति । कोपकृशानुतापः न निर्दहति भूरिविषयाश्च लोभपाशैः न तर्षन्ति, सः धीरः कृत्स्नं लोकत्रयं जयति ।

धैर्यगुणन्यक्कारः कथञ्चिदपि न युज्यत (the quality of courge is always praise worthy)

कदर्धितस्यापि धैर्यवृत्तेः धैर्यगुणः प्रमार्षुं न शक्यते । अधो मुखस्य कृतस्यापि वह्नेः शिखा कदाचिदेव अधः न याति ।

मरणोद्योगो वा वरं न तु शीलविलयः (death is better than lose of character)

अयं कायः गुरुशिखरिणः तुङ्गात् शृङ्गात् क्वापि विषमे कठिनदृषदन्ते पतित्वा विदलितः वरम् । हस्तः तीक्ष्णदशने फणिपतिमुखे न्यस्तः वरं वह्नौ पातः वरम् । तदपि शीलविलयः न वरम् ।

शीलसम्पन्नस्य दुःखहेतवः अपि सुखहेतवः एव (for the man of character , even the causes of pain turn to causes of happiness)

यस्याङ्गे, अखिललोकवल्लभतमं शीलं समुन्मीलति, तस्य वह्निः जलायते। जलनिधिः कुल्यायते । तक्षणात् मेरुः स्वल्पशिलायते । मृगपतिः सद्यः कुरंगायते । व्यालः माल्यगुणायते । विषरसः पीयूषवर्षायते ।

शीलवतां कदापि सन्तापः न प्रवर्तत (for the man of character ,there is never unhappiners)

तरुः छिन्नः अपि पुनः रोहति । चन्द्रः क्षीणः अपि पुनः उपचीयते । इति विमृशन्तः सन्तः लोके विप्लुताः सन्तः न सन्तप्यन्ते ।

शीलं परं भूषणम् -

ऐश्वर्यस्य सुजनता विभूषणम् । शौर्यस्य वाक्संयमः विभूषणम् । ज्ञानस्य उपशमः भूषणम् । श्रुतस्य विनयः विभूषणम् । वित्तस्य पात्रे व्ययः विभूषणम् । तपसः अक्रोधः विभूषणम् । प्रभवितुः क्षमा विभूषणम् । धर्मस्य निर्व्याजता विभूषणम्। सर्वकारणमिदं शीलं सर्वेषामपि परं भूषणम् ।

दैवपद्धतिः

पौरुषात् बलं दैवमेव (the will of God is greater than the human effort)

यस्य नेता बृहस्पति, प्रहरणं वज्रं, सैनिकाः सुराः, दुर्गं स्वर्गः, अनुग्रहः हरेः खलु । वारणः ऐरावणः इति आश्चर्यबलान्वितः अपि बलभित् सङ्गरे परैः भग्नः ।

तत् व्यक्तं दैवमेव शरणं खलु। वृथा पौरुषं निन्द्यम् ।

बन्धमोक्षयोः हानिवृद्ध्योश्चापि दैवमेव कारणम् (god alone is the reason for binding and freedom , and for development and decay)

आखुः नाम मूषिकः नक्तं विवरं कृत्वा, भग्नाशस्य करण्डपिण्डिततनोः क्षुधा म्लानेन्द्रियस्य भोगिनः मुखे स्वयमेव निपतितः । असौ सर्पः तत्पिशितेन नाम मूषिकस्य मांसेन तृप्तः सन् तेन पधा एव सत्वरं यातः स्वस्थाः तिष्ठत । हि वृद्धौ क्षये दैवमेव परं कारणम् । नान्यत्।

दैवायतिकतदन्ययोरवस्था (everything is Gods will)

आर्यः पतन् अपि कन्दुकपातेन उत्पतति । अनार्यस्तु मृत्पिण्डपतनं यथा पतति तथा ।

दैवोपहतस्य न कुत्रापि सुखप्राप्तिः (there is no solace for cne rejected by God)

खर्वाटः दिवसेश्वरस्य किरणैः मस्तके सन्तापिते अनातपं देशं वाञ्छन् विधिवशात् तालवृक्षस्य मूलं गतः । तत्रापि पतता महाफलेन अस्य शिरः स शब्दं भग्नं जातम्। दैवहतकः यत्र गच्छति तत्र एव आपदः प्रायः यान्ति ।

दैवमेव बलीय (divine will is storng)

गजभुजङ्गविहङ्गमबन्धनं शशिदिवाकरयोः ग्रहपीडनं मतिमतां दरिद्रतां च विलोक्य, अहो विधिः बलवान् इति मे मतिः ।

विधेरप्यज्ञता स्यात् (ignorance is also caused by fate)

विधिः अशेषगुणाकरं भुवः अलंकरणं पुरुषरत्नं सृजति तावत् तदपि तत् क्षणभङ्गि करोति चेत् विधेः अपण्डितता अहह कष्टम् ।

कथञ्चिदपि दैवयोगो न लङ्घ्यः (the supreme will cannot be overcome)

अयं चन्द्रः अमृतनिधानम् ओषधीनां नायकः अपि शतभिषगनुयातः शम्भुमूर्ध्नः

अवतंसः । किञ्च एवं शशांकं हाजयक्ष्मा न च विरहयति । हतविधि ! परिपाकः केन वा लङ्घनीयः ?

भ्रमयति चिन्ताचक्रम् (the wheel of sorrow rotetas)

खलः विधिः प्रगल्भकुलालवत् अस्मन्मनः मृगमिव बलात् पिण्डीकृत्य विपद्दण्डाघातप्रपातपरम्परापरिचयबले चिन्ताचक्रे निधाय भ्रमयति । अत्र किं विधास्यति न जानीमः।

धीरधैर्यध्वंसन मतिदुष्करम् (destruction of those courageous and brave is impossible)

अयि जडविधे ! विपदि महतां धैर्यध्वंसमीक्षितुमीहसे इति यत् आयासात् अस्मात् दुरध्यवसायतः विरम विरम । एते कुलशिखरिणः जलराशयः वा कल्पापायेऽपि अपेतनिजक्रमाः क्षुद्राः न ।

दैवमेव शरणम् (god alone is the refuge)

प्रभुणा दैवेन जगति यस्य यत् प्रमाणीकृतं तस्य तत् स्वयमुपनमेत् । महान् आश्रयः किञ्चिदपि कारणं नैव । सर्वाशापरिपूरके जलधरे प्रत्यहं वर्षति सत्यपि चातकस्य मुखे सूक्ष्माः द्वित्राः पयः बिन्दवः पतन्ति ।

कर्मपद्धतिः (the method of Action)

विधेः कर्मणः प्राबल्यम् (action is powerful than fate)

दैवान् नमस्यामः । तेऽपि हतविधेः वशगाः । अतः विधिः वन्द्यः । सोऽपि प्रतिनियतकर्मैकफलदः । फलं कर्मायत्तम् । तस्मात् अमरगणैः किम् ? विधिना च किम् ? तस्मात् येभ्यः विधिरपि न प्रभवति तेभ्यः कर्मभ्यः नमः ।

कर्मणः प्राधान्यम् (importance of action)

येन कर्मणा ब्रह्मा ब्रह्माण्डभाण्डोदरे कुलालवत् नियमितः विष्णुः महासंकटे दशावतारगहने क्षिप्तः । येन रुद्रः कपालपाणिपुटके भिक्षाटनं सेवते । येन सूर्यः गगने नित्यं भ्राम्यति, तस्मै कर्मणे नमः ।

कर्मणः उपादेयता (the acceptance of the result of action)

या सत्क्रिया तत्क्षणात् खलान् च साधून् करोति । मूर्खान् विदुषः करोति, द्वेषिणः हितान् करोति, परोक्षं प्रत्यक्षं करोति, तां सत्क्रियां भगवतीं हे साधो ! वाञ्छितं फलं भोक्तुमाराधय । व्यसनैः विपुलेषु गुणेषु व्यर्थासक्तिं मा कृधाः ।

वृद्धिहान्योरपि कर्ममूलकत्वमेव (growth or decay are caused by action alone)

शुभे कर्मणि चिरम् अनुन्यूते सति शुभ्रं सद्म सविभ्रमाः युवतयः श्वेतातपत्रोज्ज्वला लक्ष्मीः इति अनुभूयते । विच्छिन्ने सति नितरामनङ्गकलहक्रीडात्रुटत्तन्तुकं मुक्ताजालमिव झटिति दिशः भ्रण्यत् अदृश्यता प्रयाति ।

कर्माचरण प्रकारमाह (explains the method of performing action)

गुणवत् वा अगुणवत् कार्यं कुर्वता पण्डितेन परिणतिः आदौ यत्नतः अवधार्या। अतिरभसकृतानां कर्मणाम् विपत्तेः शल्यतुल्यः हृदयदाही विपाकः भवति ।

सर्वदा सत्कर्मानुष्ठेयं श्रेयस्कामेव (for one's welfare one should always perform good actions only)

इमां कर्मभूमिं प्राप्य मन्दभाग्यः यः मनुजः तपः न भजति सः वैढूर्यमय्यां स्थाल्यां चन्दनैः इन्धन ओघैः चन्दनाद्यैः इन्धनैः तिलखललीं पचति । सौवर्णैः अग्रैः अर्कतालस्य हेतोः अर्कमूलस्य हेतोः वसुधां विलिखति । कर्पूरखण्डा छित्वा, को द्रवाणां समन्तात् वृत्तिमिह कुरुते ।

पुण्यविशेष एव सफलम् (success is nothing best the remnament of punya)

आकृतिः न एव फलति । कुलं नैव फलति । शीलं नैव फलति । विद्यापि नैव फलति । पूर्वतपसा सञ्चितानि पुरुषस्य भाग्यानि वृक्षाः इव परिपाककाले एव फलन्ति खलु ।

यद्भावि तद्भवत्येव यदभावि न तद्भवेत् (that which should happen, hap-

pens that which shouldn't doesn't)

पुरुषः अम्भसि मज्जतु । मेरुशिखरं यातु । युद्धे शत्रून् जयतु । वाणिज्यं कृषिसेवनादि सकलाः विद्याः कलाः शिक्षताम् । वरं प्रयत्नं कृत्वा खगवत् विपुलम् आकाशं प्रयातु । भाग्यवशतः इहाभाव्यं न भवति । भाव्यस्य नाशः कुतः ?

अतिसंकटस्थस्यापि प्राचीनपुण्यसद्भावे तु न क्षतिः (no harm takes place even for one placed in extreme difficulty , if he has previous accrred punya)

वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा सुप्तं प्रमत्तं विषमस्थितं वा पुराकृतानि पुण्यानि रक्षन्ति ।

सुकृतिनः सर्वमानुकूल्यमेव (everything is favourable for the pure souls)

यस्य नरस्य विपुलं पूर्वसुकृतमस्ति, तस्य भीमं वनं प्रधानं पुरं भवति । सकलभोगसाधकं भवति । तस्य सर्वः जनः सुजनतामुपयाति । तस्य कृत्स्ना च भूश्च सन्निधिरत्नपूर्णा भवति ।

नीतिवाक्यामृतम्

राजनीतिः (polity)

राज्ञः राज्यस्य चात्यन्तफलदायकाः धर्मार्थकाममोक्षाख्याः चतुर्विधपुरुषार्थाः एव। ऐहिकाभ्युदयदायकः, पारलौकिकसिद्धदायकश्च धर्म एव । एतद्विपरीतफलः अधर्मः। आत्मवत् सर्वत्र कुशलवृत्तिचिन्तनं, यथाशक्तितः यागदानतपसामाचरणं च धर्माधिगमोपायाः । सकलप्राणिषु समता, सर्वाचाराणां परमाचरणं भवति। प्राणिद्रोहकारणभूता कृता क्रियमाणा करिष्यमाणा कापि क्रिया श्रेयोदायका न भवति । इतरेषामजिघांसुमनसां व्रतरिक्तमपि चित्तं स्वर्गं ददाति । आत्मनः दौःस्थित्यत्यागः देशत्यागाय भवति । परस्य दौःस्थित्यं जानन्नपि तस्मादर्थं यः अभिलषति स शत्रुः एव।शरीरमनसोःअनर्थं स्यादिति संशयस्य अवकाशरहितं व्रतमेवाचरणीयम्। त्यागः नाम ऐहिकामुत्रिकफलार्थं धनव्ययः । अपात्रेषु अर्थव्ययः भस्मनि होमाचरणमेव।

पात्रत्रयम्

धर्मपात्रं, कार्यपात्रं, कामपात्रं चेति त्रिविधं पात्रम् । आश्रितानान् न बिभर्ति, अधर्मं न प्रतिऋणद्धि कीर्तिः व्यर्था एव । शरणागतानामसंविभागःअर्थः न खलु कस्यापि । अर्थस्य हि द्वे फले विद्येते । अर्थिषु संविभागः, स्वयमुपभोगश्च। एकान्तलुब्धस्याचौचित्यं नास्ति । औचित्यं नाम दानप्रियवचनाभ्यामन्यस्य सन्तोषोत्पादनम् । आत्मनः धनं सत्सु विनियोगात् आत्मना सह जन्मान्तरेषु यः नयति स एव लुब्धः । अदातुः प्रियालापः अन्यस्य लाभस्यान्तरायः । सदा दुःस्थितानां बन्धुः कः ? नित्यमर्थयमानं दृष्ट्वा सर्वैरपि उद्विजन्ते । तपः नाम इन्द्रियमनसोः नियमानुष्ठानम्। नियमो नाम विहिताचरणं निषिद्धपरिवर्जनञ्च। विधिनिषेधौ हि एतह्यायातौ। यत्र न प्रमाणबाधा, पूर्वापरविरोधो वा तत् सद्भिः श्रद्धेयम्। अनियमितेन्द्रियमनोवृत्तीनामनुष्ठानं गजस्नानमिव विफलं भवति।

धर्माधर्मौ

स्वयमनाचरतः ज्ञानं दुर्भगाभरणमिव केवलं देहखेदावहमेव। कथक इव परस्य

धर्मोपदेशकाः लोके बहवः सन्ति। परोपदेशवेलायां सर्वेऽपि पराशराः एव। प्रतिदिनेऽपि किमपि नियमेन प्रयच्छतः तपस्यतो वा महीयांसः परे लोकाः नाम उत्तमलोकाः अवश्यं भवन्ति। कालेन सञ्चीयमानः परमाणुरपि मेरुः जायते। प्रतिदिनं लवोऽपि धर्मश्रुतधनानां संगृह्यमाणः समुद्रादपि अधिकः भवति। सर्वदा धर्मविषये अजाग्रतामात्मवञ्चनं भवति। एकदैव पुण्यराशिः कस्य सम्पद्यते ? कस्यापि न सम्पद्यते। स्वयमनाचरतां मनोरथाः स्वप्नराज्यसमाः एव । पूर्वजन्मकृतधर्मफलमनुभवतोऽपि अनात्मज्ञः अधर्मानुष्ठानं करोति। कः सुधीः भेषजमिवात्महितं धर्मं परोपरोधादनुतिष्ठति। सुधीः स्वयमेवाचरति। धर्मानुष्ठाने अप्रार्थितमपि इतरे प्रातिलोम्यं कल्पयन्ति। अधर्मकर्मणि उपाध्यायाः बहवः सन्ति।

कुशलमतयः

कुशलमतयः प्राणैः कण्ठगतैरपि अशुभं कर्म न समाचरन्ति। स्वस्वलाभेभ्यः धूर्ताः दुरीहितवृत्तयः क्रियन्ते श्रीमन्तः। खलसहवासः अनर्थं करोति। दुर्जनाः अग्निरिव स्वाश्रयमेव दहन्ति। वनगज इव तदात्वसुखलुब्धः को नाम न भवति आस्पदमापदाम्? धर्मातिक्रमात् लब्धिं धनादिं भार्यापुत्रमित्रादयः अनुभवन्ति। पापस्य तु स्वयमेव यथा सिंह इव। गजहननपापं सिंहस्य भवति। मांसभक्षकाः इतरजन्तवः एव।

धर्मसमुद्देशः

बीजभोजिनः कुटुम्बिन इव अधार्मिकस्य शुभं नास्ति। यः कामार्थौ त्यक्त्वा धर्ममेवीपास्ते, सः पक्वं क्षेत्रं परित्यज्य उषरं भूमिं कृषति। अमुत्र सुखाविरोधेन यः सुखमनुभवति, स एव सुखी। अत्र परमाश्चर्यं किमित्युक्ते अन्यायसुखलवात् इहामुत्र च अनवधिः दुःखानुबन्धः। सुखदुःखादिभिः प्राणिनामुत्कर्षापकर्षौ धर्माधर्मयोः लिङ्गं नाम चिह्नम्। जगत्सर्वं स्वाधीने उपस्थाप्य, पाति अदृष्टम्। अधिकारः सर्वदा अदृष्टस्यैव, नत्वन्यस्य। इति धर्मसमुद्देशः।

अर्थः (wealth)

अर्थो नाम सर्वप्रयोजनसिद्धिदायकः। अर्थः अर्थानुबन्धेन अर्थस्य भाजनमर्थमनुभवति। अलब्धलाभः, लब्धपरिरक्षणं, रक्षितविवर्धनं, वृद्धस्य तीर्थेषु प्रतिपादनञ्च अर्थानुबन्धः। तीर्थमर्थे नासम्भावयन् मधुच्छत्रमिव सर्वात्मना विनश्यति।

धर्मसमवायिनः, कार्यसमवायिनश्च पुरुषाः तीर्थम्। तादात्विकमूलहरकदर्येषु नासुलभः प्रत्यवायः। यः किमपि असञ्चिन्त्य उत्पन्नमर्थमपव्ययति सः तादात्विकः। यः पितृपैतामहमर्थम् अन्यायेन भक्षयति सः मूलहरः। यः भृत्यात्मपीडाभ्याम् अर्थं सञ्चिनोति सः कदर्यः। नाम लोभिः। तादात्विकमूलहरयोः आयत्यां कल्याणं नास्ति। कदर्यस्यार्थसङ्ग्रहः राजदायादतस्कराणामन्यतमस्य निधिः इति **अर्थसमुद्देशः**।

कामसमुद्देशः (lawful)

अभिमानिकरसानुविद्धा यतः सर्वेन्द्रियप्रीतिः सः कामः। धर्मार्थाविरोधेन कामं सेवेत। न निस्सुखः स्यात् अथवा धर्मार्थकाम इति त्रिवर्गं समं सेवेत। एको हि अधिकतया सेवितः धर्मार्थकामानाम् आत्मानम् इतरौ च पीडयति। परार्थं भारवाहिन इव आत्मसुखं निरुन्दानस्य धनोपार्जनम्। ऐश्वर्यस्य प्रयोजनं किमित्युक्ते, इन्द्रियमनःप्रसादनसफलाविभूतयः एव। अजितेन्द्रियस्य न कापि कार्यसिद्धिः। इष्टे अर्थे अनासक्तिः, विरुद्धे चार्थे अप्रवृत्तिः इन्द्रयजयः इत्युच्यते। अर्थशास्त्राध्ययनेन इन्द्रियजयः स्यात्। यः अनङ्गेनापि जीयते सः कथं पुष्टाङ्गान् अरीन् जयेत्, कामासक्तस्य चिकित्सितं नास्ति। स्त्रीषु अत्यासक्तिः यस्यास्ति न तस्य धनं, धर्मः, शरीरं वा सिध्यति। विरुद्धकामवृत्तिः समृद्धोऽपि न चिरं नन्दति। धर्मार्थकामानां युगपत्समवाये पूर्वः पूर्वो गरीयान्। कालसहत्वे पक्षे धर्मकामयोः अर्थमूलत्वात् अर्थस्यैव प्राधान्यं भवति। इति कामसमुद्धेशः।

अरिषड्वर्गः (the six internal enemies)

अयुक्तितः प्रणीताः कामक्रोधलोभमोहमदमानहर्षाः क्षितीशानामन्तरङ्गो अरिषड्वर्गः। परभार्यासु अविवाहितासु स्त्रीषु च दुरभिप्रायः कामः। अविचार्य परस्यात्मनो वा अपायहेतुः क्रोधः। दानार्हेषु स्वधनाप्रदानम् अकारणं वा परधनग्रहणं लोभः। कुलबलैश्वर्यरूपविद्याभिः आत्माहङ्कारकरणं परप्रधर्षणनिबन्धनं वा मदः। दुरभिनिवेशामोक्षः यथोक्ताग्रहणं वा मानः। निर्निमित्तमन्यस्य दुःखोत्पादनेन स्वस्यार्थसञ्चयेन वा मनः प्रतिरञ्जनः हर्षः। इति अरिषड्वर्गसमुद्देशः।

विद्यावृद्धः (aged by Learning)

अनुकूलप्रतिकूलयोः इन्द्रः, यमश्च यः स एव राजा। दुष्टशिक्षणं, शिष्टरक्षणञ्च राजधर्मः। शिरोमुण्डनं, जटाधारणादिकं वा न तु राजधर्मः। राज्यं नाम राज्ञः पृथिवीपरिपालनोचितं कर्म। वर्णश्रमवतीधान्यहिरण्यपशुलोहजीविकफलदा पृथिवी। ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राश्च वर्णाः। ब्रह्मचारी, गृहस्थः, वानप्रस्थः, यतिः इत्याश्रमाः। यः वेदमधीत्य स्नायात् सः उपकुर्वाणकः ब्रह्मचारी। स्नानं नाम विवाहदीक्षाभिषेकः। यस्य प्राणान्तिकमदारकर्म सः नैष्ठिकः ब्रह्मचारी। यः उत्पन्नः पुनीते वंशं सः पुत्रः। अपुत्रः पुमान् पितृणाम् ऋणभाजनम्। अनध्ययनः ब्रह्मणः ऋणभाजनम्। अयजनः देवानाम् ऋणभाजनम्। अहन्तकारः नाम अदानकर्ता मनुष्याणाम् ऋणभाजनम्। नैष्ठिकब्रह्मचारिणः आत्मा एव पुत्रः। अयं हि आत्मनि आत्मानम् आत्मनि सन्दधानः परमपवित्रतां प्रतिपद्यते। नित्यनैमित्तिकानुष्ठानस्थो गृहस्थः।

गृहस्थः

नित्यनैमित्तिकानुष्ठानस्थो गृहस्थः। ब्रह्मयज्ञ - देवयज्ञ - पितृयज्ञ - अतिथियज्ञ - भूतयज्ञानामनुष्ठानं नित्यानुष्ठानम्। दर्शपौर्णमासादियागानामनुष्ठानं नैमित्तिकानुष्ठानम्। वैवाहिकः, शालीनः, यायावरः, अधोराः इति गृहस्थाः चतुर्विधाः।

वानप्रस्थः

जानपदमाहारं, संसारव्यवहारं च यथाविधं परित्यज्य सकलत्रः अकलत्रो वा वने यः प्रतिष्ठते सः वानप्रस्थः। वालखिल्यः, औदुम्बरः, वैश्वानरः, सद्यः प्रक्षल्यकः इति वानप्रस्थाः चतुर्विधाः।

यतिः

यः सम्यक् विद्या नौ लाभेन तृष्णासरित्तरणाय योगाय यतते सः यतिः। कुटीरक, बहूदक, हंसपरमहंसाश्चेति यतयः चतुर्विधाः। पैत्रृपैतामहक्रमः पराक्रमश्च राज्यस्य मूलम्। आचारसम्पत्तिः क्रमसम्पत्तिं करोति। अनुत्सेकः नाम गर्वराहित्यं विक्रमस्यालङ्कारः। क्रमविक्रमयोः अन्यतरमात्रपरिग्रहेण राज्यस्य दुष्करपरिणामः।

क्रमविक्रमयोः अधिष्ठानं बुद्धिमानाहार्यबुद्धिर्वा स्यात्। यः विद्याविनीतमतिः सः बुद्धिमान्। सिंहस्येव केवलं पौरुषावलम्बिनः न चिरं कुशलं भवति। अशस्त्रः शूर इव अशास्त्रः प्रज्ञावानपि विद्विषां वशः भवति।

शास्त्रम्

अलोचनगोचरे ह्यर्थे शास्त्रं पुरुषाणां तृतीयलोचनं भवति। अनधीतशास्त्रः चक्षुष्मानपि अन्ध एव। अज्ञानिनः अन्यः पशुः नास्ति। मूर्खराजस्य सत्त्वादपि अराजकमेव वरम्। साधवः अकृतसंस्कारं रत्नमिव सुजातमपि राजपुत्रं न नायकपदाय आनयन्ति। विनयविहीनराज्ञः प्रजाविनाशात् अपरः उत्पातः नास्ति। यः युक्तायुक्तयोः अविवेकी, विपरीतमतिर्वा सः दुर्विनीतः। यत्र सद्भिः अधीयमानाः गुणाः संक्रामन्ति तत् द्रव्यम्। शिक्षणम्, उपदेशः इत्यादि क्रिया द्रव्यं हि विनयति। अद्रव्यं न विनयति। द्रव्याद्रव्यप्रकृतिरपि कश्चित् पुरुषः सङ्कीर्णगजवद् भवति।

बुद्धिगुणाः

शुश्रूषा, श्रवणं, ग्रहणं, धारणं, विज्ञानं, ऊहा, अपोहा, तत्त्वाभिनिवेशः इति बुद्धिगुणाः। श्रोतुमिच्छा शुश्रूषा। श्रवणम् आकर्णनम्। शास्त्रार्थोपादानं ग्रहणम्। कालान्तरेष्वपि अविस्मरणं धारणम्। मोहसन्देहविपर्यासव्युदासेन ज्ञानं विज्ञानम्। विज्ञातमर्थमवलम्ब्य अन्येषु व्याप्त्या तथा विधानां वितर्कणम् ऊहः। उक्तियुक्ताभ्यां विरुद्धादर्थात् प्रत्यभावसम्भावनया व्यावर्तनम् अपोहः। अथवा सामान्यज्ञानम् ऊहः। विशेषज्ञानमपोहः। विज्ञानोहापोहानुगमविशुद्धमिदमित्थमेवेति निश्चयः तत्त्वाभिनिवेशः। याः समधिगम्यात्मनो हितमवैति अहितञ्चापोहयति ताः विद्याः।

राजविद्याः

अन्वीक्षकी, त्रयी, वार्ता, दण्डनीतिरिति चतस्रः राजविद्याः। अधियानो हि अन्वीक्षकीं कार्याकार्याणां बलाबलं हेतुभिः विचारयति, व्यसनेषु न विषीदति। नाभ्युदयेन विकार्यते, समधिगच्छति च प्रज्ञावाक्यक्रियावैशारद्यम्। त्रयीं पठन् वर्णाचारेषु अतीव प्रगल्भते, जानाति समस्तामपि धर्माधर्मसंस्थितिम्। वार्ता नाम व्यवसायं, वर्तकञ्च। वार्तां युक्तितः प्रवर्तयन् वार्तां सर्वमपि जीवलोकमभिनन्दयति। सर्वानपि कामान् स्वयं

लभते च।

अपराधिषु दण्डप्रणयने राजा यम इव अस्ति चेत् प्रजाः स्वमर्यादां नातिक्रमन्ति। त्रिवर्गफलाः विभूतयः प्रसीदन्ति च। अन्वीक्षकी अध्यात्मविषया। त्रयी वेदयज्ञादिषु, वार्ता कृषिकर्मादिषु, दण्डनीतिः साधुपालने, दुष्टनिग्रहे च उपयुक्ताः भवन्ति। विद्यावृद्धसेवायाम् उत्सहेत। अजातविद्यावृद्धसंयोगः राजा निरङ्कुश गज इव सद्यः विनश्यति। अन्वीक्षकीम् अनधीयानोऽपि विशिष्टजनसंसर्गात् परां व्युत्पत्तिमाप्नोति। उपजलतरूणां छाया तु विशिष्टा खलु। वंशेन, चरितेन, विद्यया, बन्धुजनेन परिशुद्धाः एव राज्ञामुपाध्यायाः। सत्पुरुषाणां विषये विनयेन नीचैः आचरन् नरपतिः इहलोके स्वर्गलोके च महीयते।

राजा हि परमं दैवतम्

राजा हि परमं दैवतम्। नासौ कस्मैचित् प्रणमति अन्यत्र गुरुजनेभ्यः विना। अशिष्टजनसेवया विद्या न सम्पादनीया। ततोऽपि वरमज्ञानमेव। विषसंसर्गममृतं मास्तु। साधारणतया शिष्याः गुरुजनशीलमनुसरन्ति। नवेषु मृद्भाजनेषु लग्नः संस्कारः ब्रह्मणापि अन्यथा कर्तुं न शक्यते। ज्ञानलवदुर्विदग्धराज्ञः अन्ध इव परप्रणेयो राजा वरम्। नीलीरक्ते वस्त्रे इव दुर्विदग्धे राज्ञि रागान्तरमाधत्ते। राजा यथार्थवादश्चेत् विदुषां श्रेयस्करः। स्वामिषु अहितोपदेशात् आत्मनः मरणं वरम् इति विद्यावृद्धसमुद्देशः।

अन्वीक्षकी (the subject dealing with atma)

आत्ममनोमरुत्तत्वसमसमायोगलक्षणः अध्यात्मयोगः। अध्यात्मज्ञः राजा सहजशारीरमानसागन्तुभिः दोषैः न बाध्यते। इन्द्रियाणि मनः, भोग्यवस्तूनि, भोगानां स्थानं शरीरञ्चेति आत्मारामस्थानानि। यत्राहमिति अनुपचरितः प्रत्ययः स आत्मा। असत्यात्मनि प्रेत्यभावे विदुषा विफलं खलु सर्वमनुष्ठानम्। यतः स्मृतिः, प्रत्यवमर्शनम्, ऊहापोहौ, शिक्षालापक्रियाग्रहणञ्च भवति तन्मनः। आत्मनः विषयानुभवद्वाराणि इन्द्रियाणि। शब्दस्पर्शरूपरसगन्धाः विषयाः। समाधीन्द्रियाभ्यां विप्रकृष्टसन्निकृष्टावबोधः ज्ञानम्। सुखं प्रीतिः। यत्र मनोनिर्वृतिः नास्ति तत्सुखमपि न सुखम्। अभ्यासाभिमानसम्प्रत्ययविषयाः सुखस्य कारणानि। क्रियातिशयः परिपाकहेतुः अभ्यासः। प्रश्रयसत्कारादिलाभेन आत्मनः उत्कर्णसम्भावनम् अभिमानः। अतद्गुणे वस्तुनि तद्गुणत्वेन अभिनिवेशः सम्प्रत्ययः। इन्द्रियमनस्सन्तर्पणो भावो विषयः। दुःखम् अप्रीतिः।

यत्र मनः न संक्लिष्यते, तद्दुःखमपि न दुःखं भवति। दुःखं चतुर्विधं भवति। सहजं, दोषजम्, आगन्तुकम्, अन्तरङ्गजञ्चेति। क्षुत्तृषामनो भूभवं सहजम्। वातपित्तकफवैषम्यसम्भूतं दोषजम्। वर्षातपादिजनितमागन्तुकम्। इतरैः तिरस्कार, अवमान, विघातादिसमुत्थम् अन्तरङ्गजम्। यस्य क्लेशायासाभ्यां विक्लवप्रकृतिः भवति तस्य ऐहिकामुष्मिकं फलं नास्ति। महाभियोगेषु सुवंशधनुष इव अधिकं बलं यस्य न जायते सः पुरुषः न भवति। आगामिक्रियाहेतुः अभिलाषो वा इच्छा इत्युच्यते। आत्मनः प्रत्यवायेभ्यः प्रत्यावर्तनहेतुः अनभिलाषो वा द्वेषः। हिताहितप्राप्तिपरिहारहेतुः उत्साहः। परनिमित्तकः भावः प्रयत्नः। अतिशयाभिधानं संस्कारः। अनेक कर्माभ्यासवासनावशात् सद्योजातादीनां स्तन्यपिपासादिकं येन क्रियते सोऽपि संस्कारः। सुखदुःखानुभवस्थानम शरीरम् ऐहिकव्यवकारिकप्रसादनपरं लोकायतिकं मतम्। अधीतलोकायतमतो हि राजा राष्ट्रकण्टकानुच्छेत्तुं कल्पते। एकान्तः यतीनामपि कार्येषु दोषाः न सन्तीति वचनं नास्ति खलु। एकान्तेन कारुण्यपरः करतलगतमपि अर्थं रक्षितुं न क्षमः। अपराधिषु प्रशमः यतीनां भूषणं न तु महीपतीनाम्। स्वशक्त्या कोपम्, अनुग्रहञ्च प्रदर्शितुमयोग्यस्य जीवनं व्यर्थमेव। प्रतिकूलेषु यः न विक्रामति सः जीवन्नपि मृत एव। निस्तेजसि भस्मनि इव निश्शङ्कं पदं दधाति। यत्र महान् धर्मानुबन्धः तत्पापमपि न पापम्। अन्यथा पुनः राज्यमपि नरकाय भवेत्। बन्धनान्तः नियोगः। खलमैत्री विपदन्ता। स्त्रीषु विश्वासः मरणान्तः इति अन्वीक्षकीसमुद्देशः।

त्रयी (the vedas)

चत्वारो वेदाः, शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्यौतिषमिति षडङ्गानि इतिहासपुराणन्यायमीमांसाधर्मशास्त्राणि चेति चतुर्दशविद्यास्थानानि त्रयी इत्युच्यते। वर्णाश्रमाचाराणां धर्माधर्मव्यवस्था त्रयीतः निर्णीयते। त्रयीत एव स्वस्वपक्षानुरागप्रवृत्ताः सर्वेऽपि समयाः लोकव्यवहारेषु अधिक्रियन्ते। धर्मशास्त्राणि स्मृतयश्च वेदार्थसङ्ग्रहरूपत्वात् वेदा एव। अध्ययनं, यजनं, दानञ्च ब्रह्मक्षत्रविशां समानो धर्मः। ब्रह्मक्षत्रविशः त्रयो वर्णाः द्विजातयः। अध्यापनं, याजनं, प्रतिग्रहश्च ब्राह्मणानामेव। भूतसंरक्षणं, शस्त्राजीवः सत्पुरुषोपकारः, दानोद्धरणं, रणे अपलायनञ्च क्षत्रियाणां धर्माः। वार्ता जीवनं नाम क्रयविक्रयव्यवहारः, व्यवसायं, गोसंरक्षञ्च जीवनोपाधिरूपेंण

स्वीकृत्य, अतिथिपूजनं, नित्यान्नदानगृहाणि, नित्यजलदानस्थानानि, पुण्यप्रदानि उद्यानवनानि इत्यादीनां निर्माणादयः वैश्यानां धर्माः। त्रिवर्णोपजीवनं, शिल्पकार्यकरणं, स्तोत्रगानादीनि शकटोपवाहनञ्च शूद्राणां धर्माः। सकृत्परिणयव्यवहाराः शूद्राः। आचारानवद्यत्वं, शुचिरुपसंस्कारः, शारीरशुद्धिश्च शूद्रानपि देवद्विजतपस्विपरिकर्मसु योग्यान् करोति।

आनृशंस्यम्, अमृषाभाषित्वं परस्वनिवृत्तिः, इच्छानियमः, प्रतिलोमविवाहः, निषिद्धासु स्त्रीषु च ब्रह्मचर्यम् इति सर्वेषां समानधर्मः। आदित्यालोक इव धर्मः, विशेषानुष्ठाने नियमस्तु सर्वसाधारणः। निजागमोक्तमनुष्ठानं समस्तयतीनां धर्मः। धर्मव्यतिक्रमे यतीनां निजागमोक्तमेव प्रायश्चित्तं करणीयम्। यः यस्मिन् देवे श्रद्धावान् भवति सः तं देवं प्रतिष्ठापयेत्। अभक्तैः कृतः पूजोपचारः सर्वः शापाय हेतुः स्यात्। वर्णाश्रमाणां स्वाचारप्रच्युतौ त्रयीतो विशुद्धिः करणीया। स्व स्व धर्मासङ्करः प्रजाः राजानं च त्रिवर्गेणोपसन्धत्ते। यः राजा प्रजाः न रक्षति सः राजा न भवति। स्वधर्ममतिक्रामतां सर्वेषां गुरुः राजा एव। स एव तान् सक्रममार्गे स्थापयति। परिपालकः राजा सर्वेषां धर्मषष्ठांशमवाप्नोति। उञ्छषड्भागप्रदानेन वनस्थाः अपि तपस्विनः राजानं सम्भावयन्ति। यत्रात्मनः भक्तिरस्ति तदमङ्गलमपि नामङ्गलम्। संन्यस्य अग्निपरिग्रहांश्च अस्पृशन् उपासीत। स्नात्वा प्राग्देवोपासनात् न कञ्चन स्पृशेत्। देवालये सर्वान् यतीन् आत्मसम्बन्धिनीः जरतीश्च पश्येत्। देवाकारोपेतः पाषाणोऽपि नावमन्येत। यं कं मनुष्यमपि नावमन्येत। राजशासनस्य मृत्तिकायामिव संन्यासिविषयेऽपि तथैवेति भावः। स्वयं मलिनोऽपि खलः धेनूनां सितं क्षीरं प्रवर्द्धयत्येव। परेषां सदाचारः स्वस्य पुण्यं न ददाति। मनोविशुद्धमपि न करिष्यति। प्रायेण ब्राह्मणानां स्वभावः दीनस्वभाव एव। क्षत्रियाणां बलात्कारस्वभावः। सहजतया किरातानां शाठ्यं सिद्धम्। कृषीवलानाम् ऋजुवक्रशीलता सहजा। ब्राह्मणानां कोपः दानावसानः। गुरूणां कोपः प्रणामावसानः। क्षत्रियाणां कोपः प्राणावसानः। वणिक् जनानां कोपः प्रियवचनावसानः। विश्वस्तैः सह व्यवहारः वणिजां विधिः। उद्दारप्रदानेनापि वैश्यानां कोपोपशमः स्यात्। नीचजात्यानां वशीकरणं दण्डभयोपधिभिः। इति **त्रयी समुद्देशः**।

वार्ता (dealing with agriculture , labour)

वार्ता नाम कृषिः, पशुपालनं, वाणिज्यञ्च। वार्ता समृद्धौ हि सर्वाः समृद्धा एव। यस्य कृषिः, धेनवः, शाकवाद्यः, सद्मनि उदपानं च तस्य संसारे सुखमेव भवति। राज्ञः तन्त्रपोषणे नियोगिनामुत्सवः, महांश्च कोशक्षयः भवति। नित्यं हिरण्यव्ययेन मेरुरपि क्षीयते। यस्मिन् राज्ये राजा धान्यादीनि न सङ्ग्रहयति, आदायादधिकं व्ययं करोति तस्मिन् राज्ये सदा दुर्भिक्षमेव समुद्रस्य पिपासायां जगति जलानि कुत्र लभेयुः ? प्रजानां स्वयं जीवधनमदर्शयतः राज्ञः महतीहानिः, मनस्तापः, क्षुत्पिपासाप्रतीकारात् पापञ्च भवति। वृद्धबालव्याधितक्षीणान् पशून् बान्धवानिव पश्येत्। अतीव भारः, महान् मार्गश्च पशूनाम् अकस्मात् मरणकारणं स्यात्।

शुल्कवृद्धिः, बलापण्यग्रहणञ्च देशान्तरभाण्डानामप्रवेशे हेतुः। काष्ठपात्र्यामेकदैव पदार्थो रध्यते नाम पाकं कर्तुं शक्यते। तुलामानयोः अव्यवस्था व्यवहारं दूषयति। वणिक् कृतोर्घः स्थितान् आगन्तुकांश्च पीडयति। वणिक्कृतोर्घः नाम वर्तकैः एव मूल्यनिर्णयः देशकालभाण्डापेक्षया सर्वार्घः नाम मूल्यनिर्णयः भवेत्। वन्यतुलामानविशुद्धौ राजा नाम प्रभुत्वमेव स्वयं जागृयात्। पश्यतो हराः नाम दर्शनेनापहारकाः वणिग्भ्यः इतरे सन्ति। स्पर्धया वृद्धं मूल्यं प्रभुत्वभाण्डेषु गच्छति। अतः यथोचितं मूल्यं दातव्यं, स्वीकरणीयञ्च। नत्वधिकं दातव्यं, नत्वधिकं स्वीकरणीयम्। अल्पद्रव्येण महाभाण्डं गृण्हतः मूल्याविनाशेन तद्भाण्डं दातव्यम्। अन्यायोपेक्षया सर्वे विनश्यन्ति।

चोराः, चरटाः नाम इतरप्रान्तादागताः गूढचाराः वंशस्तुतिकर्तारः वन्दिमागधाः, तुलाभारकाः, राजसम्बन्धीकाः, आटविकाः, सामन्तराजानः, किरातकाः, द्यूतशालासम्बन्धिकाः, अधिकारिणः, ग्रामकरणाः, ऋणदायकाश्च, राष्ट्रस्य कण्ठकाः भवेयुः। तादृशकष्टकशोधनाधिकरणज्ञे राज्ञि प्रतापवति ते किमपि कर्तुं न प्रभवन्ति। अन्यायवृद्ध्या वार्धुषिकाः नाम ऋणदातारः तन्त्रं नाम परिपालनाविधानम्, राज्ञः धनागारं, देशञ्च नाशयन्ति। वार्धुषिकाणां नाम ऋणदातृणां कार्याकार्ययोः दाक्षिण्यं नास्ति। अप्रियमपि औषधं पीतव्यम्। इति **वार्ता समुद्देशः**।

दण्डनीतिः (justice)

दण्डः चिकित्साशास्त्रमिव दोषविशुद्धिहेतुः। यथादोषं दण्डप्रणयनं दण्डनीतिः। राज्ञा प्रजापालनाय दण्डः प्रणीयते, न धनार्थम्। यो राजा स्वजीवनाय प्रजासु दोषमन्विषति, नाम रोगाभावेऽपि रोगमस्तीति, औषधस्यानावश्यकेऽपि औषधं स्वीकुरु इति दास्यति तादृश वैद्य इव दुष्टः एव।

दण्ड - द्यूताहव - मृत - विस्मृत - चोर - पारदारिक - प्रजाविप्लवजानि द्रव्याणि राजा न स्वयमुपयुञ्जीत। कामक्रोधाभ्याम् अज्ञानाद्वा दुष्प्रणीतः दण्डः सर्वजनेषु विद्वेषं करोति। दण्डः अप्रणीतश्चेत् मात्स्यन्यायमुद्भावयति। मात्स्यन्यायो नाम बृहत् मत्स्येन अल्पमत्स्यस्य भक्षणमिव बलीयान् अबलं ग्रसते। इति दण्डनीति समुद्देशः।

मन्त्रिः (minister , acts after careful thinking)

मन्त्रिपुरोहितसेनापतीनाम् उपदेशानुसारेण प्रवर्तकस्य राज्ञः अपजयः नास्ति। स एव आहार्यबुद्धिः। असुगन्धमपि सूत्रं कुसुमसंयोगात् देवशिरांसि आरोहति खलु। महद्भिः प्रतिष्ठिता शिलापि देवः भवति। तर्हि मनुष्यविषये किं वक्तव्यम्। राज्याधिकाराभावेऽपि चन्द्रगुप्तः विष्णुगुप्तानुग्रहात् साम्राज्यपदमवापेति श्रूयते।

ब्राह्मणक्षत्रियवैश्येषु एकं स्वदेशजम् आचाराभिजनविशुद्धम् अव्यसनिनम्, अव्यभिचारिणम्, अधीताखिलव्यवहारतन्त्रम्, अस्त्रज्ञम्, अशेषोपधाविशुद्धञ्च मन्त्रिणं कुर्वीत। समस्तपक्षपातेषु स्वदेशपक्षपातः महान्। विषनिषेक इव दुराचारः सर्वान् गुणान् दूषयति। दुष्परिजनः मोहेन विवेकरहितः कुतोऽपि अकृत्यात् न जुगुप्सते। सव्यसनसचिवो राजा दुर्व्यसनशीलामात्यसहितः राजा आरूढदुष्टगज इव सुलाभापायः तस्य सुलभतया अपायाः आगच्छन्ति। यः विपदि नोपतिष्ठत् केनापि तेन किं प्रयोजनम् ? कार्याभावेन भोजनवेलायामागन्तुकाः सुलभतया लभ्यन्ते खलु। यः स्वामिनः हितोपायं न वेत्ति तस्य भक्त्या किं प्रयोजनम् ? अखिलव्यवहारतन्त्रज्ञः अमात्यः आवश्यकः। यस्यायुधमात्मरक्षणाय न प्रभवति तेन किं प्रयोजनम् ?

अनेन कार्येण अयं धर्मः सिद्ध्यति, अयमर्थः सिद्ध्यति, अयं कामः सिद्ध्यति अथवा अपायः स्यात् इति कपटवाक्यैः प्रोत्साहेन प्रेरयन् इतरेषां चित्तस्य परीक्षणम् उपधा इत्युच्यते। तस्यां पराक्षायामुत्तीर्णः उपधा शुद्धः। सत्कुले अजातेषु अपवादात् भयं नास्ति। विजातयः नाम नीचजातयः अलर्कविषवत् कालं प्राप्य विकुर्वते। सत्कुलीने दोषसम्भवः अमृतस्य विषत्वमेव। परप्रतिबोधाय नोपयुक्तं ज्ञानं घटप्रदीपवद्भवति। येषां प्रतिपक्षदर्शनात् चेतांसि भयमन्वयन्ति तेषां शस्त्रमिव शास्त्रमपि निष्फलमेव। यत्परेषां प्रसरं न हन्ति तत् शस्त्रं शास्त्रं वा आत्मपरिभवाय मात्रमेव। क्षितिपतीनां सर्वोप्यारम्भः मन्त्रपूर्वः एव।

मन्त्रफलम्

अनुपलब्धस्य ज्ञानम्, उपलब्धस्य निश्चयः, निश्चितस्य बलाधानम्, अर्थद्वैदस्य संशयच्छेदनम्, एकदेशदृष्टस्य अशेषोपलब्धिः इति मन्त्रसाध्यमेतत्। अकृतस्यारम्भम् आरब्धस्यानुष्ठानम्, अनुष्ठितस्य विनियोगविशेषसम्पदञ्च कर्मसु ये कुर्युः ते मन्त्रिणः।कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपातप्रतीकारः, कार्यसिद्धिश्चेति पञ्चाङ्गः मन्त्रः। आकाशे प्रतिशब्दवति चाश्रमे मन्त्रं न कुर्यात्।

मुखविकाराभिनयाभ्यां प्रतिध्वानेन वा मनस्स्थमपि अर्थमभ्यूहन्ति विचक्षणाः। आकार्यसिद्धेः मन्त्रः रक्षितव्यः। दिवा नक्तं वा अपरीक्ष्य मन्त्रयमाणस्य अभिमतः प्रच्छन्नो वा भिनत्ति मन्त्रम्।

रात्रौ वटवृक्षे प्रच्छन्नः वररुचिः 'अप्रशिख' इत्यस्य पिशाचेभ्यो वृत्तान्तमुपलभ्य, चतुरक्षराद्यैः श्लोकमेकं चकार। अनेन तव पुत्रस्य प्रविष्टस्य वनान्तरे शिखामाकृष्य पादेन खड्गेन निहतं शिरः इति श्रूयते खलु।

मन्त्रानुष्ठानम्

येषां पक्षीयेषु अपकुर्यात् न तैः सह मन्त्रं कुर्यात्। अनायुक्तः मन्त्रकालेन तिष्ठेत्। शुकसारिकाभ्याम् अन्यैश्च तिर्यग्भिः मन्त्रभेदः कृतः इति श्रूयते खलु।

मन्त्रभेदादुत्पन्नं व्यसनं दुष्टप्रतिविधेयं स्यात्। मन्त्रभेदस्य कारणानि इङ्गितम्, आकारं, मदं, प्रमादं, निद्रा च। इङ्गितं नाम अन्यथावृत्तिः। आकारः नाम कोपप्रसादजनिता शरीरवृत्तिः। मदः नाम पानस्त्रीसङ्गादिजनितः हर्षः। प्रमादः नाम गोत्रस्खलनादिहेतुः। अथवा अन्यच्चिकीर्षतः अन्यथा वृत्तिः प्रमादः। निद्रा नाम जल्पाङ्गविकारहेतुः। मन्त्रनिर्णायकः तेन प्रकारेणाचरणे आलस्यं न करणीयम्। अननुष्ठाने केवलेन मन्त्रेण किम्। केवलौषधपरिज्ञानादेव व्याधिप्रशमः न भवति खलु। अविवेकात् प्राणिनां परः शत्रुः नास्ति। आत्मसाध्यम् अन्येन करणीयमिति मन्यमानः औषधमूल्यादेव व्याधिं चिकित्सति। यः येन सम्बन्धेन विद्यते तेनैव तस्याभिवृद्धिविनाशौ स्तः। स्वामिनाधिष्ठितो मेषोऽपि सिंहायते। मन्त्रकाले मन्त्रिभिः वादः स्वैरालापश्च न कर्तव्यः। लघुनोपायेन महतः कार्यस्य सिद्धिः मन्त्रफलम्। ग्रावा यथा दारुणा उत्थाप्यते तथा हस्तेन नोत्थाप्यते खलु। यः नृपेच्छया अकार्यमपि कार्यरूपतया अनुशास्ति सः मन्त्री शत्रुः भवति। अकार्योपदेशेन राज्ञः विनाशात् स्वामिनः दुःखं वरम्। क्षीरमपि बतो बालस्य कपोलहननं क्रियते खलु। मन्त्रिणः राजहृदयत्वात् ते न केनचित् संसर्गं कुर्युः। राज्ञः अनुग्रहनिग्रहावेव मन्त्रिणामनुग्रहनिग्रहौ। यत् सुघटितमपि कार्यं विघटेत सः अपराधः न मन्त्रिणां भवति। यः मन्त्रिणो अतिक्रम्य वर्तते सः न राजा भवति। सुविवेचितात् मन्त्रात् कार्यसिद्धिः भवति। स्वामिनः न दुराग्रहः स्यात्। अविक्रामतः नीतिः वणिक्खड्गयष्टिरिव भवति। दृष्टिरिव नीतिः यथावस्थितमर्थमवलम्बयति। हिताहितप्राप्तिपरिहारौ तु पुरुषकारायत्तौ। आलस्यं कर्तुमशक्ये कार्ये विलम्बं न करणीयम्। कालातिक्रमात् नखच्छेद्यमपि कार्यं कुठारच्छेद्यम् अच्छेद्यं वा स्यात्। एकमेवामात्यं न नियुक्तव्यम्। एकः अमात्यः निरवग्रहश्चरति। अतिकष्टकार्येषु मुह्यति च। द्वावपि मन्त्रिणौ न नियुक्तव्यौ। द्वौ मन्त्रिणौ ऐकमत्येन वा विरोधेन वा राजानं नाशयतः। त्रयः पञ्च सप्त वा मन्त्रिणः कार्याः। अभेद्यसंख्यापुरुषेषु ऐक्यं कष्टं स्यात्। बहवः मन्त्रिणः परस्परं स्वमतीः उत्कर्षयन्ति। स्वच्छन्दाश्च न विजृम्भन्ते।

कार्यानुष्ठानम्

यस्मिन्कार्ये गुणाः अधिकाः, अपायाः स्वल्पाः सन्ति तत्कार्यमनुष्ठेयम्। यदेव

जीर्णं भवति तदेव भुज्यते। यथोक्तगुणसमवायिनि एकस्मिन् युगले वा मन्त्रिणि न कोऽपि दोषः। महानपि अन्धसमुदायः द्रष्टुमसमर्थः एव खलु। अवार्यवीर्यौ द्वौ धुर्यौ महति भारे नियुज्येते खलु। बहु सहाये राज्ञि मनोरथाः सर्वेऽपि सफलाः भवन्ति। एकः पुरुषः बहुषु कार्येषु कर्तुं कष्टं स्यात्। एकशाखस्य वृक्षस्य महती छाया न भवति खलु। कार्यकाले पुरुषसमवायः दुर्लभः। दीप्ते गृहे कीदृशं कूपखननं? पुरुषसङ्ग्रहात् धनमधिकमिति न मन्तव्यम्। सुक्षेत्रेषु निक्षिप्तं बीजमिव कार्यपुरुषेषु दत्तं धनं शतशः फलति। बुद्धौ अर्थे युद्धे च ये सहायाः ते कार्यपुरुषाः। भोजनवेलायां कोऽपि कस्यापि सहायः न भवति ? अश्रोत्रियस्य श्राद्ध इव मन्त्रे मूर्खस्य अधिकारो नास्ति। अन्धः किमपि न पश्येत् खलु। अन्धेनाकृष्यमाणः अन्धः समं पन्थानं न प्रतिपद्यते। अनालोकं लोचनमिव अशास्त्रं मनः न पश्यति। राजानुग्रहेण सम्पदः सिद्ध्यन्ति। आभिजात्यं पाण्डित्यं वा न सिद्ध्यतः। हरकण्ठलग्नोऽपि कालकूटः काल एव। मूर्खेषु राज्यभारारोपणं स्ववधाय कृत्योत्थापनमेव। अकार्यवेदिनः बहुशास्त्रेणापि प्रयोजनं नास्ति। गुणहीनं धनुः पिञ्जनादपि निकृष्टम्। चक्षुष्मत इव मन्त्रिणोऽपि यथार्थदर्शनमेव आत्मगौरवहेतुः भवति । शास्त्राधिकारिणः न मन्त्राधिकारिणः स्युः। क्षत्रियस्य परिहरतोऽपि उपरि भण्डनं नाम युद्धम् आयाति। शास्त्रोपजीविनां कलहमन्तरेण भुक्तं न जीर्यति।

मन्त्राधिकारः स्वामिप्रसादः, शास्त्रोपजीवनञ्चेति एकैकमपि पुरुषम् उत्सेकयति। समुदायेन किं वक्तव्यम्। स्त्रीधनादिषु अत्यासक्तिपरम् अधिकारपीठे न नियुक्तव्यम्। मन्त्रिणः मनसि धनसम्पादनेच्छा अत्यधिका चेत् राज्ञः कार्यसिद्धिः न भवति। अर्थलाभोऽपि न भवति। वरणार्थं प्रेषित इव यदि कन्यां परिणयति तदा वरयितुः तप एव शरणम्।

यावत् न परस्त्रीदर्शनम् अर्थागमो वा तावत् सर्वोऽपि शुचिः, निस्पृहो वा स्यात्। अतिप्रवृद्धः कामः सर्वं करोति। कामपरवशः प्रजापतिः स्वदुहितरि हरिः गोपवधूषु, हरः शान्तानुकलत्रेषु सुरपतिः गौतमभार्यायां चन्द्रः बृहस्पतिपत्न्याञ्च मनश्चकारेति श्रूयते। धनलाभात् कस्य लोभः न प्रवर्तेत। परधनेष्विव परस्त्रीषु यस्य निस्पृहं चेतः भवति, सः साक्षात् प्रत्यक्षदैवमेव। अदुष्टस्य दूषणं सुप्तस्य सर्पस्य गजस्योत्थापनमेव।

कार्यालोचनम्

सकृत् विघटितं चेतः स्फटिकवलयमिव सन्धातुं समर्थः कोऽपि नास्ति। अल्पेनापि अपकारेण विरागो भवति, महताप्युपकारेण तथा अनुरागः चित्तस्य न भवति। अपराद्धाः सूचीमुखसर्पा इव नानपकृत्य विरमन्ति। राभसिकानां नाम शीघ्रतया निर्णयस्य स्वीकृतां कार्यारम्भः आदायव्ययश्च समः भवति। महामूर्खाणां कार्यारम्भः बहुक्लेशेन अल्पफलदायकः भवति। अल्पबुद्धयः दोषभयात् कार्यारम्भं न कुर्वन्ति। मृगाः सन्तीति कृषिं न करिष्यामो वा ? अजीर्णभयात् भोजनं परित्यज्यते वा ? सर्वेषामपि कार्यारम्भेषु विघ्नाः भवन्ति। मन्दबुद्धयः कार्यारम्भं कुर्वन्ति आत्मसंशयेन। दूरभीरुत्वम् आसन्नशूरत्वञ्च महापुरुषाणां गुणः। जलवत् मार्दवोपेतः पृथूनपि भूभृतः भिनत्ति। प्रियंवदः शिखीव सदर्पानपि सर्पानिव नाशयति। यः विपत्सु धैर्यमवलम्बते सः महान्। सर्वकार्येषु सिद्धीनां प्रथमो अन्तरायः उत्थापकत्वम्।

सत्कुलीनाः शरद्धना इव वृथा गर्जनं न कुर्वन्ति। महानुभावाः परेषामपकारमुपकारं वा नाविधाय स्वहृदयं न प्रकाशयन्ति। महतामालापः क्षीरवृक्षवत् फलसम्पादक एव। नीचप्रकृतिः दुरारोहपादप इव दण्डाभियोगेन फलप्रदो भवति। न स्वभावेन किमपि वस्तु सुन्दरमलुन्दरं वा। किन्तु पद्मस्य प्रकृतिः प्रियं भाति तदेव तस्य सुन्दरम्। केतकीनां कीटकानां वा कर्पूररेणुना प्रीतिः न भवति खलु। अतिक्रोधनस्य प्रभुत्वम्अग्नौ पतितं लवणमिव शतधा विशीर्यते। अनुचितज्ञः नाम औचित्यज्ञानरहितः सर्वान् गुणान् निहन्ति। परस्मै मर्मकथनम् आत्मविक्रय एव।

अजाकृपाणीयं नाम परेषु विश्वासः। क्षणिकचित्तः किमपि न साधयति। सहसा कारित्वात् स्वतन्त्रः सर्वं विनाशयति। सर्वकर्मणामनधिकारी अलसः। प्रमादवान् अवश्यं विद्विषां वशः भवति। कमपि आत्मनः अनुकूलं न कुर्यात् प्रतिकूलम्। प्राणादपि प्रत्ययः रक्षितव्यः। आत्मशक्तिमजानतो विग्रहः क्षयकाले पिपीलिकानां पक्षोत्थानमिव भवति। अवकाशकालमलभमानः अपकर्तरि साधु वर्तेत। जनाः दग्धुमिधनं शिरसि वहति खलु। नदीरयः नाम नदीवेगः तीरतरूणामङ्घ्रीन् क्षालयन्नपि उन्मूलयति खलु। उपायज्ञस्य कार्यं नाल्पं महद्वा। सरित्पूरः नाम नदीप्रवाहः तीरजतृणान् दृमांश्च

सममेव उन्मूलयति खलु। युक्तियुक्तं वचः बालादपि गृह्णीयात्। रवेरविषयं नाम सूर्यस्यागोचरं वस्तु दीपं प्रकाशयति खलु। वातायनविवरं नाम गवाक्षम् अल्पमपि बहूनि वस्तूनि अपि उपलम्भयति खलु। वाचः पतिं वरा इव परार्थाः खलु। ताः निरर्थकं प्रकाश्यमानाः अवश्यं शपयन्ति जनयितारम्। यः न विशेषज्ञः तस्य उक्तं युक्तमपि अनुक्तसममेव। यः परे अनर्थिनि वाचमुदीरयति सः पिशाचकी पातकी वा स्यात्।

नयहीनस्य बुद्धिः विद्यायतः प्रदीपस्येव स्यात्। स्वामिपदमभिलषतां जीवोत्सर्गः नाम प्राणत्याग एव। बहुदोषेषु क्षणदुःखप्रदोऽपायः अनुग्रहः एव।

स्वामिदोषस्वदोषाभ्याम् अपहतवृत्तयः नाम अपहृतजीवनोपाधयः। कृद्धभीतलुब्धावमानिनः कृत्याः। अनुवृत्तिः, अभयं, त्यागः, सत्कृतिश्च कृत्यानां वशोपायाः। प्रकृतीनां क्षयः, लोभः, विकारकारणानि च न करणीयानि। सर्वकोपेभ्यः प्रकृतिकोपः गरीयान् भवति। अचिकित्स्यदोषदुष्टान् खनिदुर्गसेतुबन्धाकरकर्मान्तेषु क्लेशयेत्। अपराधैः अपराधकैश्च सहगोष्ठीं न कुर्यात्। ते हि गृहप्रविष्टसर्पवत् सर्वव्यसनानाम् आगमस्थानम्। कस्यापि क्रुद्धस्य पुरतः न तिष्ठेत्। कुत इत्युक्ते क्रुद्धस्सर्प इव यमेवाग्रे पश्यति। तत्रैव रोषविषमुत्सृजति। अप्रतिविधातुः नाम आगतस्य विपदः प्रतिक्रियां कर्तुमशक्तस्य अमात्यस्य आगमनादपि अनागमनमेव वरम्। इति **मन्त्रिसमुद्देशः**।

पुरोहितः (the priest)

अत्युत्तमकुलशीलं षडङ्गसहिते वेदे दैवे निमित्ते, दण्डनीत्यां चाभिविनीतम्, आपदां दैवमानुषीणाञ्च प्रतिकर्तारं पुरोहितं कुर्वीत। मन्त्रिपुरोहितौ राज्ञः मातापितरौ, अतः तौ न केषुचित् वाञ्छितेषु विदूरयेत्, दुःखयेत्, दुर्विनयेत्।

अवमानुषोऽग्निः अवर्षम्, अतिवर्षं, मारकः, दुर्भिक्षं, सस्योपघातः, जन्तुसर्गः, व्याधिः, भूतपिशाचशाकिनीसर्पव्यालमूषकक्षोभाश्चेत्यापदः।

शिक्षालापक्रियाक्षमो राजपुत्रः सर्वासु लिपिषु प्रसंख्याने, पदप्रमाणप्रयोगकर्मणि रत्नपरीक्षायां, सम्भोगप्रहरणोपवाह्यविद्यासु च साधु विनेतव्यः।

अस्वातन्त्र्यम्, उक्तकारित्वं नियमः, विनीतता च गुरूपासनकारणानि। व्रतविद्यावयोऽधिकेषु नीचैराचरणं विनयः। पुण्यावाप्तिः, शास्त्ररहस्यपरिज्ञानं, सत्पुरुषाभिगम्यत्वञ्च विनयफलम्। अभ्यासः कर्मसु कौशलमुत्पादयति। अभ्यासः यद्यस्ति तद्ज्ञेभ्यः सम्प्रदायः। अधर्मानुचिताचारात्मप्रत्यवायेभ्यः गुरुवचनम् अनुल्लङ्घनीयम्। शिष्यः प्रत्यर्थी वादी वा न स्यात्, युक्तमयुक्तञ्च गुरुरेव जानाति। गुरुजनरोषे अनुत्तरदानम्, अभ्युपपत्तिश्च औषधम्। शत्रूणामभिमुखः पुरुषः श्लाघ्यः। गुरूणामभिमुखः न श्लाघ्यः।

यद्यसौ आश्रितेषु कल्याणाशंसी, आराध्यं न प्रकोपयेत्। यदि ऐहिकामुष्मिकफलविलोपः न भवति, बहुभिरुक्तं नातिक्रमितव्यम्। सन्दिहानः गुरुम् अकोपयन् पृच्छेत्। गुरूणां पुरतः यथेष्टं न प्रवर्तनीयम्।

यदि गुरुः जातिव्रताभ्यामाधिक्यं समानत्वं वा न अनभिवाद्य, उपाध्यायात् विद्यामादीत। अध्ययनकाले व्यासङ्गं, पारिप्लवम्, अन्यमनस्कताञ्च न भजेत्। सहाध्यायिषु बुद्ध्यतिशयेन नाभ्यसूयेत्। प्रज्ञयातिशयानः गुरुं न अवज्ञायेत। यः मातरि पितरि वा पुरुषः शूरो वा सः किमभिजातः ? अभिजातो नाम उत्तमवंशे जातः। इतरैः मर्यादया प्रवर्तकः। गुरोः आज्ञाभावेन न क्वचित् व्रजेत्। मार्गमचलं जलाशयं च एकाकी न अवगाहेत। पितरमिव गुरुमुपचरेत्। गुरुपत्नीं जननीमिव मन्येत। गुरुपुत्रं गुरुवत् पश्येत्। स ब्रह्मचारिणी बान्धव इव स्निह्येत्। आषोडशाद्वर्षात् ब्रह्मचर्यम्। ततः गोदानं, दारकर्म च आचरणीयम्। समविद्यैः सहाधीतं सर्वदा अभ्यसेत्।

गृहदौस्थित्यम् आगन्तुकानां पुरतः न प्रकाशयेत्। सर्वोऽपि परगृहेषु विक्रमादित्यायते। यः स्वकार्येष्विव परकार्येषु अपि उत्सहते स एव महापुरुषः। परकार्येषु बहवः शीतलाः भवन्ति। राजासन्नाः सर्वेपि साधव इव दृश्यन्ते। अर्थपरेषु अनुनयः दैन्यप्रकटनमेव। अर्थार्थी कोऽपि प्रणामेन न तुष्यति। राजा आश्रितेषु कार्यतः विशेषकरणेऽपि, प्रियदर्शनालापाभ्यां सर्वत्र समवर्तनं तन्त्रं वर्धयति, अनुरञ्जयति

च प्रजाः। मृतमारणसदृशं तनुधनार्थग्रहणम्। अप्रतिविधातरि कार्यनिर्वेदनम् अरण्यरोदनमेव। दुराग्रहस्य हितोपदेशः बधिरस्याग्रतः गानसदृश एव। अकार्यज्ञस्य शिक्षणम् अन्धस्य पुरतः नर्तनसदृशमेव। अविचारकस्य युक्तिकथनं तुषखण्डनमेव। नीचेषूपकृतम् उदके विशीर्णलवणमिव स्यात्। परोक्षे उपकारस्याचरणं सुप्तसंवाहनमेव। अकाले विज्ञापनं ऊषरे कृष्टमेव। उपकृत्योद्घाटनं वैरकरणमेव। अफलवतः प्रसादः काशकुसुमसदृशः। गुणदोषौ अनिश्चित्य, अनुग्रहनिग्रहविधानं ग्रहाभिनिवेश एव। ग्रहावेशः नाम पिशाचावरणम्। ग्रामशूराणां गलगर्जनं ग्राम्यस्त्री विद्रावणकमेव। रणशूराणां गर्जनं महाशूराणामेव भयोत्पादकं भवति। यः परोक्षभोग्यः स एव मनुष्याणां विभवः। स्वस्यैव उपभोग्यः यः स रोगः। मनसि असूयाभावमुपस्थाप्य बहुषु दोषं प्रकाशयन् शिक्षयति सः गुरुः न भवति, पिता न भवति, सुहृत् वा न भवति। यः चिरसेवकेषु एकमप्यपराधं न सहते सः प्रभुः न भवति इति **पुरोहितसमुद्देशः**।

सेनापतिः (commands- in - cheif)

उत्तमवंशे जननम्, आचारप्रज्ञानुरागसत्यशौचशौर्यसम्पन्नः, प्रभाववान्, बहुबान्धवपरिवारः निखिलनयोपायप्रयोगनिपुणः, समभ्यस्तसमस्तवाहना-युधलिपिभाषात्मस्वरूपस्थितिः,सकलतन्त्रसामन्ताभिमतः, सांग्रामिगामिकाकारशरीरः, भर्तुरादेशाभ्युदयहितवृत्तिषु निर्विकल्पः, स्वामिना आत्मवत् मानार्थप्रतिपत्तिराजचिह्नैः सम्भावितः, सर्वक्लेशायाससहः, स्वैः परैश्चाप्रधृष्यप्रकृतिः इति सेनापतिगुणाः। स्त्रीजितत्वम्, औद्धत्यं, व्यसनिता, क्षयव्ययप्रवासोपहतत्वं, तन्त्राप्रतीकारः, सर्वैस्सहविरोधः, परपरीवादः, परुषभाषित्वम्, अनुचितज्ञता, असम्भाविभागित्वं. स्वातन्त्र्यात्मसम्भावनोपहतत्वं, स्वामिकार्यव्यसनापेक्षा सहकारिकृतकार्यविनाशः राजहितवृत्तिषु च ईर्ष्या लुब्धत्वम् इति सेनापतिदोषाः।

नगरनापित इव नाम नगरक्षुरक इव अनुवृत्तिपरः सर्वासु प्रकृतिषु चिरञ्जीवी यः सः सेनापतिः। इति **सेनापतिसमुद्देशः**।

दूतः (emissery)

दूरे विद्यमानानां कार्याणां विषये दूतो मन्त्री एव। स्वामिभक्तिः अव्यसनिता, दाक्ष्यं, शुचित्वम्, अमूर्खता, प्रागल्भ्यं, प्रतिभानवत्वं, क्षान्तिः, परमर्मवेदित्वं, जातिश्चेति

प्रथमाः दूतगुणाः। स च त्रिविधः। निसृष्टार्थः, परिमितार्थः, शासनहरश्चेति। पाण्डवदूतः श्रीकृष्णः निसृष्टार्थः। अविज्ञातः दूतः परस्थानं न प्रविशेत्, न निर्गच्छेत्।

अयं शत्रुः मत्स्वामिनम् अतिसन्धातुकामः परो मां विलम्बयितुमिच्छतीति अविज्ञातोऽपि दूतः अपसरेत्। गूढपुरुषान् अपसर्पयेत्। परेणाशु सम्प्रेषणे दूतः कारणं विमृशेत्।

कृत्योपग्रहः, अकृत्योत्थापनं, सुतदायादावरुद्धोपजापः, स्वमण्डलप्रविष्ट-गूढपुरुषपरिज्ञानम्, अन्तभूमिपालटविकसम्बन्धः, कोशदेशतन्त्रमित्रावबोधः, कन्यारत्नवाहनविनिस्रावणं,स्वाभीष्टपुरुषप्रयोगात् परप्रकृतिक्षोभकरणञ्च दूतकर्म।

दूतः शत्रुमन्त्रिपुरोहितसेनापतिप्रतिबद्धाप्तजनोपचारविस्तम्बाभ्यां शत्रोरितिकर्तव्यताम् अन्तःसारताञ्च विद्यात्। स्वयमशक्तः परेणोक्तमनिष्टं सहेत। गुरुषु स्वामिषु वा परिवादे नास्ति क्षान्तिः। किञ्चित्कालं स्थित्वाऽपि यास्यतो अवस्थानं केवलम् अपक्षयहेतुः। वीरपुरुषपरिवृतः शूरपुरुषान्तरितान् परदूतान् पश्येत्। चाणक्यः तीक्ष्णदूतप्रयोगेन एकं नन्दं जघानेति श्रूयते खलु। शत्रुभिः प्रेषितं शासनम् उपायनञ्च स्वैः अपरीक्षितं नोपाददीत। करहाटराजा कैटभः स्पर्शविषेण वासिताद्भुत-वस्त्रोपायनेनवसुनामानंराजानं करवालः करालम् आशी विषविषधरोपेत-रत्नकरण्डकप्राभृतेन च जघानेति श्रूयते खलु।

महत्यपकारेऽपि दूतं न हन्यात्। युद्धस्य उद्धृतेष्वपि शस्त्रेषु राजानः दूतमुखाः एव। तेषामन्तावसायिनोऽपि अवध्याः। ब्राह्मणाः कदापि न वध्याः। अवध्यभावात् दूतः सर्वमेव जल्पति। दूतवचनात् शत्रुः उत्कर्षः इति, स्वापकर्षञ्च कोऽपि सुधीः न मन्यते। शत्रुदूताशयरहस्यपरिज्ञानार्थं परदूतः स्त्रीभिः उभयवेतनैः तद्गुणाचा-रशीलानुवर्तिभिर्वा प्रणिधातव्यः नाम प्रयुक्तव्यः। प्रतिपक्षलेखानां चत्वारि वेष्टनानि खड्गमुद्रा च स्थापनीयाः। इति **दूतसमुद्देशः**।

चारः (spy)

स्वमण्डले शत्रुमण्डले च कार्याकार्यविलोकने क्षितिपतीनां चक्षूंषि चाराः एव। अलौल्यम्, अमान्द्यम्, अमृषाभाषित्वम्, अभ्यूहकत्वञ्चेति चारगुणाः। अधिकपारितोषिकादिभिः सुन्तुष्टिदानमनेव चाराणां वेतनम्। कुत इत्युक्ते तल्लोभात् स्वामिकार्येषु अतीव त्वरन्ते। सन्दिग्धविषये त्रयाणामेकैकवाक्ये सम्प्रत्ययः। अनपसर्पः नाम गूढचाररहितः राजा स्वैः परैश्च अधिसन्धीयेत। यामिकः नाम रात्रौ रक्षकभटः नास्ति चेत्, रात्रौ क्षेमः न भवति। गूढचाराः स्थायिनः, यायिनः इति द्विविधाः। एते गूढचाराः कापटिक, उदास्थित, गृहपतिक, वैदेहक, तापस कितव, किरात, अक्षशालिक, यमपट्टिक, अहितुण्डिक, शौण्डिक, शौभिक, पाटच्चर, विट, विदूषक, पीठमर्दक, नट, नर्तक, गायक, वादक, वाग्जीवक, गणक, शाकुनिक, भिषगैन्द्रजालिक, नैमित्तिक, सूदारालिक, संवाहक, तीक्ष्ण, क्रूर, रसद, जड, मूक, बधिरान्धच्छद्मानः स्थायी, यायीभेदेन अपसर्पवर्गः। परमर्मज्ञः, प्रगल्भः, छात्रः, कापटिकः।

यं कञ्चन समयमास्थाय प्रतिपन्नाचार्याभिषेकः प्रभूतान्तेवासी, प्रज्ञातिशययुक्तः, राजपरिकल्पितवृत्तिः उदास्थितः। गृहपतिकवैदेहकौ ग्रामकूटश्रेष्ठिनौ। बाह्यव्रतविद्याभ्यां लोकविडम्बनहेतुः तापसः। कितवः नाम द्यूतकारः। अल्पाखिलशरीरावयवः किरातः। प्रतिगृहं गत्वा चित्रपटदर्शी अक्षशालिकः। यमपट्टिकः नाम यमलोकनरकबाधाचित्राणां प्रदर्शकः। अहितुण्डिकः नाम सर्पक्रीडाप्रसरः। शौण्डिकः नाम कल्पपालः, मद्यव्यापारी।

जपापुष्पे काण्डपटावरणेन नानारूपदर्शी शौभिकः। काण्डवटं नाम वस्त्रेण निर्मितं कुटीरम्। पाटच्चरः नाम चोरः, बन्दिकारः वा। विटः नाम व्यसनिनां प्रेषणाजीवः। द्यूतक्रीडास्थले कर्मचारः। सर्वेषां प्रहसनपात्रं विदूषकः। कामशास्त्राचार्यः पीठमर्दकः। नटः नाम गीताङ्गप्रावरणेन नृत्यवृत्या जीवी। नर्तकः नाम नाटकाभिनयरङ्गनर्तकः। गायकः नाम रूपाजीवावृत्युपदेष्टा। वादकः नाम गीतप्रबन्धगतिविशेषवादकः। चतुर्विधातोद्यप्रचारकुशलः। वैतालिकः सूतो वा वाग्जीवकः। संख्यावित् दैवज्ञो वा गणकः। शकुनवक्ता शाकुनिकः। आयुर्वेदवित् शस्त्रकर्मवित् च वैद्यः भिषक्। तन्त्रयुक्त्या मनोविस्मयकरः मायावी च ऐन्द्रजालिकः। लक्ष्यवेदी दैवज्ञो वा नैमित्तिकः। माहानस्तिकः सूदः। विचित्रभक्ष्यप्रणेता अरालिकः। अङ्गमर्दनकलाकुशलः भारवाहको वा संवाहकः।

द्रव्यहेतोः कृच्छ्रेण कर्मणा यः जीवितविक्रयी सः तीक्ष्णः। असहनो वा। सदा बन्धुषु निःस्नेहः क्रूरः। रसदः विषप्रयोक्ता। लोकव्यवहारानभिज्ञः जडः। जिह्वाश्रवणनयनहीनाः मूकबधिरान्धाः। इति **चारसमुद्देशः**।

विचारः (thought)

नाविचार्य किमपि कार्यं कुर्यात्। विचारः नाम प्रत्यक्षानुमानागमैः यथा-वस्थितवस्तुव्यवस्थापनहेतुः। स्वयं दृष्टं प्रत्यक्षम्। पण्डिताः न ज्ञानमात्रात् प्रवृत्तिः निवृत्तिर्वा । स्वयं दृष्टेऽपि मतिः मुह्यति, संशेते, विपर्यस्यति वा, तर्हि परोद्दिष्टे किं वक्तव्यम् ? अवश्यं मुह्यति संशेति, विपर्यस्यति च।

यः प्रत्यक्षेणोपलब्धमपि साधु परीक्ष्यानुतिष्ठति। अतिरभसात् कृतानि कार्याणि अनर्थं जनयन्ति। अविचार्य चरिते कर्मणि पश्चात् प्रतिविधानं गतोदके सेतुबन्धनमिव स्यात्। अनुमानं नाम कर्मसु कृतेनाकृतावेक्षणम्। सम्भावितैकदेशः अवशिष्टं विद्यात्।

आकारः, शौर्यं, प्रज्ञासम्पत्तिः, आयतिः, विनयश्च राजपुत्राणां भाविनो राज्यस्य लिङ्गानि नाम चिह्नानि। प्रकृतेः विकृतिदर्शनं हि प्राणिनां भविष्यतः शुभस्याशुभस्य च लिङ्गं नाम चिह्नम्। एकस्मिन् कर्मणि दृष्टबुद्धिः पुरुषकारः कर्मान्तरेऽपि समर्थःस्यात्। आप्तपुरुषोपदेशः आगमः। यथाभूतानुमितश्रुतार्थाविसंवादिवचनः पुमान् आप्तः। अनुक्तसमा वागुक्तापि नास्ति तद्युक्तिः। वक्तुः गुणगौरवात् वचनगौरवम्। न तु स्वतः। सत्पुरुषाणामनुभवाय अवकाशाभावे स्थितं पचेषु धनेन किं प्रयोजनम् ? चण्डालसरसि जलेन नोपभोगः। लोकस्तु गतानुगतिकः। यतः असौ सदुपदेशिनीमपि कुट्टिनीं धर्मेषु न प्रमाणयति। तथा गोघ्नमपि ब्राह्मणवचनं प्रमाणयति। इति विचारसमुद्देशः।

व्यसनम् (addiction)

व्यसति प्रत्यावर्तयति एनं श्रेयसः इति व्यसनम्। व्यसनं द्विविधम्। सहजम्,आहार्यञ्च। सहजं व्यसनं धर्मसम्भूताद्भुताभ्युदयहेतुभिः अधर्मजनित-महाप्रत्यवायप्रतिपादनैः उपाख्यानैः योगपुरुषैश्च प्रशमयेत्। परचित्तानुकूल्येन तदभिलषितेषु व्यसनेषु उपायेन विरक्तिजननहेतवः योगपुरुषाः। शिष्टसंसर्गदुर्जनासंसर्गाभ्यां पुरातनमहापुरुषचरितोत्थिताभिश्च कथाभिः आहार्यं व्यसनं च प्रतिबध्नीयात्।

स्त्रियः अतिभजमानः अवश्यं नपुंसकं स्यात्। शरीरे रसरक्तमांसमेदस् अस्थिमज्जा शुक्राणां धातवः इति व्यवहारः। सौम्यधातुक्षयात् नाम शुक्रधातुक्षयात् सर्वधातुक्षयं भवति। पानशौण्डः नाम अतिमद्यपानासक्तः चित्तभ्रमात् मातरमपि अभिलषति। मृगयासक्तिः स्तेनव्यालद्विषद्दायादानाम् अमिषं पुरुषं करोति। द्यूतासक्तस्य अकृत्यं नास्ति। मातरि मृतायामपि कितवः दीव्यत्येव। पिशुनस्योपरि सर्वेषाम् अविश्वासं जनयति । दिवास्वापः सुप्तव्याधिव्यालानाम् उत्थापनदण्डः, सकलकार्यान्तरायश्च। सर्वविद्वेषणभेषजं परं नास्ति परपरिवादात्। नृत्यगीतवाद्यानामुपरि तौर्यत्रिकासक्तिः प्राणेभ्यः धनात्, गौरवात् दूरीकरोति।

मृषोद्या कमप्यनर्थं नाविधाय न विरमति। अतीवेर्ष्यालुं पुरुषं स्त्रियः परित्यजन्ति ध्नन्ति वा। परपरिग्रहाभिगमः, कन्यादूषणं वा साहसं दशमुखदाण्डक्यादिविनाशहेतुः प्रसिद्धमेव। यत्र नाहमित्यध्यवसायः तत्साहसम्। अर्थदूषकः कुबेरोऽपि भिक्षाभाजनं भवति। अतिव्ययः, अपात्रव्ययश्च अर्थस्य दूषणम्। हर्षामर्षाभ्याम् अकारणं तृणाङ्कुरमपि नोपहन्यात्। मनुष्यविषये किं वक्तव्यम्। न हन्यादित्यर्थः। श्रूयते हि निष्कारणं भूतावमानिनौ वातापिरिल्वलश्चासुरौ अगस्त्यात् आयासादनाद्विनेशतुः इति।

दोषाभावेन कोटिरपि गृहीता न दुःखायते। अन्यायेन तृणशलाकापि गृहीता प्रजाः खेदयति। तरुच्छेदेन फलोपभोगः सकृदेव। प्रजाविभवः स्वामिनः द्वितीयं भाण्डागारम्। अतः युक्तितः तमुपयुञ्जीत। राजपरिगृहीतं तृणमपि परेण गृहीतं चेत्, काञ्चनी भवति। जायते च पूर्वसञ्चितस्य अर्थस्यापहारः।

वाक्पारुष्यं शस्त्रपातादपि विशिष्यते। वाक्पारुष्यं नाम जातिवयोवृत्त-विद्याविभावानुचितं वचनम्। स्त्रियम्, अपत्यं, भृत्यं वा तथोक्त्या विनयं ग्राहयेत्। यथा हृदयप्रविष्टात् शल्यादिव वचनतः न ते दुर्मनायन्ते। न्यायविरुद्धेन वधः, क्लेशः, अर्थहरणं वा व्युत्क्रमेण दण्डपारुष्यम् इत्युच्यते। एकेनापि व्यसनेन उपहतः चतुरङ्गवानपि राजा विनश्यति। इति **व्यसनसमुद्देशः**।

स्वामिः (master)

धार्मिकः कुलाचाराभिजनविशुद्धः प्रतापवान् नयानुगतवृत्तिश्च स्वामी।

कोपप्रसादयोः स्वतन्त्रता, आत्मातिशयवर्णनं वा यस्यास्ति स स्वामी स्वामिमूलाः सर्वाः प्रकृतयः भवन्ति अभिप्रेतप्रयोजनाः। नास्वामिकाः, अस्वामिकाः प्रकृतयः समृद्धा अपि निस्तरितुं न शक्नुवन्ति। अमूलेषु तरुतलेषु पुरुषप्रयत्नतः किं कुर्यात् ? असत्यवादिनः सर्वे गुणाः विनश्यन्ति। वञ्चकेषु न परिजनः, न धनं, नापि चिरमायुः। यः लोकानाम् अर्थं ददाति सः प्रियः। यस्य प्रत्याशोपहतं चेतः नास्ति सः महान् दाता इत्युच्यते। महती कठोरचित्तता अलौकिकी इयमस्ति उन्नतपुरुषाणाम्। का इत्युक्ते उपकृत्य निःस्पृहाः भवन्ति। परतः प्रत्युपकारभीरवश्च। प्रत्युपकर्तुः उपकारः सवृद्धिकः अर्थन्यास इव भवति।

येषामप्रत्युपकारि परार्थानुभवनं तत् जन्मान्तरेषु न केषामृणम्। क्षीरं न क्षरति न गर्भिणी वा गवा या तया किं प्रयोजनम् ? यः स्वामि आशां न पूरयति तेन प्रसादेन किं प्रयोजनम् ? क्षुद्रपरिषत्कः सर्पवानाश्रय इव न कस्यापि सेव्यः। अकृतज्ञस्य व्यसनेषु सहायाः न सन्ति। अविशेषज्ञः शिष्टैः नाश्रीयते। आत्मं भरिः कलत्रेणापि त्यज्यते। अनुत्साहः सर्वव्यसनानाम् आगनमद्वारम्। शौर्यम्, अमर्षः, शीघ्रकारित्वं, तत्कर्मप्रवीणत्वम् इति उत्साहगुणाः। अन्यायप्रवृत्तेः न चिरं सम्पदः। यत्किञ्चनकारी स्वैः परैर्वा हन्यते। ऐश्वर्यम् आज्ञाफलम्। राजाज्ञा हि सर्वेषामलङ्घ्यः प्राकारः। आज्ञाभङ्गकारिणं सुतमपि न सहेत। यस्याज्ञा नास्ति तस्य चित्रगतस्य च राज्ञः विशेषभेदः कोऽपि नास्ति।

परमर्मस्पर्शकरम्, अश्रद्धेयम्, असत्यम्, अतिमात्रं च न भाषेत। वेषमाचारं वा नाभिजानन् न कमपि भजेत। प्रभौ विकारिणि को नाम न विकुरुते ? राज्ञि अधर्मपरे कः नाधर्मपरः। राज्ञा अवज्ञातः सर्वैः अवज्ञायते। पूजितं हि पूजयन्ति लोकाः। राज्ञा प्रजाकार्यं स्वयमेव पश्येत्। यथावसरमप्रतीहारसंगं द्वारं कारयेत्।

दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः द्विषद्भिः कार्यते अतिसधीयते च। वैद्येषु श्रीमतां व्याधिवर्धनादिव नियोगिषु भत्रुव्यसनादपरो नास्ति। कार्यार्थिनः पुरुषान् लंचलुंचनिशाचराणां भूतबलिं कुर्यात्। सर्वपातकानामागमनद्वारं लञ्चः। लञ्चोपजीविनः मातुः स्तनमपि लुनन्ति। लञ्चेन कार्यकारिभिः उरभ्रवत् स्वामी विक्रीयते। राज्ञः

लञ्चेन अर्थलाभः प्रासादविध्वंसनेन लोहकीलकलाभ इव भवति। राज्ञः लञ्चेन कार्यकरणं कस्य कल्याणं स्यात् ? न कस्यापि भवति। यदि देवता चोरेषु मिलति प्रजानां कुशलं न स्यात्।

लञ्चेन अर्थोपार्जनं दर्शयन् देशं, कोशं, मित्रं, तन्त्रं च भक्षयति। राज्ञः अन्यायकरणं, समुद्रस्य मर्यादालङ्घनम्, आदित्यस्य तिमिरपोषणं, मातुः स्वापत्यभक्षणमिति कलिकालविजृम्भितानि। विशिष्टस्य कालस्य कारणं राजा। न्यायतः पालके राज्ञि प्रजानां कामदुघा भवन्ति सर्वा दिशः। काले च वर्षति मघवान्। सर्वाश्चेतयः प्रशाम्यन्ति। लोकपालाः सर्वेऽपि राजानमनुवर्तन्ते। तेनेमं मध्यममपि उत्तमं लोकपालं राजानमाहुः। अतिवृष्टिः, अनावृष्टिः, कीटकाः, पक्षिणः, वदन्तयः, व्यवसायस्य विघातश्च ईतिबाधाः।

अव्यसनेन क्षीणधनान् कुटुम्बिनः मूलधनप्रदानेन सम्भावयेत्। समुद्रावधिर्महीराज्ञः स्वकुटुम्बम्। वंशवर्धनक्षेत्राणि कलत्राणि। अप्रतिकुर्वाणः अर्थिनाम् उपायनं न गृण्हीयात्। आगन्तुकैः असहनैश्च सह न कुर्यात् नर्म। पूज्यैः सह नाधिरुह्य वदेत्। भर्तुमशक्यम् अप्रयोजनं च जनं नाशया क्लेशयेत्। पुरुषो हि न पुरुषस्य दासः। वित्तस्य दासः। कोऽपि धनहीनः लघु भवति। अनपहार्यत्वात्, सहानुयायित्वाच्च विद्यैव धनम्, सर्वधनप्रधानञ्च भवति। सरित्समुद्रमिव नीचमुपगतापि विद्या दुर्दर्शमपि राजानं सङ्गमयति। फलन्तु भाग्यानां व्यापारः। समस्तजगतः स्थितिज्ञानं यतो भवति सा विद्या विदुषां कामधेनुः भवति। लोकव्यवहारज्ञः सर्वज्ञः। अन्यस्तु प्राज्ञोऽपि अवज्ञायत एव। ये परेषां प्रतिबोधनं कुर्वन्ति ते प्रज्ञापारमिताः पुरुषाः। अनुपयोगिना जलधिजलेन महतापि प्रयोजनं किम् ? इति **स्वामिसमुद्देशः**।

अमात्यः (minister)

चतुरङ्गयुतोऽपि अमात्यरहितः राजा न राजा भवति। चतुरङ्गबलरहितः न कदापि राजा भवति। नैकस्य कार्यसिद्धिः भवति। नैकेन चक्रेण भ्रमणम्। इन्धनस्य सत्वेऽपि वायुरभावे वह्निः न ज्वलति खलु। सर्वोत्कर्षापकर्षाभ्यां दानमानाभ्यां राज्ञा सह सम्पत्तिविपत्ती येषां ते अमात्याः भवन्ति। आयः, व्ययः, स्वामिरक्षा, तन्त्रपोषणञ्च

अमाचत्यानामधिकारः। आयव्ययमुखयोः मुनिकमण्डलुरेव उदाहरणम्। द्रव्यस्य उत्पत्तिमुखम् आयः। यथा स्वामिशासनम् अर्थस्य विनियोगः व्ययः। आयमनालोच्य व्ययमानः कुबेरोऽपि अवश्यं श्रमणायते नाम दरिद्रो स्यात्। राज्ञः शरीरं, वाक्यं, धर्मः, कलत्रम्, अपत्यानि च स्वामिशब्दार्थाः। तन्त्रं नाम चतुरङ्गबलम्। तीक्ष्णम् अशुचिं व्यसनिनम् अशुद्धाभिजनं बलवत्पक्षम् अशक्यप्रत्यावर्तनम् अतिव्ययशीलम् अल्पायम् अन्यदेशायातम् अतिचिक्कणञ्च अमात्यं न कुर्वीत। तीक्ष्णोऽभियुक्तः स्वयं म्रियते, स्वामिनं वा मारयति। बलवत्पक्षः नियोग्यभियुक्तः जलकल्लोल इव मत्तगज इव समूलं नृपाङ्घ्रिम् उन्मूलयति।

अल्पायः महाव्ययः राजार्थं भक्षयति। अल्पायमुखः महाजनं परिग्रहञ्च पीडयति। आगन्तुकेषु अर्थाधिकारः प्राणाधिकारो वा न दातव्यः। प्राणाधिकारः नाम अङ्गरक्षकादिरूपेणाधिकारः। किञ्चित्कालानन्तरं ते स्वदेशं गमिष्यन्ति अथवा अपकारं करिष्यन्ति। स्वदेशजेषु अर्थः कूपे पतित इव कलान्तरेऽपि लब्धुं शक्यते। अतिचिक्कणादर्थलाभः पाषाणात् वल्कलोत्पाटनमिव भवति। दोषे सति स्वामिना सुखेन निग्रहीतुम् अनुग्रहीतुं वा समर्थः यः स एवाधिकारी। ब्रह्मणः क्षत्रियः सम्बन्धी वा नाधिकारी कर्तव्यः। ब्राह्मणः जातिबलात् सिद्धमपि अर्थं कृच्छ्रेण प्रयच्छति न प्रयच्छति वा। क्षत्रियः अभियुक्तः खड्गं दर्शयति। सम्बन्धी बन्धुः ज्ञातिभावेनातिक्रम्य, सामवायिकान् सर्वमप्यर्थं ग्रसते। श्रौतः, मौखः, यौनश्चेति सम्बन्धः त्रिविधः। मुखेन परिज्ञातः मौखः। सयोनेर्जातः यौनः। वाचिके सम्बन्धे न सम्बन्धान्तरानुवृत्तिः। अपराधे सति यमुपहत्यानुशयीत न तं कमप्यधिकारिणं कुर्यात्। न्यूनाधिकारी राजाज्ञामवज्ञाय निरवग्रहः चरति। चिरसेवकः नियोगी अपराधेऽपि नाशङ्कते। उपकर्ताधिकारी उपकारमेव ध्वजीकृत्य सर्वमेवार्थमवलुम्पति। बाल्यस्नेहितः अमात्यः अतिपरिचयात् स्वयमेव राजायते। अन्तर्दुष्टो नियुक्तः सर्वमनर्थमुत्पादयति। अत्र दृष्टान्तः शकुनिः। यः स्वामिप्रसादेन न उत्सेकं प्राप्नोति सः अधिकारी चिरं नन्दति। सुहृदि नियोगिनि धनमित्रत्वयोः नाशः अवश्यं भवति। मूर्खस्य नियोगे भर्तुः धर्मार्थयशसां सन्देहः अनर्थनरकपातौ निश्चितौ च। स्वामिनः यत्र आत्मक्लेशे नैव सुखं तेन परिवारेण किं प्रयोजनम् ? स्वयं मूढतृणभोजिनो गजस्य सुखं किं भवति ? अश्वसधर्माणः पुरुषाः कर्मसु नियुक्ताः विकुर्वते। तस्मादहन्यहनि तान् परीक्षेत।

नियोगिषु विश्वासकरणं मार्जारेषु दुग्धरक्षणमिव भवति। ऐश्वर्यं नियोगिनां चित्तविकारिणी इति सिद्धानामादेशः। अत्यैश्वर्यसमृद्धोऽपि भविष्यत्काले आयत्यामसाध्यः। कृच्छसाध्यः, स्वामिपदाभिलाषी वा स्यात्। भक्षणम्, उपेक्षणम्, प्रज्ञाहीनत्वम्, उपरोधः, प्राप्तार्था प्रवेशः, द्रव्यविनिमयश्चेति अमात्यदोषाः।

बहुमुख्यम्, अनित्यं च करणं स्थापयेत्। स्त्रीष्वर्थेषु अन्यजातिषु च अधिकारसम्बन्धः न कार्यः। स्वपरदेशजत्वावनपेक्ष्य अधिकारः अनित्यः। आदायक, निबन्धक, प्रतिकण्टक,नीवीग्राहक, वराध्यक्षाः करणानि। आयव्ययविशुद्धं द्रव्यं नीवी। नीवीनिबन्धपुस्तकग्रहणपूर्वकं आयव्ययौ विशोधयेत्। आयव्ययविप्रतिपत्तौ कुशलकरणकार्यपुरुषेभ्यः तद्विनिश्चयः करणीयः। नित्यपरीक्षणं कर्म विपर्ययः, प्रतिपत्ति दानं च नियोगिषु अर्थग्रहणोपायाः। दुष्टव्रणा इव नियोगिनः ना पीडिताः अन्तःसारमुद्वमन्ति। नियोगिषु पुनः पुनः अभियोगः महीपतीनां वसुधारा। स्नानवस्त्रं सकृन्निपीडितं सार्द्रतां न जहाति।

देशमपीडयन् बुद्धिपुरुषकाराभ्यां पूर्वनिबन्धमधिकं कुर्वन् अर्थमानौ लभेत। यो यत्र कर्मणि कुशलः तं तत्र नियोजयेत्। प्रभोः अनुग्रहस्य सत्वेऽपि सेवकः कार्यसाधकः न भवति। बुद्ध्या पुरुषकाराभ्यां च कार्यसाधकः स्यात्। शास्त्रविदपि अनुभवरहितः कर्मसु विषादं गच्छेत्। भर्तुः न निवेद्य किञ्चिदपि न करणीयम्। आपदां प्रतीकारविषये अनवेद्यापि कर्तुं शक्यते। सहसोपचितार्थः मूलधनमात्रेण अवशेषितव्यः। नियोगिषु परस्परकलहः भूभुजां निधिः। नियोगिषु लक्ष्मीः क्षितीश्वराणां द्वितीयकोशः। सर्वसङ्ग्रहेषु धान्यसङ्ग्रहः महान् भवति। कथमित्युक्ते जीवितं सकलप्रयासश्च तदर्थमेव खलु। यथा धान्यं तथा महदपि द्रव्यं मुखे निक्षिप्तेऽपि प्राणरक्षणं न भवति खलु। धान्येषु चिरजीविनः को द्रवाः। अनवं नवेन वर्धयितव्यं व्ययितव्यं च। सर्वरसानामुत्तमः लवणसङ्ग्रहः। सर्वरसमप्यन्नम् अलवणं गोमयायते। इति **अमात्यसमुद्देशः**।

जनपदः (country)

पशुधान्यहिरण्यसम्पदा राजते शोभते इति राष्ट्रम्। भर्तुः दण्डकोशवृद्धिं दिशति ददातीति देशः। विविधवस्तुप्रदानेन स्वामिनः सद्मनि गजान् वाजिनश्च विषिणोति बध्नातीति विषयः। सर्वकामदुघत्वेन नरपतिहृदयं मण्डयति भूषयतीति

मण्डलम्। जनस्य वर्णाश्रमलक्षणस्य द्रव्योत्पत्तेर्वा पदं स्थानमिति जनपदः। निजपतेः उत्कर्षजनकत्वेन शत्रुहृदयं दारयति भिनत्ति इति धरत्। आत्मसमृद्ध्या स्वामिनं सर्वव्यसनेभ्यः निगमयति निर्गमयतीति निगमः।

अन्योन्यरक्षकः खन्याकरद्रव्यनागवनवान् अनतिवृद्धानतिहीनग्रामः, बहुसारविचित्रधान्यपण्योत्पत्तिः अदेवमातृकः, पशुमनुष्यहितः, श्रेणिशूद्रकर्षकप्रायः इति जनपदगुणाः।

विषतृणोदकोषरपाषाणकण्टकगिरिगर्तगह्वरप्रायभूमिः, भूरिवर्षाजीवनः, व्याललुब्धकम्लेच्छबहुलः स्वल्पसस्योत्पत्तिः, तरुफलाभावः इति देशदोषाः। यत्र जलदजलेनैव सस्यनिष्पत्तिः असुकृष्टभूमिकश्चारम्भः तत्र सदा दुर्भिक्षमेव। क्षत्रियप्राया हि ग्रामाः स्वल्पास्वपि बाधासु प्रतियुद्ध्यन्ते। म्रियमाणोऽपि द्विजलोकः सिद्धमप्यर्थं सान्त्वेन न प्रयच्छति। स्वभूमिकं भूतपूर्वमभूतपूर्वं वा जनपदं। स्वदेशाभिष्यन्दवमनाभ्यां परदेशोपवाहनेन वा वासयेत्। बीजानामावपेषु स्वल्पोऽपि प्रजोपद्रवः महान्तमर्थं नाशयति। कणिशेषु क्षीरिषु सिद्धादायः जनपदमुद्वासयति। लवनकाले सेनाप्रचारः दुर्भिक्षमावहति। सर्वा अपि बाधाः प्रजानां कोशं कर्षयन्ति। दत्तपरिहारान् पितेव अनुगृह्णीयात्। मर्यादातिक्रमेण फलवत्यपि भूमिः ऊषरक्षेत्रं भवति।

क्षीणजनसम्भावनं, तृणशलाकाया अपि स्वयमग्रहः, कादाचित्कञ्चोपजीवनम् इति परमाः प्रजानां संवर्धनोपायाः। न्यायेन रक्षिता पुण्यपुटभेदिनी पिण्ठाराज्ञां कामधेनुः। भूयांसः सस्यक्षेत्रग्रामाः राज्ञः चतुरङ्गबलाभिवृद्धिहेतवः भवेयुः। सुमहच्च गोमण्डलं हिरण्याययुक्तं शुल्कं च कोशवृद्धिहेतुः। गोरुतप्रमाणा भूमिः दातुरादातुश्च सुखनिर्वाहा। नामुद्रहस्तः नाम सभ्यत्वरहितः, नाम जननामसूचिकायामविद्यमानः, अशोधितः कोऽपि मण्डले निर्वसेत् निर्गच्छेद्वा। हूणाधिपतिः पुण्यपुटवाहिभिः सुभटैः चित्रकूटं जग्राह <ÊÉ¦ÉÉ&JÉÉ¤ÉÉ&ÊÉÊ®ú¨ÉÉ/ÉÉ&EÞÉÉ&SÉÖ¦ÉÉÉVÉÖÉÉ/ÉÉ&ÉÉSÉ¨ÉÉ¦ÉÉÉ&ÊÉÊ®ú¨ÉÉ<ÊÉÉ **जनपदसमुद्देशः**।

दुर्गम् (fort) that which causes sorrow to the enemies)

यस्याभियोगात् परे दुःखं गच्छन्ति तद्दुर्गम्। दुर्जनोद्योगविषयाद्वा स्वस्य विजिगीषोः आपदो गमयतीति दुर्गम्। दुर्गं द्विविधम्। स्वाभाविकम् आहार्यं चेति। पर्वतागाधैः वैषम्यं, पर्याप्तावकाशः, यवसेन्धनोदकभूयस्त्वं च स्वस्य परेषां तदभावः,बहुधान्यरससङ्ग्रहः,

प्रवेशापसारौ वीरपुरुषाश्चेति दुर्गसम्पत्। अन्यद्दुर्गं बन्दिशालेव भवति। अदुर्गः देशः परिभवास्पदं भवति। अदुर्गस्य राज्ञः पयोधिमध्ये पोतच्युतपक्षिवत् आपदि नास्त्याश्रयः। उपायतो गमनम्, उपजापः, चिरमनुबन्धः, अवस्कन्धः, तीक्ष्णपुरुषप्रयोगश्चेति दुर्गलम्बनोपायाः। इति **दुर्गसमुद्देशः**।

कोशः (bank , one that causes prosperity)

यः विपदि, सम्पदि च स्वामिनः तन्त्राभ्युदयं कोषयति संश्लेषयति स कोषः। अतिशयितरत्नहिरण्यरजतप्रायः व्यावहारिकनाणकबहुलः महापदि व्ययसहश्चेति कोशगुणाः। कोशं संवर्धयन् उत्पन्नमर्थमुपयुञ्जीत। यः प्रत्यहं काकिण्यापि कोशं न वर्धयति तस्यायत्यां श्रेयांसि कुतः भवन्ति ? कोशो हि महीपतीनां जीवितं, न प्राणाः। क्षीणकोशो हि राजा पौरजानपदानन्यायेन ग्रसते। ततः राष्ट्रमेव शून्यं भवेत्। कोशो हि राजा इत्युच्यते। भूपतीनां शरीरं राजा न भवति। यस्य हस्ते द्रव्यं स जयति। धनहीनः कलत्रेणापि त्यज्यते, इतरे सर्वेऽपि त्यजन्ति खलु। कुलाचाराभ्यां पुरुषः यथा सेव्यते ततोऽप्यधिकतया धनवान् सेव्यते। या परान् न सन्तर्पयति तया महत्तया कुलीनतया वा किं प्रयोजनम् ? यस्यास्ति धनमन्यूनं सः महान् कुलीनः। यत्र जलानि न सन्ति तस्य सरसः महत्वेन किं प्रयोजनम् ?

देवद्विजवणिजां,धर्माध्वरपरिजनानुपयोगिद्रव्यभागैः आढ्यविधवानियोगिग्रामकूट गणिकासङ्घपाषण्डिविभवांशप्रत्यादानैःसमृद्धपौरजानपदद्रविणसंविभागप्रार्थनैः अनुपक्षय श्रीकमन्त्रिपुरोहितश्रोत्रियमित्रसामन्तान्तपालानुनयगृहगमनाभ्यां च क्षीणकोशः कोशम् अभिवर्धयेत्। इति **कोशसमुद्देशः**।

बलः (army , Lit . that which covers , protects)

धनदानप्रियभाषणाभ्याम् अरातिनिवारणेन च स्वामिनं सर्वावस्थासु बलते संवृणोतीति बलम्। बलेषु हस्तिनः प्रधानमङ्गम्। ते यथा स्वैः अवयवैः अष्टायुधानि भवन्ति, न तथा अन्यद्बलम्। राज्ञां विजयप्रधानः हस्ति। एकोऽपि हस्ती सहस्रं योधयति। प्रहारसहस्रेणापि न सीदति। हस्तिनां प्रधानं न कुलं, जातिः, वनं, तत्प्रचारश्च। किन्तु शरीरं, बलं, शौर्यं, शिक्षा च प्रधानाः। अशिक्षिताः हस्तिनः केवलं

नृपाणामर्थप्राणहराः।

सुखेन यानम्, आत्मरक्षा, परपुरावमर्दनम्, अरिव्यूहव्याघातः, जलेषु सेतुबन्धनः, वचनादन्यत्र सर्वविनोदहेतवश्चेति हस्तिगुणाः। अश्वबलं सैन्यस्य जङ्गमः प्रकारः। अश्वबलप्रधानस्य हि राज्ञः कदनकन्दुकक्रीडाः प्रसीदन्ति श्रियः। दूरस्था अपि शत्रवः करस्था भवन्ति। आपत्सु च सर्वेऽपि मनोरथाः सिद्ध्यन्ति। सरणम्, अपसरणम्, अवस्कन्दः, परानीकभेदनं च इत्येतत् तुरङ्गमेकसाध्यम्। औत्साहिकं बलमत्यावश्यकम्। विजयदायकम्।

सुहृत्वं, क्षेत्रसारत्वम्, अस्त्रज्ञत्वं, स्वभावशूरत्वम्, अनुरक्तत्वञ्चेति बलस्य गुणाः। मौलबलाविरोधेन अन्यद्बलमर्थमानाभ्याम् अनुगृह्णीयात्। आपत्काले मौलबलम् अनुगच्छति। अपरेषामभेद्यं मौलबलं यथा प्रभुसम्मानः तथार्थः पुरुषान् योधयति। स्वयमनवेक्षणं, देयांशहरणं, कालयापनं, व्यसनाप्रतीकारः, विशेषविधावसम्भावनं च तन्त्रस्य विरक्तिकारणानि। स्वावेक्षणीयं परैरवेक्षयन् अर्थतन्त्राभ्यां हीयते।

आश्रितभरणे, स्वामिसेवायां, धर्मानुष्ठाने, पुत्रोत्पादने च प्रतिहस्ताः न सन्ति। आश्रिताः यावतासम्पूर्णतामाप्नुवन्ति तावद्देयम्। स्वद्रव्यमव्ययमानः राज्ञा न दण्डनीयः खलु। कोऽपि बुद्धिमान् स्वगुडं चौर्यात् न खादेत् खलु। यः जलदः सकाले न वर्षति, तेन जलदेन प्रयोजनं नास्ति। आश्रितानां कष्टकाले कष्टनिवारकः एव सुष्ठु राजा भवति। अविशेषज्ञे राज्ञि अर्थप्राणव्ययेन उत्साहं कोऽपि न प्रदर्शयति खलु। इति **बलसमुद्देशः**।

मित्रम् (friend)

सम्पत्काले विपत्काले च मेद्यति स्निह्यतीति मित्रम्। यः कारणाभावेन प्रत्युपकारापेक्षाभावेन रक्ष्यरक्षको वा भवति तन्नित्यं मित्रम्। यत्र पूर्वपुरुषपरम्परया समायातः श्लाघ्यः सम्बन्धः तत्सहजं मित्रम्। यत् वृत्तिजीवितहेतोः आश्रितं तत् कृत्रिमं मित्रम्। व्यसनेषूपस्थानम्, अर्थेष्वपि कल्पः, स्त्रीषु परमं शौचं, कोपप्रसादविषयेषु अप्रतिपक्षत्वम् इति मित्रगुणाः।

दानेन प्रणयः, स्वार्थपरत्वं, विपद्युपेक्षणम्, अहितसम्प्रयोगः, विप्रलम्भनगर्भः, प्रश्रयश्च मित्रदोषाः।

मित्रस्त्रिया सङ्गतिः, विवादः, अभीक्ष्णयाचनम्, अप्रदानम्, अर्थसम्बन्धः, परोक्षे दोषग्रहणं, पुरोभागिता, पैशुन्याकर्णनञ्च इति मैत्रीभेदकारणानि।

न हि क्षीरात्परं महदस्ति यत् सङ्गतिमात्रेण नीरमात्मसमं करोति। न नीरात्परं महदस्ति, यन्मिलितमात्रेण संवर्धयति, रक्षति च स्वक्षयेणापि क्षीरम्।

येन केनाप्युपकारेण तिर्यञ्चोऽपि प्रत्युपकारिणः अव्यभिचारिणः भवन्ति। प्रायेण मनुष्याः तथा न भवन्ति। नाडीजंघोपाख्यानमत्रोदाहरणम्। इति **मित्रसमुद्देशः**।

राजरक्षा (the protection of the king)

राज्ञि रक्षिते सर्वं रक्षितं भवतीति स्वेभ्यः परेभ्यश्च राजा नित्यं रक्षितव्यः। नीतिमर्मज्ञैः एवमुक्तं - पितृपैतामहमहासम्बन्धानुबन्धं सुशिक्षितम्, अनुरक्तं, कृतकर्माणञ्च जनम् आसन्नं कुर्वीत न तु अन्यदेशीयम्, अकृतार्थमानम्, स्वदेशीयं चापकृत्योपगृहीतम् इति चित्तविकृतेः नास्त्यविषयः। मातापि राक्षसी स्यात्। अस्वामिकाः प्रकृतयः समृद्धाः अपि निस्तरितुं न शक्नुवन्ति। गतायुषि सकलाङ्गेऽपि वैद्यः धन्वन्तरिरपि किं करिष्यति?

राज्ञस्तावत् आसन्नाः स्त्रियः, आसन्नतराः दायादाः, आसन्नतमाश्च पुत्राः। अतः राज्ञः प्रथमं स्त्रीभ्यः रक्षणं ततः दायादेभ्यः, ततः पुत्रेभ्यः रक्षणं करणीयम्। अतिनीचप्राणादारभ्य चक्रवर्त्यवधि सर्वेऽपि स्त्रीसुखाय क्लिश्यति। निवृत्तस्त्रीसङ्गस्य धनपरिग्रहः मृतमण्डनमिव स्यात्। सर्वाः स्त्रियः क्षीरसागरमिव विषामृतयोः स्थानभूताः। मकरदंष्ट्राः इव स्त्रियः स्वभावादेव वक्रशीलाः। स्त्रीणां वशोपायः देवानामपि दुर्लभः। रूपवत्, सुभगम्, अनवद्याचारम्, अपत्यवत् इति कलत्रं महतः पुण्यस्य फलम्। कामदेवोत्सङ्गस्थापि स्त्री पुरुषान्तरमभिलषत्येव। मोहः, भयं, लज्जा च न हि स्त्रीणां रक्षणम्। किन्तु परपुरुषादर्शनं, यथेष्टं सम्भोगः, सर्वाभिः समानगौरवं च स्त्रीणां वाञ्छाः इति राज्यस्त्रीः उद्दिश्योक्ताः। दानदर्शनालापैः समवृत्ते हि पुंसि स्त्रियः नापराध्यन्ति। कामधेनव इव मनीषितरतयः भवन्ति। परगृहीतासु स्त्रीषु प्रियत्वंम् अप्रियत्वं वा न मन्येत। कारणवशात् निम्बोऽपि अनुभूयत एव। चतुर्थदिवसस्नाता स्त्री तीर्थम्। तीर्थस्योपेक्षणम् अधर्मस्य हेतुः भवति। स्त्रियमुपेक्षमाणः पितृणाम् ऋणभाजनं दुषकश्च भवति । अवरुद्धाः स्त्रियः स्वयं नश्यति ,नाशयन्ति वा पतिम्। न स्त्रीणामकर्तव्ये

मर्यादास्ति। वरमविवाहः नोढोपेक्षणम्। अकृतरक्षस्य किं कलत्रेण ? अकृतश्च क्षेत्रेण किं प्रयोजनम् ?

सपत्नीविधानं, पत्युः असमञ्जसत्वं, विमाननम्, अपत्याभावः, चिरविरहश्च स्त्रीणां विरक्तिकारणानि। न स्त्रीणां सहजगुणो दोषो वास्ति। किन्तु नद्यः समुद्रमिव यादृशं पतिमाप्नुवन्ति तादृश्यो भवन्ति स्त्रियः। स्त्रीणां दौत्यं स्त्रिय एव कुर्युः। पुरुषजन्तुरपि स्त्रियं दूषयति। मनुष्यविषये किं वक्तव्यम् ?

वंशविशुध्यर्थम् अनर्थपरिहारार्थञ्च स्त्रियः रक्ष्यन्ते। न भोगार्थम्। यथा कामं कामिनीनां वेश्यानां वा सङ्ग्रहः। परम् अनीर्ष्यावान् प्रवर्तनं कल्याणकरम्। पण्यस्त्रियः भोजनभाजनवत् सर्वसमानाः। तासु हर्षामर्षयोः अवसरः नास्ति। मात्रभिजनविशुद्धाः उदवसितोपस्थायिन्यः स्त्रियः याः सन्ति ताभिः एव उपभोक्तव्याः। मण्डूकः सर्पस्य बिले प्रवेशः इव राज्ञः स्त्रीगृहप्रवेशः। आपत्कालेऽपि स्त्रीगृहादायातं न अनुभवनीयम्। संवननं स्वातन्त्र्यं चानुभवन्त्यः स्त्रियः किमपि कर्म करिष्यन्ति। अमृतसुरावाप्य इव क्रीडासुखोपकरणभूताः स्त्रियः। अपत्यपोषणे, गृहकर्मणि, शरीरसंस्करणे, भर्तुः शयनावसरे च स्त्रीणां सर्वस्वातन्त्र्यं विद्यते। स्त्रीवशः पुरुषः नदीप्रवाहपतितः पादप इव न चिरं नन्दति। पुरुषमुष्टिस्था हि स्त्री खड्गयष्टिरिव उत्सवं न जनयति। वेश्यासक्त्या प्राणार्थमानहानिः भवति। वेश्याः धनमनुभवन्ति, न पुरुषम्। वेश्याः धनहीने कामदेवेऽपि न प्रीतिं बध्नन्ति। वेश्यामनुभवन् पुरुषः न चिरं सुखमनुभवति। अचित्तविश्रान्तेः वेश्या परिग्रहः श्रेयान् सुरक्षितापि वेश्या स्वां प्रकृतिं न मुञ्चति। लोभोपहता स्त्री परपुरुषान् भजते। स्वभावो हि दुरतुक्रमः। सुभोजितापि श्वा अशुचीनि न परिहरति। क्षीराज्यशर्करया भोजितोऽपि विषं न परित्यजति सर्पः । शिक्षाशतेनापि कपिः चापल्यं न परिहरति। इक्षुरसेनापि सिक्तः निम्बः कटुरेव।

तारुण्यम् अवैकृत्यं च स्नानादिसंस्काराहारोपयोगादिजन्यं शरीरस्य रमणीयत्वम्। सम्मानादवसादः कुल्यानामपरिग्रहहेतुः। तन्त्रकोशवर्धनी वृत्तिः दायादान् विकासयति। भक्तिविश्वासाज्ञाविषयेषु अव्यभिचारिणं कुल्यं, पुत्रं वा संवर्धयेत्। उचितेषु कर्मसु विनियुञ्जीत।

प्राणबाधा बहुजनविरोधपातकेभ्यः भर्तुः आदेशं न विकल्पयेत्। बलवत्पक्षपरिग्रहेषु दायिषु आप्तपुरुषपुरःसरो विश्वासः, वशीकरणं, गूढपुरुषनिक्षेपः, प्रणिधिर्वा करणीयाः दुर्बुद्धौ सुते दायिनि वा सम्यग्युक्तिभिः बुद्धिमवतारयेत्।

साधुषु उपचर्यमाणेषु विकृतिभजनं स्वहस्तादङ्गारापकर्षणमिव भवति। क्षेत्रबीजयोः वैकृत्यम् अपत्यानि विकारयति।

कुलविशुद्धिः, उभयतः प्रीतिः, मनःप्रसादः, अनुपहतसमयः, श्रीसरस्वत्यावाहनमन्त्रपूतपरमान्नोपयोगश्च गर्भाधाने पुरुषोत्तममवतारयति। गर्भसुखजन्मकर्म अपत्येषु परिशुद्धदेहलाभात्मलाभयोः परमं कारणम्। स्वजातियोग्यसंस्कारहीनानां राज्ये वा सन्यासे वा अधिकारः नास्ति। असति योग्येऽन्यस्मिन् अङ्गविहीनोऽपि पुत्रोत्पत्तेरवधिपितृपदमधिरोढुमर्हति। राजपुत्राणां विनयः, अन्वयं, नयम्, अभ्युदयं च न दूषयति। राजपुत्राणां विनयाभावे राजकुलं घुणजग्धं काष्ठमिव नश्यति। आप्तविद्यावृद्धोपरुद्धाः सुखोपरुद्धाश्च राजपुत्राः पितरं नाभिदृह्यन्ति। यत्प्रसादादात्मलाभो राज्यलाभश्च तौ मातापितरौ राजपुत्राणां परमं दैवम्।

मातापितृभ्यां मनसाप्यवमन्यमानेषु अभिमुखाः अपि श्रियः विमुखी भवन्ति। यत्र दुरपवादोपहतं जन्म तेन राज्येन किं प्रयोजनम् ? क्वचिदपि कर्मणि पितुः आज्ञां न लङ्घयेयुः। आत्मनः विपदः तिरस्काराय अशुभं कर्म कर्तव्यमेव। येषां पितरि राज्यभारः ते राजपुत्राः सुखिनः। यदैश्वर्यं सुखं किमपि न जनयन्ती शतशः परम्पराभिः दुःखमेवानुभावयति तदैश्वर्यं मास्तु। निष्फलो ह्यारम्भः कस्यापि कदापि सुखावहः न भवति। परक्षेत्रे कृषतः कर्षयतो वा श्रमः वृथा भवति। तत् क्षेत्रं यस्य तस्यैव फलं खलु। सुतसोदरसापत्न्यपितृव्यकुल्यदौहित्रागन्तुकेषु पूर्वपूर्वाभावे उत्तरोत्तरस्य राज्यपदावाप्तिः भवति।

शुष्कश्यामवक्त्रता, वाक्स्तम्भः, वाग्भेदः, स्वेदः, विजृम्भणम्, अतिमात्रवेपथुः, प्रस्खलनम्, बाह्यविप्रेक्षणम्, आस्यप्रेक्षणम्, आवेगः, स्वकर्मणि स्वभूमौ चानवस्थानम् इति दुष्कृतं कृतवतः करिष्यतो वा चिह्नानि। इति **राजरक्षा समुद्देशः**।

दिवसानुष्ठानम् (works that should be done during the day)

ब्राह्मे मुहूर्ते उत्थाय इतिकर्तव्यतायां समाधिमुपेयात्। सुखनिद्रापन्ने हि मनसि सर्वा बुद्धयः यथार्थाः प्रतिफलन्ति। उदयास्तमनसन्धिषु धर्मकार्यातिक्रमः दोषाय स्यात्। आत्मवक्त्रम् आज्ये दर्पणे वा निरीक्षेत। प्रातःकाले वर्षधरं विकलाङ्गं वा न पश्येत्। सन्ध्याकाले मुखप्रक्षालनं, पादप्रक्षालनं च यः न करोति तं ज्येष्ठा देवता नानुगृह्णाति। नित्यमदन्तधावनस्य मुखशुद्धिः नास्ति। कार्यव्यासङ्गेन कालकृत्यादीनि न त्यक्तव्यानि। तरङ्गविगमात् सागरे स्नानं युगनिरीक्षणेनापि न सिद्ध्यति। वेगव्यायामस्वापस्नानभोजनस्वच्छन्दवृत्तिकालान् नोपरुनध्यात्। शुक्लमलमूत्रमरुद्वेगसंरोधः अश्मरीभगंदरगुल्मार्शसां हेतुः। गन्धलेपावसानं शौचमाचरेत्। गृहात् बहिरागतः न आचम्य गृहं न प्रविशेत्। क्षीण, अजीर्ण, वृद्ध, वात, किरूक्षभोजिभ्यः इतरेषाम् उषःकाले व्यायामः रसायनसदृशः। शरीरायासजननी क्रिया व्यायामः। शस्त्रवाहनाभ्यासेन व्यायामं सफलयेत् आदेहस्वेदं व्यायामकालमुशन्ति आचार्याः। बलातिक्रमेण व्यायामः आपदं जनयति। अव्यायामशीलेषु जठराग्निदीपनम्, उत्साहः, देहदार्ढ्यञ्च न सिद्ध्यन्ति। इन्द्रियात्ममनोमरुतां सूक्ष्मावस्था एव निद्रा इत्युच्यते। यथा नियमं स्वापात् भुक्तान्नपाकः भवति। इन्द्रियाणि प्रसीदन्ति। अघट्टितं, अपिहितञ्च भाजनं न साधु साधयन्ति अन्नानि। घट्टितेन पिहितेन भाजनं साधु साधयन्ति अन्नानि। नियमानुसारेण निद्रापि अन्नजीर्णायावश्यकः। स्नानस्य कारणानि धर्मार्थकामप्राप्तेः, अशुद्धेः दूरीकरणाय, दुर्जनस्पर्शनिवारणाय च। श्रमस्वेदालस्य विगमः स्नानस्य फलम्। यत्र देवगुरुधर्मोपासनानि न सन्ति तत् स्नानं जलचरस्येव भवति। प्रादुर्भवत्क्षुत्पिपासः अभङ्गनस्नानं न कुर्यात्। आतपसंतप्तस्य जलावगाहः दृङ्मान्द्यं शिरोव्यथाञ्च करोति। बुभुक्षाकाल एव भोजनकालः। अक्षुधितेनामृतमपि भुक्तं विषं भवति। जठराग्निं वज्राग्निं कुर्वन् आहारस्यादौ सदा वज्रकं नाम तक्रं कबलयेत्। निरन्नस्य सर्वं द्रवद्रव्यं जठराग्निं नाशयति। अतिश्रमपिपासोपशान्तौ पेयायाः परं कारणं नास्ति। घृताधरोत्तरं भुञ्जानः अग्निं दृष्टिञ्च लभते। सकृद्भूरिनीरोपयोगः वह्निमवसादयति। क्षुत्कालातिक्रमात् अन्नद्वेषः भवति शरीरञ्च दुर्बलं भवति। अग्नेः उपशमनानन्तरम् इन्धनेन किं प्रयोजनम्?

यो मितं भुङ्क्ते स बहु भुङ्क्ते। अप्रमितम्, असुखं, विरुद्धम्, अपरीक्षितम्, असाधुपाकम्, अतीतरसम्, अकालञ्चान्नं नानुभवेत्। फल्गुभुजम्, अननुकूलं, क्षुधितम्, अतिक्रूरञ्च भुक्तिसमये न सन्निधापयेत्। सह भोजिभिः भोजनारम्भानन्तरम् आत्मने परिवेषयेत्। सायमन्येद्युश्च जठराग्नेः अनुकूलतया भुञ्जीत। भुक्तिपरिमाणे सिद्धान्तः नास्ति। जठराग्नेः अभिलाषायत्तं हि भोजनं खलु। अतिमात्रभोजी देहमग्निं च विधुरयति नाम नाशयति। दीप्तो वह्निः लघुभोजनात् बलं क्षपयति। अत्यशितुः अतिकष्ठेनान्नं जीर्णं भवति। श्रमार्तस्य पानं भोजनञ्च ज्वराय छर्धये वा स्यात्।

न जिहत्सुः न प्रस्रोतुमिच्छुः नासमञ्जसमनाः नानपनीयः। पिपासोद्रेकं चाश्नीयात्। भोजनानन्तरं शीघ्रं व्यायामव्यवायौ न करणीयौ। तथा कृतौ चेत् अपायस्य कारणभूतौ स्याताम्। आजन्मसात्मीकृतं विषमपि पथ्यमेव। इच्छाभावेऽपि पथ्यं सेवेत। अपथ्यं न सेवेत। बलवतः सर्वं पथ्यमिति मत्वा न कालकूटं सेवेत। सुशिक्षितोऽपि विषतन्त्रज्ञः कदाचित् विषादेव म्रियत। अतिथिषु आश्रितेषु च आहारं संविभज्य, स्वयमाहरेत्। देवान्, गुरुं, धर्मञ्च उपचरन् न व्याकुलमतिः स्यात्। व्याक्षेपभूः मनोनिरोधोऽपि सर्वाणीन्द्रियाणि मन्दयति।

स्वच्छन्दवृत्तिः पुरुषाणां परमं रसायनम्। यथा कामसमीहाः काननेषु करिणः व्याधीनामास्पदं न भवन्ति। सततं सेव्यमाने द्वे एव वस्तुनी सुखाय, सरसः सत्सु संलापः ताम्बूलभक्षणञ्च।

चिरायोर्ध्वजानुः जडयति जरयति च रसवाहिनीः स्वसाः नाम नाड्यः। सततमुपविष्टः जठराग्निमाध्मापयति। तुन्दिलतां प्रतिपद्यते च। वाचि, मनसि, शरीरे वा अतिमात्रं खेदः पुरुषम् अकालेऽपि जरया योजयति। देवदेहप्रसादौ नादैवौ कुर्यात्। सर्वदा देवताध्यानेन आत्मनः देहे देवतां स्थापनीया। देव नास्ति, गुरुः नास्ति, धर्मः नास्ति इति वाचकं न विश्वसनीयम्।

क्लेशकर्मविपाकाशयैः अपरामृष्टः पुरुषविशेषः देवः। अर्हन्, अजः, अनन्तः, शम्भुः, बुद्धः, तमोऽन्तकः, ब्रह्मेति देवस्य विशेषनामानि। आत्मसुखानुरोधेन कार्याय नक्तमहश्च विभजेत्। कालानियमेन कार्यानुष्ठानं हि मरणसमम्। आत्ययिके कार्ये

नास्त्यनवसरः। अत्यावश्यकसमये समयासमयौ न द्रष्टव्यौ । अवश्यं कर्तव्ये कालं न यापयेत्। आत्मरक्षायां कदाचिदपि न प्रमाद्येत्। न्यायान्यायनिर्णयाय धर्मासनं गमने समये सवत्सां धेनुं प्रदक्षिणीकृत्य गन्तव्यम्। अनधिकृतः अनभिमतश्च राजसभां न प्रविशेत्। उत्थाय आराध्यमभिवादयेत्। देवगुरुधर्मकार्याणि स्वयं पश्येत्। वञ्चकैः अभिचारकर्मभिः सह न सङ्गच्छेत। प्राण्युपघातेन कामक्रीडां न प्रवर्तयेत्। जनन्यापि परस्त्रिया सह रहसि न तिष्ठेत्। अतिकृद्धोऽपि मान्यं नातिक्रमेत् नावमन्येत। आप्तैः न शोधितं परस्थानम् उपेयात्। आप्तजनैः अनारूढं वाहनं न अध्यासीत। स्वैः अपरीक्षितं तीर्थं, सार्थं, तपस्विनं वा अभिगच्छेत्। याष्टिकैः रक्षकभटैः अविविक्तं नाम अपरिशोधितं मार्गं न भजेत। विषापहारौषधिमणीन् क्षणमपि न उपासीत। भोज्यमुपभोग्यञ्च पदार्थं वह्नावन्यचक्षुषि च परीक्षेत। अमृते मरुति प्रविशति सर्वदा चेष्टेत। दक्षिणे मरुति भुक्तिसुरतसमरार्थी स्यात्। परमात्मना समीकुर्वन् न कस्यापि भवति द्वेष्यः। मनः परिजनशकुनपवनानुलोम्यं भविष्यतः कार्यस्य सिद्धेः चिह्नानि। नक्तं दिवा वा नैकः आहिण्डेत नाम न सञ्चरणीया। नियमितमनोवाक्कायः प्रतिष्ठेत नाम प्रयाणं करणीयम्। नक्षत्रदर्शनात् सायं सन्ध्यमुपासीत।

चतुःपयोधिपयोधरां, धर्मवत्सवतीम्, उत्साहवालधिं वर्णाश्रमखुराम्, कामार्थश्रवणां, नयप्रतापविषाणां, सत्यशौचचक्षुषं, न्यायमुखीम् इमां गाम् अहं गोपयामि। तमहं मनसापि न सहे योऽपराध्येत्तस्यै इतीमं मन्त्रं समधिस्थो जपेत्। चक्रवाकपक्षिः इव दिनकामः निशि स्निग्धं भुञ्जीत। चकोरवत् नक्तं कामः दिवा भुञ्जीत। पारावतकामः नाम कपोतवत् कामः वीर्यवर्धकान्नयोगान् चरेत्। बष्कयिणीनां नाम प्रथमतः प्रसूतानां सुरभीणां नाम धेनूनां क्षीरं, माषदलपरमान्नं च कामवर्धने नाम स्मरसंवर्धने योगः भवति। नावृषस्यन्तीं नाम पुरुषसङ्गेच्छारहितां स्त्रियं न अभियायात्।

वृषप्रकृतिः, शशप्रकृतिः, अश्वप्रकृतिः इति पुरुषः त्रिविधः। प्रथमप्रकृतिः उष्णप्रकर्षवान् प्रदेशः परमं रहस्यमनुरागे, द्वितीयप्रकृतिः सशाद्वलमुदुपवनप्रदेशे, तृतीयप्रकृतिः सर्वत्र च धर्मार्थस्थाने लिङ्गोत्सवं लभन्ते। स्त्रीपुंसयोः समसमागमात् श्रेष्ठं वशीकरणं नास्ति। प्रकृतिः, उपदेशः, स्वाभाविकं च प्रयोगवैदग्ध्यं नाम प्रयोगनैपुण्यञ्च

समसमायोगकारणानि। क्षुत्तर्षपुरीषाभिष्यन्दार्तस्य नाम क्षित्पिपासामलवेगमूत्रवेगार्तस्य अभिगमः नाम सङ्गमः दोषसन्ततिं करोति। सन्ध्याकाले, दिवाकाले, जले, देवालये च मैथुनं न कुर्वीत। पर्वदिने, पर्वसन्धौ, उपहते नाम असाधुदिने कुलस्त्रियं न गच्छेत्। कामपि स्त्रियं तद्गृहाभिगमनेन न अधिशयीत। वंशवयोवृत्तविद्याविभवाननुरूपः वेषः समाचरो वा कमपि विडम्बयति। अपरीक्षितम्, अशोधितञ्च न किञ्चित् राजकुले प्रवेशयेत् निष्कासयेद्वा। सर्वत्राविश्वस्ते नास्ति काचित् क्रिया। इति **दिवसानुष्ठानसमुद्देशः**।

सदाचारः (good conduct)

लोभप्रमादविश्वासैः बृहस्पतिरपि पुरुषः वध्यते वञ्च्यते वा। बलवता अवष्टब्धस्य विदेशगमनं, तदनुप्रवेशो वा श्रेयान्। यद्यन्यथा नास्ति क्षेमोपायः। विदेशवासोपहतस्य पुरुषकारः नास्ति। यो पुमान् येनाविज्ञातस्वरूपः स तस्य महानपि लघुरेव। अलब्धप्रतिष्ठस्य स्ववशं स्ववंशान्वयेनाहङ्कारस्य अर्हः नास्ति। आर्तः सर्वोऽपि धर्मबुद्धिः भवति। यः स्वयं धर्माय समीहते सः नीरोगः नाम आरोग्यवान्। व्याधिग्रस्तस्य धैर्यादन्यदधिकं परमौषधं नास्ति। यस्य जन्म न दुरपवादोपहतं सः महानुभावः। परधीनेष्वर्थेषु स्वोत्कर्षसम्भावनं मन्दमतीनां भवति। भयेषु विषादः न प्रतीकारः। धैर्यावलम्बनमेव प्रतीकारः। रणे मरणे शरसन्धाने वा यः मुह्यति सः न धन्वी भवति। मनः समाधाने यः मुह्यति सः न मुनिः। कृतेः प्रतिकृतिमकुर्वतः एहिकफलं नास्ति। परलोकफलञ्च नास्ति। शत्रुणापि सूक्तमुक्तं न दूषणीयम्।

कलहजननम्, अप्रीत्युत्पादनञ्च दुर्जनानां धर्मः। न तु सज्जनानां धर्मः। यः लब्धार्थमात्रेण सन्तुष्टः तस्य श्रीः अभिमुखी न भवति। भीतेष्वभयप्रदानात् परं दानं नास्ति। यः वैरानुबन्धं न प्रशमयति तस्य वंशवृद्धिः न भवति। स्वस्यासम्पत्तौ चिन्ता न कामितमर्थं दुग्धे। किन्तु उत्साहः कामितमर्थं प्रदास्यति। सर्वेषु कल्पवृक्षवत् फलन्नपि प्रभुः आत्मनि वन्ध्यः इति चेत् स्वस्यैव अपुण्योदयः अपरोधो वा स्यात्। यः मूलधनमसंवर्धयन् अनुभवति सः सर्वदा दुःखितः एव। मूर्खदुर्जनपतितैः सह सम्बन्धः कस्यापि श्रेयस्करः न स्यात्। यस्य चित्तानुरागः हरिद्रारागः इव अल्पकालमात्रः

भवति। तेन प्रयोजनं नास्ति। आत्मानमविज्ञाय प्रदर्शितः विक्रमः पराभवं करोति। पराभियोगस्योत्तरं न क्षान्तिः, किन्तु युक्त्युपन्यासः उत्तमः। अस्थाने कुप्यतां परिजनः नागच्छेयुः। मृतेषु न रोदितव्यम्। अश्रुपातसमाः हृदयेष्वङ्गाराः। यदि पुनः तत्समागमः स्यात्, अतीते वस्तुनि शोकः श्रेयानेव। बहुकालमात्मनि शोकं वासयन् त्रिवर्गमनुशोषयति। दरिद्रेन विषयाभिलाषं न करणीयम्। अपूर्वेषु प्रियपूर्वं सम्भाषणं स्वर्गच्युतानां लिङ्गं नाम चिह्नं पुण्यात्मनः एव तथा कुर्वन्ति। येषाम् इह शाश्वती कीर्तिरस्ति ते न मृताः। यस्य यशोभिः भुवनानि न धवलितानि न केवलं भूभाराय जाताः। परोपकारोद्यतानां शरणागतेषु परीक्षा नास्ति। अभिचारप्रयोगेन परोपघातः महापातकिनामेव। न तु महासत्त्वानाम्।

द्विषत्सभासु विद्वत्सभासु च गुणग्रहणे यस्य प्रागल्भ्यं नास्ति तस्य भूपतेः अभ्युदयः जयो वा न लभ्यते। यत्र कुटुम्बस्य संरक्षणं स्यात् तत्र कुटुम्बं स्थापनीयम्। परस्त्री द्रव्ययोः रक्षणेन आत्मनः फलं किमपि न भवति, विप्लवे तु महाननर्थसम्बन्धः भवेत्। यद्यस्ति दत्ते तस्य सन्तोषः तमात्मानुरक्तं कथमपि न त्यजेत्। आत्मसम्भावनः परेषामसहनश्च भृत्यः बहुजनपरिवारमपि स्वामिनम् एकाकिनं करोति। ततः इतरे प्रभुभक्तिशून्याः भवेयुः। अपराधानुरूपो दण्डः पुत्रेऽपि प्रणेतव्यः। देशानुरूपः करः नाम शुल्कः ग्राह्यः। प्रतिपाद्यानुरूपं वचनमुदाहार्यम्। आयानुरूपः व्ययः कार्यः। ऐश्वर्यानुरूपः प्रासादः विधातव्यः। अङ्गबलम्, अर्थबलञ्च दृष्ट्वा सहायानुरूपं कर्म आरब्धव्यम्। धनश्रद्धानुरूपः त्यागः अनुसर्तव्यः। यस्यास्ति सन्तोषः स पुमान् सुखी भवति। रजस्वलाभिगामि चण्डालादपि अधमः। सलज्जं निर्लज्जं न करणीयम्। यस्य सच्चरित्रमावरणं नास्ति सः पुमान् सवस्त्रोऽपि नग्न एव। यः सच्चरित्रेण भूषितः स नग्नोऽपि अनग्न एव। सर्वत्र संशयानेषु नास्ति कार्यसिद्धिः। क्षीरघृताभ्याम् अन्यत्परं रसायनं नास्ति निर्भाग्यानां परोपघात एव वृत्तिः। न पराधीनं भोजनं करणीयम्। ततः उपवासः एव वरम्। यत्र वर्णसङ्करः नास्ति तस्मिन् देशे वासः उत्तमः। यः परलोकं न पश्यति स जात्यन्धः।

व्रतं, विद्या, सत्यम्, आनृशंस्यम्, अलोलता, शक्तिविशेषश्च ब्रह्मण्यम्। जातिमात्रं

न भवति। निःस्पृहाणां परापेक्षा न भवति। कं पुरुषम् आशा न क्लेशयति ? यस्य मनः अविद्यातृष्णाभ्याम् अनुपहतं, स एव संयमी, गृहाश्रमी वा उत्तमपदमर्हति। पुरुषाणामलङ्कारः शीलमेव। देहखेदावहः बाह्यालङ्कारः नालङ्कारः। कस्य नाम नृपतिर्मित्रम् ?

अप्रियकर्तुः प्रियकरणात् परं मारणकारणं नास्ति। अप्रयच्छन् अर्थिने न परुषं ब्रूयात्। यत्रार्थिनः आप्तकामाः न भवन्ति सा श्रीः मरुभूमिः एव। राज्ञः यज्ञः प्रजापालनमेव। नृपाणां बलं धनुर्वा शरणागतरक्षणाय एव। न तु अनपराधसत्त्वव्यावृत्तये। इति **सदाचारसमुद्देशः**।

व्यवहारः (worldly activities / transaction)

कलत्रं नाम नराणाम् अनिगदमपि दृढं बन्धनमाहुः। मातापितरौ, कलत्रम्, अप्राप्तव्यवहाराणि चापत्यानि त्रीणि अवश्यं भर्तव्यानि। दानं, तपः, प्रायोपवेशनं, नियमव्यवस्थापनं वा तीर्थोपासनस्य फलम्। तीर्थोपवासिषु देवताधनपरिहरणं, क्रूरमृगेषु कारुण्यमिव स्वाचारच्युतेषु पापभीरुत्वमिव इति ज्ञातव्यम् । अधार्मिकत्वम्, अतिनिष्ठुरत्वं, वञ्चकत्वं च प्रायेण तीर्थवासिनां प्रकृतिः एव। धर्मरहितेषु देवपूजाद्युपयोगाय धनार्पणं मूषिकगृहे मोदकन्याससदृशः। यः कार्यकाले एव न सम्भावयति भृत्यान् सः न श्रेष्ठः। यः कार्यमुद्दिश्य अर्थं याचते अङ्गाकृष्टिं करोति सः न भृत्यः, न सखा वा। अर्थेन प्रणयिनी भार्या न साधुभार्या। यत्रात्मनः सुखं नास्ति तत्र न स्थातव्यम्। कष्टकाले यः नोपतिष्ठते सः न बन्धुः। यस्य विश्वासः नास्ति सः मित्रं न भवति। यस्य सत्कलत्रसम्पत्तिः नास्ति सः न गृहस्थः। यत्र सत्कारः नास्ति तत् दानं न साधु। यत्र नास्ति अतिथिसंविभागः तत् भुक्तं न भवति। यत्रास्ति कार्यवशात् प्रवृत्तिः तत् प्रेम न भवति। केवलवाच्यतामायाव्यवहारो वा तत्तु न सत्प्रवर्तनम्। अध्ययनं विनयं च रहितमपत्यं नापत्यम्। यत्र परोक्षे पिशुनभावः तत् सौजन्यं न भवति। सत्पुरुषाणामसन्तोषदायकमैश्वर्यं व्यर्थमेव। मया कृतमिति उपकृतस्योक्तिः उपकारं न भवति।

प्रभूतमानिनोः, पण्डितयोः, स्पर्धिनोः, वाचालयोः, हैतुकयोः, लुब्धयोः, मूर्खयोः,

असहनयोः, साहङ्कारयोः, उच्छृङ्खलयोः, प्रबलयोः, अतत्वदर्शिनोः, सख्यता न सिद्ध्यति। स्ववान्त इव स्वदत्ते नाभिलाषं कुर्यात्। उत्तमवंशसञ्जाताः उपकृत्य मूकभावेन विद्यन्ते। सत्पुरुषाणां परदोषश्रवणे बधिरभावः। महाभाग्यानां परकलत्रदर्शने अन्धभावः। शत्रावपि गृहायते सम्भ्रमः कर्तव्यः। महतां विषये अधिकं कर्तव्यम्। अन्तर्धनसार इव स्वयं स्वस्य धर्मः न प्रकाशयितव्यः। मदप्रमादजे दोषे गुरुषु निवेदनम्, अनुशयः प्रायश्चित्तं च प्रतीकारः। श्रीमतः विभवसंविभाग एव देवगुरुद्विजातीयान् प्रीणयति। न तु कायक्लेशः।

चणका इव नीचाः उदरस्थापिता अपि नाविकुर्वाणाः तिष्ठन्ति। यः प्रत्युपकारमनपेक्ष्य परोपकारं तनोति सः पुमान् वन्द्यचरितः।

अज्ञानिनः वैराग्यं, भिक्षोः विटत्वम्, अधनस्य विलासः, वेश्यारतस्य शौचम्, अविदितवेदितव्यस्य तत्त्वपरिग्रहः इति पञ्च शिरःशूलानि भवन्ति। यः अशास्त्रम् अशस्त्रं वा पुरुषमभियुञ्जीत सः महापातकी। उपश्रुतिं श्रोतुमिव कार्यवशात् नीचमपि लोकं स्वयमुपसर्पेत्।

अर्थी कमपि दोषं न पश्यति। गृहदास्यभिगमः गृहं, गृहपतिं, गृहिणीञ्च प्रत्यवसादयति। वेश्यापरिग्रहः देवद्विजगुरुगृहिणीबन्धूनाम् उच्छाटनमन्त्रः।

अहो लोकस्य पापं यत् निजस्त्री रतिरतारतिरपि निम्बसमा, परपरिगृहीता शुनक्यपि रम्भा समा। यस्य एक एव दारपरिग्रहः स सुखी। व्यसनिनः यथाभिसारिकासु सुखं न तथा अर्थवतीषु। अर्थवतीषु स्त्रीषु विषये महान् धनव्ययः, तदिच्छानुवर्तनं, दैन्यञ्च प्रदर्शनीयम्।

यतिठक्कुरवेश्यावरण्डभण्डानां परिस्पन्दः महान्। अर्थतस्तु न किञ्चन। लोभवति गुणाः सर्वेपि विफलाः भवन्ति। अर्थयाचना पुरुषं लघयति। दारिद्र्यात् परं लाघवकारणं नास्ति। यतः महानपि अन्यदोषेण शङ्कनीयः भवति। दारिद्र्यात् सद्गुणाः सर्वेऽपि व्यर्थाः भवन्ति। अलब्दार्थोऽपि लोकः धनक्षतिभण्डो भवति। भण्डः नाम विदूषकः। यतयोपि धनिनः चाटुकाराः। रत्नहिरण्यपूतात् जलात् परं पावनं नास्ति। आपः स्वयं मेध्याः। वह्नितप्ताः विशेषतः पवित्राः। यत्र बन्धिमोक्षः, दीनोद्धरणञ्च भवति स

एवोत्सवः।

अतिथिपरिजनयोः प्रकामं सन्तर्पणं तान्येवपर्वाणि। यासु धर्माचरणं ताः तिथयः। यस्यामकृत्यनिवृत्तिः सा तीर्थयात्रा। यत्र जातिवयोविद्योचितमनुष्ठानं तत् पाण्डित्यम्। परप्रीत्या स्वकार्यसाधनं यत् तत् चातुर्यम्। सर्वजनादेयत्वं यत् तत् लोकवित्तम्। यत्र परोद्वेगः नास्ति तत्सौजन्यमं वाग्मिता च। अनपवारं यौवनं यत् तत् धीरत्वम्। अदानेव वशीकरणं यत् तत् सौभाग्यम्। यस्यां सभायां विद्वांसः न सन्ति सा सभा अरण्यसदृशा एव। यस्यात्मनः स्वयं प्रियः न भवति तेन किं प्रयोजनम् ? यः परिजनसम्बाधां न सहते सः न प्रभुः। लेखाद्वचनमधिकं प्रमाणं न भवति। अनभिज्ञाने लेखापत्रे नास्ति सम्प्रत्ययः।स्वामिद्रोहः, स्त्रीवधः,बालवधञ्चेति त्रीणि पातकानि सद्यः फलन्ति। बलवता सह अबलाय टिरिटिल्लितम् अप्लवस्य समुद्रावगाहनमिव भवति। बलवन्तमाश्रित्य विकृतिभजनं सद्यो मरणकारणम्। प्रवासः चक्रवर्तिनमपि सन्तापयति। सामान्यविषये किं वक्तव्यम् ? बहुपाथेयं, मनोरनुकूलः परिजनः, सुविहितश्चोपस्करः इति प्रवासेषु दुःखोत्तरणतरण्डको वर्गः। इति **व्यवहारसमुद्देशः** ।

विवादः (countroversy)

गुणादोषयोः तुलादण्डसदृशः राजा। मानवेषु स्वगुणदोषाभ्यां गौरवलाघवे। राजा तु समवर्ती तत्फलमनुभावयति। आदित्यवत् यथावस्थिताः प्रकाशनपराः सभ्याः। अदृष्टशृतव्यवहाराः प्रत्यर्थिनः सामिषाश्च न सभ्याः। लोभपक्षपाताभ्याम् अयतार्थवादिनः सभ्याः सभापतेः सद्यो मानार्थहानिं लभेरन्। यत्र स्वयमेव सभापतिः प्रत्यर्थी तत्र विवादेन प्रयोजनं नास्ति। सभ्यसभापत्योः असामञ्जस्ये न्यायस्य जयः न स्यात्। बहुभिः वचनैः छगलः श्वानः क्रियते खलु।

पराजितस्य चिह्नानि एतानि - विवादमास्थाय सभायां नोपतिष्ठते। समाहूतः अपसरति। पूर्वोक्तम् उत्तरोक्तेन बाधते। परोक्तेषु निरुत्तरः। युक्तमुक्तं न प्रतिपद्यते। स्वदोषमनुद्धृत्य परदोषमुपालभते। यथार्थवादेऽपि द्वेष्टी सभाम् इति। छलेन अप्रतिभानेन वचनाकौशलेन च अर्थहानिः स्यात्। भुक्ति-साक्षि-शासनेषु पूर्वं पूर्वं प्रमाणम्। भुक्तिः सापवादा, साक्रोशाः, विप्रतिपन्नाश्च साक्षिणः, शासनं च कूटलिखितमिति विवादं न

समापयन्ति। बलात् कृतं, अन्यायकृतं, राजोपाधिकृतं च न प्रमाणम्। परस्परविप्रलापे युगैरपि विवादः न समाप्तिः। विप्रकृतोक्तीनाम् आनन्त्यात्। न्यायस्थाने परभूमिं नाभिनिविशेत, न वा मिथः संजल्पं कुर्वीत। राज्ञा दृष्टे व्यवहारे नास्त्यनुबन्धः। राजाज्ञां मर्यादां वा अतिक्रामन् सद्यः फलेन दण्डेन उपहन्तव्यः। दुवृत्तानां दण्डादन्यो नास्ति विनयोपायः। यतः अग्निसंयोग एव वक्रं काष्ठं सरलयति। शक्तस्यापराधिषु क्षमा या सा आत्मनः तिरस्कारः एव।

अतिक्रम्यवर्तिषु निग्रहकर्तुः राज्ञः सर्पादिव दृष्टप्रत्यवायाः सर्वेपि जनाः बिभ्यति। अनायकां बहुनायकां वा सभां न प्रविशेत्। गणपुरश्चारिणः सिद्धे कार्ये स्वस्य न किञ्चिदपि। असिद्धे धृवमात्मनः प्रत्यवायः। यत्र परेषां प्रतापः, न सा गोष्ठी प्रस्तोतव्या। स्वोपालम्बपरिहारेण परमुपालभेत। स्वामिनमुत्कर्षयन् गोष्ठीमवतारयेत्। प्रभोः निर्बन्धकारणात् सत्यमसत्यं वा वदन्तं न अवगृह्णीयात्। नानभियुक्तः कमपि अयुञ्जीत। एकस्योपरि अन्यः आरोपणं करोति। सः आरोपकः अभियुक्तः। अर्थसम्बन्धः, सहवासश्च नाकलहः सम्भवति। निधिः आकस्मिको अर्थलाभो वा सहप्राणैः सञ्चितमपि अर्थमपहारयति।

ब्राह्मणानां हिरण्ययज्ञोपवीतयोः स्पर्शनं शपथः, क्षत्रियाणां शस्त्रास्त्ररत्न-भूमिवाहनपल्ययनानां शपथः, वैश्यानां वैश्रवणपोतयोः काकिणीहिरण्ययोर्वा शपथः, शूद्राणां क्षीरबीजयोः वल्मीकस्य वा शपथः। येन कर्मणा जीवति तत्कर्मोपकरणानान्तु कारूणां शपथः। व्रतिनामन्येषां च इष्टदेवतापादस्पर्शनप्रदक्षिणीकरण-दिव्यकोशदण्डतुलारोहणैः विशुद्धिः भवति। व्याधानां धनुर्लङ्घनं शपथः, अन्त्यावसायिनामार्द्रचर्माधिरोहणं शपथः।

वेश्यामहिला, भृत्यो भण्डः, श्रेणिः नियोगः, नियोगी च मित्रम् इति चत्वारि अशाश्वतानि। क्रीतेषु आहारेष्विव पण्यस्त्रीषु आस्वादः न भवति।

यस्य यावान् परिग्रहः तं तावानेव सन्तापयति। गजे गर्दभे च राजरजकयोः सम एव चिन्ताभारः। मूर्खस्य आग्रहः नापायमनवाप्य निवर्तते। कार्पासाग्नेरिव मूर्खस्य उपशान्तौ उपेक्षणमेव औषधम्। मूर्खस्याभ्युपपत्तिकरणम् उद्दीपनपिण्डः। क्रोधाग्निज्वलितेषु

तत्क्षणप्रशमाग्रहः घृताग्निषु आहुतिनिक्षेप इव भवति। जलसंसिच्यमानशणगुणग्रन्थिरिव अनुनयेन कर्कशो मूर्खः। अनभिज्ञो अन्धः अन्धानिव ध्रियमाणः मूर्खकरमाकर्षति। स्वयमगुणं वस्तु न खलु पक्षपातात् गुणवद्भवति। गोपालकस्नेहात् वृषभः क्षीरं न क्षरति खलु। इति **विवादसमुद्देशः**।

षाड्गुण्यम् (the six qualities)

शमव्यायामौ व्यतिक्रमेण योगक्षेमयोः योनिः नाम कारणं भवतः। कर्मारम्भाणां योगसाधनो व्यायामः। कर्मफलोपभोगानां क्षेमसाधनः शमः। दैवं मानुषं च कर्म लोकं यापयति। दैवं धर्माधर्मौ, मानुषं नयानयौ, तच्चिन्त्यम् अचिन्त्यं दैवम्। अतर्कितोपस्थितार्थानर्थसम्बन्धः दैवायत्तः। बुद्धिपूर्वं हिताहितप्राप्तिपरिहारसम्बन्धः दैवायतः। वुद्धिपूर्व हिताहितप्राप्तिपरिहारसम्बन्धः मनुष्यायत्तः । दैवे अनुकूलेन निष्कर्मणः भद्रमस्ति। दैवमेवेहमानस्य सिद्धान्नमपि मुखे न प्रविशति। दैवमेव अवलम्बमानस्य धनुः स्वयमेव शरान् न सन्धत्ते। पौरुषावलम्बिनः अर्थानर्थयोः सन्देहः। दैवमात्रपरस्य अनर्थः निश्चित एव। आयुरौषधयोरिव दैवपुरुषयोः परस्परानुबन्धः समीहितमर्थं साधयति। योगक्षेमयोः निष्पत्त्युपायः नयः। विपत्तिहेतुः अनयः। त्रिपुरुषमूर्तित्वात् भूभुजः परं प्रत्यक्षं दैवतं नास्ति।

प्रतिपन्नप्रथमाश्रमः हृदयगुहाज्योतिषि भगवति परे ब्रह्मणि निष्णातमतिः, उपासितगुरुकुलः, सम्यग्विद्यायामधीती, कौमारं वयोऽलङ्कुर्वन् क्षत्रपुत्रः भवति ब्रह्मा। सञ्जातराज्यदीक्षाभिषेकं, स्वैः गुणैः प्रजासु अनुरागं जनयन्तं राजानं नारायणमाहुः। नह्यविष्णुः पृथिवीपतिरिति।

प्रवृद्धतापतृतीयलोचनानलः, परमैश्वर्यमातिष्ठमानः राष्ट्रकण्टकानसुरान् द्विषद्दानवांश्चोच्छेत्तुं यतमानः विजिगीषुः भूपतिः भवति पिनाकपाणिः।

उदासीनमध्यस्थविजिगीषु अरिपार्ष्णिग्राह आक्रन्द आसार अन्तर्धयः यथासम्भवं गुणगणविभवतारतम्यात् मण्डलानामधिष्ठातारः भवेयुः।

अग्रतः पृष्ठतः पार्श्वतः कोणतो वा संनिकृष्टे विप्रकृष्टे मण्डले स्थितः, मध्यमादीनां

विगृहीतानां विग्रहे, संहतानामनुग्रहे च समर्थोऽपि केनचित्कारणेन अन्यस्मिन् भूपतौ विजिगीषमाणे यः उदास्ते सः उदासीनः।

उदासीनवत् अनियतमण्डलः, परभूपापेक्षया स्वयं समधिकबलोऽपि कुतश्चित् कारणात् अन्यस्मिन् नृपतौ विजिगीषमाणे यो मध्यस्थभावमवलम्बते सः मध्यमः। बुद्धिबलेन, दैवबलेन, द्रव्यप्रकृतिसम्पन्नं, नयविक्रययोः अधिष्ठानं विजिगीषुः राजा।

स्वस्याहितानुष्ठानेन प्रातिकूल्यं बिभर्ति यः स एवारिः। यो विजिगीषौ प्रस्थिते, प्रतिष्ठमाने वा पश्चात् कोपं जनयति स पार्ष्णिग्राहः। पश्चाद्विजिगीषोः मित्रमाक्रन्दः। पार्ष्णिग्राहमित्रम् आक्रन्दमित्रं वा आसारः। अरिविजिगीष्वोः मण्डलान्तर्विहितवृत्तिः उभयवेतनः पर्वताटवीकृताश्रयश्चान्तर्धिः अराजबीजी,लुब्धः, क्षुद्रः, विरक्तप्रकृतिः, अन्यायपरः व्यसनी, विप्रतिपन्नमित्रामात्यमन्त्रिसामन्तसेनापतिः शत्रुः अभियोक्तव्यः।

अनपाश्रयः, दुर्बलाश्रयो वा शत्रुः उच्छेदनीयः। विपर्ययः पीडनीयः कर्षणीयो वा। समाभिजनः, सहजशत्रुविरुद्धः, विरोधयिता वा कृत्रिमः शत्रुः। अनन्तरः शत्रुः एकान्तरं मित्रम् इति नैष एकान्ततः। कार्यं हि मित्रत्वामित्रत्वयोः कारणम्। न पुनः विप्रकर्षसन्निकर्षौ। बुद्धिशक्तिः शरीरशक्तेः अपि गरीयसी। शशकेन सिंहव्यापादनमत्र दृष्टान्तः। कोशदण्डबलं प्रभुशक्तिः। विक्रमः बलञ्च उत्साहशक्तिः। अत्र रामः दृष्टान्तः। शक्तित्रयोपचितः ज्यायान्। शक्तित्रयापचितः हीनः। समानशक्तित्रयः समः। सन्धिविग्रहयानासनसंश्रयद्वैधीभावाः षाड्गुण्यम्। पणबन्धः सन्धिः। अपकारो विग्रहः। अभ्युच्चयः यानम्। अभ्युच्चयः नाम शत्रोः अपि अधिकबलवत्त्वम्। उपेक्षणम् आसनम्। परस्यात्मार्पणं संश्रयः। एकेन सह सन्धाय अन्येन सह विग्रहकरणम्, एकत्र वा शत्रौ सन्धानपूर्वः विग्रहः द्वैधीभावः। प्रथमपक्षे सन्धीयमानः विगृह्यमाणः विजिगीषुः इति त्र्याश्रयः द्वैधीभावः। द्वितीये तु द्व्याश्रयः। स्वमण्डलमपरिपालयतः परमण्डलाभियोगः विवसनस्य शिरोवेष्टनमिव भवति।

न मां परो हन्तुं, नाहं परं हन्तुं च शक्तः इत्यासीत, यद्यायत्यामस्ति कुशलम्। शक्तिहीनः संश्रयं कुर्यात् यदि न भवति परेषामामिषम्। बलवद्भयादबलवदाश्रयणं हस्तिभयात् एरण्डाश्रयणमिव भवति। स्वयमस्थिरेण अस्थिराश्रयणं सद्यां वहमानेन

वहमानस्याश्रयणमिव भवति।

वरं मानिनो मरणं, न परेच्छानुवर्तनादात्मविक्रयः। आयतिकल्याणे सति कस्मिंश्चित् सम्बन्धे परसंश्रयः श्रेयान् भवति। राजकार्येषु कालनियमो नास्ति। मेघवदुत्थानं हि राजकार्याणाम्। अन्यत्र शत्रौ च सन्धिविग्रहाभ्यां द्वैधीभावं गच्छेत्। यद्यन्यो अवश्यमात्मना सहोत्सहते बलवदुभयमध्यस्थः शत्रुः उभयसिंहमध्यगतः करिवसुखसाध्यः भवति। भूम्यर्थिनां भूमिफलप्रदानेन सन्दध्यात्। यतः न भुवां फलदानमस्ति नित्यमिति। न तु भुवा। परेषु गता भूमिर्गतैव।

अवज्ञयापि भूमावारोपितस्तरुः बद्धमूलः भवति तर्हि भूपतिरपि तथैव। उपायोपपन्नविक्रमः अनुरक्तप्रकृतिः अल्पदेशोऽपि भूपतिः सार्वभौमो भवति। न हि कुलागता कस्यचिद्भूमिः। किन्तु वीरभोज्या वसुन्धरा। सामीपप्रधानभेददण्डाः उपायाः।

गुणसङ्कीर्तनं, सम्बन्धोपाख्यानं, परस्परोपकारसन्दर्शनम्, आयतिप्रदर्शनम्, आत्मोपनिधानमिति पञ्चविधं भवति साम। आत्मोपनिधानं नाम यन्ममद्रव्यं तद्भवता स्वीकृत्येषु प्रयुज्यताम् इति। उपप्रदानं नाम बह्वर्थसंरक्षणाय अल्पार्थप्रदानेन वरप्रसादनम्।

योगतीक्ष्णगूढपुरुषोभयवेतनैः परबलस्य परस्पराशङ्काजननं, निर्भर्त्सनं वा भेदः। वधः, परिक्लेशः अर्थहरणं वा दण्डः। शत्रोरागतं साधुपरीक्ष्य कल्याण-बुद्धिमनुगृह्णीयात्। अरण्यजमौषधं क्षेमाय भवति खलु गृहप्रविष्टः कपोत इव अल्पोऽपि शत्रुसम्बन्धी लोकतन्त्रमुद्वासयति। मित्रहिरण्यभूमिलाभानाम् उत्तरोत्तरो लाभः श्रेयान्। हिरण्यं भूमिलाभाद्भवति। मित्रं च हिरण्यलाभात् लभते। स्वयमसहायश्चेत् भूमिः हिरण्यलाभाय न प्रभवति। तदा मित्रं गरीयः। सहायानुयायि मित्रं स्वयं चास्थास्नुः भूमिरिति ताभ्यां हिरण्यं गरीयः। शत्रोर्मित्रभावे कारणं विमृश्य यथा न वञ्च्यते तथा चरेत्। गूढोपायेन सिद्धकार्यस्य असंवृतिकरणं सविशङ्कां दुरपवादं च करोति। अभयप्रदानमान्योपदेशाभ्यां दुर्जनं शमयेत्। शत्रुमपकृत्य तद्दायादान् भूमिदानेन आत्मनः सफलयेत्, क्लेशयेद्वा। परविश्वासजनने सत्यं, शपथः, प्रतिभूः प्रधानपुरुषप्रतिग्रहो वा हेतुः। सूचीमुखाह्यनर्था भवन्ति। अल्पेनापि सूचीमुखेन महत् सूत्रजालं प्रविशति। योग्यपुरुषापचयः क्षयः। हिरण्यधान्यापचयः व्ययः। येन परैः न अवरुध्येत तमात्मनो

लाभमिच्छेत।

गृहागतमर्थं केनापि कारणेन नावधीरयेत्। यदा अर्थागमः तदैव सर्वतिथिग्रहनक्षत्रबलम्। गजेन गजबन्धनमिव अर्थेनार्थोपार्जनम्। न केवलाभ्यां बुद्धिपौरुषाभ्याम्। यस्यां नासुरवृत्तिः परप्रणेयश्च राजा सा राजन्वती भूमिः। अपरीक्षितार्थमानप्राणो हि राजा असुरवृत्तिः। परकोपप्रसादानुवृत्तिः परप्रणेयः निरनुबन्धम्, अनर्थानुबन्धं च अर्थं न गृह्णीयात्। यत्रायत्यां महाननर्थानुबन्धः नासावर्थः। नवः, भूतपूर्वः, पित्र्यश्च लाभः त्रिविधः। इति **षाड्गुण्यसमुद्देशः**।

युद्धः (battle)

यः प्रथममेव युद्धोद्योगं भूमित्यागञ्च उपदिशति सः मन्त्री न भवति। संग्रामे स्वामिनः महान्तमनर्थं संशयं वा यः व्याहरति सः सहायः न भवति। नृपाणां नयः विक्रमश्च भूम्यर्थं, न तु भूमित्यागाय। बुद्धियुद्धेन परान् जेतुमशक्तः शस्त्रयुद्धमारभेत। यथा प्रज्ञावतां प्रज्ञाः तथा इषवः न प्रभवन्ति। अदृष्टमप्यर्थं साधु साधयति प्रज्ञावान्। दूरस्थोऽपि माधवपिता कामन्दकीयप्रयोगेण माधवाय मालतीं साधयामास इति श्रूयते खलु। कुशलबुद्धीनाममोघं शस्त्रं प्रज्ञा एव। प्रज्ञाहताः कुलिशहताः इव भूभृतः पुनः न प्रादुर्भवन्ति। परैः स्वस्याभियोगमपशत्यो भयं, नदीमपश्यतः उपनत्परित्यजनमिव भवति। अतितीक्ष्णो बलवानपि शरभ इव न चिरं नन्दति। प्रहरतो अपसरतो वा समे विनाशे वरं प्रहारः। दैवस्य गतिः कुटिला। यत् मुमूर्षुमपि जीवयति। जिजीविषुमपि मारयति। दीपशिखायां पतङ्गवत् ऐकान्तिके विनाशे तु अविचारमपसरेत्। जीवतो हि दैवोदयात् कालबलं सम्भवेत्। अल्पमपि सारबलं वरम्। ना प्रतिग्रहो युद्धमुपेयात्। राजव्यञ्जनं पुरस्कृत्य पश्चात् स्वाम्यधिष्ठितस्य सारबलस्य निवेशनं प्रतिग्रहः। सप्रतिग्रहं बलं साधुयुद्धायोत्सहते। पृष्ठतः सदुर्गजलाभूमिः बलस्य महानाश्रयः। नद्यानीयमानस्य तटस्थपुरुषदर्शनमपि जीवनहेतुः। निरन्नमपि सप्राणमेव बलं यदि जलं लभेत। आत्मशक्तिमविज्ञाय उत्साहः शिरसा पर्वतभेदनमिव भवति। सामसाध्यं युद्धसाध्यं न कुर्यात्। गुडादभिप्रेतसिद्धौ को नाम विषं भुञ्जीत ? अल्पव्ययभयात् सर्वनाशं करोति मूर्खः। कृतधीः कोऽपि शुक्लभयात् भाण्डं न परित्यजति खलु। यः महान्तमर्थं रक्षति

सः न तु व्ययः। पूर्णसरः सलिलस्य परिवाहात् अपरः रक्षणोपायः नास्ति। अप्रयच्छतः बलवान् प्राणैः सहार्थं गृह्णाति। बलवति सीमाधिपे अर्थं प्रयच्छन् विवाहोत्सवगृहागमनादिमिषेण प्रयच्छेत्। अमिषमर्थं प्रयच्छतः निबन्धः शासनेन निरवधिः स्यात्। विनिःस्रावितजले सरसि विषमोऽपि ग्राहः जलव्यालो वा चगल इव स्यात्। वननिर्गतः सिंहः शृगालायते। विच्छिन्नोपान्तप्रताने वंशे किमस्त्याकर्षकस्य क्लेशः ? संघातस्य निस्सारता नास्ति। तृणसंघातः मत्तमपि वारणं बन्धयति। दण्डसाध्ये शत्रौ उपायान्तरम् अग्नौ आहुतिप्रदानमिव स्यात्। अविज्ञातकरणवृत्तः सर्वोऽपि भवति शूरः। अदृष्टान्यसामर्थ्यः सदर्पः भवति। अतिप्रवृद्धा श्रीः दर्पयति। कृतार्थापहारः विघटिततन्त्रश्च परः ऋष्यन्नपि किं कुर्यात् ? उत्पाटितदंष्ट्रः सर्पोऽपि रज्जुरेव। प्रतिहतप्रतापः अङ्गारः सम्पतितोऽपि किं कुर्यात् ? विद्विष्टानां चाटुकारं न बहुमन्येत। जिह्वया लिहन् खड्गो मारयत्येव। तत्रावापौ नीतिशास्त्रम्। स्वमण्डलपालनाभियोगः तन्त्रम्। परमण्डलावाप्त्यभियोगः आवापः।

बहुना एकः न विगृह्णीयात्। सदर्पोऽपि सर्पः पिपीलिकाभिः व्यापाद्यत एव। नाशोधितायां परभूमौ प्रविशेत् निष्क्रमेत् वा। विग्रहकाले परस्मादागतं कमपि न गृह्णीयात्। दायादेभ्यः अन्यत्र गृह्णन् वा सह न वसेत्। निजस्वामिना सह कूटकलहं विधाय आप्तविश्वासः कृकलासः नामानीकपतिः आत्मविपक्षं विरूपाक्षं जघानेति श्रूयते खलु। बलमपीडयन् परान् अभिषेणयेत्। दीर्घप्रयाणोपहतं बलम् अनायासेन परेषां साध्यं भवति। परबलस्याकर्षणमन्त्रः दायादादपरः नास्ति। यमभिगच्छेत् तस्यावश्यं दायादानुत्थापयेत्। कण्टकेन कण्टकमिव परेणैव परमुद्धरेत्। बिल्वेन बिल्वं हन्यमानम् उभयथापि आत्मनः लाभाय स्यात्। यावत्परेणापकृतं तावतोऽधिकमपकृत्य सन्धिं कुर्यात्। नातप्तं लोहं लोहेन सन्धत्ते। तेजो हि सन्धानकारणं, नापराधस्य क्षान्तिरुपेक्षा वा। उपचीयमानः घटेनेवाश्माहीनेन सहापि विग्रहं कुर्यात्।

दैवानुलोम्यं, युग्मपुरुषोपचयः, अप्रतिपक्षता च विजिगीषोरुदयः नाम वृद्धिहेतवः। पराक्रमकर्कशः प्रवीरानीकश्चेत् हीनः सन्धाय साधूपचरितव्यः। दुःखामर्षजं तेजः विक्रमयति। स्वजीविते हि निराशस्य अवार्यो भवति वीर्यवेगः। लघुरपि सिंहशाब हन्त्येव दन्तिनम्। अतिभग्नं न पीडयेत्। शमस्य समेन सह विग्रहे निश्चितं मरणम्।

जये च सन्देहः। आमं हि पात्रम् आमेनाभिहतम् उभयतः क्षयम्। ज्यायसा सह विग्रहः हस्तिना पदातियुद्धमिव भवति।

यः राजा विधेयतामात्रेणैव सन्तुष्टः प्राणार्थमानेषु नापकरोति स राजा धर्मविजयी। यः द्रव्येण कृतप्रीतिः प्राणार्थमानेषु नापराध्यति सः लोभविजयी राजा। यः प्राणार्थमानोपघातेन महीमभिलषति सः असुरविजयी राजा। असुरविजयिनः संश्रयः सूनागारे मृगप्रवेश इव भवति। यदि साधुचारसञ्चारः सन्नद्धश्च यादृशस्तादृशो वा यायिनः स्थायी बलवान्। रणेषु चरणपतितं, भीतं, अशस्त्रं च हिंसन् ब्रह्महत्यापातको भवति। सङ्ग्रामवृत्तेषु यायिषु विसर्गः, स्थायिषु संसर्गश्च सेनापत्यायत्तः श्रेयान् सर्वेषां प्राणिणामुभयतो वहति पापाय धर्माय च मतिनदीयं नाम। तत्राद्यं स्रोतो अतीव सुलभम्। द्वितीयं तत् दुर्लभम्। सत्येनापि शप्तव्यम्। महतामभयप्रदायि वचनमेव शपथम्। सर्वे व्यवहाराः सतामसतां च वचनायत्ताः। यस्य वचनममनस्कतयाप्यायातं भवति शासनं, स एव सर्वलोकमहनीयः। देवतया प्रेरिता वाक् एषा सत्यं सरस्वती एव। व्यभिचारिवचनेषु नैहकी पारलौकिकी वा क्रिया समस्ति। विश्वस्तघातात् परं पातकं नास्ति। विश्वासघातकः सर्वेषामविश्वासं करोति। असत्यसन्धेषु विश्वासः कृतान्यकृतानि च हन्ति। असत्यवादिनः मृतस्यापि दुर्यशः न विनश्यति। सकृदुत्थिता अप्रसिद्धिः देवैरपि न निवारयितुं शक्यते। तथाहि धर्मराजः असत्यमभाषत। मद्यमपाच्च इत्यद्यापि दुष्प्रसिद्धिः विद्यते। प्राणवधात् गरीयान् यशोवधः।

बलं, बुद्धिः, भूमिः, ग्रहानुलोम्यं, परोद्योगस्य प्रत्येकं, बहुविकल्पदण्ड-मण्डलाभोगाश्च संहतव्यूहरचनायाः हेतवः। साधुरचितोपि व्यूहः यावत् परबलदर्शनं तावत् तिष्ठति। न हि शस्त्रशिक्षाक्रमेण योद्धव्यम्। किन्तु परप्रहाराभिप्रायेण योद्धव्यम्। व्यसनेषु प्रमादेषु वा परेष्वभिषेणनम् अवस्कन्दः। अन्याभिमुखं प्रयाणमुपक्रम्य अन्योपघातकारणं कूटयुद्धम्। विषविषमपुरुषौपनिषदिकयोगोपजापैः परोपघातानुष्ठानं तूष्णीं दण्डः। एकं बलस्याधिकृतं न कुर्यात्। भेदापराधशङ्कायामेकः समर्थो जनयति महान्तमनर्थम्। राजा राजकार्येषु मृतानां सन्ततिमपोषयन् ऋणभागी स्यात्। धार्मिकेभ्योऽपि परागतिः शूराणाम्। युधि पृष्ठगं ब्रह्महणमाहुः। युद्धे स्वामिनः पुरःसरणम् अश्वमेधमाहुः। युधि स्वामिनं त्यजतः इहामुत्र च कुशलं नास्ति। युद्धाय उच्चलितस्य अर्थं बलं सर्वदा सन्नद्धमासीत। प्रयाणमावासनं च कुर्वतः चतुर्दिशमनीकानि अनतिदूरेण सञ्चरेयुः

तिष्ठेयुश्च। धूमाग्निरजोविषाणध्वनिव्याजेन आटविकाः गूढचाराः परबलान्यागच्छन्ति इति निवेदयेयुः। सर्वसाधारणभूमिकं तिष्ठतः शरीररक्षा नास्ति। इति **युद्धसमुद्देशः**।

विवाहः (marriage)

द्वादशवर्षा स्त्री षोडशवर्षः पुमान् च स्वतन्त्रव्यवहारप्राप्तौ भवतः इति प्राचीनकाले नियमः। अद्यतनकाले अष्टादशवर्षाः आवश्यकाः। विवाहपूर्वो व्यवहारः चातुर्वर्ण्यं कुलीनतां नयति। युक्तितः नाम शास्त्रानुसारेण लौकिकाचारप्रकारेण वधूवरयोः वरणविधानम्, अग्निदेवद्विजसाक्षिकं च पाणिग्रहणं विवाहः इत्युच्यते। यत्र वराय अलङ्कृत्य कन्या प्रदीयते स ब्राह्मो विवाहः। यत्र यज्ञार्थम् ऋत्विजे कन्याप्रदानमेव दक्षिणा स दैवो विवाहः। गोमिथुनपुरस्सरं कन्यादानम् आर्षः विवाहः। त्वं भवास्य महाभागस्य प्रेयसी सहधर्मचारिणी इति विनियोगेन कन्याप्रदानात् प्राजापत्यः विवाहः। एते चत्वारो धर्म्या विवाहाः। मातुः पितुः बन्धूनां च अप्रामाण्यात् परस्परानुरागेण मिथः समुदायात् गान्धर्वः विवाहः। पणबन्धेन कन्याप्रदानात् आसुरः विवाहः। कन्यायाः प्रसह्यादानात् प्रसह्य हरणात् राक्षसः विवाहः। सुप्तप्रमत्तकन्याहरणात् पैशाचः विवाहः। एते चत्वारः विवाहाः अधमा अपि न अधर्म्याः। यद्यस्ति वधूवरयोरनपवादं परस्परसम्भाव्यत्वम्।

कन्यादोषाः उच्यन्ते - कनीनयोः उन्नतत्वं, लोमशत्वं जङ्घयोः, ऊर्वोः अमांसलत्वम्, कटिनाभिजठरकुचयुगलेषु अचारुत्वम्, बाह्वोः अशुभसंस्थानत्वं सिरालुत्वम्, तालुजिह्वाधरेषु कृष्णत्वम्, विरलविषमभावो दशनेषु, कपोलयोः सकूपत्वम्, अक्ष्णोः पिङ्गलत्वम्, ललाटे स्थपुटत्वम्, श्रवणयोःदुःसन्निवेशत्वं, केशेषु स्थूलकपिल-पुरुषातिदीर्घभावः, अतिदीर्घातिलघुन्यूनाधिकता, विकटकुब्जवामनकिराताङ्गत्वम्, जन्मदेहाभ्यां स्वेन समानता, अधिकत्वञ्चेति तादृशी कन्या न स्वीकरणीया।

सहसा तद्गृहे गतस्य स्वयम्, आहूतगतस्य वा अग्रे अभ्यक्ता, व्यक्ता, भुक्ता, व्याधिमती, रुदती, पतिघ्नी, सुप्ता, स्तोकायुष्का, बहिर्गता, कुलटा, अप्रसन्ना, दुःखिता, कलहोद्यता, परिजनोद्वासिनी, अप्रियदर्शना च दुर्भगा भवेदिति कन्यां न वृणीत।

शिथिले पाणिग्रहणे वरः कन्यया परिभूयते। मुखमपश्यतो वरस्य सन्निधौ अनिमीलितदर्शना कन्या प्रचण्डा भवति। सहशयने तूष्णीं भवन् पशुवन्मन्येत,

बलवदाक्रमणं कुर्वन् जन्मविद्वेष्यो भवति। धैर्यचातुर्यायत्तं हि कन्याविस्रम्भणम्। विवाहसम्बन्धः समविभवाभिजनयोः असगोत्रयोश्च निश्चितव्यः। महतः पितुरैश्वर्यात् कन्या अल्पं पतिमवगणयति। पितुः दौर्बल्यात् अल्पस्य कन्या महता अवज्ञायते। अल्पस्य महता सह संव्यवहारे महान् व्ययः अल्पश्चायः। अविशुद्धकन्यापरिग्रहः दोषः। ततः वेश्यासङ्ग्रहोऽपि वरम्। कन्यायाः अकुलीनेष्ववक्षेपः न करणीयः। ततः जन्मनाशोऽपि वरम्। सम्यक् वृत्तापि कन्या यावत्पाणिग्रहणं तावत् सन्देहास्पदमेव। विकृतपत्यूढापि पुनर्विवाहमर्हतीति स्मृतिकाराः वदन्ति।

ब्राह्मणक्षत्रियवैश्यकन्याभाजनाः आनुलोम्येन ब्राह्मणक्षत्रियविशः। मातुलसम्बन्धः देशापेक्षः। दक्षिणदेशे विद्यते, उत्तरदेशे न विद्यते। दारकर्मणः फलं किमित्युक्ते - धर्मसन्ततिः, अनुपहता रतिः, गृहवार्तासु विहितत्वम्, आभिजात्याचारविशुद्धिः, देवद्विजातिथिबान्धवसत्कारानवद्यत्वम्, निःश्रेयसमार्गेषु असङ्कुचितः सञ्चारः, साधकानां हस्तावलम्बनविधानञ्चेति। गृहिणी गृहमुच्यते, न पुनः कुड्यकटसंघातः।

गृहकर्मविनियोगः, परिमितार्थत्वम्, अस्वातन्त्र्यम्, सदाचारः, मात्रुव्यञ्जन-स्त्रीजनावरोधः, स्वरसतः स्वान्तस्य सद्विषयोन्मुखतापादनं चेति कुलवधूनां रक्षणोपायाः।

रञ्जकशिलाकुर्कुरखर्परसमाः वेश्याः। अभिजातः तासु नानुरज्येत। दानैरपि दौर्भाग्यं, संस्कृत्य संस्कृत्य परोपभोग्यत्वम्, उपभोक्तुः अशक्तौ परिभवो मारणं वा महोपकारेपि अनात्मीयत्वम्, बहुकालसम्बन्धमपि त्यक्त्वा सदैव पुरुषान्तरगामित्वम् इति वेश्यानां कुलागता धर्माः। वेश्या वेश्येति न जातिरन्वेष्टव्या, पतिहृदयात् स्वहृदयं व्यभिचारयन्ती सर्वापि वेश्यैव। विट,जार इति न जातिः अन्वेष्टव्या। सती हृदयात् स्वहृदयं व्यभिचारयन् सर्वोपि विट एव, जार एव। इति **विवाहसमुद्देशः**।

प्रकीर्णकः (miscelleneous)

समुद्र इव विप्रकीर्णसूक्तिरत्नविन्यासनिबन्धनं प्रकीर्णकम्। सान्धिविग्रहको नाम इतरराज्यैः सन्धिं विरोधं च निर्णायकस्यामात्यस्य नाम विदेशव्यवहारामात्यस्य लक्षणानि कानि इत्युक्ते - वर्णपदवाक्यप्रमाणयोगविज्ञाननिष्णातमतिः, सुमुखः, सुव्यक्तमधुर गम्भीरध्वनिः, प्रगल्भः, प्रतिभानवान्, सम्यगूहावधारणागमकशक्तिसम्पन्नः, सम्प्रज्ञातसमस्तलिपिभाषा-वर्णाश्रमसमयस्वपरव्यवहारस्थितिः, आशुलेखनवाचनसमर्थश्च

इति सन्धिविग्रहिका गुणाः।

कथाविच्छेदः, व्याकुलत्वं, मुखे वैरस्यम्, अनवेक्षणं, स्थानत्यागः, साध्वाचरितेऽपि दोषोद्भावनं, विज्ञप्ते च मौनम्, अक्षमा, कालयापनम्, आदर्शनम्, मृषाभ्युपगमश्च इति विरक्तलिङ्गानि।

दूरादेवेक्षणं मुखप्रसादः सम्प्रश्नेषु आदरः प्रियवस्तुस्मरणं, परोक्षे गुणग्रहणं, तत्परिवारस्य तदनुनयवृत्तिः इति अनुरक्तलिङ्गानि ।

श्रुतिसुखत्वम्,अपूर्वाविरुद्धार्थातिशययुक्तत्वम्, उभयालङ्कारसम्पन्नत्वम्, अन्यूनाधिकवचनत्वम्, अभिव्यक्तान्वयत्वमिति काव्यस्य गुणाः। अतिपरुषवचनविन्यासत्वम्, अनन्वितगतार्थत्वम्, दुर्बोधानुपपन्नपदोपन्यासत्वम्, अयथार्थयतिविन्यासत्वम्, अभिधानाभिधेयातिशयशून्यत्वम् इति काव्यस्य दोषाः।

वचनकविः, अर्थकविः, उभयकविः, चित्रकविः, वर्णकविः, दुष्करकविः, अरोचकी, सतुषाभ्यवहारी च इति अष्टौ कवयः।

कविसङ्ग्रहस्य फलं किमित्युक्ते - मनः प्रसादः कलासु कौशलम्, सुखेन चतुर्वर्गविषया व्युत्पत्तिः, आसंसारं च यशः, निगूढसत्संस्कारोद्बोधश्चेति।

गीतस्य गुणाः के इत्युक्ते, आलापशुद्धिः, माधुर्यातिशयः, प्रयोगसौन्दर्यवैदग्ध्ये, अतीवमसृणता, स्थानकम्पितकुहकारितादिभावः, रागान्तरसङ्क्रान्तिः, परिगृहीतरागनिर्वाहः, सहृदयहृदयग्राहिता, स्वास्थ्यजननञ्चेति।

वाद्यस्य गुणाः के इत्युक्ते - समत्वम्, तालानुयायित्वं, गेयाभिनयानुगतत्वं, श्लक्ष्णत्वं, प्रव्यक्तयतिप्रयोगत्वं, श्रुतिसुखावहत्वं चेति।

नृत्यगुणाः के इत्युक्ते - दृष्टिहस्तपादक्रियासु समसमायोगः, सङ्गीतकानुगतत्वम्, सुश्लिष्टललिताभिनयाङ्गहारप्रयोगभावः, रसभाववृत्तिलावण्यभावश्चेति।

यः खल्वार्तोऽपि न दुर्वचनं ब्रूते स महान् खलु। यत्रागत्य अर्थिनः कृतार्थाः न भवन्ति सः गृहाश्रमी न भवति। ऋणग्रहणेन धर्मः, सुखं, सेवा, वाणिज्या च आयतिहीनवृत्तीनां तादात्विकानाम्। द्रव्यं विद्यमानमर्थिभ्यो देयम्। नाविद्यमानम्।

ऋणदातुरासन्नं फलं परोपास्तिः, कलहः, परिभवः, प्रस्तावेऽर्थालाभश्च। अदातुस्तावत् स्नेहः, सौजन्यं, प्रियभाषणं, साधुता च यावन्नार्थावाप्तिः। यत्र न सम्भाव्यार्थहानिः तदसत्यमपि नासत्यम्। प्राणवधे सम्प्राप्ते नास्ति कश्चिदसत्यवादः। प्राणावधिः नास्तिकस्यासत्यवादः। अर्थाय लोकः मातरमपि हिनस्ति। असत्यं न भाषते वा ? सत्कला, सत्योपासनं हि विवाहकर्म। वधूवरयोः विवाहः दैवायत्तः। रतिकाले कामार्तः पुमान् यत् ब्रूते, न चैतत् प्रमाणम्। यावत् न प्रातिलोम्यं, कलहः, रतिकैवतञ्च तावत् स्त्रीपुरुषयोः परस्परं प्रीतिः। तादात्विकबलस्य रणे जयः, प्राणार्थस्त्रीषु कल्याणं वा न भवेयुः।

यावन्न भवति कृतार्थः तावत् सर्वः सर्वस्यानुनयवृत्तिपरः। अशुभस्य कालहरणमेव प्रतीकारः। पक्वान्नादिव स्त्रीजनात् देहतापोपशान्तिरेव प्रयोजनम्। तत्रानुरागविरामाभ्यामावश्यकता नास्ति। तृणेनापि प्रयोजनमस्ति। पाणिपादवता मनुष्येण नास्ति वा ? बहु अस्ति।

न कस्यापि लेखमवमन्येत। लेखा प्रधाना हि राजानः। तन्मूलत्वात् सन्धिविग्रहयोः सकलस्य राज्यव्यापारस्य च विद्यन्ते। नीतिविदः पुष्पयुद्धमपि नेच्छन्ति। शस्त्रयुद्धमपि नेच्छन्ति। यः बहून् बिभर्ति सः प्रभुः। या न भवति परेषामुपभोग्या किमर्जुनतरोः फलसम्पदा प्रयोजनं किम् ? यः मार्गपादप इव सर्वेषां संबाधं सहते सः त्यागी। पर्वता इव राजानः केचन दूरत एव सुन्दराः। प्रायशः सर्वेऽपि देशाः लोकवार्तामात्ररमणीयाः एव। अधनस्य बान्धवस्य च जनस्य मनुजपूरितापि भूमिः महाटवी एव। श्रीमतः अरण्यान्यपि राजधानी एव। सर्वस्याप्यासन्नविनाशस्य भवति मतिः प्रायेण विपर्यस्ता एव। पुण्यवतः पुरुषस्य न क्वचिदप्यस्ति असौकर्यम्। दैवमनुकूलञ्चेत् विपदः विघटयति, सम्पन्नो भवति च। असूयकः, पिशुनः, कृतघ्नः, दीर्घरोषणः इति कर्मचण्डालाः।

औरसः क्षेत्रजः, दत्तः, कृत्रिमः, गूढोत्पन्नः, अपविद्धः इति षट्पुत्राः दायादाः पिण्डदाश्च। कानीनः सहोढः, क्रीतः, पौनर्भवः, स्वयं दत्तः, शौद्रश्चेति षट् पुत्राः न दायाद्यः, नापि पिण्डदाश्च। देशकालकुलापत्यस्त्रीसमयापेक्षः दायादविभागः अन्यत्र यतिराजकुलाभ्यां तत्र हि एक एव भवति तत्पदार्हः। अतिपरिचयः कस्यापि अनादरं जनयति।

भृत्यापराधे यदि तं भृत्यं न मुञ्चति स्वामिनो दण्डः। रतिमन्त्रहोमाहारकालेषु कमपि न उपसेवेत। सुष्ठु परिचितेष्वपि तिर्यक्षु विश्वासं न गच्छेत्। मत्तवारणारोहिणा जीवितव्ये सन्देहः निश्चितश्चापायः। अत्यर्थहयविनोदः अङ्गभङ्गम् अनापाद्य न तिष्ठति। ब्राह्मणयतिक्षत्रियेभ्यः अन्यत्र ऋणमाददानः दासकर्मणा निर्हरेत्। यो यस्य यथालाभमशन शयनञ्च न सहते, तस्यात्मदेह एव वैरी।

यो महामुनिरिव सर्वान्नीनः सर्वक्लेश सहः, सर्वत्र सुखशायी च तस्य असाध्य किमपि नास्ति। स्त्रीप्रीतिरिव कस्यापि न स्थिरेयं लक्ष्मीः। प्रायेण परपैशुन्योपायेनैव राज्ञः वल्लभो भवति लोकः। नीचः परापवादेन आत्मोत्कर्षं मन्यते। अन्यपरमाणूनाम् अल्पत्वेन मेरुः न महान् भवति। किन्तु स्वगुणेनैव महान् भवति। महान्तः निनिर्मित कलुषितमनीषाः न भवन्ति। प्रकृत्या शीतलमपि जलम् उष्णं भवति यत् सः वह्ने प्रभावः खलु। कार्यार्थी सुचिरस्थायिनं साधूपचरेत् स्थितैस्सह अर्थोपचारेण व्यवहारं न कुर्यात्।

सत्पुरुषपुरुषश्चारितया शुभमशुभं वा कुर्वतः नास्त्यपवादः प्राणव्यापादो वा समयेषु परं सम्भवो नीतिवादः। सम्पत् सम्पदमनुबध्नाति, विपच्च विपदम्। कार्यार्थी परस्याचारं न विचारयति। शास्त्रविदः स्त्रियश्चानुभूतगुणाः परमात्मानं रञ्जयन्ति। चित्रगतमपि राजानं नावमन्येत। क्षात्रं हि तेजो महत्। सत्पुरुषदेवतास्वरूपेण तिष्ठति। रिपुशेषादिव ऋणशेषादपि अवश्यं भवति आयत्यां भयम्। नवः सेवकः विनीतः भूतो वा न भवति प्रतिज्ञं निर्वाहस्तु दुर्लभः। अप्राप्ते अर्थे भवति सर्वोऽपि त्यागी। प्राप्ते तु स एव अन्य परिणमति। अर्थी परेषु नीचैः आचरणात् न उद्विजेत्। स्वामिना उपहतस्य तदाराधनमेव निवृत्तिहेतुः भवति। दैवोपहतस्य दैवाराधनमेव निर्वृत्तिहेतुः। जनन्या कृतविप्रियस्य बालस्य जननी एव जीवितस्य कारणं भवति। सारतः सर्वोऽपि सर्वास्वप्यवस्थासु नीतिपथम् आत्मपथञ्च न विस्मरेत्। तस्मिन्मार्गे एव सञ्चरेदिति **प्रकीर्णकसमुद्देशः**।

नीतिद्विषष्ठिका (आर्या)

आर्योक्तिः (the word of the Learned)

सुन्दरपाण्ड्येन कृतायाः आर्यायाः, नीतिद्विषष्ठिका इति च प्रसिद्धिः विद्यते। द्विषष्ठिविषयेषु आर्याछन्दसि नीतिः बोधिता। श्रीमान् सुन्दरपाण्ड्यः श्रुतिस्मृतिप्रसृतसत्पदार्थज्ञः। श्रोतृणां बुद्धिवृद्धिकरीं नीतिद्विषष्ठिकां सम्यक् कृतवान्। आर्याछन्दसि इति आदौ उक्तम्। सज्जनसम्मानकामेन वसुदेशजातानां रत्नानामिव सद्भाषितरत्नानां हृदि निचयः कर्तव्यः। परिषदि परपरिवादः पण्डितेन न कथं च न वक्तव्यः। सत्यमपि तन्न वाच्यम्। यदुक्तम् असुखावहं भवति।

उत्तरं नैव वाच्यम् (shouldn't reply)

भूमिपतौ आर्थपतौ विद्यावृद्धे तपोऽधिके बहुषु मूर्खेषु, अरिषु, गुरुषु च विदुषा उत्तरं नैव वाच्यम्।

स्वाधीने माधुर्ये मधुराक्षरसंहितेषु वाक्येषु सत्ववन्तः पुरुषाः परुषाणि भाषन्ते किमिदम् ?

अप्रियमुक्ताः पुरुषाः द्विगुणमप्रियं वक्तुं प्रयतन्ते। तस्मात् अन्यप्रियवाक्यकामेन अप्रियम् अवाच्यम्।

विप्रलापी (chatterer)

अल्पाक्षररमणीयं यः कथयति निश्चितं सः वै वाग्मी भवति। बहुवचनमल्पसारं यः कथयति सः विप्रलापी भवति।

वाणी विराजते (one who speaks harsh)

शब्दार्थसूक्ष्मवसना, सत्याभरणा, विचित्रहेत्वङ्गी, विद्वन्मुखनिष्क्रान्ता सुस्त्री इव विराजते वाणी। दुर्जनवदनविनिर्गतवचनभुजङ्गेन सज्जनो दष्टः। औषधशतैः असाध्यः शान्तिमात्रेण चिकित्स्यते।

कोपाग्निः (the fire of anger)

अवमानारणिमधितं दुर्वागिन्धनविवर्धितज्ज्वालं कोपाग्निं सत्पुरुषाः ज्ञानाम्बुघटैः प्रशमयन्ति।

मधुरभाषिणी वाणी (one who speaks sweetly)

यथा मधुरभाषिणी वाणी पुरुषं प्रह्लादयति तथा शशी, सलिलं, चन्दनरसः, शीतलच्छाया च न प्रह्लादयन्ति।

कटुभाषिणी (one who speaks harsh)

यथा कटुकभाषिणी वाणी पुरुषं परितापयति। तथा रिपुः, शस्त्रम्, अग्निः, विषं, दारुणव्याधिः च न परितापयन्ति।

सज्जनवचनानि (the speech of the virtuous)

रजनिकरः शीतः खलु । रजनिकरात् चन्दनः महाशीतः । रजनिकरचन्दनाभ्यां सज्जनवचनानि शीतानि।

दुर्जनवचनानि (the speech of the crook)

दिवसकरः तीक्ष्णः। दिवसकरात् पावकः महातीक्ष्णः, दिवसकरपावकाभ्यां दुर्जनवचनानि तीक्ष्णानि।

सज्जनमैत्री (friendship with the virtuous)

इक्षोरग्रात् क्रमशः पर्वणि पर्वणि यथा रसविशेषः तद्वत् सज्जनमैत्री विपरीतानां तु विपरीता।

प्रगल्भावाणी (talk or brave ? exaggerated)

कुगृहात् दुष्टस्त्री इव दुर्जनवदनात् प्रवृद्धवागुल्का परुषानलप्रगल्भा वाणी त्वरितगतिः निस्सरति।

मोहादपहसन्ति (ridiculus because of infactuation)

मूर्खेषु कुशलमानिषु विजानतापि अकुशलेन भवितव्यम्। विपुलमपि कथितमर्थं मूर्खाः मोहादपहसन्ति।

मूर्खवत् (like a stupid)

मूर्खाः न द्रष्टव्याः। द्रष्टव्यश्चेत् न तैस्तु सः तिष्ठेत्। यदि तिष्ठेत् न कथयेत्। यदि कथयेत् मूर्खवत् कथयेत्।

वने व्याघ्रं पिशाचं वा दृष्ट्वा मे तथा भयं न भवति। मूर्खम् अभिमुखं दृष्ट्वा मां भयं समाविशति।

अननुभोग्याः (cannot enjoy)

कान्तारपादपानां फलं मानुषैः यथा अननुभोग्यं तथा अनार्येष्वपि अर्थाः मनसा अपि आर्यैः अननुभोग्याः एव।

उपभोगकातराणां पुरुषाणाम् अर्थसञ्चयपराणां गृहे कन्यारत्नमिव अर्थाः परस्यार्थे तिष्ठन्ति।

मित्राणि (friends)

यः अर्थिनमभिमुखमागतमनभिमुखस्सन् विसर्जयति तस्य जीवितार्थः कः ? विभवे सति तस्य पुरुषार्थः कः ?

यस्य विभवारविन्दे विद्वद्भ्रमराः कृतविनोदाः, चारित्रनिर्मलजलः, सत्पुरुषसदः नित्यम् अक्षयो भवतु।

यस्य उद्यानतरोरिव सुहृद्भिः नष्टयन्त्रणैः प्रणयात् सुजीवितः सः जीवलोके जीवति।

यस्मिन् जीवति जीवति महाजनः तस्य जीवितं नाम । यमाश्रितः पुरुषः न जीवति, जीवन्नपि स न जीवति ।

ज्ञानवताम् अतिथीनां लोकज्ञानां प्रकाशवंशानां प्रणयात् गृहे निवसतां शेषभुजः नः सुहृदः सन्तु।

आर्यः अर्थिभ्यः अर्थं सत्कारपूर्वं छन्नं प्रयच्छति। यद्यपि नीचः यच्छति तत्कारणवच्च जनवच्च।

धनम् (money)

शीलं, शौचं, शान्तिः, दाक्षिण्यं, मधुरता, कुले जन्म सर्वाण्यपि अर्थविहीनस्य पुरुषस्य न विराजन्ते।

मानो वा दर्पो वा विज्ञानं, विक्रमः, सुबुद्धिर्वा सर्वं समं विभवहीनस्य पुरुषस्य प्रणश्यति।

अस्पष्टम् अनर्थमपि समृद्धस्य वाक्यं पूज्यं भवति। हेतुप्रमाणयुक्तं दरिद्रस्य वाक्यं न श्रूयते।

यस्य अर्थाः तस्य मित्राणि। यस्य अर्थाः तस्य सम्पदः। यस्य अर्थः सः कुलीनः स्यात्। यस्य अर्थः स च पण्डितः।

गुणः (quality)

प्रख्याते कुले जातेऽपि, स्रग्वी अपि, वाग्मी अपि, सुदर्शनीयश्चापि आर्यैः गुणैः वियुक्तः फलाश इव पुष्पितः भवति।

शीलम् (character)

विद्या, श्रुतं, तपः, ऐश्वर्यं, यशः, प्रकाशो वापि शीलरहितस्य पुंसः द्विरदस्नानोपमं भवति। तीर्थाभिषेकगमनैः निदाघसूर्यानुवर्तनस्थानैः शीशिरेष्वप्सु निवासैः नाशीलः स्वर्गमाप्नोति। शीलरहितस्य स्वर्गप्राप्तिः नास्ति।शीलवतः गन्धैः, मालैः, मुहूर्तरमणीयैः वा आवश्यकता नास्ति। यस्य गुणाधिवासः यशोगर्भः दिशि दिशि प्रसृतो भवति।

वित्तं भवतु न भवतु वा मनुष्यस्य कुलीनता दुर्लभा। कुलपुत्रत्वं प्राप्य चारित्राढ्येन भवितव्यम्।

श्रुतवन्तः शौर्यधैर्यसम्पन्नाः शीलं रक्षमाणाः अपि यथा विक्रियां न यान्ति तथा नीचैः मिलन्ते किल।

नीचः (the rogue)

मानी, दंभी, द्रोही, परापवादी, विकत्थनः, पिशुनः, ब्राह्मणकुले जातेऽपि श्वपाक इव नीचतां याति।

मलिनः (the impure)

येषां हृदयानि नित्यशुद्धानि एते मलिनाः अपि अमलिनाः एव। येषां हृदयानि कलुषानि ते अमलिनाः अपि मलिनाः एव।

विश्वासम् (confidence)

सत्यार्जवहृदयानां साधूनां वर्जयितव्यं किमस्ति ? स्वहृदयानुमानात् ते परहृदये विश्वासं यान्ति।

कुमित्रः (bad friend)

मर्मान्तः परिहासः, यावत्क्रियमात्तभद्रकृत्यं, दुष्कृतानां स्मरणं च कुमित्रस्य चिह्नानि त्रीणि।

नीचः (the lowly man)

पूर्वं बन्धुरिव भवति। मध्ये मित्रमिव भवति। अन्ते शत्रुरिव कृकलास इव दुरात्मा नीचः त्रीन् वर्णान् दर्शयति।

जीवलोकरसायनम् **(elixir of the human world)**

गुणवन्तः, समशीलाः, विस्रम्भसुखोपचारसम्भोगाः, समदुःखसुखाः सुहृदः जीवलोकस्य रसायनं भवन्ति।

भिन्नश्लिष्टा प्रीतिः यद्युपचारेण बहुगुणी भवति, छिन्नविरूढेवलता पूर्वच्छायां न पूरयति।

कल्याणमित्राणि **(friends who are good)**

स्निग्धानाम् अशठानां स्थिरसन्धीनां महानुभावानां व्यसनेषु सहायानां कल्याणमित्राणां भद्रमस्तु।

पापमित्राणि **(friends who are bad)**

वाङ्मात्रवत्सलाः, शस्त्राग्निविषप्रघातहृदयाः अर्थार्थमाश्रिताः पापमित्राणि।

नीचः **(the lowly man)**

यावत्स्वकार्यनिष्पत्तिः तावत् स्वजन इव भवति नीचः। कृतकृत्यः स्वप्रवृत्तः प्रतीकारभयात् शत्रुः भवति।

कैतवम् कैवल्यम् **(salvation)**

यावदनुत्पन्नसौहृदः पुरुषः तावत् उपचारः कर्तव्यः। उत्पन्नसौहृदानाम् उपचारः कैतवं भवति।

सज्जनमैत्री **(friendship with good people)**

धिक् सज्जनमैत्रीं, दुर्जनसंसर्ग एव नो भवतु। सज्जनवियोगकाले तीव्राणि दुःखानि भवन्ति।

गुणसमुदिताः **(people of noble qualities)**

श्वेतगिरिशिखरकेषु निशासु पतिताः चन्द्रांशवः इव गुणसमुदितेषु पुरुषेषु अल्पाश्च गुणाः सीताः भवन्ति।

सुकृतं दुष्कृतम् **(good act and bad act)**

अपराधानां शतमपि एकेन सुकृतेन नाशयति आर्यः। सुकृतशतमपि एकापराधेन नाशयति नीचः।

सेव्याः

एकसुकृतेन दुष्कृतशतानि ये नाशयन्ति ते सेव्याः। एकदोषजनितः कोपः येषां कृतशतघ्नः भवति ते न सेव्याः।

पर्याप्तमेकं मित्रम् (should serve , one good is enough)

समरसमविषमम् अकुटिलम् अनवस्थितं तुल्यशीलसामर्थ्यम् अचलितम्, उदारम् एकमपि मित्रं पर्याप्तम्।

अभिगम्याः वर्ज्याः (those whom one should approach , those one should avoid)

विद्वान् ऋजुः अभिगम्यः, विदुषि शठे चाप्रमादिना भाव्यम्। मूर्खऋजवः अनुकम्प्याः। मूर्खशठाः सर्वदा वर्ज्याः।

अनर्थचिरजीवित्वम् (living for very long is of no use)

कामेर्ष्यासक्तचेतसां पुंसां कर्मण्यसमर्थानां, परिभवदुःखाग्निशतानां चिरजीवित्वमनर्थं भवति।

त्यक्तव्याः सुहृदः (friends whom one should abandon)

दैवविपर्ययादागतं मित्रं व्यसनार्णवे निमग्नं स्वस्थाजनवत् निरीक्षन्ते ये सुहृदः ते त्यक्तव्याः।

सुखम् (happiness)

सततप्रसरे विषये जितेन्द्रियत्वं पुंसः यदि भवेत्, इह च न मनोऽभिघातः परत्र च सुखं भवति।

क्षान्तिस्थानम्

हिमवति औषधं तिष्ठति। उदधौ रत्नं तिष्ठति। विभावसौ तेजः तिष्ठति। असज्जनहृदये वैरं तिष्ठति। सज्जनहृदये क्षान्तिः तिष्ठति।

वैरम् (enemity)

पाषाणेषु रेखा इव मूर्खे वैरं दृढं वैरं चिरं तिष्ठति। जलमध्येषु रेखा इव प्राज्ञे वैरं चिरं न भवेत्।

देवतासदृशाः (similar to gods)

परपरिवादनमूकाः परदारनिरीक्षणेषु जात्यन्धाः, ये पररहस्यबधिराः ते पुरुषाः देवतासदृशाः।

सोढव्यम् (should bear , endure)

यदि तत्त्वेनाक्रोशति तत्त्वमाहेति सोढव्यं भवति। अध चेत् मिथ्याभिहितं क्षन्तव्यं नैतदस्तीति।

दुर्जनः आर्यः (the wicked and the noble)

मर्माणि घट्टयित्वा सुप्रीतमनास्तु भवति दुर्जनः। अप्रियमुक्त्वा अतिभृशं पश्चात्तपति आर्यः।

मनुजान् श्वा यदि दंशति न ते जनाः तं प्रतिदशन्ति। नीचः यद्याक्रोशति सज्जनः तं किञ्चिदपि न वदति।

महर्षिः (maharshi)

भयात् श्रेष्ठं क्षमते। लोकापवादभयात् समं क्षमते। यः हीनं क्षमते सः महर्षिसमः नर इति ज्ञेयः।

महात्मानः (great souls)

वाक्छल्यैः परुषैः मर्मघ्नैः कोपिताः अपि महात्मानः आर्याः शरत्काले सलिलमिव प्रसीदन्ति।

कोपः मास्तु (don't get anger)

आकृष्टेन मतिमता तत्वार्थविचारणे मतिः कार्या। यदि सत्यं कः कोपः ? स्यादनृतं किं नु कोपेन ?

त्रिविधाः पुरुषाः (three types of men)

उत्तममध्यमाधमाः पुरुषाः पनसाम्रपाटलसमाः स्युः। कर्म-सुमफल-सुमनिचयैः कर्मवचः कर्म वाङ्मि च यैः।

सत्पुरुषाणां कोपः (anger of the good people)

सत्पुरुषाणां कोपः न भवति, भवति च चिरं न भवति, चिरं चेत् फले न सम्भवति नीचानां स्नेहः न भवति। भवति च न चिरं भवति, चिरं चेत् फले न सम्भवति।

नीचजनजनितमन्युः कृद्धोऽपि आर्यः विप्रियं न वदति। राहुवदनदष्टः चन्द्रः शैत्यं न परित्यजति खलु।

खलभुजगाः कुपिताः यत् परमर्मघ्नं वाक्यविषं क्षरन्ति शान्तिमयैः अगदैः तत विषमिव सन्तः प्रशमयन्ति।

त्यक्तव्यम् (should leave)

आलस्यं, लौल्यं, लोभः, परापवादः अस्थानेषु कोपः, मानश्च पुरुषेण त्यक्तव्यम्।

पुरुषचतुष्टयम् (four types of men)

विद्वान् ऋजुः प्रधानः। विद्वान् शठश्च मध्यमः पुरुषः, मूर्खऋजुश्च तृतीयः पुरुषः, सर्वजघन्यः मूर्खशठः चतुर्थः।

सुजनः (good person)

सुजनः वैरं न याति। विनाशकालेऽपि परहितबुद्धिः एव। चन्दनतरुः छेदेऽपि कुठारस्य मुखं सुरभयन्ति।

मित्ररूपशत्रवः (enemies in the guoise of friends)

अभिमुखमधुरतरेभ्यः, हठान्मुखाक्रोशनात् कुशीलेभ्यः अभ्यन्तरकलुषेभ्यः मित्रक्रतुभ्यः भेतव्यम्।

कुलीनलक्षणानि (the qualities of one born in noble family)

कुलीनस्य लक्षणानि एतानि - न हसति, नाभ्यसूयति, न परान् परिभवति, नानृतं वदति, आक्षिप्यं कथां न कथयति।

पश्यति दीर्घं कृत्यं, पीडां सहते, परं न पीडयति, न कंचित् अवमन्यते।

नीचः (the crook)

आत्मनः दोषान् न स्मरति। परस्य कुलशीलवृत्तदोषान् विद्यादोषान् कर्मदोषान् च कथयति।

चिरजीवित्वम् (living a long life)

अधर्मचारिणः पुरुषस्य जीवित्वम् अनर्थं भवति। धर्मैकनिरतस्य पुरुषस्य चिरजीवित्वं सफलं भवति।

सृष्टिवैचित्र्यम् (the wonder that is creation)

ज्ञानाढ्यम्, अलोकज्ञं, कृपणं, धनिनं, दरिद्रम्, अभिजातं, गुणवन्तं, श्रुतहीनं सः कृतान्तः कस्मात् कृतवान् ?

ज्ञानफलम् (the result of knowledge)

पर्याप्तज्ञानसत्वयुक्तस्य फलं किमित्युक्ते एतावदेव हि - यदि आपत्सु न मुह्यति, अभ्युदये विस्मितो न भवति।

आर्यस्य दुःखानि (the miseries of the noble man)

नीचेषु कार्ययुक्तिः, साधुप्रणये क्रियासु च अशक्तिः, अनार्यैः सहवासश्च आर्यस्य गुरूणि दुःखानि।

मित्रदोषक्षमत्वम् (pardoning the mistakes of friend)

यः बहुविधदोषं मित्रं पालयति सः पालयति खलु। गुणवति मित्रे परिपालनकृत्यं न किञ्चित् भवति।

जगत्प्रकाशं कृत्वा सर्वात्मना मनुष्येण प्रीतिं विषमरसान्यपि सुहृदां शीलानि अनुवर्तनीयानि।

सद्भिः अभिगम्याः (should be associated with the good)

ये स्वगृहमुपगतानां श्रमम् उपचारैः व्यपनयन्ति ते व्यपगतमानावमानदोषाश्च सद्भिः अभिगम्याः।

सुजनदुर्जनौ (the good and bad person)

अल्पम् ऐश्वर्यम् एत्य प्रायेण दुर्जनो भवति मानी। सुमहदैश्वर्यं प्राप्य प्रशमं प्रतिपद्यते सुजनः।

किमाश्रमैः (what asmramas)

सत्यवचनवृत्तानां शीलजटाशौचवल्कलधराणां सन्तोषाभिरतानाम् आर्याणाम् च आश्रमैः किं कार्यम् ?

वित्तं वैदुष्यम् (wealth and scholarship)

विद्वत्ते यतितव्यम्। अर्थेष्वेवादरः सदा न कार्यः। अर्थः स्वजनगतः। विद्वत्ता लोके दुर्लभा।

त्यक्तव्यं मित्रम् (should leave away the friend)

यस्मिन् बाष्पमोक्षः नापि रहस्यं, न च प्रणयजातं तन्मित्रं त्यक्तव्यम्। अर्थहीनेन श्रमेण किं प्रयोजनम् ?

पर्याप्तं मित्रम् (one friend is sufficient)

हतदोषतया गृहप्रवेशः, दारैः सन्निकर्षश्च यस्य तु अशङ्कनीयौ तन्मित्रं पर्याप्तं भवति।

सज्जनस्नेहः (friendship with a good man)

लोके सदसताम् अनिशं हार्दानि पक्षद्वयशशिसदृशानि। सतां तु आप्यायन्ते। असतां च परिक्षयं यान्ति।

सत्सङ्गम् (association of the good people)

सत्सङ्गमस्य अर्घः कर्तुं न भवतीति मे मतिः। यत्तद्वियोगदुःखं तदेव तस्य मूल्यं भवति।

मूर्खतमाः

येषां धनमस्ति त्यागश्च नास्ति, केवलम् आर्जनरक्षणवियोगदुःखान्यनुभवन्ति ते मूर्खाः मूर्खतमाश्च।

कुलीनानाम् अलङ्कारैः किम् ? (of what use ornaments for one born in high class family)

गुणकलशैः स्नातानां विनयविलेपनविलिप्तगात्राणां विद्याविभूषितानां कुलीनानामलङ्कारैः किम् ?

लोकज्ञानयत्नम् (should endeavour for worldly knowledge)

नृषु बहुमाने प्रवर्तमानेन बलवत्तरेण विदुषा बह्वपि तत्त्वं ज्ञात्वा लोकज्ञाने प्रयतितव्यम्।

तत्कष्टम् (that is difficult)

यत् विद्वान् विद्यापारंगतोऽपि यत्नेन विज्ञातारमविन्दन् प्राकृतजनेन समः भवति।

दुर्लभः पुरुषः (the rare man)

न हि वक्ता मृदुवक्ता विमृश्य वक्ता न चापि बहुवक्ता । ऋतवक्ता गुणवक्ता हितवक्ता च पुरुषः दुर्लभः ।

क्षिप्रं जरयति क्षिप्रं जरयति (makes one old fast)

प्रतिवादिनी च भार्या परसेवा, परगृहे सदा भुक्तिः नीचैर्वासः प्रवासश्च क्षिप्रं जरयति ।

पिचुमन्दः (neem tree)

अनार्ये उपकृतवतापि कृतप्रियोस्मीति नाश्वासितव्यम् । पयसापि सिक्तमूलः पिचुमन्दः नाम निम्बवृक्षः मधुरं न भवति खलु ।

कृत्रिमपुरुषः (the artificial man)

यः विभवे सति न ददाति , न भुङ्क्ते, तस्य तद्द्रव्यं तृणकृत कृत्रिमपुरुषः परस्यार्थे सस्यं रक्षति ।

भोग्या साधुसम्पत् (the company of the noble is an enjoyment)

स्वल्पापि साधुसम्पत् महतां भोग्या भवति। खलश्रीः तथा न सहकरोति। सारसमेव पयः तृषमुपनयति, न तु सागरजलम्।

सुजनाः नीचाः (the good and the bad people)

अतिकुपितापि सुजनाः योगेन मृदू भवन्ति। नीचाः तथा न भवन्ति। हेम्नः कठिनस्यापि द्रवणोपायोऽस्ति। तृणानां तथा नास्ति।

गुणवति (in a man of qualities)

दोषमपि गुणवति जने दृष्टा गुणरागिणः न खिद्यन्ते। शशिनि पतितं कलङ्कमपि प्रीत्यैव पश्यति लोकः।

गुणज्ञः (one who knows / comprehends good qualities)

गुणिनि गुणज्ञो रमते। गुणहीनस्य गुणिनि न परितोषः। भ्रमरः दूरादागत्य पद्मरसं पिबति। एकवासोऽपि मण्डूकः नाप्नोति खलु।

अण्वपि गुणिनां गुणाय भवति सुकृतम्। महदपि दोषिणां दोषाय स्यात् सुकृतम्। तृणमपि गवां दुग्धाय सहकरोति। दुग्धमपि सर्पाणां विषाय भवति।

उपकृतिरेव खलानां दोषस्य गरीयसो हेतुः भवति। अनुकूलाचरणेन व्याधयः अत्यर्थं कुप्यन्ति।

नीचः (the crook)

परवादे दशवदनः। पररन्धे नीरीक्षणे सहस्राक्षः। सद्वृत्तवित्तहरणे बाहुसहस्रार्जुनः नीचः।

लब्धोदयः खलजनः प्रथमे स्वजने सन्तापं करोति। उङ्गच्छन्दवदहनो दारुः जन्म भुवं निर्दहति।

मैत्री (friendship)

सहवसतामप्यसतां जलरुहजलवद्भवति असंश्लेषः। दूरेऽपि सतां वसतां प्रीतिः कुमुदेन्दुवद् भवति।

अतिसत्कृतापि शठाः सहभुवं जातु प्रकृतिं न उज्जन्ति। ननु महेश्वरेण शिरसा धृतोऽपि शशी वक्र एव।

व्यर्थः (wastful)

अपात्रे श्राद्धम् अफलम्। अर्थिभ्यः धनं यत् न दत्तम् अफलमेव। यमिनः यौवनम् अफलम्। दुर्विनीतस्य श्रुतम् अफलम्।

आश्रितवात्सल्यम् (affection for one seeking protection)

निर्गुणमपि अनुरक्तं समाश्रितं सन्तः प्रायः न जहति। सहवृद्धिक्षयभाजं कलङ्कमपि शशाङ्कः वहति।

खलकौशलम् (the expertise of the crook)

परमर्मघट्टनादौ खलस्य यत् कौशलं तत् साधोः न भवति। सूची छिद्रं करोति। तथा तन्तुः सदा पिधत्ते।

दूरं गन्तव्यम् (should go far off)

निकटवर्ती वाचाटष्टिट्टिभः कटु रटति। यतस्मात् अपसरणमेव युक्तं मौनं वा राजहंसस्य।

महदैश्वर्यम् (great wealth)

आरोग्यं, विद्वत्ता, सज्जनमैत्री, महाकुले जन्म, स्वाधीनता च पुंसां महदैश्वर्यम् अर्थैः विनाऽपि।

मूर्खः (the fool)

यत्किञ्चनप्रलापी, परमर्मकुतूहलः, विगतलज्जः, सर्वक्रियासु शक्तः पारिप्लवश्च मूर्खः भवति।

प्राज्ञः (the intellectual)

व्यपनीतदैन्यहर्षः, अविज्ञातज्ञानरत्नसम्पन्नः, गाम्भीर्यधैर्ययुक्तः, अहो समुद्रोपमः प्राज्ञः।

आर्यः (the noble)

अशठहृदयः, कृतज्ञः, सानुक्रोशः, सतां मार्गे स्थितः, अपरापवादकर्मा, शुचिकर्मरतः सः आर्यः खलु।

साधुः (the rightous)

विभवे सति असति चापि अतिथीन् पूजयति, मान्यान् मानयति, मित्रेषु विनिहितात्मा चारित्राढ्यः सः साधुः खलु।

विद्वान् **(the scholar)**

श्रुतिसञ्चयात् विनीतः, सतां मार्गे ज्ञानेन निसर्गतः, विचारदक्षः, परिषदि युक्तं कथयति सः विद्वान् खलु।

कुलीनः **(born in noble family)**

लज्जति, दीर्घं पश्यति, पीडां सहते, परान् न पीडयति, कञ्चित् न अवमन्यते कुलीनस्य लक्षणमेतत्।

सेव्यः **(worthy of serving , one who should be served)**

यो वेत्ति पुरुषसारं, ज्ञानैर्युक्तः, कृतं न नाशयति, अपराधनमपि मृषते, सानुक्रोशः सः सेव्यः खलु।

असेव्यः **(one who shouldn't be served)**

अलमुदकेन तृणैर्वा मनस्विना प्राणधारणा कार्या। नासंस्कृतश्च पुरुषः प्राकृतसत्वः प्रणयितव्यः।

लोकप्रतीक्षणं मास्तु **(donot await for help from world)**

लोकस्तुष्यतु मा वा स्वकार्यनिष्पत्तये प्रयतितव्यम्। लोकप्रतीक्षणपरः नरः न कृतकृत्यतां याति।

सुखावमानाति **(will get comfert)**

सन्तुष्टेनात्मवता समदुःखसुखेन निश्चितार्थेन लोकः सुखं प्रविष्टः मानेन सुखावमनाति।

सहजाः **(natural)**

सदा गिरिषु काठिन्यं, सलिले मृदुता, सूर्ये प्रभा धृवा। असज्जनहृदये वैरं, सज्जनहृदये पुनः क्षान्तिः सहजाः एव।

आर्यस्यागरुस्वभावः **(the noble man's nature is like incense)**

अप्रियवचनाङ्गारैः दग्धोऽपि आर्यः विप्रियं न वदति। दह्यमानमगरुस्वभावसुरभिं न परित्यजति खलु।

अक्षिव्रणम् **(bruise in the eyes)**

दूरेऽपि परस्यागसि आत्मनस्समीपेऽपि न पटुः जनः। स्वं व्रणम् अक्षि न पश्यति। शशिनि कलङ्कं निरूपयति।

कोपे कोपः (anger an angry)

अपकारिणि कोपश्चेत् कोपे कोपः कथं न जायेत ? धर्मार्थकाममोक्षप्राणयशोहारिणि क्रूरे कोपे कोपः कथं न जायेत।

स्वस्थानात्प्रच्युतः (one who has fallen off from his position)

स्वस्थानात् प्रच्युतस्य पुरुषस्य मित्रमपि रिपतां याति। जलादपेतं कमलं रविः शोषयति न तोषयति।

अवज्ञा

विशिष्टेऽपि वस्तुनि प्रायः अतिपरिचयात् अवज्ञा भवति। लोकः प्रयागवासी कूपस्नानं समाचरति।

भयं भयम् (fear)

भृत्याः प्रायशः राजकुलं शङ्कमानाः प्रविशन्ति विनापि दोषेण कृतदोषा इव तत्क्षणमेव निष्क्रान्ताः अपि।

सेवकः मूढः (the servant is stupid)

उन्नतिहेतोः प्रणमति। जीवनहेतोः प्राणान् विमुञ्चति। सुखहेतोः दुःखीयति। सेवकादपरः मूढः कः ?

गन्तव्यं राजगृहम् (should keep going to the house of the king)

यद्यपि अर्थाः न भवन्ति, अनर्थप्रतीकाराः भवन्ति, राजगृहं गन्तव्यं, राजसम्मताः पुरुषा द्रष्टव्याः।

सुखी भवति (becomes happy)

सुहृदि निरन्तरचित्ते, गुणवति भृत्ये, प्रियासु नारीषु शक्तिसमेते स्वामिनि दुःखं निवेद्य सुखी भवति।

किं कृतं तेन ? (what did he do?)

चलानधिकारान् प्राप्य, शत्रुषु मित्रेषु बन्धुवर्गेषु नापकृतं, नोपकृतं, न सत्कृतं, किं कृतं तेन ?

मस्तकशूलानि (head aches)

अविधेयः भृत्यजनः, शठानि मित्राणि, निर्दयः स्वामी, विनयरहिता च भार्या च चत्वारि शूलानि।

स्वभावः दुरतिक्रमः (nature is difficult to overcome)

कुलजोऽयं, गुणवानिति विश्वासः खलप्रकृतौ न क्षमः ननु मलयचन्दनादपि समुत्थितः अग्निः दहत्येव।

व्यर्थम् (waste)

अप्रतिबुद्धे श्रोतरि, पुंसां वक्त्रुत्वमनर्थकं भवति। स्वामिनि नेत्रविहीने स्त्रीणां लावण्यमनर्थकं स्यात्।

प्रतिज्ञफलम् (the result of the

अवसितप्रतिज्ञस्य मनः तीर्णार्णवस्य सुखं, विगतज्वरमिव हृदयं, गात्रं लघुतरमिवावसितभारं भवति।

धनिनोऽपि दरिद्राः एव (even tyhe rich are poor)

धनिनोऽपि अदाननिरताः महादरिद्राणां धुरि वर्ण्यन्ते। यतः पिपासां न हन्ति अतः समुद्रोऽपि मरुभूमिरेव।

अर्थिता हरति (begging steals away qualities)

सेवेव मानमखिलं, ज्योत्स्नेव तमः, जरेव लावण्यं, हरिहरकथेव दुरितं गुणशतमपि अर्थिता हरति।

लोभः (the greedly)

मायाविनिमयविभ्रमनिह्नववैचित्र्यकूटकपटानां सञ्चयदुर्गपिशाचः सर्वहरः मूलकारणं लोभः।

नीचः सुजनश्च (the crook and the noble)

मेघः शरदि गर्जति, न वर्षति, वर्षासु निस्स्वनो मेघः। नीचः वदति न कुरुते। सुजनः न वदति करोत्येव।

खलसुजनौ (the wicked and the noble)

अनुकुरुतः खलसुजनौ अग्रिमपाश्चात्यभागयोः सूच्याः। एकः रन्ध्रं विदधाति। अन्यस्तु गुणवान् पिदधाति।

त्यजन्ति

कृतपापं भयं त्यजति। मित्राणि शठं त्यजन्ति। प्रमादिनं विद्या त्यजति। कामिनं ह्रीः त्यजति। अलसं श्रीः त्यजति। स्त्री क्रूरं त्यजति। लोकः दुर्जनं त्यजति।

अधिगच्छन्ति

दक्षः श्रियमधिगच्छति। पथ्याशी कल्यतां याति। अरोगः सुखमधिगच्छति। उद्युक्तः विद्यामधिगच्छति। विनीतः धर्मार्थयशांसि अधिगच्छति।

यः सकाले प्रियातिथिं नैव जानाति सः मूढः, हितानि यः न श्रुणोति सः बधिरः, यः न विनीतः सः अन्धः।

बुद्धिविकासः (the development of the intellect)

सुकृतिं यः पठति, लिखति, परिपृच्छति पण्डितानुपासयति, तस्य दिवाकरकिरणैः नलिनीव विबोध्यते बुद्धिः।

इमां काञ्चनपीठस्थां समेत्य भुविकवयः सुन्दरपाण्ड्यस्य नीतिद्विषष्ठिकां वधूमिव स्नापयन्ति।

चाणक्यनीतिः

सुखस्य मूलं धर्मः, धर्मस्य मूलम् अर्थः, अर्थस्य मूलं राज्यं, राज्यमूलमिन्द्रियजयः। इन्द्रियजयस्य मूलं विनयः। विनयस्य मूलं वृद्धोपसेवा। वृद्धोपसेवायाः मूलं विज्ञानम्। विज्ञानेनात्मानं सम्पादयेत्। सम्पादितात्मा जितात्मा भवति। जितात्मा सर्वार्थैः संयुज्येत। अर्थसम्पत् प्रकृतिसम्पदं करोति। प्रकृतिसम्पदा हि नायकस्यभावेऽपि राज्यं पाल्यते। प्रकृतिकोपः सर्वकोपेभ्यः गरीयान् भवति। अधिकनाशकारः कोपः। अविनीतप्रभोरभाव एव श्रेयः। लाभश्च भवति बहूनां सम्पादनाय सहायं कृत्वा सहायमात्मनमन्विच्छेत् सहायवान्। असहायस्य मन्त्रनिर्णयाः अनिश्चिताः भवन्ति। एकेन चक्रेण शकटं न परिभ्रमयति खलु। अस्माकं सुखदुःखयोः सदा स्थितः एव सहायकः स्यात्। मानी प्रभुः आत्मना समानं प्रतिमानिनम् आत्मनि द्वितीयं मन्त्रमुत्पादयेत्। अविनीतं व्यक्तिं स्नेहमात्रेण मन्त्रालोचनसमये न मन्त्रे कुर्वीत। बहुश्रुतवन्तं व्यक्तिं सर्वविधैः परीक्ष्य, ततः शुद्धं मन्त्रिणं कुर्वीत।

मन्त्रः (mantra / chant)

समस्तकार्यव्यापाराः मन्त्रालोचने एव सुलभाः भवन्ति। मन्त्ररक्षणेनैव कार्यसिद्धिर्भवति। मन्त्ररहस्यस्य विस्रावी कार्यं नाशयति। प्रमादकारणात् शक्तिः व्यक्तिश्च शत्रुवशमुपयास्यति। सर्वद्वारेभ्यः मन्त्रः रक्षितव्यः। रहसि स्थापनीयः। मन्त्ररक्षणेनैव राज्यं वर्धते। मन्त्रसंरक्षणमेव श्रेष्ठतमः विषयः इति ज्ञातव्यः। कर्तव्याकर्तव्यकार्यान्धस्य प्रभोः मन्त्रः दीप इव मार्गं दर्शयति।

मन्त्ररूपचक्षुषा प्रभुः आत्मनः परिच्छिद्राणि नाम शत्रूणां दोषान् पश्यति। मन्त्रकाले मत्सरः न कर्तव्यः। त्रयाणामेकवाक्ये विषयनिश्चयः करणीयः। कार्याकार्यतत्त्वार्थदर्शिनः मन्त्रिणः। षट्कर्णात् खिद्यते मन्त्रः।

आपत्सु स्नेहसमयुक्तं मित्रम्। मित्रसम्पादनेन बलं सम्पद्यते। बलवान् अलब्धिलाभे प्रयतते। अलसस्य अलब्धिलाभः न भवति। अलसस्य लब्धमपि रक्षितुं शक्यं न भवति। भृत्यैः कार्यं साधितुमपि न समर्थः भवति अलसः।

राज्यतन्त्रम् (the doctrine of kingdom)

अलब्धवस्तुसम्पादनं, लब्धवस्तुनः संरक्षणं, संरक्षितस्य विवर्धनं, वर्धितस्य सम्पदः विभजनञ्चेति चतुष्टयमेव राज्यतन्त्रम्।

राज्यतन्त्रायत्तं नीतिशास्त्रम्। तन्त्रावापौ राज्यतन्त्रेषु आयत्तौ। सामदानभेददण्डोपायान् स्वविषयकृत्येषु आयत्तं तन्त्रमित्युच्यते। इतरराज्यमण्डले सामदानादिचतुरोपायप्रयोगः आवापः इत्युच्यते। सन्धिविग्रहयोः निर्मण्डलः।

नीतितन्त्रम् (the doctrine of morality)

नीतिशास्त्रानुगो राजा। स्वस्यदेशस्यानन्तरप्रकृतिः शत्रुः भवति। एकान्तरितं मित्रमिष्यते। हेतुतः शत्रुमित्रे भविष्यतः। हीयमानः सन्धिं कुर्वीत। सन्ध्यर्थानां सन्धानहेतुः तेजः। अतप्तलोहः लोहेन न सन्धीयते खलु। बलवान् हीनेन विगृण्हीयात्। आत्मनः ज्यायसा समेन वा विवादः न करणीयः। गजपादयुद्धमिव बलवद्विग्रहः स्यात्। आमपात्रम् आमपात्रेण सह घर्षणे विनश्यति। अतः समानैः युद्धं न करणीयम्। अरिप्रयत्नम् अभिसमीक्षेत। बहवः शत्रवः सन्ति चेत् एकेन सन्धिः करणीया। अमित्रविरोधात् आत्मरक्षामावसेत्।

शक्तिहीनः बलवन्तमाश्रयेत्। दुर्बलाश्रयः दुःखमावहति। अग्निवत् राजानमाश्रयेत्। उष्णसाहाय्यं प्राप्तव्यम्। उष्णस्पर्शः न करणीयः खलु। राज्ञः प्रतिकूलं नाचरेत्। उद्धतवेषधरः न भवेत्। देवचरितं न चरेत्। द्वयोरपि ईर्ष्यतोः द्वैधीभावं कुर्वीत। व्यसनपरस्य कार्यावाप्तिः न सिद्ध्यति। चतुरङ्गबलवानपि इन्द्रियवशवर्ती विनश्यति।

द्यूतप्रवृत्तस्य कार्यसिद्धिर्न भवति। मृगया परस्य धर्मार्थौ विनश्यतः। अर्थेषणा तु व्यसनेषु न गण्यते। कामासक्तस्य कार्यानुष्ठानं न सिद्ध्यति। वाक्पारुष्यम् अग्निदाहादपि विशिष्टं भवति।

दण्डनीतिः (the science of governance , law)

दण्डपारुष्यात् सर्वजनद्वेष्यो भवति राजा। स्थितेनार्थेन तुष्टं तोषणं श्रीः परित्यजति। शत्रोः वशीकरणाय दण्डनीतिः आचरणीया।

दण्डनीतिमधितिष्ठन् प्रजाः संरक्षति। दण्डः सम्पदा योजयति। दण्डाभावे मन्त्रिवर्गाभावः स्यात्। दण्डात् प्रजाः अकार्याणि न कुर्वन्ति। आत्मरक्षणं सर्वं दण्डनीत्यामायत्तम्। राजा आत्मनि रक्षिते सर्वं रक्षितं भवति। वृद्धिविनाशौ आत्मायत्तौ पूर्वापरालोचनानन्तरमेव दण्डप्रयोगः करणीयः। दुर्बलोऽपि राजा नावमन्तव्यः। अग्नेः दौर्बल्यं नास्ति दण्डे प्रतीयते वृत्तिः।

अर्थनीतिः (the science of finance)

वृत्तिमूलम् अर्थलाभः। अर्थमूलौ धर्मकामौ। अर्थमूलं कार्यम्। अर्थसिद्धेः अल्पप्रयत्नात् कार्यसिद्धिर्भवति। उपायैः क्रियमाणं कार्यं दुष्करं न स्यात्। अनुपायपूर्वं कार्यं कृतमपि नश्यति। कार्यार्थिनां सहायः उपाय एव पुरुषकारेण कार्यं लक्ष्यं सम्पद्यते। दैवं पुरुषकारमनुवर्तते। दैवं विना अतिप्रयत्नं करोति यत् तद्विफलं स्यात्। असमाहितस्य वृत्तिः न विद्यते। पूर्वं निश्चित्य पश्चात् कार्यमारभेत। कार्यान्तरे दीर्घसूत्रता न कर्तव्या। चलचित्तस्य कार्यावारितः न भवति। हस्तगतावमानात् कार्यव्यतिक्रमः भवति। दोषवर्जितानि कार्याणि दुर्लभानि। कष्टसाध्यं, दुःखपूर्णं च कार्यं नारभेत्। कालवित्कार्यं साधयेत्। कालातिक्रमात् काल एव फलं पिबति। तस्मात् सर्वकृत्येष्वपि क्षणमपि कालविक्षेपं न कुर्यात्। देशफलविवेचनानन्तरं कार्यमारभेत। सुसाध्यमपि दैवहीनं कार्यं दुःसाध्यं भवति।

नीतिज्ञः (the knower of morality)

नीतिज्ञः देशकालौ परीक्षेत। परीक्षकारिणि श्रीः चिरं तिष्ठति। सामदानभेददण्डोपायैः सर्वाश्च सम्पदः सम्पादनीयाः। अपरीक्षकारिणं भाग्यवन्तं श्रीः परित्यजति। ज्ञानानुमानैश्च परीक्षा कर्तव्या। यः यस्मिन् कर्मणि कुशलः, तं तस्मिन्नेव योजयेत्। उपायज्ञः दुःसाध्यमपि सुसाध्यं करोति। अज्ञानिना कृतमपि न बहु मन्तव्यम्। यादृच्छिकत्वात् कृमिरपि रूपान्तराणि करोति खलु। सिद्धस्यैव कार्यस्य प्रकाशनं कर्तव्यम्। ज्ञानवतामपि दैवमानुषदोषात् कार्याणि न फलन्ति। शान्तिकर्मणा दैवं प्रतिषेद्धव्यम्। मानुषीं कार्यविपत्तिं कौशलेन विनिवारयेत्। कार्यविपत्तौ दोषान् वर्णयन्ति बालिशाः। कार्यार्थिना दाक्षिण्यं न कर्तव्यम्। क्षीरार्थी वत्सः मातुः ऊधः प्रतिहन्ति खलु। अप्रयत्नात् कार्यविपत्तिः भवेत्। केवलदैवप्रमाणानां कार्यसिद्धिः न भवति। कार्यबाह्यः आश्रितान् न पोषयति। आत्मनः कर्तव्यं कार्यं यः न पश्यति सः अन्धः एव।

कार्यनीतिः (the doctrine of action)

प्रत्यक्षपरोक्षानुमानैः कार्याणि परीक्षेत। सम्यक् परीक्ष्य विपत्तिः तार्या। अपरीक्ष्यकारिणं श्रीः परित्यजति। स्वशक्तिं ज्ञात्वा कार्यमारभेत। स्वजनं सन्तृप्तिकरेण तर्पयित्वा यः शेषभोजी सः अमृतभोजी। सर्वविधकार्यानुष्ठानात् आयमुखानि वर्धन्ते। कार्यचोरस्य भीरोः कार्यचिन्ता नास्ति। कार्यार्थी स्वस्य प्रभोः शीलं ज्ञात्वा कार्यं साधयेत्। धेनोः शीलज्ञः क्षीरं दुग्ध्वा भुङ्क्ते।

विचारशीलः (the thoughtful)

विचारशीलः आत्मनः गुह्यप्रकाशनं क्षुद्रे न कुर्यात्। राज्ञः मृदुस्वभावः आश्रितैः अपि अवमन्यते। तीक्ष्णदण्डः सर्वैः उद्वेजनीयो भवति। अल्पसारं श्रुतवन्तमपि न बहु मन्यते लोकः। ततः राजा दण्डकारी स्यात्। अतिभारः पुरुषमुपपादयति। सभाप्रदेशे यः परदोषं प्रकटयति, सः स्वदोषं प्रख्यापयति। अनात्मवतां कोपः आत्मानमेव नाशयति। सत्यवताम् अप्राप्यं नास्ति। साहसेन कार्यसिद्धिः न भवति। व्यसनार्तः अप्रवेशेन विस्मरति। कालविक्षेपे कार्याणां विघ्नानि सम्भवन्ति। असंशयविनाशात् संशयविनाशः श्रेयान् भवति। परधनानि निक्षेप्तुः केवलं स्वार्थं मुख्यम्। दानं धर्मः इत्युच्यते। समाजे प्रचलितं परम्परागतं व्यर्थमाचरणमेव मानवजीवननाशकं भवति। यो धर्मार्थौ न पीडयति सः कामः। धर्मार्थविपरीतः कामसेवी अनर्थकः भवति। जनेषु ऋजुस्वभावपरः दुर्लभः। साधुः अवमानेना-गतमैश्वर्यमवमन्यते। बहूनपि गुणान् एको दोषो ग्रसति। महात्मना परेण साहसं न कर्तव्यम्। कदाचिदपि सदाचारं न लङ्घयेत्। सिंहः क्षुधार्तः न तृणं खादति।

प्राणादपि प्रत्ययो रक्षितव्यः। पिशुनः श्रोता पुत्रदारैरपि त्यज्यते। बालादपि अर्थजातं श्रुणुयात्। सत्यमपि अश्रद्धेयं न वदेत्। अल्पदोषात् बहुगुणाः त्यज्यन्ते। विपश्चित्स्वपि दोषाः सुलभाः। अखण्डितं रत्नं नास्ति। मर्यादातीतं कदाचिदपि न विश्वसेत्। अप्रिये कृतं प्रियमपि द्वेष्यं भवति। समन्त्यपि तुलाकोटिः कूपोदकक्षयं करोति। सतां मतं नातिक्रमेत्। गुणवदाश्रयात् निर्गुणोऽपि गुणी भवति। क्षीराश्रितं जलं क्षीरमेव भवति। मृत्पिण्डोऽपि पाटलिगन्धमुत्पादयति। कनकसङ्घात् रजतं कनकं भवति। उपकर्तरि अपकर्तुमिच्छति मूर्खः। पापकर्मणाम् आक्रोशभयं नास्ति। उत्साहवतां शत्रवोऽपि वशीभवन्ति। मनोबलमेव उत्साहः। पराक्रममेव राज्ञां मुख्यधनं भवति। अलसस्य

ऐहिकामुष्मिकं नास्ति। उत्साहहीनस्य दैवसहायं न लभ्यते। मत्स्यार्थी इव जलमुपयुज्यार्थं गृह्णीयात्। अविश्वस्तेषु विश्वासः न कर्तव्यः। सर्वेष्वपि कालेषु विषं विषमेव। अर्थसङ्ग्रहणे वैरिणां सङ्घ एव न कर्तव्यः। अर्थसिद्धावपि वैरिणं न विश्वसेत्। अर्थाधीन एव नियतसम्बन्धः। शत्रोः सुतः अपि सखा रक्षितव्यः। यावत् शत्रोः दौर्बल्यं न जानीमः तावत् हस्तेन स्कन्धेन वा बाह्यः। शत्रुं छिद्रे प्रहरेत्। आत्मछिद्रं न प्रकाशयेत्। छिद्रप्रहारिणः शत्रवः एव। हस्तगतमपि शत्रुं न विश्वसेत्। स्वजनस्य दुर्वृत्तं निवारयेत्। स्वजनावमानोऽपि मनस्विनां दुःखमावहति। एकाङ्गदोषः पुरुषमपसादयति। सुवृत्तता शत्रुं जयति। विकृतिप्रियाः नीचाः। नीचस्य सदुपदेशः न करणीयः। नीचपुरुषेषु विश्वासः न कर्तव्यः। सुपूजितोऽपि दुर्जनः पीडयत्येव। चन्दनादीनपि दावाग्निः दहत्येव। कदापि पुरुषं नावमन्येत। क्षन्तव्यमिति पुरुषं न बाधेत। रहसि एकान्ते प्रभुणा उक्तम् अधिकं वक्तुमिच्छन्ति अबुद्धयः। अनुरागस्तु फलेन सूच्यते। आज्ञाफलम् ऐश्वर्यम्। दातव्यमपि बालिशः परिक्लेशेन दास्यति। महदैश्वर्यं प्राप्यापि अधृतिमान् नाम धैर्यहीनः विनश्यति। धैर्यहीनव्यक्तेः इहपरसुखं नास्ति। दुर्जनैस्सह संसर्गः न कर्तव्यः। शौण्ढहस्तगतं पयोऽपि अवमन्येत। कार्यसङ्कटेषु अर्थव्यवसायिनी बुद्धिः। मितभोजनं स्वास्थ्यं भवति। अजीर्णे पथ्यमपथ्यं वा नाश्नीयात्। न भुञ्जीयात्। जीर्णभोजनं व्याधिः नोपसर्पति। जीर्णशरीरे वर्धमानं व्याधिं नोपेक्षेत। अजीर्णे भोजनं दुःखं स्यात्। व्याधिः शत्रोरपि अधिकदुःखदायका। स्वस्य धनशक्तिमनुसृत्य दानं करणीयम्। पटुतरे तृष्णापरे सुलभमतिसन्धानम्। तृष्णाया मतिः छाद्यते। कार्यबहुत्वे बहुफलमायातिकं कुर्यात्। स्वयमेवापस्कन्नं कार्यं निरीक्षेत। मूर्खेषु साहसं नियतम्। मूर्खेषु विवादः न कर्तव्यः। मूर्खेषु मूर्खवत् कथयेत्। आयसैः आयसं छेद्यम्। अधीमतः नास्ति सखा । धर्मेण धार्यते लोकः। प्रेतमपि धर्माधर्मौ अनुगच्छतः। दया धर्मस्य जन्मभूमिः। धर्ममूले सत्यदाने। धर्मेण जयति लोकान्। मृत्यरपि धर्मिष्ठं रक्षति।

अधर्मबुद्धिः (the man without morals / dharma)

धर्माद्विपरीतं पापं यत्र प्रसज्यते तत्र धर्मापमतिः महती प्रसज्यते। उपस्थितविनाशानां प्रकृतिः आकारेण लक्ष्यते। अधर्मबुद्धिः आत्मविनाशं सूचयति। पिशनवादिनः रहस्यं नास्ति। पररहस्यं नैव श्रोतव्यम्। वल्लभस्य कठोरप्रवर्तनम् अधर्मयुक्तं भवति। स्वजनेषु

अतिक्रमः न कर्तव्यः। मातापि दुष्टा त्याज्या। विषदिग्धः स्वहस्तोऽपि छेद्यः। हिताभिलाषी परोऽपि च बन्धुरेव। कक्षादपि औषधं गृह्यते। चौरेषु विश्वासः नास्ति। अप्रतीकारेषु अनादरः न कर्तव्यः। मानवस्य सर्वनाशनकारणं भवति व्यसनम्। अमरवत् अर्थजातमर्जयेत्। अर्थवान् सर्वलोकस्य बहुमतः स्यात्। महेन्द्रमपि अर्थहीनं न बहुमन्यते लोकः। पुरुषस्य जीवितं मरणं दारिद्र्यं खलु। विरूपोऽपि अर्थवान् सुरूपः। अदातारमपि अर्थवन्तम् अर्थिनः न त्यजन्ति। अकुलीनोऽपि धनी कुलीनवत् विशिष्ठः भवति।

अनार्यः (the dispicable man)

अनार्यस्य अवमानभयं नास्ति। चेतनवतां व्यवहारकार्यकुशलीनाम् वृत्तिभयं नास्ति। जितेन्द्रियाणां विषयभयं नास्ति। कृतार्थानां मरणभयं नास्ति। कस्यचिदर्थं स्वार्थमिव मन्यते साधुः। परेषां धनं लोभदृष्ट्या न द्रष्टव्यम्। परधनवाञ्छा नाशमूला स्यात्। पलालमपि परद्रव्यं न हर्तव्यम्। परद्रव्यापहरणम् आत्मद्रव्यनाशहेतुः भवति। चौर्यात्परं मृत्युपाशः नास्ति। एकस्मिन् समये यवागूरपि प्राणधारणं करोति। न मृतस्यौषधं प्रयोजनम्। समकाले स्वयमपि प्रभुत्वस्य प्रयोजनं भवति। नीचस्य विद्याः पापकर्मणि योजयन्ति। भुजङ्गस्य पयःपानमपि विषवर्धनं स्यात्। नामृतं स्यात्। नहि धान्यसमो हि अर्थः। क्षुधा समः शत्रुः नास्ति। अकृतेः नियता क्षुत्। क्षुधितस्य अभक्ष्यं नास्ति। अधिकतया उपयुक्तानि इन्द्रियाणि मानवम् अकालवार्धक्यवशं कुर्वन्ति। सानुक्रोशं भर्तारमाजीवेत्। विशेषज्ञं स्वामिनमाश्रयेत्। पुरुषस्य मैथुनं जरा। स्त्रीणाममैथुनं जरा। नीचोत्तमयोः विवाहः न करणीयः। आगम्यागमनात् आयुः यशः पुण्यानि क्षीयन्ते। अहङ्कारसमः शत्रुः नास्ति। सभायां शत्रुः न निन्दितव्यः। शत्रुव्यसनं श्रवणसुखं भवति। अधनस्य बुद्धिः न विद्यते। हितमपि अधनस्य वाक्यं न गृह्यते। धनहीनः स्वभार्ययापि अवमन्यते। भ्रमराः पुष्पहीनमाम्रवृक्षमपि न परिभ्रमन्ति। अधनानां धनं विद्या। चौर्यैरपि विद्या न ग्राह्या। विद्यया ख्यापिता ख्यातिः। यशः शरीरं न विनश्यति।

सत्पुरुषः (the virtuous man)

यः परार्थमुपसर्पति सः सत्पुरुषः। इन्द्रियाणां प्रशमं शास्त्रम्। अशास्त्रकार्यवृत्तौ शास्त्रांकुशं निवारयति। नीचस्य विद्या नोपेतव्या। म्लेच्छभाषणं न शिक्षेत। म्लेच्छानामपि

सुवृत्तं ग्राह्यम्। गुणे मत्सरः न कर्तव्यः। शत्रोरपि सुगुणो ग्राह्यः। विषादपि अमृतं ग्राह्यम्। अवस्थया पुरुषः सम्मान्यते। स्थाने एव नराः पूज्यन्ते। आर्यवृत्तमनुतिष्ठेत्। कदापि मर्यादां नातिक्रमेत्। पुरुषरत्नस्य अर्घः नास्ति। स्त्रीरत्नसमं रत्नं नास्ति। सुदुर्लभं रत्नम्। भयेषु उत्कृष्टं भयम् अयशो भयम्। अलसस्य शास्त्रागमः नास्ति। न स्त्रैणस्य स्वर्गाप्तिः, धर्मकृत्यं च । स्त्रियोऽपि स्त्रैणमवमन्यन्ते। पुष्पार्थी शुष्कतरुं न सिञ्चति। धनाभावे न कार्यसाधनयत्नं सिकतात् तैलमर्दनसदृशमेव। महाजनहासः न कर्तव्यः। कार्यसम्पदं निमित्तानि सूचयन्ति। नक्षत्रादपि निमित्तानि विशेषयन्ति। न त्वरितस्य नक्षत्रपरीक्षा। परिचये दोषाः न छाद्यन्ते। स्वयमशुद्धः परानाशङ्कते।

स्वभावो दुरतिक्रमः। अपराधानुरूपः दण्डः। कथानुरूपं प्रतिवचनम्। विभवानुरूपमाभरणम्। कुलानुरूपं वृत्तम्। कार्यानुरूपः प्रयत्नः। पात्रानुरूपं दानम्। वयोऽनुरूपो वेषः। स्वाम्यनुकूलो भृत्यः। भर्तृवशवर्तिनी भार्या। गुरुवशानुवर्ती शिष्यः। पितृवशानुवर्ती पुत्रः। अत्युपचारः शङ्कितव्यः। स्वामिनमेवानुवर्तेत। मातृताडितः वत्सः मातरमेवानुरोदिति। स्नेहवतः स्वल्पोऽपि रोषः। मूर्खः आत्मछिद्रं न पश्यति, परच्छिद्रमेव पश्यति। सोपचारः कैतवः। कामैः विशेषैः उपचरणम् उपचारः। चिरपरिचितानाम् अत्युपचारः शङ्कितव्यः। श्वसहस्रादेकाकिनी श्रेयसी गौः। श्वः मयूरात् अद्य कपोतः वरः। अतिसङ्गः दोषमुत्पादयति। अक्रोधः सर्वं जयति। यद्यपकारिणि कोपः कोपे कोप एव कर्तव्यः।

मतिमन्तः (the thoughtful man)

मतिमत्सु मूर्खमित्रगुरुवल्लभेषु विवादः न कर्तव्यः। अपिशाचमैश्वर्यं नास्ति। धनवतां सुकर्मसु श्रमः नास्ति। यानवतां गतिश्रमः नास्ति। अलौहमयं निगडं कलत्रम्। यः यस्मिन् कुशलः सः तस्मिन् योक्तव्यः। मनस्विनां शरीरकर्शनं करोति दुष्कलत्रम्। अप्रमत्तः दारान् निरीक्षेत। स्त्रीषु किञ्चिदपि न विश्वसेत्। स्त्रीषु स्थिरत्वं दुर्लभम्। गुरूणां माता गरीयसी। सर्वावस्थासु माता भर्तव्या। वैदुष्यमलङ्कारेणाच्छाद्यते। स्त्रीणां भूषणं लज्जा। विप्राणां भूषणं वेदः। सर्वेषां भूषणं धर्मः। भूषणाणां भूषणं सविनया विद्या। उपद्रवरहिते देशे आवसेत्। साधुजनबहुलदेशे आवसेत्। सुदूरमपि दहति राजवह्निः। गुरुं दैवतं राजानं च रिक्तहस्तः नाभिगच्छेत्। सदा राजकुलं गन्तव्यम्। द्रष्टव्यम्। ज्ञातव्यम्। श्रोतव्यम्। राजपुरुषैः सम्बन्धं कुर्यात्। राजदासी न सेवितव्या। पुत्रे गुणवति

कुटुम्बिनः स्वर्गं लभेत। पुत्राः विद्यानां पारङ्गमयितव्याः। जनपदाय ग्रामं त्यजेत्। ग्रामाय कुटुम्बं त्यज्यते। अतिलाभः पुत्रलाभ एव। यः दुर्गतेः पितरौ रक्षति सः पुत्रः। कुलं प्रख्यापयति पुत्रः। अनपत्यस्य स्वर्गः नास्ति। या प्रसूते सा भार्या। तीर्थसमये पुत्रवतीमनुगच्छेत्। सतीर्थाभिगमनात् ब्रह्मचर्यं नश्यति। परक्षेत्रे बीजं न विनिक्षिपेत्। पुत्रप्राप्तेरेव स्त्रीभिः विवाहः निश्चितः। स्वदासीपरिग्रहः दासभावः एव। उपस्थितविनाशः नीतिवाक्यं न श्रुणोति। देहिनां सुखदुःखाभावः नास्ति। मातरमिव वत्साः सुखदुःखानि कर्तारमेव अनुगच्छन्ति।

साधुः (The saint)

तिलमात्रमप्युपकारं शैलवन्मन्यते साधुः। अनार्येषु उपकारः न कर्तव्यः। प्रत्युपकारभयात् अनार्यः शत्रुः भवति। स्वल्पमप्युपकारकृते प्रत्युपकारं कर्तुं सज्जनः वाञ्छति। न कदापि देवता अवमन्तव्या। चक्षुषः समं ज्योतिः नास्ति। शरीरिणां नेता चक्षुः। अप्सु मूत्रं न कुर्यात्। न नग्नः जलं प्रविशेत्। यथा बुद्धिः तथा विभवः। अग्नावग्निं न निक्षिपेत्। तपस्विनः पूजनीयाः। परदारान्न गच्छेत्। अन्नदानं भ्रूणहत्यामपि मार्ष्टि। वेदबाह्यः न धर्मः। सर्वदा धर्ममाचरणीयम्। मृदुसत्यभाषणं मानवं स्वर्गं नयति। सत्यात्परं तपः नास्ति। सत्यं स्वर्गस्य साधनम्। सत्येन धार्यते लोकः। सत्यात् देवः वर्षति। असत्यात् परं पातकं नास्ति। न मीमांस्या गुरवः। खलत्वं नोपेयात्। खलस्य मित्रं नास्ति। लोकयात्रा दरिद्रं बाधते। अतिशूरः दानशूरः एव। गुरुदेवब्राह्मणेषु भक्तिः भूषणम्। सर्वस्य भूषणं विनयः। अविनीतिपरात् उत्तमकुलजात् निम्नकुलजोऽपि नीतिपरः श्रेष्ठः। सदाचारात् आयुः कीर्तिश्च वर्धेते। प्रियमपि अहितं न वक्तव्यम्। बहुजनविरुद्धम् एकं नानुवर्तेत। दुर्जनेषु भागधेयः न कर्तव्यः। कृतार्थेष्वपि नीचेषु न सम्बन्धः। ऋणशेषः, शतृशेषः, व्याधिशेषश्च अशेषः कर्तव्यः। भूत्यानुवर्तनं नाम सम्पदाजीवनं, कल्याणमार्गस्यानुसरणमेव पुरुषस्य रसायनम्। अर्थिषु अवज्ञा न कार्या। दुष्करं कर्म कारयित्वा कर्तारमवमन्यते नीचः। कृतघ्नस्य नरकात् निवर्तनं नास्ति। जिह्वायत्तौ वृद्धिविनाशौ। विषामृतयोः आकरीजिह्वा। प्रियवादिनः शत्रुः नास्ति। स्तुताः देवताः अपि तुष्यन्ति। असत्यमपि दुर्वचनं चिरं तिष्ठति। राजद्विष्टं न च वक्तव्यम्। श्रुतिसुखात् कोकिलालापात् तुष्यन्ति। स्वधर्माचरणहेतुना सत्पुरुषः इत्युच्यते। अर्थिनः गौरवं नास्ति।

स्त्रीणां भूषणं सौभाग्यम्। शत्रोरपि न पातनीया वृत्तिः। अप्रयत्नोदकं क्षेत्रम्। एरण्डमुपलम्ब्य कुञ्जरं न कोपयेत्। अतिप्रवृद्धा शाल्मली वारणस्तम्भो न भवति। अतिदीर्घोऽपि कर्णिकारः न मुसली भवति। अतिदीप्तोऽपि खद्योतः न पावकः। न प्रवृद्धत्वं गुणहेतुः भवति। सुजीर्णोऽपि पिचुमन्दः न शङ्कुलायते। यथा बीजं तथा निष्पत्तिः। यथा श्रुतं तथा बुद्धिः। यथा कुलं तथा आचारः। संस्कृतेऽपि पिचुमन्दः नाम निम्बवृक्षः आम्रवृक्षः न भवति खलु। आगतं सुखं न त्यजेत्। मानवः स्वयमेव दुःखमधिगच्छति। रात्रिचारणं न कुर्यात्। न चार्धरात्रं स्वपेत्। विषयः विद्वद्भिः ज्ञातव्यः।

लोकोक्तिः (proverb , general saying)

अकारणतः परगृहं न प्रविशेत्। ज्ञात्वापि दोषमेव करोति लोकः। लोकवृत्तिः शास्त्रप्रधाना। शास्त्राभावे शिष्टाचारमनुगच्छेत्। सदाचारात् शास्त्रं न गरीयः। दूरस्थमपि राजा चारचक्षुषा पश्यति। गतानुगतिको लोकः। यमनुजीवेत् तं नापवदेत्। तपसः सारः इन्द्रियनिग्रहः। स्त्रीबन्धनात् मोक्षः दुर्लभः। दुष्टस्त्रीसम्पर्कात् विपदः सम्भवन्ति। शत्रुत्वस्य बीजं स्त्री। स्त्रीणां मनः क्षणिकम्। अशुभद्वेषिणः स्त्रीषु न प्रसक्ताः। यज्ञफलज्ञाः त्रिवेदविदः। स्वर्गस्थानं न शाश्वतम्। यावत्पुण्यं तावत्फलम्। स्वर्गपतनात् परं दुःखं नास्ति। देही देहं त्यक्त्वा ऐन्द्रं पदं न वाञ्छति। दुःखानाम् औषधं निर्वाणम्। अनार्यसम्बन्धात् आर्यशत्रुता वरम्। दुर्वचनं कुलं निहन्ति। पुत्रसंस्पर्शात् परं सुखं नास्ति।विवादे धर्ममनुस्मरेत्। निशान्ते नाम प्रातःकाले दैनिककार्यं चिन्तयेत्। प्रदोषे नाम सन्ध्याकाले संयोगः न कर्तव्यः। उपस्थितविनाशः दुर्नयं मन्यते। क्षीरार्धिनः करिण्या किं कार्यम्? दानसमं वश्यं नास्ति। परायत्तेषु उत्कण्ठां न कुर्यात्। दुर्जनानां सम्पत् दुर्जनैः एव भुज्यते। अम्बोधिः तृष्णां नाम पिपासां न अपोहति। बालका नाम सिकतरेणवः स्वगुणं नाम काठिन्यमाश्रयन्ते। सज्जनाः दुर्जनैः न रमन्ते। हंसः प्रेतवने न रमते। अर्थार्थं प्रवर्तते लोकः। आशया बध्यते लोकः। आशापरैः सह श्रीः न तिष्ठति। आशापरे धैर्यं नास्ति। दैन्यानामुत्तमं मरणम्। आशा लज्जां व्यापोहति। मात्रा सह वासः न कर्तव्यः। आत्मा न स्तोतव्यः। दिवा स्वप्नं न कुर्यात्। ऐश्वर्यान्धः आसन्नमपि न पश्यति। इष्टं वाक्यं न श्रुणोति। स्त्रीणां भर्तुः परं दैवतं नास्ति। स्त्रीणां भर्तुः अनुसरणमुभयसुखम्। अथितिमभ्यागतं च यथाविधि पूजयेत्। हव्यस्य व्याघातः नास्ति।

शत्रुः मित्रवत् प्रतिभाति। मृगतृष्णा जलवद् भाति। दुर्मेधसामसच्छास्त्रं मोहयति। सत्सङ्गः स्वर्गवासः। आर्यः स्वमिव परं मन्यते। रूपानुवर्ती गुणः। यत्र सुखेन वर्तते तदेव स्थानम्। विश्वासघातिनः निष्कृतिः नास्ति। दैवायत्तं न शोचयेत्। आश्रितदुःखम् आत्मन इव मन्यते साधुः। हृद्गतमाच्छाद्य अन्यत् वदति अनार्यः।

बुद्धिहीनः (the stupid)

बुद्धिहीनः पिशाचतुल्यः। पुत्रः न स्तोतव्यः। असहायः पथि न गच्छेत्। स्वामी स्तोतव्योऽनुजीविभिः। धर्मकृत्येष्वपि स्वामिन एव घोषयेत्। राजाज्ञां नातिलङ्घयेत्। राज्ञा यथाज्ञाप्तं तथा कुर्यात्। बुद्धिमतां शत्रुः नास्ति। आत्मच्छिद्रं नाम स्वसम्बन्धरहस्यं न प्रकाशयेत्। क्षमावानेव सर्वं साधयति। आपद्धर्मं धनं रक्षेत्। साहसवतां प्रियं कर्तव्यम्। श्वः कार्यमद्य कुर्वीत। अपराह्णिकं कार्यं पूर्वाह्ण एव कर्तव्यम्। व्यवहारानुलोमः धर्मः। सर्वज्ञता नाम लोकज्ञता। शास्त्रज्ञोऽपि अलोकज्ञः मूर्खतुल्यः। शास्त्रप्रयोजनं तत्वदर्शनम्। तत्त्वज्ञानं कार्यमेव प्रकाशयति। व्यवहारे पक्षपातः न कार्यः। धर्मादपि व्यवहारः गरीयान्। व्यवहारस्य साक्षी आत्मैव। समस्तप्राणिषु आत्मा एव साक्षीरूपेण विद्यते। कूटसाक्षी न स्यात्। कूटसाक्षिणः नरके पतन्ति। प्रच्छन्नपापानां साक्षिणः महाभूतानि। पृथिव्यप्तेजोवाव्याकाशश्च पञ्चभूतानि। आत्मनः पापम् आत्मैव प्रकाशयति। व्यवहारे अन्तर्गतमाचारः सूचयति। आकारसंवलनं देवानामप्यशक्यम्। चोरराजपुरुषेभ्यः वित्तं रक्षेत्। दुर्दर्शना हि राजानः प्रजाः नाशयन्ति। सुदर्शना हि राजानः प्रजाः रञ्जयन्ति। न्याययुक्तं राजानं मातरमिव मन्यन्ते प्रजाः। तादृशः राजा इह सुखं ततः स्वर्गमाप्नोति। अहिंसा परमो धर्मः। स्वशरीरमपि परशरीरं मन्यते साधुः। सर्वेषामपि मांसभक्षणमयुक्तम्। ज्ञानवतां संसारभयं नास्ति। विज्ञानदीपेन संसारभयं निवर्तते। सर्वमनित्यं भवति। पुण्यपापजन्महेतुः कृमिशकृन्मूत्रभाजनं शरीरम्। जन्ममरणादिषु दुःखमेव अधिकं भवति। तेभ्यः कर्तुं प्रयतेत। तपसा स्वर्गमाप्नोति। क्षमायुक्तस्य तपः विवर्धते। तस्मात् तपसा सर्वेषां कार्यसिद्धिः भवति।

शुक्रनीतिः

राजकृत्याधिकारः

पूर्वदेवैः सम्पूज्य वन्दितः पूजितः स्तुतः भार्गवः पृष्टः। स च सर्गस्थित्यन्तकारणं जगदाधारं प्रणम्य, तान् यथान्यायं नीतिसारम् उवाच। अथ शतलक्षश्लोकमितं नीतिशास्त्रम् उक्तवान्। भगवान् ब्रह्मा लोकहितार्थं सङ्ग्रहेण वसिष्ठाद्यैः अभिवृद्धिहेतवे नीतिशास्त्रस्य सारं युक्तिभिः सङ्कलितम्। सर्वोपजीवकं सामाजिकसुरक्षायाः बन्धकत्वं नीतिशास्त्रकमेव। यतः धर्मार्थकाममूलं मोक्षप्रदं निश्चयेन कथितम्। अतः राजा सदा प्रयत्नतः नीतिशास्त्रम् अभ्यसेत्। यस्य विज्ञानात् विशिष्टबोधात् नृपाद्याः शत्रुवर्गे विजयं लभन्ते। लोकरञ्जकाश्च भूत्वा सुयशो भागिनो भवन्ति। किञ्चान्यत् नित्यं सुनीतिकुशलाः शक्तिशालिनः भवन्ति। शब्दार्थानां ज्ञानं व्याकरणात् भवेत्। अन्यशास्त्राणां ज्ञानं तु स्वयमेव भविष्यति। सर्वलोकव्यवहारस्थितिः नीत्या विना न भवति। यथा देहिनां भोजनैः विना देहस्थितिः न स्यात् तथा। सर्वाभीष्टकरं नीतिशास्त्रं सर्वसम्मतं स्यात्। सकलप्रजानां स्वामी राजा। अतः राज्ञः अपि अत्यावश्यकं नीतिशास्त्रम्। कुपथ्यभक्षकानां रोगाः यथा जायन्ते तथा नीतिहीनानां शत्रवः जायन्ते। नीतिज्ञानां शत्रवः न जायन्ते। राज्ञः परमः धर्मः प्रजानां परिपालनम्। अतः नीत्या विना लोकरक्षणं न भवति। नृपस्य नीतिकुशलतायाः अभाव एव महान् दोषः। तेन प्रतिदिनं भीतिः समुत्पद्यते। शत्रूणां च वृद्धिः भवति। किञ्च राज्ञः बलहानिरपि भवति। यः नीतिं त्यक्त्वा स्वतन्त्रः वर्तते सः कष्टं भजति स्वतन्त्रप्रभुसेवनं करवालकोटिसंसेवनमेव। नीतिशास्त्रवित् सुखेन आराध्यो भवति। यस्य नीतिबलमस्ति तस्य सर्वप्रकारैः लक्ष्मीः समायाति। यथा सर्वराष्ट्रम् अप्रेरितहितकरं भवेत् तथा नीतिः राज्ञा आत्महिताय सन्धार्या। यस्य राज्ञः नीतिविरुद्धव्यवहारेण वारं वारं प्रजामण्डलं, सैनिकबलं मन्त्रिवर्गश्च पृथक् पृथक् भवति एतत् त्रयं तस्य कुशलताराहित्यं सूचयति। राजा तपः प्रभावेण तेजस्वी भवति। उत्तमः शासकः, रक्षकः, प्रजाजनमनोरञ्जकश्च भवति। पूर्वजन्मनः तपसा एव भूपतिर्भवति। स्वभावतः वृष्टिशीतोष्णनक्षत्रगतिरूपः इष्टानिष्टाधिकं तु न्यूनाचारैः कालः भिद्यते।

आचारप्रेरकः (the instigator of acara)

राजा आचारप्रेरकः। एष एव कालस्य नियामकत्वे कारणं भवति। इह लोकः राजदण्डभयात् स्वस्वधर्मपरः भवेत्। यो हि स्वधर्मनिरतः सः तेजस्वी भवेत्। स्वधर्मात् विना सुखं न भवति। स्वधर्मो हि परं तपः। ये न सदा स्वधर्मरूपं तपः वर्धितं तस्य तु देवाः अपि प्रसीदन्ति। सामान्यमानवानां विषये किं वक्तव्यम् ? नृपः स्वधर्मनिरतः भूत्वा, महाभयैः सुदण्डैः प्रजाः धर्मनिरताः कुर्यात्। अन्यथा तेजः क्षयः स्यात्। सिंहासनासीनः बुद्धिबलेन सेनया, स्वकीयशूरतया, राजनीत्या प्रतिदिनं प्रजावर्गमनुपालयन् सदा दोषरहितो भूत्वा राजदण्डधारणं कर्तव्यम्। बुद्धिमतः राज्ञः अत्यल्पोप्यर्थः नित्यं विवर्धते। शौर्यनीतिवशैः धनैः तिर्यञ्चोऽपि वशं याति।

तपोवैविध्यम् (diversity of penance)

सात्विकं, राजसं, तामसञ्चेति तपः त्रिविधम्। यः यादृक् सः तादृक् अत्यर्थं भवति। यः स्वधर्मनिरतः प्रजानां परिपालकश्च सर्वयज्ञानां यष्टा च शत्रुगुणस्य नेता दानशौण्डः क्षमी शूरः निस्पृहः विषयेष्वपि विरक्तः स हि नृपः सात्विकः अन्ते मोक्षम् अन्वियात्। विपरीतः तामसः स्यात्। सः निर्घृणः मदोन्मत्तः हिंसकः सत्यवर्जितः अन्ते नरकभाजनः भवति। दाम्भिकः लोभी विषयी, वञ्चकः, शठः, मनसा वचसा कर्मणा अन्यः च कलहप्रियः नीचप्रियः, स्वतन्त्रः, नीतिहीनः, छलान्तरः, राजसः सः नृपधामः। अन्ते तिर्यकत्वं स्थावरत्वं वा भविता। सात्त्विकः देवांशान् भुङ्क्ते। तामसः राक्षसांशान् भुङ्क्ते। राजसः मानवांशान् भुङ्क्ते। ततः सत्त्वे मनः धार्यम्। सत्त्वस्य तमसः साम्यात् मानुषं जन्म जायते। मर्त्यः यत् आश्रयते, निष्ठतः तत्तुल्यः भवेत्। अत्र कर्म एव सुगतिं दुर्गतिञ्च प्रति कारणम्। प्राक्तनमपि कर्मैव च किं क्षणम् अक्रियः कः अस्ति ? अत्र जात्या ब्राह्मणः क्षत्रियः वैश्यः न। तथा शूद्रः, म्लेच्छोऽपि च न। गुणकर्मभिः भेदिताः एताः। ब्राह्मतेजः न वर्णतः न जनकात् समुत्पद्यते। यः ज्ञानकर्मोपासनाभिः देवताराधने रतः शान्तः दान्तः दयालुः गुणैः ब्राह्मणः कृतः। यः लोकसंरक्षणे दक्षः, शूरः, दान्तः पराक्रमी दुष्टनिग्रहशीलः स वै क्षत्रियः उच्यते। भुवि ये विक्रयक्रयकुशलाः नित्यं पण्यजीविनः पशुरक्षाः कृषिकराः ते वैश्याः कीर्तिताः। त्यक्तस्वधर्माचरणाः निर्घृणाः परपीडकाः चण्डाः नित्यं हिंसकाः ते हि अविवेकिनः म्लेच्छाः कथिताः। राज्ञां प्राक्कर्मफलभोगार्हबुद्धिः सञ्जायते। अन्यथा पापकर्मणि पुण्ये वा न च कर्तुं शक्तः।

यादृक् कर्मफलोदयः तादृक् बुद्धिः जायते। यादृशी भवितव्यता तादृशाः एव सहायाः भवन्ति। प्राक्कर्मवशतः सर्वं निश्चितं भवत्येव। तदा कार्याकार्यप्रबोधकाः उपदेशाः व्यर्थाः स्युः। धीमन्तः वन्द्यचरिताः पौरुषं महत् मन्यन्ते। क्लीबाः पौरुषं कर्तुम् अशक्ताः दैवम् उपासते।

पापं पुण्यम् (sin and merit)

सर्वं च दैवे पुरुषकारे च प्रतिष्ठितम्। तत् द्विधा कृतं पूर्वजन्मकृतं कर्म इहार्जितं चेति। बलवान् सदा दुर्बलस्य प्रतीकारी स्यात्। सः बलाबलयोः ज्ञानं फलप्राप्त्या तत्करोति। प्रत्यक्षहेतुना फलोपलब्धिः नैव दृश्यते। सा तु प्राक्कर्महैतुकी अन्यथा न वेति निश्चयः। अल्पक्रियया नृणां यत् महत् फलं जायते, तदपि प्राक्तनात् कर्मणः एवेति केचन वदन्ति। नृणाम् इहैव क्रियया पौरुषं जायते। सस्नेहवर्तिदीपस्य प्रयत्नतः वातात् रक्षेति केचिद्वदन्ति। अवश्यं भाविभावानां यदि प्रतीकारः न चेत् वै तदा यावद्बुद्धिबलोदयं दुष्टानां क्षपणं श्रेयः भवतु। अतः राजापि प्रतिकूलानुकूलाभ्यां ईषत् मध्यादिकाभ्यां फलाभ्यां च दैवं त्रिधा विचिन्तयेत्।

लङ्काधिपतेः रावणस्य एकस्मात् वनभङ्गे मधुवनमर्दने तथा भीष्मादेः नरात् अर्जुनात् गोग्रहणे विराटराजस्य गवां प्रत्याहरणे प्रतिकूल्यं तु सर्वविदितमेव। राघवस्य च अर्जुनस्य कालानुकूल्यं विस्पष्टं, यदा दैवं तदा अल्पाक्रिया सुफला भवेदित्यर्थः।

सदसदौ (good and bad)

प्रतिकूलके प्रातिकूल्ये महती सत्क्रिया अनिष्ठफला स्यात्। तथाहि बलिः दानवराजः तथैव हरिश्चन्द्रः दानेन सन्नियन्त्रितः भवेत्। सत्क्रियया इष्टं भवति यत् तद्विपरीततया अनिष्टं भवति। अतः शास्त्रतः सदसत् ज्ञात्वा, असत् त्यक्त्वा, सत् समाचरेत्। राज्यं सप्ताङ्गम् उच्यते। स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च। तत्र नृपः मूर्धा स्मृतः। अमात्यः दृग् सुहृत् श्रोत्रं कोशः मुखं बलं मनः दुर्गहस्तः राष्ट्रं पादः राज्याङ्गानि स्मृतानि। क्रमशः अङ्गानां सदा भूतिप्रदान् गुणान् वक्ष्ये। यैः गुणैः संयुक्ताः राजानः बुद्धिमन्तः उन्नतिशालिनः निश्चयेन भवन्ति वृद्धाभिसम्मतः राजा तोयधेः शशाङ्क इव नयनानन्दजनकः तथा अस्य जगतः वृद्धिहेतुः भवति। यदि नरपतिः सम्यक् नेता न स्यात् ततः प्रजाः जलधौ अकर्णधारा नौः इव इह विप्लवेत।

प्रजाः पालेन विना स्वस्वधर्मे न तिष्ठन्ति, तथा स्वामी तु प्रजया विना पृथिव्यां नैव शोभते। अथ नृपतिः न्यायप्रवृत्तः आत्मानं च प्रजाः त्रिवर्गेण उपसन्धत्ते। अन्यथा धृवं निहन्ति। धर्मराजः द्वैतवने धर्मं विधाय दिवं बुभुजे। नहुषः अधर्मात् रसातलं प्रतिपेदे। वेणः नाम राजा अधर्मेण नष्टः। पृथुः धर्मतः बद्धः। तस्मात् पार्थिवः धर्मं पुरस्कृत्य अर्थाय यतेत। यः राजा धर्मपरः सः देवांशः। अन्यः राक्षसांशभूतः, धर्मलोपी, प्रजापीडाकरः भवेत्। सर्वस्मिन् अराजके सति भयात् सर्वतः विदृते प्रभुः अस्य सर्वस्य रक्षार्थम् इन्द्रानिलयमार्काणाम् अग्नेश्च वरुणस्य च चन्द्रवित्तेशयोश्चापि शाश्वतीः मात्राः निर्हृत्य राजानम् असृजत्। यथा इन्द्रः स्वतपसा जङ्गमस्थावराणाञ्च ईशः अंशग्रहणे तथा रक्षणे दक्षः। तथैव राजा भवेत्।

राजा यमः (king is the yama)

वायुः गन्धस्य प्रेरकः। नृपस्तु सदसत्कर्मणः प्रेरकः। धर्मप्रवर्तकः तथा तमसः रविरिव अधर्मनाशकः दुष्कर्मदण्डकः राजा यमः स्यात्। यतः यमः दण्डकृत्। अग्निः शुचिस्सन् सर्वभागभुक् तथा रक्षार्थं सर्वेषां करग्राही भवति। वरुणः अपां रसैः सर्वं पुष्यति। नृपः स्वधनैः, चन्द्रः करैः ह्लादयति। राजा स्वगुणकर्मभिः सर्वं रञ्जयति। कोशानां रक्षणे दक्षः निधीनां धनाधिपः स्यात् । यथा चन्द्रः सर्वैरंशैः विना न भाति। यथा पिता स्वप्रजायाः गुणसाधनसन्दक्षः, माता पुष्टिविधायिनी, एवम् अपराधानां क्षमयित्री भवेत्। सुविद्याध्यापकः गुरुः यथा शिष्यस्य हितोपदेष्टा, भ्राता, पितुर्धनात् यथा शास्त्रं स्वभागोद्धारकृत् भवति। राजा मित्रवत् आत्मस्त्रीधनगुह्यानां गोप्ता बन्धुः धनदः कुबेरः तथा दण्डकृत्। अत एव यमः भवेत्। विशिष्टाभ्युदयशालिनि सुराज्ञि राजगुणाः तिष्ठन्ति, कदापि न त्यक्तव्याः। यः शक्तः अपराधं क्षमते सः सुदमने क्षमी। क्षमया तु विना भूपः अखिलसद्गुणैः न भाति।

देवतांशकः (having the divine - -)

यः स्वान् दुर्गुणान् परित्यज्य अतिवादान् तितिक्षते। किञ्च सदा दानैः मानैश्च सत्कारैः स्वप्रजारञ्जकः दान्तः शूरः। शस्त्रास्त्रकुशलः अरिनिषूदनः अस्वतन्त्रः मेधावी ज्ञानविज्ञानसंयुतः नीचहीनः दीर्घदर्शी वृद्धसेवी सुनीतियुक् गुणिजुष्टः राजा यः सः देवतांशकः इति ज्ञेयः। तद्विपरीतः दानवांशसमुद्भूतः नरकभाजनः भवति।

नरैः कृतकर्मफलं प्रतिकारैः विना अवश्यमेव भोक्तव्यम्। प्रतिकारे कृते सति न भोक्तव्यम्। चिकित्सितरोगः यथा भोगाय भवति तथा प्रतिकृतकर्मफलः राजा भोगाय भवति। अनिष्टहेतौ उपदिष्टे कः अनिष्टं कर्तुं यतेत ? न कोऽपि यतेत।

सत्फले स्वान्तं रज्यते। दुष्फले कस्यापि जनस्य मनः न रमते। अतः सदसद्भोधकानि शास्त्राणि दृष्ट्वा आचरेत्।

विनयः नयस्य मूलम्। विनयश्च शास्त्रनिश्चयाद् भवति। इन्द्रियजयः विनयस्य मूलम्। तदन्वितः विज्ञानमधिगच्छति।

राजा प्रथमम् आत्मानं, ततः पुत्रान्, ततः अमात्यान्, ततः भृत्यान्, ततः प्रजान् विनयेन उपपादयेत्।

नृपः केवलः परोपदेशकुशलः न भवेत्। क्वचित् सगुणोऽपि नृपः प्रजाधिकारहीनः स्यात्।

प्रजास्तु दुर्गुणाः अपि नृपविहीनाः न स्युः। इन्द्राणि यथा नहि मृतभर्तिका भवति तथा प्रजाः सर्वदा भूपतिसहिताः भवेयुः। यस्य राज्ञः मन्त्रिणः नहि जितेन्द्रियाः, दायादाः अविनीताः तथा पुत्रादयोऽपि च दुष्टाः सन्ति। तस्य राज्ञः स्वामिता भ्रष्टश्रीः भवति। सदानुरक्तप्रकृतिः प्रजापालनतत्परः विनीतात्मा हि नृपतिः भूयसीं श्रियम् अश्नुते। प्रकीर्णविषयारण्ये धावन्तं विप्रमाथिनम् इन्द्रियदन्तिनं ज्ञानाङ्कुशेन वशं कुर्वीत। मनः विषयामिषलोभेन इन्द्रियं प्रेरयति। प्रयत्नेन तन्निरुध्यात् तस्मिन् जिते जितेन्द्रियः भवति। यः एकस्यैव मनसः वशीकरणे अशक्तः सः सागरपर्यन्तां महीं केन प्रकारेण अवजेष्यति। कथमपि न जेष्यति ? नृपतिः क्रियावसानविरसैः अपहारिभिः विषयैः आक्षिप्तहृदयः करी इव बन्धनं याति। शब्दस्पर्शरूप-रसगन्धपञ्चसङ्ख्याकाः एकैकोऽपि विनाशाय समर्थो अस्ति।

शुचिर्दर्भाङ्कुराहारः सुदूरविचरणे समर्थोऽपि लुब्धकोद्गीतमोहेन हरिणः मरणम् अन्विष्यति। गिरीन्द्रशिखराकारः लीलयोन्मूलितद्रुमः करिणीस्पर्शमोहात् वारणः नाम मदोन्मत्तगजराजः बन्धनं याति। पतङ्गः स्निग्धदीपशिखा लोकविलोलितविलोचनः सम्मोहात् सहसा पतन् मरणं वरयति। दासतः दूरे वसन् अगाधसलिले मग्नः मीनस्तु

मांसयुक्तं लौहकण्टकं मृत्यवे आस्वादयति। भ्रमरः कमलदलकर्तनाय समर्थोऽपि सपक्षकः गन्तुं गन्धलोभेन कमले बन्धने याति। विषसन्निभाः विषयाः एकैकशः विनिघ्नन्ति। मिलिताः विनाशयन्ति एव।

विनाशकत्रयम् (the three types of destoryers)

द्यूतं, स्त्री, मद्यम्, अयुक्तम् एतत् त्रितयं बह्वनर्थकृतयुक्तियुक्तमिति निश्चयेन धनपुत्रमतिप्रदं भवति। धर्मपुत्रनराद्यास्तु सुद्यूतेन विनाशिताः। तद्विदां सकापट्यं द्यूतं धनायालं भवति। स्त्रीणां नामापि आह्लादजनकं सत् मानसं विकरोत्येव। तासां विलासोल्लासितभ्रुवां स्त्रीणां दर्शनं मानसं विकरोति। रहसि प्रचारकुशलाः श्रुतिमधुरप्रहृष्टवादिनी रक्तान्तलोचना नारी कं नरं न वशीकुर्यात्।

अङ्गना जितेन्द्रियस्य मुनेरपि मनः अवश्यं सरागं कुरुते। का वार्ता किं वक्तव्यम् अजितात्मनाम् अजितेन्द्रियाणाम् ? अतः सदा स्त्रीषु असक्तिं कुर्वन्तः अमी इन्द्रदण्डकनहुषरावणाद्याः नाशं गताः। अतत्परनरस्यैव सदा स्त्रीसुखाय भवेत्। यतः तां विहाय अन्या गृहकृत्ये सन्तानोत्पादने, तेषां लालने पालने च साहायिनी न विद्यते। अतिमद्यं पिबतः बुद्धिलोपो भवेदिति सर्वविदितमेव। मात्रया पीतं मद्यं प्रतिभां बुद्धिवैशद्यं, धैर्यं, चित्तविनिश्चयं तनोति। अपरिमितमद्यपानञ्च विनाशकारकं भवति। एवमेव कामक्रोधौ मद्यतमौ यथोचितं नियोक्तव्यौ।

राज्ञा प्रजापालने कामः दयार्थिना शत्रुनिबर्हणे क्रोधः सेनासन्धारणे लोभः योज्यः। नृपैः कदापि परस्त्रीसङ्गमे कामः। अन्यधनेषु च लोभः तथा स्वप्रजादण्डने क्रोधः नैव धार्यः। नरः परस्त्रीसङ्गमात् कुटुम्बी न भवति। स्वप्रजादण्डनात् शूरः न भवति। परधनैः धनवान् न भवति। देवाः अरक्षितारं नृपतिम् अतपस्विनं ब्राह्मणञ्च अप्रदातारं धनिकञ्च घ्नन्ति। अधः त्यजन्ति। स्वामित्वं दातृत्वञ्च धनिकत्वं तपः फलमेव। तथा याचकत्वं दास्यत्वं दरिद्रता च पापस्य फलम्। अतः नृपः शास्त्राणि दृष्ट्वा चित्तं संनियम्य, परत्र इह च सुखाय स्ववृत्तिं यथोचितं कुर्यात्। राजवृत्तं तु अष्टधाः यथा दुष्टनिग्रहणं, दानं, प्रजायाः परिपालनं, राजसूयादेः यजनं, न्यायतः कोशानामार्जनं, राज्ञां करदीकरणं, रिपूणां परिमर्दनं, भूयः भूमेः उपार्जनञ्चेति।

कर्त्तव्यहीनाः (lacking in activities)

यैः नृपैः बलं न वर्धितं, भूपाः न करदीकृताः नाम करदानेन वशीकृताः, न सम्यक् प्रजाः पालिताः, ते नृपाः षण्ढतिलाः नाम नपुंसकतिलाः, कर्तव्यहीनाः। प्रजाः यस्मात् सूद्विजे यत् कर्म परिनिन्दति, तथा गुणिभिः धनिकैः यः त्यज्यते सः नृपाधमः। यः नृपः नटगायकगणिकामल्लषण्ढाल्पजातिषु अतिसक्तः, सः निन्द्यः इति निश्चयेन शत्रूणां मुखे स्थितः। यः नृपः सदा बुद्धिमन्तं द्वेष्टि, वञ्चकैः सह मोदते, स्वं दुर्गुणं नैव वेत्ति, सः स्वात्मनाशाय भवति।

स्वदुर्गुणं सन्त्यजेत् (one should leave his bad habit)

यदा धनकारकः लोकानां परिपीडकः तथा प्रदण्डः नृपः स्वदुर्गुणश्रवणतः अपराधं हि न क्षमते, तदा लोकः क्षुब्धते। अतः नृपः यतः स्ववृत्तात् भिद्यते तत् स्ववृत्तं गूढचारैः श्रावयित्वा के अमात्याद्याः तद्विदः दूषयन्ति वा कैः भावैः भूषयन्ति। तथा मम अगुणैः गुणै वा केषां मयि कीदृक् सम्प्रीतिः वा अप्रीतिरेव एतदखिलं चारैः संश्रुत्य लोकतः सर्वदा ज्ञात्वा नृपः सुकीर्त्यै नित्यं स्वदुर्गुणं सन्त्यजेत्, प्रजाः नैव अवमन्येत।

हे राजन् ! लोकः त्वां निन्दति इति चारैः संश्रावितः सन् यदि दैरात्म्यात् कोपं करोति तदा असौ आत्मनः दुर्गुणानां लोपकः अपि सीतारामेण साध्वी लोकापवादतः त्यक्ता, शक्तेनापि रामेण रजके अल्पोऽपि दण्डः न धृतः। यतः राजा ज्ञानविज्ञानसम्पन्नः दत्ताभयोऽपि चेति।

देवाः स्तुतिप्रियाः (the gods are pleased by habit)

राज्ञः गुर्वपि दूषणं भयात् समक्षं न वक्ति। यतः विष्णुमुख्याः देवाः स्तुतिप्रियाः। मनुजाः अपि स्तवेनैव सन्तुष्यन्ति। अस्मात् कारणात् नित्यं क्रोधः निन्दाजः राजा सदा सुभागदण्डी सुक्षमी रञ्जकः स्यात्। यौवनं जीवितं चित्तं छाया लक्ष्मीः च स्वामिता एतानि षट् चञ्चलानि ज्ञात्वा धर्मरतः भवेत्। प्रजा राज्ञः अदानेन अपमानेन छलात् कटुवाक्यतः प्रबलदण्डेन नृपं वै मुञ्चति। एभिः विपरीतैः गुणैः प्रजा सान्वया रज्यते। एकः दुर्गुणः दुष्कीर्तिं तनोति। सङ्घशः किं वक्तव्यम् ? न किमपि।

निन्दितानि कर्माणि (actions that are censured)

मृगया, अक्षाः, पानं च महीभुजां निन्दितानि। तेभ्यः पाण्डुनैषधवृष्णिषु विपदः दृष्टाः। कामः, क्रोधः, मोहः, लोभः, मानः तथा मदः एनं षड्वर्गम् उत्सृजेत्। एते शत्रुषड्वर्गमाश्रिताः निधनं प्रयाताः। तथा हि दण्डकः नृपतिः कामात् जनमेजयः क्रोधात्, राजर्षिः ऐलः नाम इलायाः तनयः लोभात् असुरः मोहात्, पौलस्त्यः राक्षसः मानात् नाम दर्पात्, तथा दम्भोद्भवः राजा, मदात् निधनं प्रयाताः। प्रतापवान् जामदग्न्यः तथा महाभागः अम्बरीषः शत्रुषड्वर्गमुत्सृज्य चिरं महीं भुक्तवन्तौ।

अस्मिन् लोके सद्भिः सेवितौ धर्मार्थौ आदरात् निगृहीतेन्द्रियग्रामः सन् वर्धयन् गुरूणां सेवनं कुर्वीत। शास्त्राय गुरुसंयोगः विनयवृद्धये शास्त्रं विद्याविनीतः नृपतिः सतां सम्मतः भवति।

धर्मसंज्ञं कर्म (the dharmic action)

महीपतिः असद्वृत्तैः प्रेर्यमाणोऽपि अकार्येषु न प्रवर्तते। तथा श्रुत्या स्मृत्या लोकतः मनसा च साधु निश्चितं यत् धर्मसंज्ञं कर्म तत् व्यवस्यति। यश्च आददानप्रतिदानकला सम्यक् सः पण्डितः। जितेन्द्रियस्य नीतिशास्त्रानुसारिणः नृपतेः लक्ष्म्यः उच्चलिताः। तथा कीर्तयः नभस्पृशः भवन्ति। अन्वीक्षकी, त्रयी, वार्ता, दण्डनीतिश्च शाश्वती चतस्रः विद्या एव नृपतिः सदा अभ्यसेत्। अन्वीक्षिक्यां वेदान्ताद्यं तर्कशास्त्रं प्रतिष्ठितम्। त्रय्यां धर्मः अधर्मश्च। कामः अकामश्च प्रतिष्ठितः। वार्तायाम् अर्थानर्थौ, दण्डनीत्यां नयानयौ वर्णाश्रमाश्चैव आसु विद्यासु प्रतिष्ठिताः।

अङ्गानि चत्वारः, वेदाः, मीमांसा, न्यायविस्तरः, धर्मशास्त्राणि पुराणानि इदं सर्वं त्रयी उच्यते। वार्तया कुसीदं नाम वृद्धिव्यवहारः कृषिः वाणिज्यं गोरक्षा उच्यते। सज्जनः वार्तया सम्पन्नः वृत्तेः भयं न प्राप्नोति। दण्डः दमः इति ख्यातः। तस्मात् महीपतिः दण्डः। तस्य नीतिः दण्डनीतिः। नयनात् नीतिः उच्यते। आन्वीक्षिक्या आत्मविज्ञानात् हर्षशोकौ व्युदस्यति। त्रय्यां यथा विधितिष्ठन् उभौ लोकौ अवाप्नोति। यतः सर्वप्राणभृताम् आनृशंस्यं परो धर्मः, तस्मात् राजा आनृशंस्येन कृपणं जनं पालयेत्। स्वसुखमन्विषन् कृपणं जनं न हि पीडयेत्। पीड्यमानः कृपणः मृत्युना

पार्थिवं हन्ति। महान् धर्माय सुखाय च सुजनैः सङ्गतं कुर्यात्। सुजनैः सेव्यमानस्तु अत्यधिकं शोभते। हिमांशुमाली च नवोत्फुल्लोत्पलं सरः यथा चेतांसि आनन्दयति तथा सुजनचेष्टितम्।

साङ्गत्यम् (association)

ग्रीष्मसूर्यांशुसन्तप्तम् अनाश्रयम् उद्वेजनं मरुस्थलमिव दुर्जनसङ्गतं त्यजेत्। निश्वासेन उद्गीर्णः यः वह्निः तस्य धूमेन धूम्रीकृताननैः आशीविषैः सङ्गं श्रेष्ठम्। न तु दुर्जनैः सम्पर्कं कुर्यात्। अभ्यर्हणीयाय सुजनाय यथा अञ्जलिः क्रियते, हितार्थिना दुर्जनाय ततः साधुतरः कार्यः। मनोहारिण्या वाचा नित्यं जगत् प्रह्लादयेत्। क्रूरवाक् धनदोऽपि सन् भूतानि उद्वेजयति। जनः यया हृदि विद्ध इव अत्यर्थं सन्तप्यते। मेधावी पीडितोऽपि तां वाचं न उच्चारयेत्। सत्सु वा द्विषत्सु प्रियमेव नित्यम् अभिघातव्यम्। जनप्रियः शिखी केका इव नाम मयूरवाणीव मधुरां गिरं ब्रूते। विपश्चितां वाचः यथा हरन्ति मनः तथा न हरति मदरक्तस्य हंसस्य कोकिलस्य शिखण्डिनः वाचः। ये प्रियं सत्कृतमिच्छन्ति, प्रियाणि भाषन्ते ते नरविग्रहाः श्रीमन्तः वन्द्यचरिताः देवाः वक्तव्याः।

सद्भावना (good will)

त्रिषु लोकेषु एतादृशं वशीकरणं न विद्यते। यथा भूतेषु दया मैत्री, सौहृद्यं तथा मधुरवाक् च भवति। आस्तिक्यपवित्रात्मा सदा देवतां देवतावत् गुरुजनान् तथा आत्मवत् सुहृत् जनान् पूजयेदिति श्रुतिरस्ति। अनूचानैः वेदवेदाङ्गपारङ्गतैः विद्वद्भिः परिवेष्टितः सन् प्रणिपातेन सतः गुरून् तथा भूत्यै सुकृतकर्मणा देवान् अभिमुखान् कुर्वीत। सद्भावेन मित्रं सद्भावेन बान्धवान् प्रेममानाभ्यां स्त्रीभृत्यौ दाक्षिण्येन इतरं जनं हरेत्।

भूपतिधर्माः (the dharmas of a king)

यः भूपः बलवान् बुद्धिमान् शूरः प्रतापवान् तथा युक्तपराक्रमी सः यथा स्यात् तथा पराक्रमते। सः वित्तपूर्णां महीं भुङ्क्ते। सः एव भूपः, भूपतिः भवेत्। पराक्रमः बलं बुद्धिः शौर्यम् एते गुणाः उत्तमाः। एभिः रहितः अपरप्रभावोपपन्नः नृपः सधनोऽपि

स्वल्पामपि भूमिं नैव भुङ्क्ते। पुनः शीघ्रमेव राज्यात् विनश्यति। यः एभिः गुणैः समन्वितः अव्याहताज्ञः तथा तेजस्वी भवेत् स राजा महाधनात् शोभते। अन्ये भूप्रसाधने न समर्थाः भवन्ति। इमं देवदैत्यविमर्दिनी सर्वधनस्य खनिः भूमिपतयः भूम्यर्थे स्वात्मानमपि नाशयन्ति। येन उपभोगाय धनं जीवितञ्च रक्षितुं तु येन भूः न रक्षिता, तस्य धनजीवितैः न किमपि प्रयोजनम्। कस्यापि जनस्य सञ्चितं धनं सदागमात् नित्यधनलाभं विना यथेष्टव्ययाय अलं समर्थं न भवेत्। कुबेरस्यापि अञ्जसा तत्वतः न अन्यस्य किं पुनः इति भावः। यथेच्छव्यये सति सिञ्चितं धनम् अचिरात् क्षीयते। यादृक् व्ययः तादृशश्चेत् सर्वदा आगमो न स्यात्।

भूपतेः गुणाः (the qualities of a king)

पराक्रमादिभिः गुणैः उपलक्षितः भूपः पूज्यः प्रसंशनीयः कुलसम्भवः। राजवंशप्रसूतस्तु भूपः न पूज्यः। राजवंशप्रसूतत्वमेव न पूज्यत्वे निदानम्। बलशौर्यपराक्रमैः यादृक् पूज्यते, कुले कुलजातत्वे तादृक् न।

यस्य तु वत्सरे वत्सरे प्रजानाम् अतिपीडनैः नित्यं लक्षकर्षमितः राजतः भागः जायते, सः सामान्तः इति प्रोक्तः। लक्षत्रयावधि यावत् तत् ऊर्ध्वं दशलक्षान्तः नृपः माण्डलिकः स्मृतः। तदूर्ध्वं विंशतिलक्षकः यावत् राजा भवेत्। पञ्चाशल्लक्ष्यपर्यन्तः महाराजः प्रकीर्तितः। ततस्तु कोटिपर्यन्तः स्वराट्, ततः परं दशकोटिमितः यावत् सम्राट्, तदनन्तरं पञ्चाशत्कोटिपर्यन्तं विराट्, ततः परं सार्वभौमः यस्य वश्या सदा सप्तद्वीपा पृथिवी भवेत्। ब्रह्मणा स्वभागभृत्या प्रजानां दास्यत्वे हि सर्वदा पालनार्थं तु स्वामिरूपः नृपः कृतः। ये तु भुवि भृत्याः अधिकृताः ते सामन्तादिसमाः। ते तु क्रमात् राजभागहराः सामन्तसंज्ञाः न भवन्ति। ये तु सामन्तादिपदभ्रष्टाः महाराजादिभिः तत्तुल्यं वेतनेन पोषिताः ते जनास्तु हीनसामन्तसंज्ञकाः भवन्ति। यः शतग्रामाधिपः सोऽपि सामन्तसंज्ञकश्च शतग्रामे नृपेण अधिकृतः सः अनुसामन्त इति भावः। यः दशग्रामे अधिकृतः सः नायकः इति कीर्तितः। यश्च अयुतग्रामभागभाक् सः दिक्पालश्च स्वराट् इति कीर्तितः। क्रोशात्मक रूप्यकर्षसहस्रकः ग्रामः भवेत्। ग्रामार्धकं पल्लिसंज्ञं भवेत्। पल्यर्द्धं कुम्भसंज्ञकं भवेत्। पञ्चसहस्रैः करैः प्रजापतेः क्रोशः प्रोक्तः। अथवा चतुस्सहस्रैः हस्तैः परिमितभूभागः क्रोशस्य विस्तरः मनोः प्रोक्त इति। सार्धद्विकोटिहस्तैः क्रोशस्य क्षेत्रं तथा पञ्चविंशशतैः क्षेत्रैः तत् निवर्तनं विधातुः प्रोक्तम्।

ज्येष्ठाङ्गुल्याः मध्यं यत् तदङ्गुलम्। तथाष्टभिः यवोदरैः दैर्घ्यं, तथा पञ्चभिः यवोदरैः स्थौल्यं यत् तदपि अङ्गुलमिति भावः। तैः चतुर्विंशत्यङ्गुलैः प्राजापत्यः करः स्मृतः। भूमिमाने तु सः श्रेष्ठः। तदन्यास्तु अधमाः मताः। चतुःकरात्मकः दण्डः पञ्चकरात्मकः लघुः। तत् अङ्गुलं पञ्चयवैः तत् मानवं मानम् एवेति। अष्ठषट्सप्तधिकसंख्यैः यवैः धान्यविशेषैः परिमितः वेणुदण्डः प्रजापतेः इति बोध्यः। पुनः षट्शतैः यवानामुदरैः एकैकशः स्थापितैः परिणामविशेषः मानवः दण्डः इति भावः। उभयोः त्रिंशत् शतैः अङ्गुलैः त्रिपञ्चसहस्रकैः यवैः पञ्चविंशतिभिः दण्डैः निवर्तनं भवति। सपादशतहस्तैः वा ऊनविंशतिसहस्रैः द्विशतैश्च यवोदरैः मानवं निवर्तनं भवति। चतुर्विंशशतैः अङ्गुलैः एव शतैः करैः प्राजापत्यं निवर्तनं सदा कथितम्। मनुप्राजापत्योः सम्बन्धिनी उभयोश्च निवर्तने सपादषट्शताः दण्डाः उभयोरेव पञ्चविंशतिः निवर्तनानि सदा भवन्ति। पञ्चसप्ततिसाहस्रैः अङ्गुलैः मानवं परिवर्तनं तथा षष्ठिसाहस्रैः अङ्गुलैः प्राजापत्यं भवति। भूमेः द्व्यङ्गुलमपि न दद्यात्। अथवा भूग्रहीता यावज्जीवति वृत्यर्थं स्वत्वनिवर्तनं कल्पयेत्। गुणी तावत् देवतार्थं सदैव विसृजेत्। पुनः कुटुम्बिनं दृष्ट्वा आरामार्थम् अथवा गृहार्थं दद्यात्। एवं विधं दानञ्च यावज्जीवनपर्यन्तमिति बोध्यम्।

राजधानी - (the capital city)

नानावृक्षलताकीर्णे पशुपक्षिगणावृते सदा सुबहूदकधान्ये च तृणकाष्ठमुखे आसिन्धुनौगमाकूले नातिदूरः महीधरे सुरम्यसामभूदेशे राजधानीं प्रकल्पयेत्।

राजगृहम् - (king's house)

अर्धचन्द्रां वा वर्त्तुलां वा चतुरश्रां सुशोभनां सप्राकारां सपरिखां ग्रामादीनां निवेशिनीं सभा मध्यां कूपवापीतटाकादियुतां चतुर्दिक्षु चतुर्द्वारां सुमार्गारामवीथिकां दृढसुरालयमठपान्थशाला विराजितां कल्पयित्वा नृपः सदा तत्र सुगुप्तः सप्रजः वसेत्। राजगृहं सभामध्यं गवाश्वगजशालिनं प्रशस्तवापीकूपादिजलयन्त्रैः सुशोभितं सर्वतः समभुजं दक्षिणोच्चम् उदङ्नतं शालां विना नैकभुजं तथा विषमबाहुकं शास्त्रास्त्रधारी संयुक्तप्रकारं सुष्ठुयन्त्रकं स्यात्। सत्रिकक्षचतुर्द्वारं चतुर्दिक्षुसुशोभितं दिवारात्रौ सशस्त्रास्त्रैः

चतुर्भिः पञ्चभिः षड्भिः वा परिवर्तकैः यामिकैः प्रतिकक्ष्यासु सदा सुगोपितं नानागृहोपकार्याट्टसंयुतं कल्पयेत्। पूर्वस्यां वस्त्रादिमार्जनार्थञ्च यजनार्थकं भोजनार्थञ्च पाकार्थं गृहान् कल्पयेत्। दक्षिणस्याम् अनुक्रमात् निद्रार्थं विहारार्थं पानार्थं रोदनार्थकं धान्यार्थं च रोदनार्थं दासीदासार्थं तथा उपसर्गार्थं गृहान् कुर्यात्। किञ्च प्रत्यक् गोमृगोष्ट्रगजाद्यर्थं गृहान् प्रकल्पयेत्।

राथवाज्यस्त्रशास्त्रार्थं व्यायामायामिकार्थकं तु वस्त्रार्थकं, द्रव्यार्थम् एवञ्च विद्याभ्यासार्थं सुगुप्तान् सुमनोहरान् उदग्गुहान् प्रकुर्वीत। अथवा नृपः यथा सुखानि एतानि गुहाणि कुर्यात्। धर्माधिकरणं शिल्पशालां गृहात् उदीच्यां दिशि निर्माणं कुर्यात्। गृहे कुड्यप्रसरात् पञ्चमांशः अधिकः उच्छ्रायः भवति। द्वारस्य अंशौ मध्यमौ चतुर्दिक्षु द्वौ द्वौ नृणां धनपुत्रप्रदौ। तस्मिन्नेव कोष्ठविभागेषु प्रवेशद्वारं कल्पयेत्। नान्यथा तु कदाचन। कोष्ठे यादृक् सुखावहं वातायनं पृथक् कुर्यात्। गृहद्वारम् अन्यगृहद्वारविद्धं गृहकोणस्तम्भमार्गपीठकूपैश्च वेधितं न चिन्तयेत्। प्रासादमण्डपद्वारे मार्गवेधः न विद्यते। उच्छ्रायस्य चतुर्थांशं गृहपीठं प्रकल्पयेत्। अथवा अपरे प्रसादानां मण्डपानाम् अर्द्धांशं जगुः। वातायनं परवातायनैः विद्धं नापि स्मृतम्।

खर्परसम्भवाच्छदिः विस्तारार्धांशमध्योच्चा। तस्यां पतितं तु जलं सुखं वापि अधः गच्छति। छदिः हीना निम्ना न स्यात्। स्वोच्छायस्य कोष्ठस्य विस्तारः न स्यात्। प्राकारः अर्द्धमूलः वा सममूलकः न स्यात्। अथवा प्राकारः तृतीयांशकमूलः। यतः गृहोच्चतायाः अर्द्धपरिमितः प्रविस्तरः। तथा कार्य्यः। यथा चोरैः न विलङ्घ्यते। नित्यं यामिकैः रक्षितः नालिकास्त्रैः संयुतः सुबहुदृढगुल्मः तथा सुगवाक्षप्रणालिकः।

स्वकीयाकारात् हीनः प्रतिप्राकारः असमीपमहीधरः। ततश्च खतं कुर्यात्। गर्तात् द्विगुणितविस्तरा कार्या। सा च नातिसमीपप्राकारा अगाधसलिलाशुभा च। किञ्च युद्धसाधनसम्भारैः तथा सयुद्धकुशलैः विना राज्ञः दुर्गवासः श्रेयसे न भवति। राज्ञा सुगुप्तसुमनोहरत्रिकोष्ठैः पञ्चकोष्ठैः वा सप्तकोष्ठैः विभक्ता विस्तृता। तथा प्राक् प्रत्यक् दीर्घा त्रिगुणा राजसभा कार्या। अथवा यथा कामम् एकभूमिः द्विभूमिका त्रिभूमिका सोपकार्या। शिरोगृहप्रतिकोष्ठे सर्वतः वातायनविराजिता राजसभा कार्या।

किञ्च मध्यकोष्ठस्य विस्तारः पार्श्वकोष्ठात् द्विगुणिता भवितव्या। मध्यकोष्ठस्य उच्चं विस्तरात् पञ्चमांशाधिकम् उच्चता विस्तरेण समं वा पञ्चमांशाधिकम् इति कथयन्ति। कोष्ठानां भूमिः अथवा छदिः या आसीत् तत्र द्विभूमिके पार्श्वकोष्ठे मध्यस्थम् एकभूमिकं कारयेत्।

राजसभा - (king's court)

पृथक् स्तम्भान्तसत्कोष्ठा चतुर्मार्गागमा शुभा च जलोर्ध्वपातियन्त्रैश्च सुस्वरयन्त्रकैः कालप्रबोधकैः यन्त्रैः युता वातप्रेरकयन्त्रैः स्वादर्शैः तथा च प्रतिरूपकैः प्रतिष्ठिता। एवं विधा राजसभा कार्यदर्शने तथाविधा अमात्यलेख्यसभ्याधिकृतशालिकाः पृथक् पृथक् तथा राजगृहात् शतहस्तमितां भूमिं त्यक्त्वा सदा तदर्थाः एताश्च पृथक्कर्तव्याः।

बुद्धिमान् पूर्वं राजगृहस्य निकटे दूरेऽपि च सदा सेनासंवेशनार्थिकां शतद्वयहस्तोत्तरस्यां दिशि शालिकां कुर्यात्। ततःपरं चतुर्दिक्षु परितः समन्तात् अनुक्रमतः वशीभूताः धनिकाः उत्तमाः प्रजानां निलयानि च विन्यसेत्। प्रकृत्यनुप्रकृतयः ततः अधिकारिणगणः ततः सेनाधिपाः ततः पदातीनां गणः, ततः साश्वः सादिगणः, ततः सगजः, गजपालगणः, ततः बृहन्नालिकयन्त्राणि सैन्यसाहचर्यात् लाक्षणया तच्चालिनः पुरुषाः, ततः स्वतुरगीगणः, ततः नृपाङ्गरक्षकवर्गः, ततश्च आरण्यकः गणः, पुरे क्रमात् एषां सदा शोभनानि गृहाणि स्युः। ततः सुगुप्ता सुजलाशया पान्थशाला कार्या।

राजमार्गः - (royal way / royal path)

पुरे ग्रामे च पङ्क्तितः सजातीयगृहाणां पूर्वाभिमुखम् उत्तराभिमुखं वा समुदायेन निवेशनं तथा आपणे सजातीयपण्यनिवहैः पण्यवेषणं निवेशनं कर्तव्यम्। राजमार्गस्य पार्श्वयोः क्रमेण धनिकादिनराधिपः, एवं हि पत्तणञ्च ग्रामं कुर्यात्। नृपगृहात् चतुर्दिक्षु राजमार्गाः कर्तव्याः। त्रिंशत् हस्तमितः राजमार्गः उत्तमः भवेत्। विंशतिकरः राजमार्गः मध्यमः। तथा दशपञ्चकरः अधमः। तथा पुरग्रामादिषु स्थिताः एते पण्यमार्गाः कार्या। केवलपदचारणयोग्यपथः पद्धतिर्वा करस्त्रयात्मिका भवितव्यम्। तथा वीथिः पञ्चकरात्मिका विपणिमार्गः निर्मातव्यः। ग्रामे नगरेषु च मार्गः दशहस्तपरिच्छिन्नः प्रोक्तः। नृपः ग्राममध्यात् प्राक्पश्चात् दक्षिणोत्तरं दृष्ट्वा, तान् राजमार्गान् प्रकल्पयेत्। तथा पुरं दृष्ट्वा सुबहून् राजमार्गान् कल्पयेत्।

राजधान्यां वीथिं न च पदचारणयोग्यमार्गमपि न कर्तव्यम्। इति निर्धारणे तथा षट् योजनान्तरे अरण्ये अर्थात् उत्तमं राजमार्गं प्रकल्पयेत्। षट् योजनानन्तरारण्ये मध्यमं, तयोः मध्ये अधमं मार्गं प्रकल्पयेत्। तथा ग्रामे ग्रामे दशहस्तात्मकं पथं नित्यं योजयेत्। ग्राम्यैः कूर्मपृष्ठा सुसैतुका मार्गभूमिः कार्या। पुनः जलस्य निर्गमार्थं पार्श्वगर्त्तात् मार्गान् कुर्यात्। सकलान्यपि गृहाणि राजमार्गमुखानि स्युः। गृहपृष्ठे सदा मलनिर्हरणस्थलं वीथिः कार्या। तथा प्रतिवत्सरं पङ्क्तिद्वयगतानां गेहानां मार्गान् सुधाशर्करैः वा घटितान् कारयेत्। अभ्यर्थिभिः अनुरुद्धैर्वा ग्रामीणजनैः नृपः ग्रामद्वयान्तरे पान्थशालां प्रकल्पयेत्। तत्र ग्रामप्रमुखैः नित्यं समार्जितां च सुरक्षितां प्रकल्पयेत्। तथा पान्थशालाध्यक्षः तस्मिन् पान्थगृहे आगतानां प्रश्नं कुर्यात्। कुतः प्रयातः असि ? क्व गच्छसि ? त्वं ससहायः वा असहायः ? किं सशास्त्रः ? सवाहनः वा ? सत्यं वद। का जातिः ? किं कुलम् ? नाम किं ते ? कुत्र चिरं स्थितिः ? इति पृष्ट्वा लिखेत्। सायं तस्य शस्त्रं प्रगृह्य सावधानमना भूत्वा स्वापं कुरु इति शासयेत्। ततः तत्रस्थान् गणयित्वा तु च शाला द्वारं पिधाय, यामिकैः संरक्षयेत्। प्रभाते तान् प्रबोधयेत् च शस्त्रं दद्यात् गणयेत् च मोचयेत्।

मुहूर्तं नयेत् - (should be done at auspicious time)

ग्राम्यजनः सदा सीमान्तं तेषां सहाय्यं कुर्यात्। नृपस्तु राजधान्यां वसन् दिनकृत्यं प्रकुर्यात्। पश्चिमे यामे उत्थाय राजा मुहूर्तद्वयेन नियतायाः, कति कति व्ययश्च निर्धारितः कति कोशभूतस्य स्थितस्य द्रव्यस्य व्ययः कति गतः तथा व्यवहारे मुद्रितानां निर्णीतानाम् आयस्य व्ययस्य च शेषः कति इति प्रत्यक्षतः लेखतः लिखिताच्च ज्ञात्वा अद्य व्ययः कति भविष्यतीति च विचार्य इति अध्याहार्यं कोशात् धनागारात् तत्तुल्यं वर्तमानदिवसीयव्ययोपयोगि इत्यर्थः, द्रव्यं निर्हरेत्। पश्चात्तु मौहूर्तिकं वेगनिर्मोक्षं ततः स्नानं कर्तव्यम्। ततः सन्ध्यापुराणदानैः मुहूर्तद्वितयं नयेत्। ततश्च गवाश्वयानव्यायामैः प्रातर्मुहूर्तकं नयेत्।

ततः पारितोषिकदानेन सुधीः नृपः मुहूर्तं नयेत्। ततश्च धान्यवस्त्र-स्वर्णरत्नसेनादेशविलेखनैः तथा आयव्ययैः मुहूर्तानां चतुष्कं तथा स्वस्थचित्तः सुसहृत् भोजनेन मुहूर्तं नयेत्।

ततः जीर्णानां पुरातनानां नवीनानां नूतनानाञ्च प्रत्यक्षीकरणात् मुहूर्तकं, ततश्च प्राङ्विवाकादिभिः विधिवेत्तादिभिः बोधितेन व्यवहारेण द्वौ मुहूर्तौ नयेत्। ततः मृगया क्रीडनैः अथवा व्यूहाभ्यासैः मुहूर्तं नयेत्। ततः संध्यया मुहूर्तं नयेत्। तथा मुहूर्तं भोजनेन नयेत्। तदनन्तरं गूढचारैः समाचारश्रवणेन वार्तालापेन मुहूर्तद्वयं नयेत्। तत् पश्चात् निद्रया अष्टमुहूर्तकं रात्रौ नयेत्।

एवं विहरतः राज्ञः सम्यक् सुखं प्रजायते। त्रिंशद्भिः मुहूर्तकैः एवम् अहोरात्रं विभज्य, कालं नयेत्। स्त्रीमद्यसेवनैः वृथा नैव नयेत्। यत्काले कर्तुम् उचितं तत्कार्यं त्वरितं निर्भयं तत्काले एव कर्तव्यमिति। यथावसरे वृष्टिः प्रजानां सुपोषाय भवति। अन्यथा सुविनाशिनी भवति। किञ्च नीतिनिपुणः तथा अनीतेः नीतिम् अधोगतिं वेत्तीति परितः शस्त्रादिसञ्चालनेषु सुदक्षैः उत्तमैः चतुर्भिः पञ्चभिर्वा षड्भिः यामिकैः सदा सर्वाणि कार्यस्थानानि गोपयेत्। तत्रत्यानि दैनिकानि कार्याणि लेखकाधिपैः श्रुणुयात्। तथा दिने दिने यामिकानां परिवर्तनं प्रकुर्यात्। यामिकैः गृहपङ्क्तिमुखे सदा द्वारं कर्तव्यम्। गृहस्थभूतिपोषितैः तैस्तु वृत्तं धैर्येण श्रवणं कुर्यात्।

गमनागमनपरीक्षणम् (observation in coming and going)

ये ग्रामात् निर्गच्छन्ति ये च ग्रामं प्रविशन्ति तान् यत्नेन सुसंशोध्य तान् शोधनपत्रकान् मोचयेत्। प्रख्यातवृत्तशीलान् असमीक्ष्य त्यजेत्। किञ्च यामिकैः चौराणां जाराणाम् उपरमाय निशि वीथिवीथिषु प्रतिरथ्यासु सदा प्रहरमध्ये पर्यटनं कर्तव्यम्। राज्ञा नित्यं प्रजासु ईदृशं शासनं कार्यम्। राजपुरुषाः दिण्डिमनादैः सह प्रजानुपालिनीं राज्यव्यापिनीं नृपाज्ञामुद्घोषयन्ति। यथा मद्देशसंस्थितैः मदधिकारवर्तिभिः जनैः क्वचिद्दासे किङ्करे भृत्ये पोष्यजने अथवा भार्यायां पुत्रेऽपि वा शिष्ये छात्रे वाग्दण्डपारुष्यं नैव कर्तव्यम्। तुलायाः शासनानि निर्णायकानि यानि मानानि परिमाणानि तेषां क्वचित् कुत्रचित् वा नाणकस्य मुद्रायाः निर्यासानां तरुलतानिर्गतरसानां सजातीनां समानावयवानां धातूनां स्वर्णरजतादीनां घृतस्य मधुदुग्धवसादीनां पिष्टादीनां चूर्णविशेषाणाञ्च सर्वदा कूटं कपटं बलात् जनैः लिखितम् उत्क्रोचग्रहणं तथा स्वामिकार्येषु विलोभनं नैव कर्तव्यम्।

दुवृत्तकारिणं चोरं मद्वेषिणं शत्रुं तथा गूढं यथा तथा अपकारान् अनिष्टकारिणः अन्यान् जनान् न रक्षन्तु। न गोपयन्तु। केऽपि इति मातृणां पितृणाम् अन्येषां पूज्यानां गुरुजनानां विदुषां तथा सद्वृत्तशालिनां सदाचाररतानां जनानाम् अवमानं न उपहसनञ्च न कुर्युः। मदधिकृता इति कर्तृपदमूह्यम्। एवम् उत्तरत्र ज्ञेयम्।

पालने पर्यवेक्षणम् - (observation in ruling)

ननार्योः स्त्रीपुंसयोः तथा स्वामिभृत्ययोः भेदं परस्परमनोभङ्गं न जनयेयुः। किञ्च भ्रातृणां गुरुशिष्याणां तथा पितृपुत्रयोः भेदञ्च न कुर्युः। वापीदीर्घिकाकूपः प्रसिद्धः आरामः उपवनं सीमा उभयोर्विवादशान्त्यर्थं निर्णीतं स्थानं धर्मशाला, धर्मानुशीलनार्थं स्थापितगृहं सुरालयः देवालयः एतान् मार्गान् पथः हीनाङ्गान् विकलाङ्गान् वा जनान् नैव प्रबाधेयुः। राजाज्ञया द्यूतं मद्यपानं मृगया शस्त्रधारणं गवां गजानाम् अश्वानाम् उष्ट्रणां महिषीणां नृणां नराणां स्थावरस्य भूम्यादेः रजतस्य रौप्यस्य स्वर्णस्य रत्नस्य मणिभेदस्य मादकस्य मत्ततताजनकद्रव्यस्य तथा विषस्य क्रयः विक्रयः वा मद्यसन्धानं सुराप्रस्तुतकरणं क्रयपत्रं दानपत्रम् ऋणनिर्णयपत्रकं वा चिकित्सितं चिकित्सा व्यवसायः नैव कार्यम्। महापापाभिशमनं निधेरस्वामिकस्य धनस्य ग्रहणं तस्य राजलभ्यत्वादिति भावः। नूतनं समाजनियमं, जातिदूषणं, हारितस्य धनस्य संग्रहं, मन्त्रभेदनं, गूढमन्त्रणाप्रकाशं तथा नृपस्य दुर्गुणालापं कदाचन नैव कुर्युः। स्वधर्महानिम् अनृतं परदाराभिमर्षणं परस्त्रीगमनं, कूटसाक्ष्यं, कपटसाक्षित्वं, कूटलेख्यम् अप्रकाशप्रतिग्रहम् अज्ञातेन परस्वग्रहणं निर्धारितस्य करस्याधिक्यं, करादायिभिः प्रजाभ्यः अतिरेकग्रहणं, स्तेयं, साहसं तथा स्वामिद्रोहं प्रभोरनिष्टाचरणं मनसापि न कुर्वन्तु।

किञ्च भृत्याः वेतनेन भरणेन वा शुल्केण पण्यद्रव्याणां राजग्राह्यांशेन भागेन वृद्ध्या कुसीदव्यवहारेण दर्पात् बलात् छलात् व्याजाद्वा सर्वदा यस्य कस्यापि जनस्य पीडनं न कुर्वन्तु। परिमाणम् उन्मानं राजविमुद्रितं कृत्वा धार्यम्। निखिलाः प्रजाः गुणार्जने सम्यक् निपुणाः भवन्तु। तथा साहसाधिकृते बलात्कारादि दुष्कर्मापवादे सति आततायिनं विशेषेण निगृह्य दद्युः राजसमीपे।

आततायिनश्च षड्विधाः

यथा अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षडेते आततायिनः इति।

उक्तप्रकारं राजशासनं श्रुत्वा ये जनाः अन्यथा वर्तयन्ति पापकारान् तान् महता प्रबलेन न दण्डेन विनशिष्यामीत्यर्थः।

राजशासनम् (the king's command)

राजा शासनं लिखित्वा प्रमुखपथे स्थापयेत्। असाधुषु शत्रुषु च सदा उद्यतदण्डः स्यात्। नृपेण नीतिपूर्वं प्रजानां पालनं कार्यम्। तथा नृपः यात्रिकानां सुखाय मार्गसंरक्षणं कुर्यात्। ये ये पान्थप्रपीडकाः ते प्रयत्नतः हन्तव्याः। त्रिभिः अंशैः बलं धार्यम्। अर्धांशकेन दानञ्च अर्धांशेनाधिकारिणः अर्धांशेन प्रकृतयः अर्धांशेन आत्मभोगश्च अंशेन कोषः रक्ष्यते। एवम् आयस्य षड्भागैः तु वत्सरे व्ययं कुर्यात्। सामन्तादिषु अयं धर्मः न्यूनस्य कदाचन नास्त्येव।

राजा सर्वदा रक्षकः (the king is the protector always)

राजा प्राप्तस्य राज्यस्य यशसः कीर्तेः धनस्य च गुणस्य च रक्षणे तथा अन्यस्य हरणे च उद्यमोऽपि किञ्च संरक्षणे च संहरणे सदा सुप्रयत्नः भवेत्। क्वचित् शौर्यपाण्डित्यवक्तृत्वं, दातृत्वं, बलं, पराक्रमं, नित्यं सततम् उत्थानम् उद्योगञ्च न त्यजेत्। यः समितौ स्वकार्ये तथा स्वामिकार्ये प्राणभयं त्यक्त्वा अविशङ्कितः युद्धं कुर्यात् सः शूरः इति कथ्यते। यः पक्षं संत्यज्य बालस्यापि सुभाषितं यत्नेन गृह्णाति। धर्मतत्वं निरूपयति सः पण्डितः भवति। यः शङ्कारहितः सन् प्रत्यक्षं नृपस्यापि दुर्गुणान् वदति, कदाचन तान् दोषान् गुणतुल्यान् न प्रस्तौति। सः वक्ता भवति। यस्य भार्या पुत्रादिकं धनम् अदेयं नैवास्ति, यश्च आत्मानमपि पात्रे सन्दत्ते। सः दाता उच्यते। येन अशङ्कितं कार्यं कर्तुं समः तत् बलं भवति।

येन अन्ये नृपाद्याः किंकराः इव भवन्ति सः पराक्रमः युद्धानुकूलव्यापारः। उत्थानमिति कीर्तितः। विषदोषभयात् षड्रसमन्नं कपिकुक्कुटैः विमृश्य नित्यं भुञ्जीत। यतः सविषम् अन्नं दृष्ट्वैव हंसाः स्खलन्ति। भृङ्गाः कूजन्ति। मयूराः नृत्यन्ति। कुक्कुटः विरौति। क्रौञ्चः मदोन्मत्तो भवति। कपिः निश्चयेन रेचते। बभुः नाम भरद्वाजपक्षिविशेषः रोमाञ्चिताः भवेत्। तथा सारिका वमते। तस्मात् भोज्यं परीक्षयेत्। रसद्वययुक्तं नहि भुञ्जीत। हीनातिरिक्तं कटुमधुरक्षारसङ्कुलं न। किञ्च यत्कार्यम् आवेदयति अर्थी मन्त्रिभिस्सह श्रुणुयात्।

राजासावधानः (the king is alert)

सावधानः सन् आरामादौ स्त्रीभिः नटैः गायकैः मागधैः मायिकैः यथावसरं विहरेत्। सदा प्रातः सायञ्च गजाश्वरथयानम् अभ्यसेत्। तथा सैनिकानां व्यूहाभ्यासं स्वयं शिक्षेत् शिक्षयेत् च। वनचरैः व्याघ्रादिभिः मयूराद्यैः पक्षिभिः क्रीडयेत्। तथा दुष्टसत्वान् निपातयन् मृगयां कुर्यात्। मृगायायां नित्यं शौर्यं लक्ष्यसन्धानसाधनम् अकातरत्वं नाम निर्भयत्वं, शास्त्रास्त्रशीघ्रपातनकारिता च प्रवर्धते। एते शूरत्वादिगुणाः सहजभावेन उपवर्धते। किञ्चास्मिन् कर्मणि एकः हिंसादोषः महत्तरः। अतः अस्मिन् कर्मणि निवृत्तिरेवोचितम्। किञ्च सावधानमनाः सन् सदा निशि यथा सिद्धानि शस्त्राणि अस्त्राणि सञ्चालने प्रवीणः सन् सर्वनाशकरे पुनः गूढचारेभ्यः जनानाम् अधिकारिणां प्रकृतीनां सचिवसेनापत्यादिप्रधानपुरुषाणां यत् इङ्गितं तथा क्रियाकलापः शत्रूणां सैनिकादीनाञ्च आशयं यत् समाजिकानाञ्च बान्धवानाम् अन्तःपुरस्त्रीणाञ्च मतं सर्वं यत्नात् श्रुणुयात्। तथा संलिखेत्।

म्लेच्छः (the barbarious)

यः नृपः असत्यवादिनं गूढचारं नैव शास्ति सः प्रजाप्राणधनापहः म्लेच्छः नाम वर्णाश्रमधर्मविहीनः इत्युक्तः। ब्रह्मचारी, तपस्वी, सन्यासी, कपटयोगविभूतिज्ञः, तेषां स्वरूपिणं गूढचारं प्रत्यक्षेण छलेन विशोधयेत्। तेषां गूढचाराणां परीक्षणात् अभावे राजातत्वं न जानाति। न च आप्यते। अशोधकनृपात् अनृतवादने नैव बिभ्यति। प्रधानराजपुरुषेभ्यः राज्यपदाधिकारिभ्यः गूढचारं सुपालयेत्। राज्यं सदा एकनायकं कुर्यात्। न तु बहुनायकम्। भूमिपः क्वचिदपि अनायकं कर्तुं नाभिलषेत्। यदि राजकुले बहवः पुरुषाः सन्ति तदा तेषु ज्येष्ठः राजा भवेत्। शेषाः तस्याग्रजन्मनः कार्यसाधकाः स्युः। सर्वसहायेभ्यः गरीयांसः वराः। अतः अभिवृद्धये भवति। ज्येष्ठोऽपि यः बधिरः, कुष्ठी, मूकः, अन्धः, षण्डः, सः तथा भ्राता तत्पुत्रः वा एको हि नैव राज्यार्हः भवेत्।

ऐकमत्यं श्रेष्ठम् (unity wins)

नृपात्मनः कनिष्ठोऽपि, ज्येष्ठस्य भ्रातुः पुत्रस्तु राज्यभाक्। यथा अग्रजस्य चाभावे कनिष्ठाः राज्यभागिनः। किञ्च दायादानाम् ऐकमत्यं राज्ञः परं श्रेयस्करं भवति। वंशजानां वैभिन्न्यं राज्यस्य कुलस्य च विनाशाय भवति। अतः नृपः अव्याहताज्ञः

सन् छत्रसिंहासनैरपि सन्तुष्येत्। तथा दायादान् स्वभोगसदृशान् कारयेत्। अर्थात् तेऽपि राजसुखमनुभूय सन्तुष्टाः तिष्ठेयुः। राज्यस्य विभजनात् राज्ञां शुभं नैव भवेत् खलु। यतः विभागेन अल्पीकृतं राज्यं शत्रुः गृहीतुमिच्छति। अल्पस्य अनायासेनैव जेतुं शक्यत्वात्। नृपः वंशजान् राज्यतुर्यांशदानेन समन्ततः स्थापयेत्। अथवा चतुर्दिक्षु सदा देशाधिपान् कुर्यात्। किं वा गोगजाश्वोष्टकोशानामाधिपत्ये नियोजयेत्। किञ्च माता तथा नारी मातृसमा महानसे नियोज्या। बान्धवाः आत्मवीराः सदा सेनाधिकारे संयोज्याः। ये च गुरवः सुहृदः ते स्वदोषदर्शकाः स्थाप्याः। स्त्रियः वस्त्रालङ्काराणां सुदर्शनेयोज्याः। स्वयं तु सर्वं विवेचनं कुर्यात्। केन पदाधिकारिणा किं क्रियतेऽस्य पर्यवेक्षणं कुर्यात्। पर्यायेण क्रमशः मुद्राङ्कितं कुर्यात्।

मन्त्रिसमालोचनम् (thinking along win ministers)

रात्रौ अथवा दिवा विशोधिते निर्जने अन्तर्वेश्मनि अथवा अरण्ये मन्त्रिभिः सह भाविकार्यं मन्त्रयेत्। सभायां सुहृद्भिः भ्रातृभिः पुत्रबान्धवैः सेनापतिभिः पुनः सभ्याद्यैः सदा राजकृत्यं चिन्तयेत्। सभायां पश्चिमादर्धभागस्य मध्ये सिंहासनं स्मृतम्। दक्षिणस्यां दिशि स्थिताः, उत्तरस्यां दिशि स्थिताः उपविशेयुः। अन्ये तु पार्श्वयोः विभागयोः तिष्ठन्ति।

राजपरिवारः (the king's family)

पुत्राः पौत्राः भ्रातरः तथा भागिनेयाः स्वपृष्ठतः दौहित्राः दक्षिणस्यां दिशि विशेयुः। इमे पित्रुसोदराः स्वकुलश्रेष्ठाः सभ्याः, तथा सेनानायकाः क्रमात् राज्ञः वामभागे विशेयुः। तथा नृपतिसमक्षं दक्षिणस्यां दिशि मातामहकुलश्रेष्ठाः मन्त्रिणः बान्धवाः श्वशुराः श्यालकाः, पूर्वाभिमुखाः पृथगासनाः विशेयुः। तथा वामभागे पदाधिकारिवर्गः तिष्ठेयुः।

जामाता, भगिनीपतिः वामदक्षिणपार्श्वस्थौ स्वसदृशः सुहृत् समीपे अथवा स्वस्यार्द्धासनगतः विशेत्। दत्तकादयः पुत्राः दौहित्रभागिनेयानां स्थाने स्युः। तथा भागिनेयाः पुनः दौहित्राः पुत्रादिस्थानेषु संश्रिताः भवेयुः। यथा पिता तथा आचार्यः पार्श्वयोः अग्रभागे समश्रेष्ठासने स्थितः भवेदिति, लेखकः सर्वे सचिवानां पृष्ठदेशे उपविशेयुः। परिचारगणाः सर्वे सर्वेभ्यः पृष्ठसंस्थिताः। पार्श्वे अन्तर्गमनप्रणतिज्ञापकौ कनकदण्डधरौ सेवकौ तिष्ठेताम्।

सिद्धास्त्रः राजा ललितलाञ्छनान्वितः सुभूषणः सुकवचः सुवस्त्रः मुकुटान्वितः नग्नशस्त्रः सदा सावधानमनाः सन्, राजसिंहासने सानन्दं प्रविशेत्। तथा त्वं सर्वस्मादधिकः, दाता, शूरः, धार्मिकः असीति वाचं न श्रुणुयात्। ये सेवकाः श्रावकाः तथा ये मन्त्रिणः रागात् लोभात् भयात् मूकाः इव स्युः। तान् स्वार्थसिद्धये अभिमतान् न गृह्णीयात्। तेषां पृथक् पृथक् सोपकरणं विचारं लेखयित्वा स्वमतेनैव विमृशेत्। बहुसम्मतं कार्यं कुर्यात्। सुधीः विद्वान् नृपः दिने दिने गजाश्वरथपश्वादीन् तथैव भृत्यान् दासान् सम्भारान् सैनिकान् कार्यक्षमान् ज्ञात्वा, प्रयत्नेन संरक्षयेत्। सुजीर्णान् अतिवृद्धान् विसर्जयेत्।

सहस्रदशकोशोद्भवां वार्ताम् एकदिनेनैव जानीयात्। तथा जनान् भृतिपोषितान् सर्वविद्यानां कलानामभ्यासे शिक्षयेत्। अधिगतज्ञानं सम्यगवबोध्य, तान् विद्याकलोत्तमान् तस्मिन् कर्मणि परीक्ष्य, प्रतिसंवत्सरे पुरस्कारादिप्रदानेन सम्मानयेत्। नृपः सदा येन प्रकारेण विद्याकलानां वृद्धिः भवेत्, तथा कार्यं कुर्यात्। तथा क्रूरवेशान् नतिनीतिविशारदान् सिद्धास्त्रान् भटान् समीपे पृष्ठभागे अग्रगामिनः नियुक्तं कुर्यात्। पुनः स्वयं गजस्थः प्रजाः रञ्जयन् नित्यं नगरे पर्यटनं कुर्यात्। नृपानुरूपवाहनारोहणात् राज्ञा समः राजा एव। तथा राजा कविभिः अञ्जसा विभाव्यते। अतः नृपः स्वसाम्यप्रापितैः गुणैः स्वबान्धवैः मित्रैः तथा पदाधिकारिवर्गैः सह गच्छेत्। कदाचिदपि नीचैः न गच्छेत्।

राजकार्याणि (the activities of the king)

मिथ्यासत्यसदाचारैः क्रमात् आनुपूर्व्यात् नीचश्च साधुः स्मृतः। नीचाः हि साधुभ्यः अतिस्वमृदुत्वं सन्दर्शयन्ति। राजा प्रतिवर्षे स्वयं ग्रामान् नगराणि देशान् च संवीक्ष्य, तथा अधिकारिगणैः काः प्रजाः रञ्जिताः ? काश्च पीडिताः ? ताश्चावलोक्य, साधुभूतेन व्यवहारं विचिन्तयेत्। भृत्यपक्षपाती न भवेत्। प्रजापक्षं यथा कल्याणं भवति तथा व्यवहारं कुर्यात्। प्रजाशतेन प्रदत्तदोषम् अधिकारवर्गं परित्यजेत्। तथा अमात्यमपि सकृत् अन्यायगामिनं संवीक्ष्य, एकान्ते दण्डयेत्। अभ्यासापकृतं स्पष्टं त्यजेत्। किञ्च नृपः अन्यायवर्तिनां भृत्यानां राज्यं सर्वस्वं हरेत्। विजितानां नृपाणां विषये सदा धर्माधिकरणं स्थाप्यम्। तथा निर्जितानां तच्चरित्रानुरूपतः तेषां चरित्राणामनुरूपतः वेतनं दद्यात्। आत्मनि अनुरक्तां सुरूपां सुवस्त्रां प्रियवादिनीं

सुभूषणां सुसंशुद्धां प्रमदां शयने भजेत्। यामद्वयं यावत् शयानञ्च इति निश्चयेन अत्यन्तं सुखमश्नुते। स्वस्थानं न परित्यजेत् तथा नीत्या च शत्रुगणं जयेत्। दन्ताः केशाः नखाः तथा नृपाः स्थानभ्रष्टाः न विभान्ति। नृपः सदा महापदि गिरिदुर्गाणि आश्रयेत्। तस्य पर्वतस्य आश्रयात् गिरिमवलम्ब्य दस्यवृत्या पुनः स्वराज्यं समाहरेत्। विवाहदानयज्ञार्थं धनं विना लुण्ठकभूतो राजा अष्टमभागावशिष्टं दुर्जनानां निखिलं धनं सर्वतः हरेत्। नित्यम् एकत्र न संवसेत्। केनाऽपि पुरुषं प्रति नैव विश्वासं कुर्यात्। सततं सावधानः परपीडकः सदा उद्युक्तः अनार्यकृत्येषु निष्ठुरः। किञ्च परदारासु तथा कुलकन्याप्रदूषणे विमुखः ये जनाः पुत्रवत् पोषिताः भृत्याः समये शत्रुतां गताः, तेषां हननं न चिन्तयेत्। प्रयत्नस्य दोषः न स्यात्। तत् स्वयं भागधेयम्। कर्म सुविफलं दृष्ट्वा तपः तप्त्वा दिवं व्रजेत्। संक्षेपतः राजकृत्यमुक्तम्। मिश्रे अधिकतया कथ्यते। राजकार्यनिरूपकः प्रथमः अध्यायः प्रोक्तः।

युवराजादिलक्षणम् (the quality of a prience)

यद्यपि कर्म अल्पतरं तदपि एकेन असहायेन पुरुषेण दुष्करं भवति। ऐश्वर्यपूर्णं राज्यं किं वक्तव्यम् ? सर्वविद्यासु कुशलः सुमन्त्रवित् अपि नृपः एकः मन्त्रिभिः विना क्वचित् मन्त्रं तु न चिन्तयेत्। प्राज्ञः नृपः सभ्यानाम् अधिकारिणां सचिवादिप्रधानपुरुषाणां सभासदाञ्च सुमते सर्वदा स्थितः भवेत्। स्वमते कदापि न तिष्ठेत्। स्वातन्त्र्यमापन्नः प्रभुः अनर्थायैव कल्पते। यतः भिन्नप्रकृतिरेव च सद्यः भिन्नराष्ट्रः पदच्युतो भवेत्। आप्तवाक्यैः अनुभवैः आगमैश्च अनुमानतः पुरुषे पुरुषे बुद्धिवैभवं भिन्नं च प्रत्यक्षेण सादृश्यैः साहसैः कपटैः बलैः च व्यवहाराणां वैचित्र्यं गुरुलाघवैः औन्नत्यं दृश्यते। तत् सकलम् एकेन नरेण ज्ञातुं न शक्यते। अतः राजा राज्यविवृद्धये कुलगुणशीलवृद्धान् शूरान् भक्तान् प्रियंवदान् हितोपदेशकान् क्लेशसहान् सदा धर्मरतान् कुमार्गगमपि नृपं बुद्ध्या उद्धर्तुं क्षमान् शुचीन् निर्मत्सरान् कामक्रोधलोभहीनान् तथा निरालसान् सहायान् वरयेत्। कुसहायेन नृपः स्वधर्मात् राज्यतः हीयते। दितिजाः कुसहायतः कुकर्मणा च प्रनष्टाः। शूराः बलाधिकास्तु दुर्योधनादयः नृपाः नष्टाः। अतः नृपतिः निरभिमानः सुसहायः भवेत्। युवराजः अमात्यगणः उभौ राज्ञः भुजौ तौ क्रमात् दक्षसख्यौ कर्णौ च नयने स्मृतौ। युवराजसचिवाभ्यां विना नृपः बाहुकर्णाक्षिहीनः स्यात्। अतः चिन्तयित्वा युवराजसचिवौ राजकार्ये योजयेत्। अन्यथा महानाशाय भवति।

मुद्रां विना सदा अखिलं राजकृत्यं कर्तुं क्षमं धर्मपत्नीजम् औरसं युवराजार्थं कल्पयेत्। अथवा स्वकनिष्ठम् अनुजम् पितृव्यम् अग्रजसम्भवं पुत्रं वा पुत्रीकृतं दत्तं यौवराज्ये अभिसेचयेत्। स्वधर्मनिरतान् शूरान् भक्तान् नीतिमतः राजपुत्रान् बालानपि सुयत्नतः सदा संरक्षयेत्। राजकुमाराः अर्थेषु लोलुभ्यमानाः अरक्षिताः सन्तः राजानं मारयेयुः। रक्ष्यमाणाः अपि ते यदि कथञ्चित् छिद्रं प्राप्नुवन्ति। मृगेन्द्रशिशवः गजमिव मदोद्धूताः निरङ्कुशाः गजाः इव राजपुत्राः रक्षितारं हृतं घ्नन्ति। ते पितरं भ्रातरञ्चापि निघ्नन्ति। इतरान् सर्वान् अपि च घ्नन्ति। मूर्खः बालः अपि स्वस्य साम्यम् इच्छतिस्म। युवानां विषये किं वक्तव्यम् ? सदा स्वयं सद्भृत्यैश्चापि तत् स्वान्तं कौशलैः ज्ञात्वा स्वात्यन्तसन्निकर्षेण रक्षयेत्। नृपः अमात्याद्यैः सुतान् सुनीतिशास्त्रकुशलान् धनुर्वेदविशारदान् सदा क्लेशसहान् वाग्दण्डपारुष्यानुभवान् शौर्ययुद्धरतान् सर्वकालविद्याविदः अञ्जसः तथा सुविनीतान् प्रकुर्वीत। सुवस्त्राद्यैः भूषयित्वा सुक्रीडनैः लालयित्वा च आसनाद्यैः अर्हयित्वा सुभोजनैः पालयित्वा तु यौवराज्यार्हान् विधाय, यौवराज्ये स्वकीयपुत्रान् अभिषेचयेत्। यतः अविनीतकुमारं त्वरितमेव विनश्यति। राजपुत्रः सुदुर्वृत्तः परित्यागं नार्हति। यतः सः क्लिश्यमानः परान् आश्रित्य पितरं निश्चयेन हन्ति। व्यसने आकण्ठनिमज्जमानं तं राजकुमारं व्यसनाश्रयैः क्लेशयेत्। दुष्टं गजमिव उद्वृत्तं सुखबन्धनं कुर्वीत। किन्तु दायादाः सुदुर्वृत्ताः चेत् तदा ते प्रयत्नतः व्याघ्रादिभिः शत्रुभिः अथवा कौशलैः राष्ट्रविवृद्धये हन्तव्याः। अतः अन्यथा ते दायादाः प्रजायाः पुनः राज्ञः विनाशाय भवन्ति। ततः दायादाः परैः स्वगुणैः नृपं नित्यं तोषयेयुः। अन्यथा ते दायादाः स्वभागात् जीवितादपि भ्रष्टाः भवन्ति। ये नराः स्वसापिण्ड्यविहीनाः अन्योत्पन्नाः ते दत्ताद्याः स्वसुता इति मनसापि नैव मन्तव्याः। इति यत् ते धनिकं नरं दृष्ट्वा दत्तकत्वमिच्छन्ति। यतः दुहिता पुत्रवत् नृणाम् अङ्गात् अङ्गात् सम्भवति। अतः स्वकुलोत्पन्नकन्यायाः पुत्रः तेभ्यः वरः भवति। अस्मात् कारणात् पुत्रदौहित्रयोः पिण्डदाने भेदः नास्ति। राजा भूमेः प्रजानाञ्च रक्षणार्थम् इति निश्चितं दत्तपुत्रकं पालयेत्। नृपः सधनश्चेत् तदा प्रजापालनार्थं परोत्पन्ने स्वपुत्रत्वं मत्वा तं सर्वं ददाति। लोके दत्तकाय सर्वं रक्षेत् तथापि न ददाति कस्मैचित् किमपि। नापि यजति देवान् किमाश्चर्यम् ? किञ्च युवराजत्वं प्राप्यापि

विकृतिं च न प्राप्नुयात्। मातरं पितरं गुरुं भ्रातरं भगिनीं वा अन्यान् वापि राजवल्लभान् स्वसम्पत्तिमदात् नैव पीडयेत्। राष्ट्रे महाजनान् न अवमन्येत। तथा न पीडयेत्। किञ्च महतीं समृद्धिं प्राप्यापि पितुराज्ञया एव वर्तेत। पितुः आज्ञा हि पुत्रस्य परमं भूषणं स्मृतम्। भार्गवेण माता हता। राघवस्तु वनं गतः। रामपरशुरामौ पितुः तपोबलात् मातरं राज्यं प्रापतुः। अतः यः शापानुग्रहयोः शक्तः तस्य आज्ञा गरीयसी भवति। सर्वेषु सोदरेषु स्वस्याधिक्यं न दर्शयेत्। यतः भागार्हाणां भ्रातृणाम् अवमानात् सुयोधनः नष्टः अभवत्।

राजपुत्रकाः (the sons of king)

इह राजपुत्रकाः उत्तमं पदं प्राप्यापि पितुराज्ञोल्लङ्घनेन उत्कृष्टपदात् किङ्कर इव भ्रष्टाः सन्ति। यथा ययातेः पुत्राः यदुप्रभृतयः यथा विश्वामित्रसुताः मधुच्छन्दादयः विपन्नाः बभूवुः। तस्मात् कायवाङ्मानसैः पितृसेवापरः जीवेत्। येन पिता तुष्टः भवेत्, तत् कर्म नियतं कुर्यात्। येन पिता मनागपि विषीदति तत् न कुर्यात्। यस्मिन् पितुः प्रीतिः भवेत् तस्मिन् स्वयं प्रियं चरेत्। यस्मिन् पिता द्वेषं कुर्यात् सः स्वस्यापि आत्मनोऽपि द्वेष्यः एव। पितुः असम्मतं वा विरुद्धं नैव समाचरेत्। चारसूचकदोषेण यदि पिता अन्यथा स्यात् तदा प्रकृत्यनुमतं कृत्वा एकान्ते तं प्रबोधयेत्। अन्यथा सूचकान् महद्दण्डेन नित्यं दण्डयेत्। सदैव सचिवादिप्रमुखपुरुषाणां कपटस्वान्तं निश्चयेन जानीयात्। किञ्च राजपुत्रः प्रतिदिनं प्रातः पितरं मातरं गुरुं च नत्वा ततः यद्यत् स्वकृतं राजानम् अनुदिनं निवेद्य गृहस्य अविरोधेन गृहे वसेत्। त्यागी तथा सत्यसम्पन्नः विद्यया कर्मणा शीलैः प्रजाः संरञ्जयन् मुदा सर्वान् आत्मनः अधीने कुर्यात्। वर्द्धमानचन्द्र इव शनैः शनैः प्राचुर्येणोत्कर्षं गच्छेत्। निष्कण्टकं शत्रुशून्यं राज्यं प्राप्यापि एवं सदाचारयुक्तः राजपुत्रः साहाय्यसम्पन्नः सहामात्यः चिरं वसुन्धरां भुङ्क्ते। युवराजस्य यत् हितं तत् सर्वं समासतः उक्तम्। अमात्यादेः कृत्यं मृदुगुरुप्रमाणत्ववर्णशब्दादिभिः समन्वितं लक्षणं समासतः उच्यते। परीक्षकैः यथा द्रावयित्वा स्वर्णं परीक्ष्यते तथा कर्मणा सहवासेन शीलकुलादिभिः गुणैः नित्यं भृत्यं परीक्षयेत्। तदा विश्वास्यं विश्वसेत्। केवलं जातिं न लक्षयेत्। अपि च कुलं नैव लक्षयेत्।

कुशलगुणाः (qualities of experties)

कर्मशीलगुणाः पूज्याः जातिकुले नैव पूज्ये। तथा पूज्याः न जात्या न वंशेन पूज्यत्वमाप्नोति। विवाहे भोजने नित्यं कुलजातिविवेचनं कार्यम्। सत्यवाक् गुणसम्पन्नः अभिजनवान् धनी सत्कुलोत्पन्नश्च सुशीलश्च सुकर्मा च तथा निरालसः यथा आत्मकार्यं करोति ततः अधिकं स्वामिकार्यं सम्पादयति। भृत्यः कायवाङ्मानसेन यत्नेन चतुर्गुणेन भृत्यैव मृदुवाक् कार्यदक्षः शुचिः दृढः। परोपकरणे दक्षः अपकारपराङ्मुखः स्वाम्यागस्कारिणं पुत्रं पितरं वापि दर्शकः नापि भवेत्। पत्यौ अन्यायगामिनि यततद्रूपः सुबोधकः काञ्चित् प्रभुवाचं न दोषारोपकः, न तथा तन्न्यूनस्य अप्रकाशकः भवेत्। सत्कार्ये अचिरक्रियः असत्कार्ये चिरक्रियः तथा कदाचन तस्य स्वामिनः भार्यापुत्रमित्रच्छिद्रदर्शी न भवेत्। तदीयेषु भार्यापुत्रादिबन्धुषु तद्वत् बुद्धिः न श्लाघते। न विजिगीषते। न अभ्यसूयति। नापि निन्दति।

अन्येषामधिकारं नेच्छति इत्यवधारणे सदा निस्पृहः मोदते। तथा सततं तद्दत्तान् वस्त्रभूषादीन् धारयतीति तस्य राज्ञः पुरः तिष्ठेत्। भृतितुल्यव्ययी इन्द्रियजेता दयालुः शूरः तथा रहसि तस्य राज्ञः अकार्यस्य सूचकः भवेत्। ईदृशसेवकः श्रेष्ठः भवति।

हीनभृतिकाः (the debased servants)

एभिः विपरीतगुणैः भृतकः निन्द्यः उच्यते। ये भृत्याः हीनभृतिकाः ये दण्डेन प्रपीडिताः, ये च शठाः पुनः भीताः लुब्धाः समक्षं प्रियवादिनः, मत्ताः, व्यसनिनः, आर्ताः उत्कोचेष्टाः, देविनः द्यूतकाराः, नास्तिकाः, दाम्भिकाः, तथा असत्यवाचः असूयकाः अपि ये च अपमानिताः, ये असद्वाक्यैः मर्मणि भेदिताः रिपोः मित्राः तथा सेवकाः पूर्ववैरानुबन्धिनः चण्डाः, साहसिकाः धर्महीनाः एते सुसेवकाः न भवन्ति। तथा सदसत् भृत्यलक्षणं संक्षेपतः कथितम्। पुरोधादिलक्षणं यत् तत् समासतः उच्यते। पुरोधाः प्रतिनिधिः तथा प्रधानः सचिवः तथा मन्त्री अभिभाषकः कोविदः सुमन्त्रकः अमात्यः दूतश्च एताः दश राज्ञः राज्यसञ्चालनस्योपादानकारणानि सन्ति। दूतान्ताः क्रमशः पूर्वं दशगुणाधिकाः कथिताः। कैश्चित् समालोचकैः राजा अष्टप्रधानपुरुषैः सदा युक्तः स्मृतः। सुमन्तः पण्डितः मन्त्री प्रधानसचिवः अमात्यः न्यायाधीशः प्रतिनिधिः

तथा इङ्गिताकारतत्वज्ञः तदनुगामी तस्य राज्ञः आज्ञापालकः कथितः। दूताश्च एताः अष्टौ संज्ञः प्रधानपुरुषाः सदा भृतिसमाः। पुरोधाः प्रथमं सर्वेभ्यः श्रेष्ठः राजराष्ट्रभृत् प्रतिनिधिः। तदनु तदनन्तरं पण्डितः, ततः सुमन्त्रः ख्यातः। ततः परम् अमात्यः ततः परं तु दूतः। एते क्रमात् यथागुणाः पूर्वश्रेष्ठाः भवन्ति। पुरोधाः प्रथमं सर्वेभ्यः श्रेष्ठाः। मन्त्रानुष्ठानसम्पन्नः त्रैविध्यः धर्मतत्परः जितेन्द्रियः, जितक्रोधः, लोभमोहविवर्जितः, षडङ्गवित्, साङ्गधनुर्वेदवित् च अर्थधर्मवित् यत् कोपभीत्या राजापि धर्मनीतिरतो भवेत्। यश्च नीतिशास्त्रव्यूहादिकुशलः यः शापानुग्रहयोः शमः सः पुरोहितः। यश्च पुरोधाः सैवाचार्यः।

प्रधानपुरुषाः (important men)

पुरोहितादिप्रधानपुरुषाणां सत्परामर्शात् विना राज्यनाशः ध्रुवं भवेत्। राज्ञः रोदनं न भवेत्। तस्मात् ते सुमन्त्रिणः स्युः। येभ्यः नृपः न बिभेति तैः किं राज्यवर्धनं स्यात् ? यथालङ्कारवस्त्राद्यैः स्त्रियः भूष्याः, प्रधानपुरुषाः तादृशाः एव। येषां परामर्शात् राज्यं जनाः बलं, धनं तथा सुनृपत्वं न हि वर्धितम्। तथा अरिनाशं न भवति। तैः प्रधानपुरुषैः किं प्रयोजनम् ? यः कार्यस्य अकार्यस्य च प्रकर्षेण विशिष्टबोद्धा सः प्रतिनिधिः कथितः। यः सर्वदर्शी सः प्रधानः भवति। पुनः यः सेनावित् सः सचिवः भवति। यः नीतिकुशलः सः अमात्यः भवति। तथा धर्मतत्ववित् पण्डितः सदा लोकशास्त्रनयज्ञः सः न्यायाधीशः स्मृतः। यश्च देशकालप्रविज्ञाता स हि अमात्य इति कथ्यते। यः आयव्ययप्रविज्ञाता सः सुमन्त्रः इति कीर्तितः। यः सङ्केतबाह्य-स्वरूपकायिकव्यापारज्ञः स्मरणशक्तिसम्पन्नः देशकालवेत्ता, सन्धिविग्रहयानासन-द्वैधीभावसंश्रेयेति षाड्गुण्यमन्त्रवित् वाग्मी भयरहितः सः दूतः कथ्यते।

राजप्रतिनिधिः (king's representatice)

प्रतिनिधिः सदा यत्कार्यम् अहितञ्चापि सद्यः यदा कर्तुम् उचितं, यच्च हितमपि अकर्तुं यदा उचितं तत् राज्ञः बोधयेत् कारयेत् कुर्याच्च। तथा न कुर्यात् न प्रबोधयेत्। प्रधानः सर्वेषां राजकृत्येषु यत् कार्यजातं सत्यं यदि वा असत्यं निश्चितं भवेत् तत् विचिन्तयेत्। अमात्यः गजानाम् अश्वानां रथानां पदगामिनां सुदृढानाम् उष्ट्राणां वृषाणां

वृषभानां बाह्यभाषासु सङ्केतव्यूहाभ्यसनशालिनां प्राक्प्रत्यग्गामिनां हीनमध्योत्तमकर्मणां राज्यचिह्नशस्त्रास्त्रधारिणां परिचारगणानाम् अस्त्राणाम् अस्त्रजातीनां विचिन्त्य तथा कार्यक्षमः प्राचीनः साद्यस्कः वा स्वतुरगीगणः कति विद्यते ? कार्यसमर्थः कति ? तथा शस्त्रगोलाग्निचूर्णयुक् साङ्ग्रामिकः सम्भारः कति अस्ति तान् विचिन्त्य राज्ञे तत् कार्यं सम्यक् निवेदयेत्। मन्त्री केषु कदा कथं सामदानभेदः दण्डश्च तेभ्यः किं फलं बहुमध्यम् अल्पकञ्च एतत् सञ्चिन्त्य निश्चित्य सर्वं राज्ञे निवेदयेत्।

न्यायाधिपतिः (cheif justice)

सभास्थितः न्यायाधिपतिः धर्माधिकारिभिः परिवृतः सन् साक्षिभिः लिखितैः भोगैः छलैः मानुषान् आत्मनैव उत्पादितसम्प्राप्तव्यवहारान् विचिन्त्य, दिव्यसंसाधनाद्वापि बहुसम्मतसंसिद्धान् विनिश्चित्य केषु किं परं साधनं युक्तिप्रत्यक्षानुमानोपमानैः लोकशास्त्रतः विनिश्चित्य सदा नृपं सम्बोधयेत्।

पण्डितः (scholar)

पण्डिताः के प्राचीनाः ? के च वर्तमानाः ? धर्माः लोकसंश्रिताः ? के शास्त्रेषसमुद्दिष्टाः च अधुना विरुध्यन्ते ? तान् विचिन्त्य परत्र इह च सुखप्रदैः तैः नृपं निवेदयेत्।

सुमन्त्रः (good minister)

सुमन्त्रः अस्मिन् वत्सरे इयत् तृणादिकं स्थावरजङ्गमं द्रव्यं सञ्चितम्, इयत् व्ययीभूतम्, इयञ्च शेषम् अस्तीति राज्ञे निवेदयेत्। अमात्यः कति पुराणि ? कति ग्रामाः ? कति अरण्यानि सन्ति ? कति भूः कर्षिताः केन ? ततः कति भागः प्राप्तः ? कति वा कस्मिन् भागशेषं स्थितम्? आकृष्टा च भूमिका कति ? अस्मिन् वत्सरे शुल्कदण्डादिजं भागद्रव्यं कति ? अकृष्टपच्यं कति ? अरण्यसम्भवं कति ? आकरसञ्जातं कति ? निधिप्राप्तं च कति ? अस्वामिकं कति ? नाष्टिकं तस्करादृतं सञ्चितञ्च, एतत् विनिश्चित्य राज्ञे निवेदयेत्। समासात् प्रधानदशकस्य लक्षणञ्च कृत्यम् उक्तम्। नृपः तदनुदर्शिभिः तल्लिखितैः सर्वं विन्द्यात्।

एवमेतान् परिवर्त्य अन्योन्यकर्मणि अमात्यञ्च नियोजनं कुर्यात्। अधिकारिणः इति निश्चयेन कदापि स्वाधिकबलान् न कुर्यात्। तथा दशप्रकृतयः प्रधानपुरुषाः परस्परं समबलाः कार्याः। एकस्मिन्नधिकारे सदा पदाधिकारिणां त्रयं नियुक्तं कुर्यात्। तेषु त्रिषु पुरुषेषु एकं मुख्यतमं बुद्धिमन्तं नियुञ्जीत। तत्कार्ये द्वौ दर्शकौ त्रिभिः पञ्चभिः वा सप्तभिः वा दशभिः हायनैः तन्निवर्तयेत्। तत्कार्यकौशल्ये दृष्ट्वा तौ परिवर्तयेत्।

अधिकारमदः (arrogence of the authorities)

नृपः सदा यस्मै कस्मै अपि चिरम् अधिकारं न दद्यात्। अधिकारे क्षमं दृष्ट्वा अधिकारे नियोजयेत्। कः पुनः चिरं पीत्वा न हि मोहमुपगच्छेत्। अतः बहुकालपर्यन्तं यस्मै कस्मै जनाय प्रभुत्वपदं न दातव्यम्। अतः तं कार्यक्षमं दृष्ट्वा अन्ये कार्ये नियोजयेत्। वर्तने तु अन्यं तत्पदानुगतं तत्कार्ये कुशलं नियोजयेत् खलु। तदभावे तथा अपरं नियोजयेत्। यदि तत्पुत्रः तद्गुणः तदा तत्कार्ये तं नियोजयेत्। यस्मिन् काले कोऽपि कर्मचारी यथा यथा श्रेष्ठपदे अधिकारी भवेत्। तथानुक्रमेणासौ संयोज्यः। अन्ते तं जनं प्रधानपदं प्रापयेत्।

अधिकारबलं दृष्ट्वा बहून् दर्शकान् नियोजयेत्। अथवा दर्शकैर्विना एकं कार्यक्षमं पदाधिकारिणं तत्पदे नियुक्तं कुर्यात्। ये चान्ये कर्मसचिवाः तान् सर्वान् गजाश्वरथपादातपशूष्ट्रमृगपक्षिणां सुवर्णरत्नरजतवस्त्राणाम् अधिपान् वित्तानामधिपं पाकाधिपं तथा आरामाधिपतिं सौधगेहाधिपं सम्भारपं देवतुष्टिपतिं दानपतिं साहसाधिपतिं तथा ग्रामनेतारं भागहारं लेखकं शुल्कग्राहं तथा प्रतिहारं पृथक् पृथक् योजयेत्। किञ्च एतत् ग्रामे ग्रामे पुरे पुरे नियोक्तव्यम्।

ये तपस्विनः दानशीलाः श्रुतिस्मृतिविशारदाः पौराणिकाः शास्त्रविदः दैवज्ञाः मन्त्रिकाः आयुर्वेदविदः कर्मकाण्डज्ञाः तथा तान्त्रिकाः ये च अन्ये गुणिनः श्रेष्ठाः बुद्धिमन्तः जितेन्द्रियाः तान् सर्वान् दानैः मानैश्च सुपूजितान् भृत्या पोषयेत्। अन्यथा राजा हीयते अकीर्तितञ्च प्राप्नोति। कार्याणि बहुसाध्यानि ज्ञात्वा तत्तत्कार्येषु कुशलान् तान् तेषामपि तथा अधिपान् नियोजयेत्। अक्षरम् अमन्त्रं नास्ति। मूलम् अनौषधं

नास्ति। कोऽपि मानुषः अयोग्यः न भवति। तत्र योजकः दुर्लभः भवति।

यः गजानां प्रभद्रादिजातिभेदं चिकित्सितं शिक्षां व्याधिं पोषणं च तालुजिह्वानखैर्गुणान् आरोहणं गतिं च वेत्ति सः गजरक्षणे योज्यः। तथाविधः हस्तिपकः हस्तिनां हृदयकारकः भवति। यः अश्वानां हृदयं जातिवर्णभ्रमैः गुणान् गतिं शिक्षां चिकित्सां सत्वं सारं रोगं हिताहितं पोषणं परिमाणं चलनं दन्तान् वयः वेत्ति तथा शूरः व्यूहवित् तथा प्राज्ञः भवति। सः अश्वाधिपतिः कार्यः। यः एभिः गुणैः संयुक्तः धुर्यान् युग्यान् रथस्य सारं गमनं भ्रमणं परिवर्तनं च वेत्ति, यश्च रथगत्या समापतत्सुशस्त्रास्त्रलक्ष्यसन्धाननाशकः तथा हयसंयोगगुप्तिवित् सः रथपः भवेत्। शूराः व्यूहविशारदाः वाजिगतिविदः प्राज्ञाः शस्त्रास्त्रैः युद्धकोविदाः सादिनः कार्याः। यः अश्वस्य चक्रितं रेचितं वल्गितकं धौरितम् आप्लुतम् शीघ्रगमनं मन्दं कुटिलं सर्पणं परिवर्तनं तथा आस्कन्दितम् इति एकादशगतीः वेत्ति तथा यथा बलं यथार्थञ्च शिक्षयेत् सः शिक्षकः भवेत्। यः वाजिसेवासु कुशलः घोटकपरिचर्या प्रभृतीनां नियोगवित् च दृढाङ्गः तथा शूरः सः वाजिसेवकः कार्यः।

ये नीतिशस्त्रास्त्रव्यूहादिनीतिविद्याविशारदाः अबालाः मध्यवयसः शूराः नियन्त्रिताः दृढाङ्गकाः स्वधर्मनिरताः नित्यं स्वामिभक्ताः रिपुद्विषः शूद्राः क्षत्रियाः वैश्याः सङ्करसम्भवाः वा म्लेच्छाः ते जयार्थिना राज्ञा सेनाधिपाश्च सैनिकाः कार्याः। पञ्चानाम् अथवा षण्णां पदगामिनाम् अधिपः पदातिगः योज्यः। त्रिशतां गौल्मिकः स्मृतः। शतानां शतानीकः तथा अनुशतिकः वरः सेनानी तथा लेखकः एते नियोक्तव्याः। इमे च शततं प्रति अधिपाः किन्तु साहसिकाः तथा च महान् अयुतिकः संयोज्यः।

यः सायं प्रातश्च सैनिकान् व्यूहाभ्यासं शिक्षयेत्। तथा सुयोद्धुं युद्धभूमिकां जानाति सः शतानीकः इत्युच्यते। यः तथाविधः शतानीकस्य साधकः युद्धसम्भारं तथा कार्ययोग्यं सैनिकं जानाति सः अनुशातिकः। यः कार्याणि तथा यामिकान् च निदेशयति सः सेनानिः। यश्च यामिकानां परिवृत्तिं करोति स च पदातिपतिः भवति। गुल्मपः यामिकानां स्वावधानं जानीयात् सः लेखकः। सैनिकाः कति सन्ति ? एतैश्च कति वेतनं प्राप्तम् ? के च प्राचीनाः ? के च कुत्र गताः? एतान् वेत्ति। किञ्च गजाश्वानां विंशतेः अधिपः नायकसंज्ञकः भवति। उक्तसंज्ञान् स्वस्वचिह्नैः लाञ्छितान्

नियोजयेत्। ये च अजाविगोमहिष्येण मृगाणां तद्वद्धिपुष्टिकुशलाः तद्वात्सल्यनिपीडिताः ते तदधिपाः। तथा गजानां तथा गजोष्ट्रादेः ये तथाविधाः तेऽपि तत्सेवकाः योज्याः। किञ्च तित्तिरादेः युद्धप्रवृत्तिकुशलाश्च पोषकाः शुकादेः सम्यक् पाठकाः तथा श्येनादेः पातबोधकाः नियोक्तव्याः। यतः ते जनाः सदा तत्तद् हृदयविज्ञानकुशलाः यश्च रत्नानां स्वर्णरजतमुद्राणाञ्च मानाकृतिप्रभावर्णजातिसाम्याच्च मौल्यवित् सः अधिपः। यस्तु दान्तः सः धनः व्यवहारविशारदः धनप्राणोऽतिकृपणः स एव हि कोपाध्यक्षः। यश्च देशभेदैः जातिभेदैः स्थूलसूक्ष्मबलाबलैः कौशेयादेः वस्त्रस्य मानमूल्यवेत्ता वस्त्रपः। यश्च कुटीकञ्चुकनेपथ्यमण्डपादेः परिक्रियां प्रमाणतः रञ्जनानि च सौचिकेन तथा शय्यादिसन्धानं वितानादेः वस्त्रादीनाञ्च नियोजनं वेत्ति सः खलु वितानाद्यधिपः प्रोक्तः।

यः धान्यानां जातिं तुलां मौल्यं सारं भोगं परिग्रहं सम्मार्जनं च विजानाति सः धान्यपः। धौताधौतविपाकज्ञः रससंयोगभेदवित् क्रियासु कुशलः तथा द्रव्यगुणवित् पाकनायकः भवति। यः पादपानां यथाकालं भूमिजलादिना फलपुष्पवृद्धिहेतुम् आरोपणं वपनं वा शोधनं कर्तुं तद्भेषजं संवेत्ति सः आरामाधिपतिः भवति।

यः सुशिल्पशास्त्रतः सम्यक् सुरम्यं यथा भवेत् तथा प्रासादं परिखां दुर्गं प्राकारं प्रतिमां यन्त्राणि सेतुबन्धं वापीं कूपं तडागकं तथा पुष्करिणीं कुण्डं जलाद्यूर्ध्वगतिक्रियां कर्तुं जानाति सैव गृहाद्यधिपतिः स्मृतः। यः तत्वतः राजकार्योपयोग्यान् पदार्थान् वेत्ति यथाकाले सञ्चिनोति सः सम्भाराधिपः उच्यते। यः सदा स्वधर्माचरणे दक्षः, देवताराधने रतः तथा निःस्पृहः सः देवतुष्टिपतिः कर्तव्यः। किञ्च यः दानशीलः निर्लोभः गुणज्ञः निरालसः दयालुः मृदुवाक् दानपत्रवित् विनयशीलः सन् याचकं विमुखं नैव करोति, न च सङ्ग्रहं करोति, सः नित्यम् एभिः गुणैः युक्तः दानाध्यक्षः प्रकीर्तितः। ये च सर्वासु व्यवहारविदः प्राज्ञाः वृत्तिशीलगुणान्विताः रिपौ मित्रे च समाः धर्मज्ञाः सत्यवादिनः निरालसाः जितक्रोधकामलोभाः प्रियंवदाः वृद्धाः तथा सभ्याः सभासदः कार्याः। यः सर्वभूतेषु आत्मतुल्यः निस्पृहः नित्यम् अतिथिपूजकः दानशीलश्च सैव सत्राधिपः स्मृतः। यः परोपकारनिरतः परमर्माप्रकाशकः निर्मत्सरः गुणग्राही तथा गुणज्ञाता भवेत् सः परीक्षकः भवति। यः प्रजा यथा नष्टा न भवेत् तथा दण्डविधायकः नातिक्रूरः नातिमृदुः सः साहसाधिपतिः कर्तव्यः। ग्रामपालकः चौरादिलुण्ठकेभ्यः तथा

अधिकारिगणात् मातृपितृवत् प्रजासंरक्षणे दक्षः भवेत्। मालाकारः इव यत्नेन वृक्षान् अत्यन्तं सम्पुष्य फलं पुष्पं विचिन्वति तथाविधः भागहारः भवेत्। यस्तु गणनाकुशलः देशभाषाप्रभेदवित् असन्दिग्धम् अगूढार्थं विलिखेत् सः च लेखकः। यस्तु शस्त्रास्त्रकुशलः दृढाङ्गः च निरालसः तथा प्रणम्रः यथायोग्यं समाहूयात् सः प्रतिहारकः भवेत्। विक्रयिणां यथा मूलधननाशः न हि भवेत् तथा शुल्कं हरति सः शौल्किकः उदाहृतः। यः सदा जपोपवासनियमकर्मध्यानरतः दान्तः क्षमी निष्कामः सः तपोनिष्ठः उच्यते। यः याचकेभ्यः अर्थं ददाति किन्तु भार्यापुत्रादिकं तु अपि यत्किञ्चित् न सङ्गृह्णाति सः दानशीलः उच्यते। ये श्रुतिस्मृतिपुराणानां पठनं पाठनं कर्तुं क्षमाः तथा अभ्यासशालिनः ते श्रुतिज्ञाः प्रकीर्तिताः। यः साहित्यशास्त्रेषु निपुणः संगीतज्ञः सुस्वरः तथा सर्गादिपञ्चकज्ञाता सः वै पौराणिकः स्मृतः। यः मीमांसातर्कवेदान्तशब्दशासनतत्परः ऊहवान् बोधितुं तथा तत्वतः बोधितुं शक्तः सः शास्त्रवित्। यः होरां संहिताञ्च गणितं तत्वतः वेत्ति, त्रिकालज्ञः भवेत् सः ज्योतिर्वित् विज्ञेयः। यः बीजानुपूर्व्या मन्त्राणां गुणान् दोषान् च वेत्ति तथा मन्त्रानुष्ठानसम्पन्नः सिद्धदैवतः सः मान्त्रिकः उच्यते। यः हेतुलिङ्गौषधीभिः व्याधीनां तत्वनिश्चयं साध्यासाध्यं विदित्वा उपक्रमते सः भिषक् स्मृतः। यः श्रुतिस्मृतीतरैः मन्त्रानुष्ठानैः देवतार्चनं हिततमं मत्वा कर्तुं यतते सः तान्त्रिकः भवति। ये सत्यवाचः सुभूषाः प्रियंवदाः सुकुलाः सुरूपाः नपुंसकाश्च सदा अन्तःपुरे नियोक्तव्याः। ये अनन्याः स्वामिभक्ताः धर्मनिष्ठाः दृढाङ्गकाः, अबालाः नाम शैशवातीताः मध्यवयसः सेवासु कुशलाः सर्वं यद्यत् कार्यजातं नीचं कर्तुं तत्परः सदा आज्ञापालकाः राज्ञा कार्याः। ये शत्रुप्रजाभृत्यवृत्तं विज्ञातुं कुशलाः तथा यथार्थश्रुतबोधकाः ते गूढचाराः कर्तव्याः। ये राज्ञः समीपप्राप्तानां प्रणतिस्थानविबोधकाः सुशिक्षकाः ते दण्डधराः वेत्रधराः वा कर्तव्याः। यः तन्त्रीकण्ठोत्थितान् सप्तस्वरान् स्थानविभागतः उत्पादयति स संयोगविभागिनः संवेत्ति, तथा अनुरागं सुस्वरं सतालं सनृत्यं वा सः गायकानामधिपः कीर्तितः। नृपेण आत्महिताय तथाविधा निर्लज्जा भावसंयुता शृङ्गाररसतत्त्वज्ञा सुन्दराङ्गी मनोरमा नवीना उत्तुङ्गकठिनकुचा सुस्मितदर्शिनी पुण्यस्त्री सन्धार्या। तथा ये च अन्ये साधकाः चित्तविरञ्जकाः सुभृत्याः तेऽपि संरक्षणीयाः। ये वैतालिकाः सुखवयः वेत्रदण्डधराः, शिल्पज्ञाः कलावन्तः तथा

सदा उपकारकाः। दुर्गुणा सूचकाः भाणाः नर्तकाः बहुरूपिणः आरामकृत्रिमवनकारिणः दुर्गकारिणः रक्षणीयाः। महानालिकयन्त्रस्थगोलैः लक्ष्यविभेदिनः लघुयन्त्राग्नेयचूर्णभाणगोलासिकारिणः। अनेकयन्त्रशस्त्रास्त्रधनुस्तूणादिकारकाः स्वर्णरत्नाद्यलङ्कारघटकाः रथकारिणः पाषाणघटकाः लौहकाराः धातुविलेपकाः कुम्भकाराः शौल्बिकाः, तक्षाणाः मार्गकारकाः रक्षणीयाः। क्षुरिणः रजकाः काष्ठहराः मलहारकाः वार्ताहराः सौचिकाः तथा राजचिह्नाग्रधारिणः रक्षणीयाः। ये व्यूहरचकाः भेरीपटह गोपुच्छशङ्खवेण्वादिनिस्वनैः यानव्यपयानादिबोधकाः। नाविकाः खनकाः व्याधाः किरातः भारिकाः अपि शत्रसम्मार्जनकराः जलधान्यप्रवाहकाः। आपणिकाः, गणिकाः, वाद्यजायाप्रजीविनः तन्तुवायाः शाकुनिकाः चित्रकाराः तथा चर्मकाराः। गृहसम्मार्जकाः, पात्रधान्यवस्त्रप्रमार्जकाः, शय्यावितानास्तरणकारकाः, शासकाः अपि आमोदास्वेदसद्धूपकाराः तथा ताम्बूलिकाः, हीनाल्पकर्मिणः, कार्यानुरूपतः एते योज्याः।

सत्यं तथा परोपकरणं पुण्यतमं प्रोक्तम्। नृपः आज्ञायुक्तान् भृतकान् सततं धारयेत्। हिंसा सर्वपापेभ्यः गरीयसी। तथा अनृतभाषणं गरीयस्तरम्। एताभ्यां युक्तान् भृत्यान् नृपः न धारयेत्। यदा यत् कर्तुं वा वक्तुम् उचितं तत् प्रबोधयन् सपदि तद्वक्ति च कुरुते। सः सद्भृत्यः सुपूज्यते। पश्चिमे यामे उत्थाय च गृहकृत्यं विचिन्त्य उत्सर्गं तु कृत्वा विष्णुं स्मृत्वा सार्धमुहूर्तकं यावत् प्रातः कृत्यं तु निर्वर्त्य स्वकार्यशालां गत्वा कार्याकार्यं विचिन्त्य अनन्तरं हि स्नायात्। द्वारे स्थितः द्वारपालः आज्ञया विना विशन्तं सम्यक् निरोधयेत्। तत्पश्चात् निदेशेन कार्यं विज्ञाप्य, पुनस्तेन आज्ञप्तस्सन् प्रविशन्तं जनं प्रमोचयेत्। दण्डधरः सभामध्ये आगतान् दृष्ट्वा क्रमात् राज्ञे तेषां प्रणामान् निवेद्य, पश्चात् तेषां स्थानानि सूचयेत्। ततः राजगृहं गत्वा आज्ञप्तः सन्निधिं गच्छेत्। प्रविश्य च नृपम् अपरं विष्णुरूपं यथान्यायं नत्वा सानुरागस्य चित्तज्ञस्य भर्तुः अर्द्धासने दृष्टिं कृत्वा अन्यत्र समन्ततः दृष्टिं न निक्षिपेत्। उपशिक्षितः दीप्तम् अग्निम् इव तथा क्रुद्धम् आशीविषमिव प्राणानां धनानाम् ईश्वरं, प्रभुम् आसीदेत्। नित्यं यत्नेन उपचरेत्। अहमस्मीति न चिन्तयेत्। तत्पक्षं समर्थयन् साधुभाषितं भाषेत। तत् नियोगेन वा सुपरिनिश्चितम् अर्थं ब्रूयात्। सुखप्रबन्धगोष्ठीषु वादिनां विवादे मतं विजानन्नपि भर्तुः उत्तरं क्षिप्त्वा वचः न ब्रूयात्। नृपाहूतः इति सदा अनुद्धतवेषः प्राञ्जलिः स्यात्।

तथा कृतनतिः वस्त्रान्तरितसम्मुखस्सन् आदौ स्वामिनः वाचं श्रुत्वा, तस्य निदेशं धारयित्वा, विनतो भूत्वा, स्वकर्माणि निवेदयेत्। तत्पार्श्वे वा सम्मुखे आसने नैव आसीत। उच्चैः प्रहसनं कासं लालनिःस्सारणं कुत्सनं जृम्भणञ्च गात्रभङ्गं पर्वास्फोटञ्च वर्जयेत्। राज्ञादिष्टन्तु यत् स्थानं मुदान्वितं तत्र तिष्ठेत्। प्रवीणोचितमेधावी अभिमानतां वर्जयेत्। हितान्वेषी अपृष्टोऽपि आपदि उन्मार्गगमने च कार्यकालात्ययेषु कल्याणभाषितं ब्रूयात्। प्रियं तथ्यञ्च पथ्यं धर्मार्थकं वचः वदेत्। समानवार्तया च सदा तत् हितं बोधयेत्। अन्येषां नृपाणां कीर्तिं नीतिफलं वा वदेत्। हे राजन् त्वं दाता, धार्मिकः, शूरः तथा नीतिमानसि। कदाचन ते मनसि अनीतिः न तु। ये ये अनीत्या भ्रष्ठाः तान् तदग्रे सदा कीर्तयेत्। सर्वेभ्यः नृपेभ्यः इति निश्चयेन अधिकः असि इति न विशेषयेत्। तथा देशकालज्ञः च देशे काले च परार्थं साधयेत्। यथा परार्थनाशनं न स्यात् तथा सदैव हि ब्रूयात्। तथा प्रजाकार्यमिषतः नृपं सदा न कर्षयेत्। पण्डितः क्षुधा परिगतः शुष्यन्नपि स्थाणुवत् आसीत। अनर्थसम्पन्नां वृत्तिं नत्वेव ईहेत।

यः यत्कार्ये नियुक्तः सः तत्कार्यतत्परः भूयात्। अन्याधिकारं न अन्विच्छेत् च केनचित् न अभ्यसूयेत्। कस्यापि जनस्य न्यूनं न लक्षयेत्। प्रत्युत आत्मशक्त्या पूरयीत। सदा परोपकारकरणात् अन्यत् मित्रकरं न स्यात्। ते कार्यं करिष्यामीति कार्यलम्बनं न कुर्यात्। समर्थश्चेत् द्राक् कुर्यात्। आशया दीर्घं न रक्षयेत्। भर्तुः गुह्यं कर्म मन्त्रञ्च न सम्यक् प्रकाशयेत्। विद्वेषञ्च विनाशं मनसापि न चिन्तयेत्। राजा परं मित्रः अस्तीति कामं न विचरेत्। तदर्थिभिः स्त्रीभिः तथा पापैः निराकृतैः वैरिभूतैः एकार्थचर्चां साहित्यं संसर्गञ्च विवर्जयेत्। किञ्च पृथिवीपतेः वेषभाषानुकरणं न कुर्यात्। तथा सम्पन्नोऽपि च मेधावी तद्गुणैः न स्पर्द्धेत। कुशलकर्मवित् भर्तुः रागापरागौ तथा इङ्गिताकारचेष्टाभ्यः तदभिप्रायतां जानीयात्। विरक्तं नृपतिं त्यजेत्। रक्ते तु वृत्तिं कारयेत्। तथा विरक्तः विनाशं विपक्षाभ्युदयं च कारयेत्।

यः नृपः आशावर्धनकं कृत्वा फलनाशं करोति। अकोपोऽपि सकोपाभः प्रसन्नोऽपि च निष्फलः समदं वाक्यं वक्ति च वृत्तिच्छेदं करोति। गुणसङ्कीर्तने कृतेऽपि विमुख एव लक्ष्यते। अन्यत्र च क्रियमाणे कर्मणि दृष्टिं क्षिपति, एतत् विरक्तलक्षणम्। रक्तस्य लक्षणं ब्रुवे, दृष्ट्वा प्रसन्नः भवति चादरात् वाक्यं गृह्णाति कुशलादिपरिप्रश्नी आसनं प्रदापयति। अस्य विविक्तदर्शनं रहसि एनं न शङ्कते। तस्य च तत्कथां श्रुत्वा,

हृष्टवदनः ज्ञायेत। तद्युक्तानि अप्रियाण्यपि अन्यानि अभिमन्यते च उपायनं तथा स्तोकसम्पादनैः कथान्तरेषु प्रहृष्टवदनः स्मरति रक्तस्य इति लक्ष्यं तस्य सेवनं कर्तव्यम्। तेन राज्ञा दत्तवस्त्रभूषादिचिह्नं सदा सन्धारयेत्। तथा स्वाधिकारकार्ये न्यूनाधिक्यं नित्यं निवेदयेत्। तदर्थं वा तत्कृतां वार्तां श्रुणुयाच्च कीर्तयेत्। चारसूचकदोषेण तु नृपः यत् अन्यथा वदेत् मौनमाश्रित्य तत् श्रुणुयात्। किन्तु तथ्यवत् न अनुमोदयेत्। आपद्गतं सुभर्तारं कदापि न परित्यजेत्। यस्य अन्नम् एकवारमपि आदरेण अशितं तदिष्टं नित्यं चिन्तयेत्। पालकस्य अञ्जसा सर्वं कार्यं सिद्ध्यति। काले च अत्यन्तसेवनात् अप्रधानः प्रधानः स्यात्। यतः सेवालस्यादिना प्रधानेऽपि अप्रधानः स्यात्। नित्यं संसेवनरतः भृत्यः राज्ञः प्रियो भवति। यद् भृत्यः झटिति स्वस्वाधिकारकार्यं कुर्यात् यतः सुमनाः भवन्ति। सहसा कार्यं न कुर्यात्। राजापि नीचं कार्यं नोदिशेत्। राज्ञः तत्कार्यकारकाभावे सदैव हि कार्यम्। काले यत्कर्तुम् उचितं नीचमप्युत्तमोऽर्हति। यस्मिन् राजा प्रीतः भवेत् तत् अनिष्टं न चिन्तयेत्। कदाचन स्वाधिकारगौरवं न तु दर्शयेत्। राज्ञा अधिकृताः सन्तः स्वस्वाधिकारगुप्तये परस्परं न अभ्यसूयुः। तथा कदापि भेदं न प्राप्नुयुः। यत्र अधिकारिगणः राजा च द्वौ सद्वृत्तौ तिष्ठतः, तस्मिन् राज्ये लक्ष्मीः स्थिरा विपुला सम्मुखी भवेत्। अन्याधिकारवृत्तं तु श्रुतमपि न ब्रूयात्। उत राजापि कदाचन अन्यमुखतः न श्रुणुयात्। ये अधिकारिणः हितम् अहितं न बोधयन्ति ते तु दास्यरूपम् उपाश्रिताः प्रच्छन्नवैरिणः स्यात्। यश्च राजा मन्त्रिमुखात् हिताहितं न श्रुणोति सः राजरूपेण प्रजानां धनहारकः दस्युः भवति। ये मन्त्रिणः राजपुत्रैः सुपृष्टव्यवहाराः तैः साकं विरुध्यन्ति। ते तु प्रच्छन्नतस्कराः। राजपुत्राः बालाः अपि मन्त्रिभिः न अवमान्याः। सदा सुबहुवचनैः ते प्रयत्नतः सम्बोध्याः। क्वचित् तेषाम् असदाचरितं राज्ञे न दर्शयेत्। स्त्रीपुत्रमोहः बलवान्। तयोः निन्दा न श्रेयसे। राज्ञः अग्रतः अवश्यतरं निश्चितं प्राणसंशयितं यत्कार्यं तत् निश्चितं करिष्ये इति विज्ञाप्य, शीघ्रमेव स्वशक्तितः कर्तुं प्रयतेत। भृत्यः कुटुम्बपुष्ट्यर्थं महत्कार्ये नृपाय प्राणानपि सन्दद्यात्। अन्यथा तु न कदाचनार्पयेत्। सर्वे भृत्याः युक्त्या धनहराः। नृपोऽपि प्राणहरः। युद्धादौ सुमहत्कार्ये नृपः भृत्या प्राणान् हरेत्। अन्यथा न भृत्यः भृतिरूपेण राजधनं हरेत्। अन्यथा तौ हरतः स्वनाशकौ भवतः। राजा तु सदा मान्यः। युवराजस्तु तन्यूनम्। अमात्यनवकं तन्यूनाः मान्याः। तन्यूनाधिकृतो गणः

आयुतिकः मन्त्रितुल्यः मान्यः, तथा साहसिकः मन्त्रिन्यूनः मान्यः ज्ञेयः। राजसमं न क्रीडयेत्। क्रीडिते तं विशेषयेत्। राजपत्नी कन्या च मन्त्रिभिः न अवमान्यः। राजसम्बन्धिनः सुहृदश्च यथार्हतः पूज्याः। नृपाहूतः महत् कार्यशतमपि त्यक्त्वा तुरं गच्छेत्। सुमन्त्रितं राजकार्यं मित्रायापि न वक्तव्यम्। भृतिं विना राजद्रव्यं न अभिलाषयेत्। राजाज्ञया विना कार्यमाध्यस्थिकीं भृतिं न इच्छेत्। तथा द्रव्यलोभात् यस्य कस्यचित् सत्कार्यं न निहन्यात्। काले स्वस्त्रीपुत्रधनप्राणैः नृपं संरक्षयेत्। उत्कोचं नैव गृह्णीयात्। नृपम् अन्यथा न बोधयेत्। अन्यथा दण्डदातारं नित्यं प्रबलदण्डकं भूपालं निगृह्य, राजगुप्तये एकान्ते सम्यक् बोधयेत्। यत् राज्ञः हितञ्च लोकानामहितं तत् न कारयेत्। नवीनकरशुल्काद्यैः लोकः ततः विरज्यते। कुलभूतः यदि गुणनीतिबलद्वेषी अधार्मिकः भवेत्, राष्ट्रविनाशकं तं तु त्यजेत्। पुरोहितः प्रकृतीनाम् अनुमतिं कृत्वा गुणयुक्तं तस्य कुलजं तत्पदे राज्यगुप्तये स्थापयेत्। सास्त्रः नृपात् दूरम् अस्त्रपातात् बहिः सदा तिष्ठेत्। सशस्त्रः दशहस्तं तु दूरम्। नृपप्रियाः मन्त्रिणः, लेखकाः यथादिष्टं सदा पञ्चहस्तं दूरं वै वसेयुः। राजा तु सेनाध्यक्षैः विना सशस्त्रास्त्रः सन्नपि सभां नैव विशेत्। पुरोहितः श्रेष्ठतरः सेनापतिः श्रेष्ठः स्मृतः। सुहृच्च सम्बन्धी च समः। मन्त्रिणस्तु उत्तमाः स्मृताः। अधिकारिगणः मध्यमः दर्शकलेखकौ अधमौ। भृत्यः परिचारकगणः सदा अधमतमः। परिचारगणात् नीचसाधकाः न्यूनः विज्ञेयः। असौ राजा पुरोहितादीनां क्रमात् पुरोगमनम् उत्थानञ्च स्वासने सन्निवेशनं कुशलप्रश्नं तथा सुस्मितदर्शनम् अन्येषां सभास्थश्च निरालसः स्नेहदर्शनं कुर्यात्।

नृपः त्रिविधः स्यात्। विद्यावत्सु शरच्चन्द्र इव, द्विषत्सु निदाघार्कः, तथा प्रजासु वसन्तार्कः। नृपः यदि ब्राह्मणभिन्नेषु मृदुत्वं धारयेत् तदा नीचाः हस्तिपकाः गजं यथा तं परिभवन्ति। भृत्याद्यैः क्रीडनं परिहासाश्च न कर्तव्याः। राज्ञः ते अपमानास्पदे नित्यं भयावहे। यतः ते भृत्याः स्वार्थपराः, स्वार्थसिद्ध्यै स्वकार्यं गुणवत्कृत्वा नृपाय पृथक् पृथक् व्यापयन्ति। नृपे यः परिहासक्षमाक्रीडोद्भवाः एते दोषाः तादृशाः भृत्याः तद्वचः विकल्पन्ते। अवमन्यन्ति च लङ्घयन्ति। तथा राज्यभोज्यानि भुञ्जन्ति। स्वके पदे न तिष्ठन्ति। किञ्च तन्मन्त्रं विश्रंसयन्ति च दुष्कृतं विवृण्वन्ति। राजकीयपरिधानं परिधारयन्ति। किं बहुना ? सदा नृपं वञ्चयन्ति। अपि च तस्य

नृपस्य स्त्रियं सज्जयन्ति। राज्ञि कृद्धे च हसन्ति। निर्लज्जाः सन्तः व्याहरन्ति। क्षणात् नृपं हेलयन्ति। आज्ञामुल्लङ्घयन्ति। तथा अकर्मणि कृतेऽपि भयं न यान्ति।

राजसेवकः क्वचित् नृपलेखाद्विना कार्यं न कुर्यात्। नृपो वा लेखनेन विना अल्पं वा महत्कार्यं न आज्ञापयेत्। भ्रान्तेः पुरुषधर्मत्वात् लेख्यं परमनिर्णायकम्। यः अलेख्यं लेख्यं विना आज्ञापयति, यश्च यत् अलेख्यं लेख्यं राजकृत्यं करोति। तौ उभौ भृत्यनृपती सदा चौरौ विज्ञेयौ। राजमुद्राङ्कितं तत् लेख्यमेव राजा भवति। लिखितादेशं विना राजा राजा न भवति। यद् लेख्यं समुद्रं राज्ञा लिखितं तच्चोत्तमोत्तमम्। राजलिखितम् उत्तमम्। मन्त्र्यादिभिः कृतं मध्यमम्। पौरलेख्यं कनिष्ठं स्यात्। सर्वं संसाधनक्षमम्। यस्मिन् यस्मिन् इति निश्चयेन कृत्ये यः यः सामात्ययुवराजादिः नरः राज्ञा अधिकृतः सः सः यथानुक्रमतश्च दैनिकं मासिकं वार्षिकं बहुवार्षिकं वा वृत्तं तत्कार्यजातलेख्यं तु राज्ञे सम्यक् निवेदयेत्। राजादिभिः मुद्रितस्य लेख्यस्य स्मृतिपत्रकं धारयेत्। यतः समये अतीते सति नृणां विस्मरणं वा भ्रान्तिः सञ्जायते। पुरा ब्रह्मणा अनुभूतस्य स्मृत्यर्थं यत्नात् वाचां वर्णस्वरविचिह्नितं लिखितं निर्मितम्। लेख्यं द्विधा भवति। वृत्तलेख्यं तथा आयव्ययलेख्यम्। तदुभयं व्यवहारक्रियाभेदात् बहुतां गतम्। यथोपन्यस्तसाध्यार्थसंयुक्तं सुत्तरक्रियं च सावधारणकं जयपत्रकम् उच्यते। येन सामन्तेषु अथवा राष्ट्रपालादिकेषु भृत्येषु यत्कार्यम् आदिश्यते तत् आज्ञापत्रम् उच्यते। येन ऋत्विक् पुरोहिताचार्येषु अन्येषु अभ्यर्चितेषु कार्यं निवेद्यते तत् प्रज्ञापनाय पत्रमुच्यते। सर्वे मम आज्ञया निश्चितं कर्तव्यं श्रुणुत। स्वहस्तकालसम्पन्नं तदेव शासनं पत्रम्। राजा सेवाशौर्यादिभिः तुष्टः यस्य लिखितेन देशाधिकं प्रयच्छति तत हि प्रसादलिखितम्। भोगपत्रं करदीकृतञ्च उपायनीकृतं पुरुषावधिकं वा कालावधिकम्। ये च भ्रात्राद्याः स्वरुच्या परस्परं तु विभक्ताः विभागपत्रं कुर्वन्ति तत् भागलेख्यम् उच्यते। गृहभूम्याधिकं च दत्वा यत् अनुच्छेद्यम् अनाहार्यं प्रकाशकं पत्रं कुर्यात् तत् दानलेख्यमुच्यते। तुल्यमूल्यप्रमाणयुक् गृहक्षेत्रादिकं क्रीत्वा यत्तु पत्रं कारयते तत् क्रयपत्रम् उच्यते। जङ्गमस्थावरं बन्धं कृत्वा यत् गोप्यभोग्यक्रियायुक्तं लेख्यं करोति तत् सादिलेख्यम् उच्यते। ग्रामः देशः परस्परं राजा विरोधिधर्मार्थं यत् सत्यलेख्यं कुर्यात् तत् संवित्पत्रम्

उच्यते। वृद्ध्यै धनं गृहीत्वा तु सुसाक्षिमत् यत् लेख्यं कृतं कारितं वा तत् मनीषिभिः ऋणलेख्यं प्रोक्तम्। अभिशापे समुत्तीर्णे प्रायश्चित्ते कृते यत् साक्षिमत् लेख्यं दत्तं, तत् बुधैः शुद्धिपत्रम् उच्यते। साधकाः स्वधनांशान् व्यवहाराय मेलयित्वा यत् लेख्यपत्रं कुर्वन्ति तत् सामयिकं लेख्यं स्मृतम्। सभ्याधिकारिप्रकृति सभासद्भिः यत् न कृतं तत् पत्रं चेत् यदि वादिभिः मान्यं भवति, तत् सम्मतिसंज्ञकं ज्ञेयम्। स्वकीयवृत्तज्ञानार्थं श्रीमङ्गलपदाढ्यं वा सपूर्वोत्तरपक्षकम् असन्दिग्धम् अगूढार्थं सदा स्पष्टाक्षरपदम् अन्यव्यावर्तकस्वात्मपरपित्रादिनामयुक् एकद्विबहुवचनैः यथार्हस्तुतिसंयुतं समामसर्द्धाहनीमजात्यादिचिह्नितं कार्यबोधि सुसम्बन्धं नत्याशीर्वादपूर्वकं स्वाम्यसेवकसेव्यार्थं यत् परस्परं लिख्यते तत्तु क्षेमपत्रं स्मृतम्। एभिरेव गुणैः युक्तं स्वाधर्षकं यत् तत् भाषापत्रम् अथवा वेदनार्थकं तत्पत्रं तु ज्ञेयम्। समासात् लक्षणान्वितं वृत्तलेख्यं प्रदर्शितञ्च अन्यत् शेषम् आयव्ययबोधकं समासात् कथ्यते। वत्सरे वत्सरे मासि मासि वापि दिने दिने यत् हिरण्यपशुधान्यादि स्वाधीनं तत्तु आयसंज्ञम्। यच्च पराधीनं कृतं तत् धनं व्ययसंज्ञकं भवति। आयः साद्यस्कः प्राचीनश्च आयः सञ्चतसंज्ञकः। व्ययश्च द्विधा उपभुक्तः तथा विनिमयात्मकः भवति। सञ्चितं त्रिविधं मतम्। निश्चितान्यस्वामिकं च अनिश्चितस्वामिकं तथा स्वस्वत्वनिश्चितम्। निश्चितान्यस्वामिकं यद्धनं तत्तु हि त्रिविधम्। औपनिध्यम्, याचितकम् औत्तमर्णिकञ्च। विश्रम्भात् सद्भिः यद्धनं निहितं तत् हि औपनिधिकम्। यच्च अवृद्धिकं गृहीतान्यलङ्कारादि तत् याचितम्। सवृद्धिकं यदृणं गृहीतं तच्च औत्तमर्णिकम्। मार्गादौ यत् निध्यादिकं प्राप्तं तत् अज्ञातस्वामिकम्। स्वस्वत्वविनिश्चितं धनं द्विधा भवति। साहजिकम् अधिकञ्च। दिने मासि वत्सरे वा दायात् स्ववृत्तितः यः नियतः आयः उत्पद्यते सैव साहजिकः। यत्तु दायः परिग्रहः तत् प्रकृष्टं स्वभावजं साहजिकम्। यत् मौल्याधिक्यं कुसीदञ्च याजनादिभिः गृहीतं पारितोष्यं भृति प्राप्तं तथा विजितं यत् धनं तत् स्वस्वत्वे अधिकसंज्ञं तत् अन्यत् साहजिकं स्मृतम्। स्वाधीनं सञ्चितं सर्वं धनं द्वेधा प्रकीर्तितम्। पूर्ववत्सरं शेषं वर्तमानाब्दसम्भवञ्च। अधिकं साहजिकं पार्थिवेतरभेदतः द्वेधा। तत्र भूमिभागसमुद्भूतः आयः पार्थिवः उच्यते। सः पार्थिवः आयः देवकृत्रिमजलैः देशग्रामपुरैः पृथक् भूमिभागतः बहुमध्याल्पफलतः भिद्यते। शुल्कैः दण्डैः खनिजैः करैः भाटकैः

उपायनादिभिः आयः तज्ज्ञैः धनागमज्ञानविद्भिः लेखविशारदैः इतरः कथितः। आयः यन्निमित्तः भवेत् व्ययस्तन्नामपूर्वकः व्ययश्च। एवं व्याप्यव्यापकसंयुक्तः समुद्दिष्टः। व्ययश्च द्विधा भवति। पुनरावर्तकः, स्वत्वनिवर्तकः। यत् निध्युपनिधीकृतः विनिमयीकृतः वृद्धिसहितः वृद्धिरहितः इति द्वेधा। आधवर्णिकश्च आवृतः स्मृतः। भूमौ विनिहितः निधिः अन्यस्मिन् स्थितः उपनिधिः दत्तमूल्यादिसम्प्राप्तः सैव विनिमयीकृतः। यश्च वृद्ध्या अवृद्ध्या च दत्तः स वै अधमर्णिकः स्यात्। सवृद्धिकं यत् दत्तं तद् ऋणम् अवृद्धिकं तु याचितं भवति।

स्वत्वनिवर्तकस्तु द्विधा। ऐहिकः, पारलौकिकः। तत्र प्रतिदानं पारितोष्यं वेतनं भोग्यञ्चेति चतुर्विधः ऐहिकः । तथा पारलौकिकः अनन्तभेदभाक् भवति। पुनरावर्तकः व्ययः नित्यं शेषं संयोजयेत्। यच्च मूल्यत्वेन दत्तं तत्प्रतिदानं स्मृतम्। सेवाशौर्यादिसन्तुष्टैः यद्दत्तं तत्पारितोषिकम्। भृतिरूपेण यत् सन्दत्तं तत् वेतनं प्रकीर्तितम्। धान्यवस्त्रगृहारामगोगजादिरथार्थकं विद्याराज्याद्यर्जनार्थं तथैव च धनाद्यर्थं रक्षणार्थं व्ययीकृतं तत् उपभोग्यमुच्यते। सुवर्णरत्नरजतनिष्कशालाश्च तथैव पृथक् पृथक् रथाश्वगोगजोष्ट्राजावीनशालाः वाद्यशस्त्रास्त्रवस्त्राणां धान्यसम्भारयोः तथा मन्त्रिशिल्पनाद्यवैद्यमृगाणां पाकपक्षिणां शालाः भोग्ये निविष्टाः तद् व्ययः भोग्य उच्यते। पारलौकिकः जपहोमार्चनैः दानैः चतुर्धा भवति। उभौ च विशेषायव्ययौ पुनर्यातश्च निवृत्तः द्वौ तु व्ययायौ पृथक् द्विधा आवर्तकश्च पुनः निवर्ती। लेखकः आवर्तकविहीनौ तु व्ययायौ लिखेत्। क्रयाधमर्णघटनान्यस्थलाप्तः निवर्तकः स्वयं द्रव्यं लिखित्वा दद्यात्। गृहीत्वा विलिखेत्। एवम् आयव्ययविलेखकः न क्षीयते। अपि तु वर्धते। शेषम् आयाः व्ययाश्च पृथक् पृथक् हेतुप्रमाणसम्बन्धकार्याङ्गव्याप्यव्यापकैः मानेन सङ्ख्यया उन्मानेन परिमाणकैः बहुधा भिन्नाः। क्वचित् तद्विदां व्यवहाराय संख्या क्वचित् मानं, क्वचित् उन्मानं, क्वचित् परिमाणं, क्वचिच्च समाहारः इष्टः। अङ्गुल्याद्यं मानं स्मृतम्। तुला तु उन्मानं स्मृता। पात्रमानं परिमाणम्। एकद्वित्रिप्रभृति संख्या इति स्मृता। यत्र यादृक् व्यवहारः तत्र तादृक् प्रकल्पयेत्। व्यवहारार्थं मुद्रितं रजतस्वर्णताम्रादिव्यवहार्यम्। वराटाद्यं रत्नान्तं द्रव्यम् ईरितम्। सपशुधान्यवस्त्रादितृणान्तं धनसंज्ञिकम्। पुनः व्यवहारे अधिकृतं स्वर्णाद्यं मूल्यतां लभेत। भुवि कारणादिसमायोगात्

येन व्ययेन पदार्थः संसिद्धः तद् व्ययस्तु तस्य मूल्यकम्। पदार्थानां सुलभासुलभत्वात् तथा अगुणत्वगुणसंश्रयैः अर्थं यथा कामात् हीनाधिकं च भवेत्। क्वचित् मणिधातूनां हीनं मूल्यं न प्रकल्पयेत्। पुनः मणिसुवर्णरजतादीनां मूल्यहानिः इति निश्चयेन राजदौष्ट्येन जायते। व्याप्यव्यापकानां लेखने दीर्घे चतुर्भागभूतपात्रे तृतीयांशव्यापिनी च अर्द्धांशव्यापिनी वा पादपाः अभ्यन्तरगता वक्रत्वेन विन्यस्ता पदसंज्ञिका आवलिः कार्या। तासु वामतः तृतीयांशव्यापिनी अभ्यन्तरगा श्रेष्ठा भवति। दक्षिणभागे तृतीयांशव्यापिनी तत्पश्चात् अर्द्धभागगामिनी पदावलिः ततः न्यूना चतुर्थांशे व्यापिनी ततः न्यूना स्वभ्यन्तरे सदृशे पदे स्वभेदाः सदृशाः स्युः। किञ्च पत्रे सदैव स्वारम्भपूर्तिसदृशे इति निश्चयः। राजा लेख्यं दृष्ट्वा विचार्य च लेखानुपूर्वं यथाभिलषितं तथा स्वस्य लेख्यचिह्नं कुर्यात्। मन्त्री विधिवेत्ता पण्डितः दूतसंज्ञकश्च एते इति निश्चयेन प्रथमं स्वाविरुद्धमिदं लेख्यं लिखेयुः। अयम् अमात्यः एतत् साधुलिखनमस्तीति प्राक् लिखेत्। ततः सुमन्त्रः सम्यक् विचारितमिति विलिखेत्। प्रधानश्च यथार्थं सत्यं स्वयं लिखेत्। ततः प्रतिनिधिः अङ्गीकर्तुं योग्यम् इति लिखेत्। युवराजश्च अङ्गीकर्तव्यम् इति स्वयं लिखेत्। ततः पुरोहितः एतत् लेख्यं स्वाभिमतम् इति विलिखेत्। लेख्यान्ते स्वस्वमुद्राचिह्नितं कुर्युः। ततः राजा अङ्गीकृतमिति लिखेत् पुनः मुद्राङ्कनं कुर्यात्। युवराजादिभिः कार्यान्तरस्य आकुलत्वात् सम्यक् द्रष्टुं न शक्यते। तत् अनेन च दर्शितं लेख्यम्। ततः सर्वे मन्त्रिगणाः समुद्रं वै विलिखेयुः। सम्यक् दर्शनाक्षमः राजा शीघ्रं दृष्टमिति लिखेत्। आदौ सम्यक् आयं पश्चात् व्ययं लिखेत्। वामे पत्रांशे वा आयं दक्षिणभागे च व्ययं लिखेत्। यत्र उभौ प्यापकव्याप्यौ वा आधाराधेयरूपौ तत् क्रमात् वामोर्ध्वभागगौ कार्यौ। तत् हि गणितं कालार्थं भवति। तत्र व्यापकं क्रमात् वामतः अधोऽधश्च लिखेत्। व्याप्यानाञ्च मूल्यमानादि तत् पङ्क्त्यां विनिवेशयेत्। यत्र उभौ व्यापकव्याप्यौ व्यापकत्वेन संस्थितौ, तत्र ऊर्ध्वगानं गणितम् अधः पङ्क्त्यां प्रजायते। बहुवृत्तित्वं व्यापकं न्यूनवृत्तित्वं व्याप्यं स्यात्। अवयवाः व्याप्याः प्रोक्ताः। अवयवी व्यापकश्च स्मृतः। सजातीनां लिखनं च समुदायतः कुर्यात्। आद्यन्तसमुदायतः यथाप्राप्तं लिखनं कुर्यात्। यत्र पदार्थाः व्यापकाः स्थलानि सन्ति तत्र सर्वदा आयव्ययं कालेन कुर्यात्। एषा स्थानटिप्पणिका ततः अन्यत् सङ्घटिप्पणम्। तत्र लेख्यभाषितं

व्यापकं विशिष्टसंज्ञितम्। आयाः कति, व्ययाश्च कति कस्य द्रव्यस्य शेषमस्ति, विशिष्टसंज्ञकैः एषां सविज्ञानं प्रजायते। आदौ यथा प्राप्तं पश्चात् तत् गणितं लिखेत्। टिप्पणैः यथा द्रव्यं च स्थानम् अधिकसंज्ञं च भवेत्। शेषायव्ययविज्ञानं क्रमात् लेख्यैः प्रजायते। व्यापकं स्थलाय व्ययविज्ञानं स्थलतो भवेत्। स्थलानि पदार्थस्य पदार्थाश्च स्थलस्य व्याप्याः स्युः। तिथ्यादयश्चापि नृणां लेखने यथेष्टाः । निश्चितान्यस्वामिकाद्याः ये आयाः ये च इतरान्तगाः ये च विशिष्टसंज्ञकाः पुनरावर्तकादयः व्ययाः ते परलेखान्ताः अन्तिमव्यापकाश्चेति । आदौ प्रमाणफलम् इच्छया ताडितं कृत्वा प्रमाणभक्तं तल्लब्धं नृणाम् इच्छाफलं भवेत् । समासतः सर्वेषां स्मृतिसाधनं लेख्यम् उक्तम्। गुञ्जामाषः कर्षः पदार्द्धः प्रस्थ एव । एते यथोत्तराः दशगुणाः । यथा पञ्चप्रस्थस्य आढकाः । ततश्चाष्टाढकः अकर्मणः प्रोक्तः । ते तु विंशतिः खारिका स्यात् । देशे देशे प्रमाणकं स्यात्। पञ्चाङ्गुलावटं चतुरङ्गुलविस्तृतं यत् पात्रं बुधैः सदा परिमाणे प्रस्थपादं तत्तु ज्ञेयम् । ऊर्ध्वाङ्कश्च यथासंज्ञः तदधः स्थाः वामगाः क्रमात् स्वदशगुणिताः परार्द्धान्ताः प्रकीर्तिताः । कालस्य दुर्गमात् संख्यासंज्ञात् कर्तुं न शक्यते । तथाहि मनीषिभिः ब्रह्मणो द्विपरार्द्धम् आयुः उक्तम् । एकः दशशतं सहस्रम् अयुतं नियुतं प्रयुतं कोटिः अर्बुदम् अब्जं खर्वः निखर्वः पद्मं शङ्खः अब्धिः मध्यम् अन्तः इति संख्या संज्ञकाः ।

कालमानं त्रिधा ज्ञेयम् - चान्द्रं, सौरं, सावनं च । भूतिदाने सदा सौरम् कौसीदवृद्धिषु नित्यं चान्द्रम् दिनभृत्ये अवधौ सदा सावनं कल्पयेत् । कार्यमाना कालमाना कार्यकालमितिः त्रिधा भृतिः तद्विज्ञैः उक्ता । यथा भाषिता सा देया । त्वया तत्र अयं भारः संस्थाप्य,एतावती भृतिं दास्यामि तन्निदेशकैः सा भृतिः कार्यमाना कीर्तिता । वत्सरे वत्सरे मासि मासि वा दिने दिने एतावतीं ते भृतिं दास्यामि इति कालिकेति ज्ञेयम् । त्वया एतावता कालेन इदं कार्यं कृतं तदा एतावतीं भृतिं दास्ये, सा च कार्यकालमिता । भृतिलेपं तथा भृतिविलम्बनं तु न कुर्यात् । अवश्यपोष्य भरणा भृतिः मध्या । परिपोष्याभृतिः श्रेष्ठा । अन्नाच्छादनार्थिका समा प्रकीर्तिता। किञ्च यया एकस्य भरणं भवेत् सा हीनसंज्ञका । भृतकस्तु यथा यथागुणवान् तथा तस्य भृतिः नृपेण आत्महिताय वै प्रयत्नेन संयोज्या । अवश्यपोष्यवर्गस्य भरणं यथा

भृतकाद् भवेत् तद्योग्यभृतकाय तथा भृतिस्तु वै संयोज्या । ये भृत्याः हीनभृतिकाः ते स्वयं कृताः शत्रवः, ते तु परस्य साधकाः छिद्रकोशप्रजाहराः भवन्ति । शूद्रादिषु अन्नाच्छादनमात्राभृतिः स्मृता । अन्यथा मांसभोजिषु पोषकः तत्पापभाक् स्यात् । ब्राह्मणेन यत् धनम् अपहृतं तत् परलोकदं,यत् शूद्राय दत्तमपि केवलं नरकायैव भवति । भृत्यः त्रिविधः उच्यते । मन्दः,मध्यः तथा शीघ्रः । तेषां भृतिश्च समा,मध्या तथा श्रेष्ठा क्रमात् स्मृता । भृत्यानां गृहकृत्यार्थं दिवा यामं निशि यामत्रयं नित्यं समुत्सृजेत् । दिनभृत्ये अर्द्धयामकम् । नृपः उत्सवाद्यैः विना तेभ्यः कार्यं कारयीत उत्सवेऽपि श्राद्धदिनं हित्वा सदा कारयीत । भृत्ये तु आर्ते पादहीनां भृतिं दद्यात् । ततः त्रैमासिकीं पञ्चवत्सरभृत्ये तु यथा तथा न्यूनाधिक्यम् । दीर्घार्त्ते तु षाण्मासिकी भृतिः , तदूर्ध्वं न च कल्पयेत्, किञ्च पक्षार्द्धम् आर्तस्य अल्पापि भृतिः नैव दातव्या। संवत्सरोषितस्यापि प्रतिनिधिः ग्राह्यः । ततः सुगुणिनं सदा अर्द्धम् भृतिः कल्पयेत् । नृपः सेवां विना भृत्याय वत्सरे पक्षं दद्यात् । येन सेवया चत्वारिंशत् समानीता, नृपः ततः सेवां विना सदा तस्मै भृत्यर्द्धं कल्पयेत् । यावज्जीवम् अक्षमे तत्सुते तु बाले वा सुशीलायां भार्यायां वा कन्यायां स्वश्रेयसे तदर्द्धकम् । वत्सरे भृत्याय अष्टमांशं पारितोष्यं दद्यात् किञ्च शीघ्रमधिकं कार्यं कृतं तदा कार्यस्य अष्टमांशं वा दद्यात् ।

यः स्वामिकार्ये विनष्टः तत्पुत्रे यावत् बालः तद्भृतिं वहेत् । अन्यथा पुत्रगुणान् दृष्ट्वा भृतिं वहेत् । भृत्यस्य भृतेः षष्ठांशं वा चतुर्थांशं पालयेत् । द्वित्रिवर्षे भृत्याय तदर्द्धं वा अखिलं दद्यात् । स्वामी वाक्पारुष्यात् न्यून भृत्या प्रबलदण्डतः अपमानतः भृत्यं नित्यं शत्रुत्वं प्रशिक्षयेत् । ये भृतिदानेन सन्तुष्टाः मानेन परिवर्धिताः मृदुवाचा सान्त्विताः ते हि अधिपं न त्यजन्ति । अधमाः धनम् इच्छन्ति, तु मध्यमाः धनमानौ, उत्तमास्तु मानमिच्छन्ति । यस्मात् कारणात् मानः महतां धनम् । नृपः यथागुणान् स्वभृत्यान् च प्रजाः संरञ्जयेत् । तथा च कांचित्शाखाप्रदानतः अपरान् फलदानतः अन्यान् स्वचक्षुषा हास्यैः तथा कोमलया गिरा सुभोजनैः सुवसनैः ताम्बुलैः तथा धनैरपि कांश्चित् कुशलप्रश्नैः अधिकारप्रदानतः वाहनानां प्रदानेन योग्याभरणदानतः छत्रातपत्रचमरदीपिकानां प्रदानतः क्षमया प्रणिपातेन मनेन च अभिगमेन सत्कारेण ज्ञानेन हि आदरेण च शमेन प्रेम्णा समीपवासेन स्वार्द्धासनप्रदानतः सम्पूर्णासनदानेन

स्तुत्या उपकारकीर्तनात् सर्वान् यथायोग्यान् रञ्जयेत् । ये यत्कार्ये विनियुक्ताः तान् दूरात् प्रविज्ञानाय लोहजैः ताम्रजैः रीतिभवैः रजतसम्भवैः सौवर्णैः वा यथायोग्यैः स्वलाञ्छनैः वस्त्रैश्च मुकुटैरपि कार्याङ्कैः अङ्कयेत् । नृपः भृत्यान् वाद्यवाहनभेदैश्च पृथक् पृथक् कुर्यात् । स्वविशिष्टं यत् चिह्नं कस्यचित् न दद्यात् । पुरोहितप्रभृतयः ये जनाः दशप्रधानपुरुषाः प्रोक्ताः ते सर्वे एव ब्राह्मणाः । अभावे क्षत्रियाः, तद्भावे ऊरुजाः नियोक्तव्याः । राजभिः सुदक्षाः अपि शूद्राः नैव नियोक्तव्याः । क्षत्रियस्तु भावग्राही साहसाधिपतिश्च सः ब्राह्मणः ग्रामपः तथा कायस्थः लेखकः योज्यः । वैश्यः शुल्कग्राही च पादजः प्रतिहारः सेनाधिपः क्षत्रियः तदभावतः ब्राह्मणः नियोज्यः। कस्यामपि अवस्थायां वैश्यः न शूद्रश्च न भीतश्च नैव । सर्वासु जातिषु वीर एव सेनापतिः योज्यः। अयं ससङ्कश्चतुर्वर्णधर्मः न यावनः । यस्य वर्णस्य यः राजा स वर्णः सुखम् एधते इति शुक्रनीतौ युवराजादिलक्षणं नाम द्वितीयो अध्यायः।

नृपराष्ट्र सामान्यलक्षणम्

सर्वेषु सार्वजनिकं नीतिशास्त्रम् उच्यते । सर्वभूतानां सर्वाः प्रवृत्तयः सुखार्थाः मताः । धर्मात् विना सुखं न भवति तस्मात् धर्मपरो भवेत् । त्रिवर्गशून्यम् आरम्भं न भजेत् । तम् अवरोधयन् मध्यमः सर्वधर्मेषु प्रतिपदम् अनुनयात् । नीचरोमनखश्मश्रुःनिर्मलांघ्रिमलायनः स्नानशीलः सुसुरभिः सुवेशः तथा अनुल्वणः उज्ज्वलश्च सन् रत्नसिद्धमन्त्रमहौषधीः सततं धारयेत् । सप्तपत्रपदत्राणः युगमात्रदृक् विचरेत् । निशि च आत्यायिके कार्ये दण्डीमौली सहायवान् विचरेत् । वेगितः अन्यकार्ये न स्यात्, बलात् वेगान् न धारयेत् । किञ्च इतरदूरगः भक्त्या कल्याणमित्राणि सेवेत । हिंसास्तेयान्यथाकामपैशुन्यं परुषानृतं सम्भिन्नालापव्यापादममिथ्यादृग्विपर्ययम् इति कायवाङ्मनसैः दशधा पापकर्म त्यजेत् । यदि मानवः शक्त्या यतन् धर्मकार्यं न प्राप्नोति । अत्र तत् पुण्यं प्राप्तो भवति इति निश्चयेन प्राप्तः भवति। अत्र संशयः नास्ति । मनसा पापं चिन्तयन् कर्मणा न अभिरोचयेत् । इत्येवं तस्य तत् फलं प्राप्नोति इति धर्मविदः विदुः । अवृत्तीन् व्याधिशोकार्तान् शक्तितः अनुवर्तेत । कीटपिपीलिकमपि सततम् आत्मवत् पश्येत् । अपकारपरेऽपि रिपौ उपकारप्रधानः सम्पद्विपत्सु एकमनाः स्यात् । हेतौ विद्विष्यात् न तु फले ईर्षेत् । पूर्वाभिभाषी सुमुखः

सुशीलः करुणा मृदुः काले हितं मितम् अविसंवादि पेशलं ब्रूयात् । एकः न सुखी । सर्वत्र न विस्रब्धश्च न शङ्कितः भवेत् । किञ्चिदात्मनः शत्रुं न आत्मानं कश्चित् रिपुं न । प्रभोः अपमानात् निःस्नेहतां च न प्रकाशयेत् । पराराधनपण्डितः जनस्य

दुर्गुणस्य च वक्तारः विरलाः जनाः । अतः लोकतः शास्त्रतश्च ज्ञात्वा सुधीः त्याज्यान् त्यजेत् । किञ्च मनसापि अनयं नयसङ्काशं न चिन्तयेत् । अयं सहस्रापराधी मम एकेन किं भवेत् ? इति मत्वा, ईषत् अघं न स्मरेत् । यतः बिन्दुना घटः पूर्यते । सम्प्रति कथं भूतस्य मे नक्तं दिनानि च यान्ति,एवं नित्यं सन्निहितस्मृतिः दुःखभाक् न भवति । विचक्षणः श्रुतिस्मृतिपुराणानां समासेन व्यूहेन हेत्वादिना च कृतम् इच्छार्थं विहाय, स्तुत्यर्थवादान् सन्त्यज्य, यत्नतः सारं संगृह्य च यतः धर्मतत्वं गहनम् अतः सत्सेवितं, तेन कर्म कुर्यात् । राजमित्रं सुतं गुरुमपि अधर्म निरतम् आततायिनं चेत्, न गोपयेत् वासयेत् च। अग्निदः गरदः शस्त्रोन्मत्तः धनापहः नाम वित्तापहारकः क्षेत्रहारी तथा दारहरः एतान् षट् आततायिनः विद्यात् । बुद्धिमान् नरः स्त्रियां बालं रोगं दासं पशुं धनं विद्याभ्यासं सत्यसेवां क्षणमपि न उपेक्षेता। यत्र नृपतिः धनिकः श्रोत्रियः भिषक् आचारः देशश्च विरुद्धः तत्र दिवसमपि न वसेत् । यत्र नपुंसकः स्त्रीबालः चण्डः मूर्खः साहसी च एते अधिकारिणः । तत्र दिवसमपि न वसेत् । यत्र राजा अविवेकी, यत्र तु सभ्याः पाक्षिकाः सन्मार्गोज्झितविद्वांसः साक्षिणोऽनृतवादिनः यत्र च दुरात्मनां स्त्रीणां तथा नीचजनस्य प्राबल्यं तत्र धनं वसतिं जीवितञ्चापि न इच्छेत् । यदि बाल्ये माता न पालयेत् पिता न साधु शिक्षयेत्, राजा वित्तं हरेत् तत्र विलापस्य न किमपि प्रयोजनम् । यत्र मित्रस्वजनपार्थिवाः अपि प्रकुप्यन्ति, गृहञ्च अग्निना अशनिना हतं तत्र विलापस्य न किमपि प्रयोजनम्। यदि आप्तवाक्यम् अनादृत्य, दर्पेण आचरितं विपरीतं फलितं तत्र न कापि परिवेदना। सावधानमनाः राजानं देवतां गुरुम् अग्निं तपस्विनं धर्मज्ञानवृद्धं नित्यं सुसेवयेत् । मातुपित्रुगुरुस्वामिभ्रातृपुत्रसखिष्वपि क्वचित् मनसापि न विरुध्येत् नापकुर्यात् । स्वजनैः न विरुध्येत बलीयसा न स्पर्धेत । स्त्रीबालवृद्धमूर्खेषु च विवादनं न कुर्यात्। एकः स्वादु न भुञ्जीत । एकश्च अर्थान् न चिन्तयेत् । एक एव मार्गं न गच्छेत् । एकः सुप्तेषु न जागृयात् । अन्यधर्मं न सेवेत,कदाचन न द्रोहं कुर्यात् इति निश्चयेन क्वचित् हीनकर्मगुणैः स्त्रीभिश्च सह एकासने नासीत । भूतिमिच्छता पुरुषेण इह निद्रा,तन्द्रा, भयं,क्रोधः,आलस्यं, दीर्घसूत्रता एते षड्दोषाः परित्याज्याः । एते कार्यविघाताय प्रभवन्ति । अत्र न संशयः । उपायज्ञः,योगज्ञः, तत्त्वज्ञः प्रतिभानवान् नित्यं स्वधर्मनिरतः

परस्त्रीषु पराङ्मुखः वक्ता ऊहवान् मधुरवाक् सदा अकुण्ठितवाक् स्यात् ।

चिरम् अर्थान् नित्यं संश्रुणुयात् च क्षिप्रमेव जानीयात् । तथा विज्ञाय सेवेत । क्वचिदपि कामं न सेवेत । क्रयविक्रयेषु अतिलिप्सां स्वदैन्यं न हि दर्शयेत् । अपि कार्यं विना न अज्ञातश्च अन्यगेहे न प्रविशेत् । अपृष्टस्तुकं प्रतिगृहकृत्यं नैव कथयेत्। किञ्च बह्वर्थम् अल्पाक्षरं कार्यसाधकं सल्लापं कुर्यात् । अनुभूतात् विना सदा स्वाभिमतं न दर्शयेत् । तथा परमतं सम्यकत्वेन ज्ञात्वा अज्ञातोत्तरं न वदेत् । दम्पत्योः पित्रृपुत्रयोः कलहे साक्ष्यं न कुर्यात् । किञ्च सुगुप्तौ कृत्यमन्त्रौ येन तथोक्तः स्यात् तथा शरणागतं न त्यजेत् । यथाशक्तिचिकीर्षेत कुर्वन् आपदि न मुह्येत् । कस्यचित् मर्मस्थलं न स्पृशेत् । मिथ्यावादञ्च न वदेत् । अश्लीलं न कीर्तयेत् कञ्चित् प्रलापं च न कारयेत् । यत्तु लोकविद्वेषितं तत् धर्म्यमपि अस्वर्ग्यं स्यात् । कदाचन कस्यापि वाक्यं स्वहेतुभिः न हन्येत । प्रविचार्य उत्तरं देयम् सहसा क्वचित् न वदेत् । शत्रोरपि गुणाः ग्राह्याः । गुरोः दुर्गुणास्तु त्याज्याः । नित्यः उत्कर्षः तथैव अपकर्षश्च नैव स्यात् । प्राक्कर्मवशतः नित्यं सधनः निर्धनः भवेत् । तस्मात् सर्वेषु भूतेषु मैत्रीं च नैव परित्यजेत् । सदा दीर्घदर्शी प्रत्युत्पन्नमतिः, क्वचित् साहसी च चिरकाली न भवेत् । यः सुदुर्निष्फलं कर्म ज्ञात्वा कर्तुं व्यवस्यति सः आदौ झटिति दीर्घदर्शी स्यात् । चिरं सुखमश्नुते । यः प्रत्युत्पन्नमतिः प्राप्तां क्रियां कर्तुं व्यवस्यति, तत्र चापल्यात् कार्यगौरवात् सांशायिकी सिद्धिः भवति। यः सालसः काले अपि क्रियां कर्तुं नैव यतते, तस्य कुत्रापि सिद्धि न भवति । स च सान्वयः नश्यति। यः क्रियाफलमविज्ञाय यतते स च साहसी क्रियया वा तत्फलेन दुःखभागी भवत्येव । यः चिरकारी महत्कालेन अल्पकर्म करोति सः अल्पफलतः शोचति । अतः दीर्घदर्शी भवेत् । सहसा कृतं कर्म कदाचित् सुफलं भवेत् । सुविचारितं वापि कदाचित् निष्फलं भवेत् । तथापि सहसा नैव कुर्वीत । तत् अनर्थकारि । कदाचिदपि अकार्यात् इष्टसाधनं सञ्जातम् । सत्कार्यात् यदनिष्ठं तत् न अकार्यप्रेरकं भवति । भृत्यः भ्राता पुत्रः वा पत्नी यत् न कुर्यात् तत्कार्यम् अविशङ्कितं मित्राणि विधास्यन्ति । कस्यचित् मानसिकः धर्मः अञ्जसा न हि ज्ञायते । अतः तत्प्राप्तौ यतेत । अतः नृणां मित्रलब्धिः वरा । विश्वस्तमपि कञ्चित् पुत्रं भ्रातरं भार्याम् अमात्यम् अधिकारिणं सर्वदा अत्यन्तं न विश्वसेत् । यतः सर्वेषां धनस्त्रीराज्यलोभः इति निश्चयेन अधिकः

। अतः सर्वत्र प्रामाणिकम् अनुभूतम् आप्तं विश्वासं कुर्यात् । आत्मवत् विश्वसित्वा गूढः स्वयं तत्कार्यं विमृशेत् । तद्वाक्यं तर्कतः अनर्थं विपरीतं न चिन्तयेत् ।

अथ स्वधर्मनीतिबलवान् तन्नाशितं चतुष्षष्ठितमांशं क्षमयेत् ।तेन मैत्रीं प्रधारयेत्। दानैः मानैः सत्कारैः सुपूज्यान् सदा पूजयेत् । कदापि उग्रदण्डः कटुभाषणतत्परश्च न स्यात् । कटुवाक्यात् प्रदण्डतः भार्यापुत्रोऽपि उद्विजते । पशवोऽपि दानैः मृदुभाषणैश्च वशं यान्ति । विद्यया न, शौर्येण न, धनेन न, अभिजनेन बलेन च न प्रमत्तः अतिमानी च कदाचन स्यात् । विद्यामत्तः स्वहेतुभिः आप्तोपदेशं न संवेत्ति । अनर्थमत्यभिप्रेतं परमार्थवत् मन्यते । येन महाजनैः धृतः पन्थाः बलात् सन्त्यज्यते । सः शौर्येण मत्तः व्यूहादियुक्तकौशलं तिरस्कृत्य शस्त्रवान् सहसा युद्धं कृत्वा, असून् जहाति । श्रीमत्तः पुरुषः अजः स्वमूत्रगन्धं दुष्कीर्तिं यथा न वेत्ति, प्रत्युतमुत्रेण स्वमुखमासिञ्चते तथा अभिजनेन मत्तः सर्वान् एवं श्रेष्ठान् इतरान् अवमन्यते, अकार्ये मतिं कुरुते। बलमत्तस्तु सहसा युद्धे मनः विदधते । अन्यथा पश्वादीनपि सर्वान् बलेन बाधते । मानमत्तः अखिलं जगत् तृणवत् मन्यतेऽस्म । अनर्होऽपि सर्वेभ्यः अत्यर्धासनम् इच्छति । अवलिप्तानाम् एते मदाः । सतामेते दमाः स्मृताः । विद्यायाः फलं ज्ञानं विनयश्च श्रियः फलं यज्ञः दानश्च बलस्य फलं सतां रक्षणम् उदाहृतम् । शौर्यफलं शत्रवः नामिताः करदीकृताश्च अभिजनस्य फलमिदं शमः दमः आर्जवञ्च मानस्य च एतत् फलं सर्वे स्वसदृशाः इति । साधकः मानम् उत्सृज्य दुष्कुलादपि सुविद्यामन्त्रभैषज्यस्त्रीरत्नञ्च सुप्रयत्नेन गृह्णीयात् । यत् प्रनष्टम् उपेक्षेत,यत् प्राप्तं तत् उपाहरेत् । किञ्च न बालं न स्त्रियं च न अतिलालयेत् । न च अतिताडयेत् । विद्याभ्यासे गृह्यकृत्ये तौ उभौ क्रमात् योजयेत् । क्षुद्रमपि परद्रव्यम् अदत्तं न संहरेत्। कस्यापि अणु अघं न उच्चारयेत् । पुनः स्त्रियं नैव दूषयेत् । अनृतं साक्ष्यं न ब्रूयात्। कृतं साक्ष्यं न लोपयेत् । प्राणात्यये तथा सुमहत्कार्यसाधने अनृतं ब्रूयात् । कन्यादात्रे अधनं नरं दस्यवे सधनं नरं जिघांसवे गुप्तं विज्ञातमपि न दर्शयेत् । जायापत्योश्च पित्रोश्च भ्रात्रोश्च स्वामिभृत्ययोः भगिन्योः गुरुशिष्ययोः भेदं न कुर्यात् । भाषाशालिनोः स्थितयोरपि मध्यात् गमनं न कुर्यात् । सुहृदं भ्रातरं बन्धुं सदा आत्मवत् स्वामिनमिव उपचर्यात् । गृहागतं क्षुद्रमपि सदा यथार्हं तदीयकुशलप्रश्नैः शक्त्या जलादिभिः

दानैश्च पूजयेत् । सपुत्रः गृहे सपुत्रां कन्यां न सभर्त्रुकां भगिनीं च न वासयेत् । ते अनाथे तु पालयेत् । सर्पः अग्निः दुर्जनः राजा जामाता भगिनी सुतः रोगः शत्रुश्च अल्पः बालको वा उपचारतः नावमान्यः । क्रौर्यात् तैक्ष्ण्यात् दुःखस्वभावात् स्वामित्वात् पुत्रिका भयात् स्वपूर्वजपिण्डदत्वात् वृद्धिभीभ्याम् उपाचरेत् ।

ऋणशेषं रोगशेषं शत्रुशेषञ्च न रक्षयेत् । किञ्च याचकाद्यैः प्रार्थितः सन् तीक्ष्णम् उत्तरं न वदेत् । तत्कार्यं तु चेत् समर्थः कुर्यात् वा कारयीत । सदा दातृणां धार्मिकाणां शूराणां कीर्तनं प्रयत्नेन श्रुणुयात् । तत् छिद्रं नैव लक्षयेत् । नरः काले हितमिताहारविहारी विघसाशनः अदीनात्मा सुस्वप्नः सर्वदा शुचिः स्यात् । सदा विजने विहारम् आहारं निर्हारं कुर्यात् । सदा व्यवसायी भवेत् । सुखं व्यायामं अभ्यसेत् । अन्नं न निन्द्यात् । सुखस्थः प्रीतिभोजनं स्वीकुर्यात् । षड्रसं मधुरोत्तरम् आहारं उत्तमोत्तमं जानीयात् । स्वस्त्रीभिः विहारं कुर्यात् । वेश्याभिः कदाचन न विहारं कुर्यात् । कुशलैः सार्धं प्रणतिभिः श्रेष्ठं व्यायामरूपं युद्धविशेषं कुर्यात् । प्राक्पश्चिमौ यामौ हित्वा निशि स्वापः वरं मतः । दीनान्धपङ्गुबधिराः कदाचन न उपहास्याः । अकार्ये मतिं न कुर्यात्। साधकः मानमुत्सृज्य, उद्योगेन बलेनैव धैर्येण आर्जवेन पराक्रमेण साहसात् झिटिति स्वकार्यं साधयेत । यदि येन कलहेन अर्थः सिध्यति सः वरः । अन्यथा आयुर्धनसुहृद्यशः सुखहरः स्मृतः । कस्मिन्नपि अनिष्टं न प्रवदेत् । कस्यापि छिद्रं न लक्षयेत् । महतां राज्ञः आज्ञाभङ्गः क्वचित् न कार्यः । असत्कार्यनियोक्तारं गुरुमपि प्रबोधयेत्। क्वचिदपि लघुं सत्कार्यबोधकं न अतिक्रामेत्। तरुणीं स्त्रियं स्वतन्त्रां, कृत्वा, क्वचिदपि न गच्छेत्। स्त्रियः अनर्थस्य मूलकारणम् । परपुरुषैः सह तरुण्यः किं वक्तव्यम् ? मदद्रव्यैः न प्रमाद्येत् तथा कुसन्ततौ न विमुह्येत् ।

साध्वी भार्या पित्रृपत्नी माता बाला पिता स्नुषा अभर्त्रृका अनपत्या साध्वी कन्या स्वसाऽपि च मातुलानी भ्रात्रुभार्या तथा पितुः स्वसा मातुः स्वसा, अनपत्यः , मातामहः, गुरुः, श्वशुरः, मातुलः, अपिता, बालः, दौहित्रः, भ्राता, भगिनीसुतः एते प्रयत्नेन शक्तितः अवश्यं पालनीयाः । अविभवेऽपि एते पालनीयाः । विभवे सुहृद् पित्रुमातृकुलं पत्न्याः कुलं दासदासी भृत्यवर्गाश्च पोषयेत् । विकलाङ्गान् प्रव्रजितान्

दीनान् अनाथान् च पालयेत् । यः कुटुम्बभरणार्थेषु यत्नवान् न भवेत् तस्य सर्वगुणैः किं प्रयोजनम् ? स तु जीवन्नेव मृततुल्यो भवतीति भावः । येन कुटुम्बं न भृतं, शत्रवोऽपि न नाशितं प्राप्तं, नैव संरक्षितं, तस्य जीवितेन किं प्रयोजनम् ? स्त्रीभिः जितः नित्यम् ऋणी, सुदरिद्रः याचकः गुणहीनः अर्थहीनश्च सन् एते सजीवकाः मृताः । आयुः वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजं दानमानापमानञ्च एतानि नव सुगोपयेत्। देशाटनं राजसभावेशनं शास्त्रचिन्तनं वेश्यादिदर्शनं विद्वन्मैत्रीम् आतन्द्रितः कुर्यात् । देशाटनात् अनेकाश्च धर्माः पदार्थाः पशवः नराः पर्वताः स्वानुभूताः प्रभवन्ति । सभागमनशीलस्य राजपुरुषाः कीदृशाः ? न्यायान्यायं कीदृशम् ? के च मिथ्या विवादिनः ? के च सत्यविवादिनः ? शास्त्रलोकतः व्यवहारस्य प्रवृत्तिः कीदृशी ? तद्विज्ञानं प्रजायते । शास्त्राणां तत्त्वचिन्तनैः अहङ्कारी धर्मान्धश्च न भवेत् । एकं शास्त्रमधीयानः कार्यनिर्णयं न विद्यात् बह्वागमसन्दर्शी विशिष्टरूपेण व्यवहारः अर्थात् लोकतत्त्वस्य दर्शी स्यात् । अतः बुद्धिमान् नित्यं बहुशास्त्राणि अतन्द्रितः अभ्यसेत् । वेश्या तदर्थं गृहीत्वापि तदधीना न जायते । तथाविधावापि नरं वशीकर्तुं क्षमा भवति। किञ्च सा स्वयं कस्यापि वशं न व्रजेत् । तद्वत् जगत् स्वाधीनं कारयेत् । पण्डितानां सहवासात् श्रुतिस्मृतिपुराणानाम् अर्थं विज्ञानं उज्ज्वला बुद्धिश्च प्रजायते । देवपित्रतिथिभ्यः अन्नम् अदत्वा क्वचित् न अश्नीयात् । यः मोहात् आत्मार्थं पचेत् सः नरकार्थं जीवति। गुरुभ्यः बलिने व्याधिताय शवाय राज्ञे श्रेष्ठाय व्रतिने यानगाय मार्गं समुत्सृजेत् । शकटात् पञ्चहस्तं वाजिनस्तु दशहस्तं, नागात् शतहस्तं, वृषात् दशहस्तं दूरतः तिष्ठेत् । शृङ्गिणां नखिनां दंष्ट्रिणां दुर्जनस्य नदीनां स्त्रीणाञ्च वसतौ विश्वासं नैव कारयेत् । खादन् अध्वानं न गच्छेत् । न च हास्येन भाषणं, नष्टस्य शोकं, स्वकृतेः जल्पनं न कुर्यात् । स्वशङ्कितानां सामीप्यं, नीचसेवनं त्यजेत् । गुप्तः सर्वदा कस्यापि संलापं न श्रुणुयात् । उत्तमैः अननुज्ञातं कार्यं तैः सह न इच्छेत् । यतः देवैः साकं सुधापानात् राहोः शिरः छिन्नम् । असत्कृतमपि तत् महतः भूषणाय भवेत् । यथा विषपानं शिवस्य भूषणाय, अन्येषां तु मृत्युकारकम्। तेजस्वी अनघः वह्निरिव सर्वं भोक्तुं क्षमते। किञ्च गुरोः राज्ञः कस्यचित् श्रेष्ठस्य सामुख्यं न स्थेयम् । राजा मित्रमिति ज्ञात्वा मानसेप्सितं न कार्यम् । मूर्खस्य स्वामित्वं दास्यञ्च महात्मना विरोधं ज्ञानलवदुर्विदग्धस्य रञ्जनं न इच्छेत् । बुद्धिमान् अत्यावश्यम् अनावश्यं क्रमात् कार्यं

प्राप्तं प्राक्पश्चात् झटिति समाचरेत् । पित्रा ज्ञप्तेनापि गोतमपुत्रेण मात्रुवधरूपे अकार्ये चिरकारिता धृता सा प्रशंसिता । सदा प्रेम्णा समीपवासेन स्तुत्या नत्या च सेवया कौशल्येन कलाभिश्च कथाभिः ज्ञानतोऽपि च आदरेण आर्जवेनैव शौर्यात् दानेन विद्यया प्रत्युत्थानाभिगमनैः आनन्दस्मितभाषणैः उपकारैः स्वाशयेन जगत् वशीकुर्यात्। एते वश्यकरोपायाः दुर्जने निस्फलाः स्मृताः । प्राज्ञः तत्सन्निधिं त्यजेत् । शक्ताः तं दण्डतः कपटस्वरूपैः तद्रूपैः एभिरुपायैः तं जयेत् । साङ्गानां सोपवेदानां सकलानां श्रुतिस्मृतिपुराणानां सर्वदा अभ्यासः नरस्य हितः भवति । मृगया अक्षाः स्त्रियः पानञ्च एतानि सदा नृणां व्यसनानि। एतानि चत्वारि सन्त्यज्य युक्त्या क्वचित्संयोजयेत्। कूटेन व्यवहारं कस्यचित् वृत्तिलोपं कस्यापि अहितं च क्वचिदपि न कुर्यात्, न चिन्तयेत् यस्मात् द्वैकालिकं दृढं सुखं भवेत् तत्कार्यं मृते स्वर्गं जीवति च शुभां कीर्तिं विन्द्यात्। यः सचिन्तः आधिव्याधिनिपीडितः जारः चोरः बलिद्विष्टः विषयी धनलोलुपः कुसहायी भिन्नामात्यसुहृत्प्रजः कुनृपतिः सः जागर्ति ।अतः समीक्ष्य नरः तथा कुर्यात् यथा चिरं सुखं तथा निद्रां लभेत । राज्ञः श्रेष्ठस्य कस्यचित् अनुकृतिं न कुर्यात् । एकः व्यालव्याघ्रचोरेषु प्रबाधितुं प्रबाधितुं न गच्छेत् । हन्तुमिच्छन्तम् आततायिनम् गुरुमपि हन्यात् । कलहे सहायः न स्यात्। बहुनायकं संरक्षेत् । गुरुणां राज्ञश्च पुरतः महासने न आसीत । प्रौढपादः तद्वाक्यं हेतुभिः विकृतिं न नयेत् । इतरः यत्कर्तव्यं तन्न जानाति । कृतं जानाति । यश्च नरः उत्तमः सः कर्तव्यं कृतन्न वक्ति । प्रियया कथितं मात्रुस्नुषाभ्रात्रुपत्नी सपत्निजम् अपराधम् अनुभवं विना सम्यक् न मन्येत । स्त्रीणाम् अष्टौ स्वदुर्गुणाः । यथा अनृतं, साहसं, माया, मूर्खत्वम्, अतिलोभता, अशौचम्, निर्दया,दर्पः चेति । षोडशवर्षात् अनन्तरं पुत्रं, द्वादशवर्षादनन्तरं स्त्रियं,न ताडयेत् । पुत्रवध्वादिकं दुष्टवाक्यैः न पीडयेत्। दौहित्राः, भागिनेयाः, भ्रातरश्च, पुत्राधिकाः, भ्रातृभार्या,स्नुषा, भगिनी, कन्याधिकाः पालनीयाः । स्वामी कुटुम्बपोषणे आगमार्थं रक्षणार्थञ्च सर्वदा यतते इति निश्चयेन तदन्ये तस्कराः इव यतन्ते । यतः स्त्रियाम् अनृतं साहसं मौर्ख्यं तथा कामाधिक्यं अतः कामात् विना स्त्रिया सह एकशयने न सुप्यात् । धनं, कुलं, शीलं, रूपं, विद्या, बलं, वयश्च दृष्ट्वा कन्यां दद्यात् । उत्तमं चेत्तदा आत्मानः मैत्रीं कुर्यात् । भार्यार्थिनं वयोविद्यारूपिणं निर्धनमपि केवलेन रूपेण वयसा नापि केवलेन धनेन न दद्यात् ।

आदौ कुलं, ततः विद्यां, ततः वयः, ततः शीलं, ततः धनं, ततः रूपं, ततः देशं परीक्षेत । पश्चात् विवाहयेत्। कन्यारूपं वरयते, माता वित्तं, पिता श्रुतं,बान्धवाः कुलम्, इतरे जनाः मिष्टान्नं च वाञ्छन्ति । भार्यार्थम् असमानर्षिगोत्रजां भ्रातृमतीं, सुकुलां योनिदोषविवर्जितां, कन्यां वरयेत् । क्षणशः कणशः एव विद्यामर्थञ्च साधयेत् । विद्याधनार्थिना नित्यं क्षणकणौ तु न त्याज्यौ । सुभार्यार्थं पुत्रार्थं मित्रार्थं दानार्थञ्च नित्यं धनार्जनं हितम् । एतैः विना धनैः किम् ? जनैः किम् ? भाविसंरक्षणक्षमं धनं यत्नेन रक्षयेत् । शतवर्षं जीवामि । अतः धनेन नन्दामि इति बुद्ध्या, पञ्चविंशत्यब्द पूर्वं तदर्थं वा, तदर्धकं यावत् विद्यादिकं धनं सदा सञ्चयं कुर्यात् । विद्याधनं श्रेष्ठतरम्, इतरधनं तन्मूलम् । एतच्च दानेन नित्यं वर्द्धते । न भाराय न नीयते। यावत् सधनः अस्ति, तावत् सर्वैः सेव्यते। निर्धनस्तु सगुणोऽपि भार्यापुत्राद्यैः त्यज्यते। अतः संसृतौ व्यवहाराय धनं सारभूतं स्मृतम् । अतो हि नरः उपायैः साहसैः तत्प्राप्तौ यतेत। सुविद्यया सुसेवाभिः शौर्येण तथा कृषिभिः कौसीदवृद्ध्या पण्येन कुलाभिश्च प्रतिग्रहैः यया कयापि वृत्या यथा धनवान् भवेत् तथा आचरेत् । अतः गुणिनः सधनद्वारे किङ्कराः इव तिष्ठन्ति । धनवतः दोषाः अपि गुणायन्ते । निर्धनस्य गुणाः अपि दोषायन्ते। अतः निर्धनः अखिलैः निन्द्यते। केचित् जनाः निर्धनत्वं प्राप्य मरणं भजन्ते। केचित् जनाः ग्रामाय,केचित् जनाः पर्वताय.केचित् जनाः आत्मविनाशाय गताः । अर्थहेतुना केचित् जनाः उन्मादं व्रजन्ति । अन्ये च रिपूणामधीने गच्छन्ति । अन्यं जनाः शत्रूर्णां दास्यं व्रजन्ति । यथा आत्मानः स्त्रीपुत्रमित्राणि धनं कियत् कुत्र सञ्चितं न जानन्ति । तथा सलेखं ऋणं दद्यात् । व्यवहारिणां लिखितात् अन्यत् स्मारकं नैवास्ति । लेख्येन विना बुधः सदा न व्यवहारं कुर्यात् । निर्लोभे धनिके राज्ञि विश्वस्ते क्षमिणां वरे राज्ञि च सुसञ्चितं धनं धार्यम् । अथवा स्वीकृतं लिखितं यस्य तथाभूतं कृत्वा यत्र कुत्रापि रक्षणीयम् । मैत्र्यर्थे सदा वृद्धिरहितं धनम् अर्थं याचितं दद्यात् । यदि तस्मिन्मित्रे तथाविधं बहुस्थितं तदा तन्न हानिकृत् भवति । अधर्मणं वृद्ध्या व्यवहारक्षमं दृष्ट्वा, सदा सबन्धं सप्रतिभुवं वा साक्षिमत् गृहीतं लिखितं योग्यमानं प्रत्यागमे सुखं कृत्वा, धनं दद्यात् । वृद्धिलोभेन न दद्यात् । तथा सति मूलधनं नष्टं भवेत् । आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् । धनं दाने

मैत्रीकरम् आदाने च शत्रुकारणम् । नरः स्वान्ते औदार्यं तथा बहिः कार्पण्यं कृत्वा काले तु उचितं व्ययं कुर्यात् । अन्यथा न कुर्यात् । शक्त्या धनैः सुभार्या पुत्रमित्राणि संरक्षयेत् । अतः आत्मानं सर्वैः संरक्षयेत् । यतः सर्वं पुनर्भवेत् । सजीवः नरश्चेत् भद्रशतानि पश्यतिस्म । तदा पिता श्रेयोऽर्थी शीघ्रमेव सदारप्रौढपुत्रान् विभजेत् । प्रौढाः सदारभ्रातरः एकोदराः अपि प्रायः विभजेयुः । अन्यथा यः विनाशाय भवन्ति खलु । मनुजस्य स्त्रीद्वयं पशूनां नरद्वयम् एकत्र न संवसेत् । तद्बहुत्वं कथं वसेत्? गृहस्थानां पुत्राः यद्धनं बुद्धिकारणम् अधर्मणे स्थितं तच्च ऋणदं देयम् । तत् न हि विभजेयुः । यस्य उत्तमां मैत्रीमिच्छेत् तत् अर्थाभिलाषकं परोक्षे तत् रहसि चारं तथा तस्य स्त्रिया सह सम्भाषणं न कुर्यात् । किञ्च तन्मित्रस्य न्यूनदर्शनं तत् प्रतीपं यथा स्यात्, तथाविवादनं तस्य कार्ये असाहाय्यम् असहयोगं च तस्य अनिष्टेऽपि उपेक्षणं न कुर्यात् । सकुसीदं अकुसीदं वा यच्चौत्तमर्णिकं तत् यथा उभयोः क्लेशकृत् न तथा साक्षियुक्तं विना ऋणपत्रस्य पृष्ठतः अलिखितम् अगृहीतमिव दद्यात् । आत्मपित्रुमात्रुगुणैः प्रख्यातः उत्तमोत्तमः आत्मभवैः पैत्रुकैः गुणैः पृथक् उत्तमः मध्यमः नीचः ख्यातः भ्रातृगुणैः नरः अधमः स्यात्। कन्यास्त्रीभगिनीभाग्यः नरैः अधमतमः मतः । महाधनः भूत्वा, पोष्यवर्गं सम्यक् पोषयेत् । बुधः यत्किञ्चिदपि अदत्वा दिवसं न नयेत् । अहं मृत्युमुखे स्थितः मम क्षणमपि आयुः न अस्ति । तथा तौ दानधर्मौ विना मे परत्र इतरे सहायाः न सन्ति । लोकः दानशीलाश्रयात् वर्तते । न शठाश्रयात् इति मत्वा यथेष्टौ दानधर्मौ समाचरेत्। द्विषन्तोऽपि दानेन मित्राः भवन्ति । तर्हि इतरेषां विषये किं वक्तव्यम् ?

देवतार्थं च यज्ञार्थं ब्राह्मणार्थं गवार्थकं यत् दत्तं तत् पारलौक्यं तत् संविदत्तम् उच्यते । वन्दिमागधमल्लादिनटनार्थं यत् पारितोष्यं दीयते तत् यशोऽर्थं तु श्रिया दत्तं तत् उच्यते । सुहृत्सम्बन्धिबन्धुषु विवाहादिषु यत् उपायनीकृतं आचारदत्तं तत् लज्जया दत्तमिति कथितम् । राज्ञे बलिने कार्यघातिने कार्यार्थम् अथवा पापभीत्या यत् दत्तं तत्तु भीत्या दत्तमुच्यते। हिंस्राणाम् वृद्ध्यर्थं यत् दत्तं द्यूतविनाशितं चौरैर्हृतं पापदत्तं परस्त्रीसङ्गमार्थकं यत् तत् नष्टं भवति ।

यं देवमाराधयति तमुत्कृष्टतरं वदेत् । तत् न्यूनतां नैव कुर्यात् । तस्य

सेवनञ्च जोषयेत् । दानार्जवाभ्यां वा विना भुवि वशीकरं नास्ति । अतः दानक्षीणः विवर्द्धिष्णुः शशी वक्रोऽपि शुभः भवति । स्नेहं वा द्वेषं विचार्यं कुर्यात् । कृत्वा च अन्यथा न कुर्यात् । तथा च न अपकुर्यात् । नापि उपकुर्यात् । अनर्थकारिणौ भवतः। अतिक्रौर्यं न , अतिशाठ्यं न, अतिमार्दवं न, अतिवादं न , अतिकार्यासक्तिं न, न च अत्याग्रहं धारयेत् । सर्वम् अतिशयः नाशहेतुः इति निश्चयेन अस्मात् कारणात् अत्यन्तं विवर्जयेत् । जनः क्रौर्यात् उद्वेजते कार्पण्यात् अतिनिन्दितो भवति। मार्दवात् नैव गणयेत् । अतिवादतः अपमानः अतिदानेन दारिद्र्यं तथा अतिलोभतः तिरस्कारः भवति । नरस्य अत्याग्रहात् मौर्ख्यम्, अनाचारात् धर्महानिः सञ्जायते खलु । अत्याचारस्तु मूर्खता। अहं सर्वेभ्यः अधिकः अस्मि । सर्वेभ्यः अधिकः ज्ञानवानस्मि। इदमेव धर्मतत्त्वम्। एवं बुद्धिमान् न मन्येत । तिमिङ्गिलगिलः अपि अस्ति । तद्गिलोऽपि राघवः अस्ति। कश्चित् तु तङ्गिलोऽपि अस्तीति सर्वदा मन्येत । देवेषु च गोषु च ब्राह्मणेषु स्वाम्यं न इच्छेत् । एतत् महानर्थकरं कुलनाशनं च भवति । एतेषु सर्वदा भजनं पूजनं सेवां च इच्छेत् । यतः कस्मिन् कीदृक् ब्रह्मतेजः प्रतिष्ठितं न ज्ञायते । तरुणीं धनं पुस्तकं पराधीनं नैव कुर्यात् । कृतं चेत् भ्रष्टं नष्टं विमर्दितञ्च दैवात् लभ्यते । धीमान् अल्पहेतुना बह्वर्थं न त्यजेत् । क्वचित् अभिमानेन बह्वर्थव्ययतः अल्पं न साधयेत् । बह्वर्थव्ययभीत्या तु सदा सत्कीर्तिं न त्यजेत् । भटानाम् असदुक्त्या न ईर्ष्येत् । तैः सह न कुप्याच्च । येन सुहृत् लज्ज्यते भिद्यते च दुर्मनाः भवेत् । श्रीमता विनोदोऽपि तथा किञ्चित् न वक्तव्यम् । यस्मिन् सूक्तं दुरुक्तं समं वा निरर्थकं स्यात् , तत्र प्राज्ञः बधिरेषु गायनमिव न प्रलपेत्।

यः व्यसने सज्जमानं मित्रं यथाशक्ति अनुनीय न अभिपद्यते , पण्डिताः तं कठोरहृदयं जानन्ति । ज्ञातीनामन्योन्यं भेदे यत् मित्रं सर्वप्रयत्नेन माध्यस्थ्यं नाश्रयते तं पण्डिताः सखा न मन्यन्ते । आजन्मसेवितं दानैः मानैश्च परिपोषितमपि मित्रं तीक्ष्णवाक्यात् तत्कालं शत्रुतां याति। यतः मानसं वक्रोक्तिशल्यम् उद्धर्तुं न शक्यम्। यावत् स्वबलाधिकः स्यात् अमित्रं स्कन्धेन वहेत् । तं तु नष्टबलं ज्ञात्वा अश्मनि घटमिव भिन्द्यात् । सौजन्यभूषणं यादृक् अलङ्कारः तादृक् न राज्यं न च पौरुषं न विद्या न धनं न भूषयति।

अश्वे जवः, वृषे धैर्यं, मणौ कान्तिः, नृपे क्षमा, वेश्यायां हावभावौ, गायके मधुरस्वरः, धनिके दातृत्वम्, सैनिके शौर्यं, गोषु बहुदुग्धता, तपस्विषु दमः, विद्वत्सु वाचालता, सभ्येषु अपक्षपातः, साक्षिषु सत्यवाक्, भृत्येषु अनन्यभक्तिः, मन्त्रिषु सुहितोक्तिः, मुर्खेषु मौनं, स्त्रीषु पातिव्रत्यं च सुभूषणम् । अमीषु एतद्विपरीतं महादुर्भूषणम् । एकनायकं गृहं बहुकुटुम्बेन दीपैः गोभिः सुबालकैश्च नित्यं भाति । बहुनायकैः गृहं न शोभते । शक्तः जनः घातकजीवं नैव उपेक्षेत । तत्क्षणमेव हन्यात् । पैशुन्यं चण्डता चौर्यं मात्सर्यम् अतिलोभता असत्यं कार्यघातित्वं तथा अलसकतापि गुणिनामपि अलं दोषाय भवति । एतत् गुणान् आच्छाद्य जायते । बाल्ये मातुः मध्ये प्रियायाः वार्धक्ये पुत्रस्य धनस्य च विनाशनं क्रमात् महापापफलं भवति । श्रीमताम् अनपत्यत्वं च अधनानां मूर्खता स्त्रीणां षण्डपतित्वम् इष्टानां निर्गमः न सौख्याय भवति । मूर्खः पुत्रः अथवा कन्या चण्डी भार्या दरिद्रता नीचसेवा नित्यम् ऋणम् । एतत् षट्कं सुखाय न भवति । यस्य मनः अध्यापने न, अध्यायने न देवेन गुरौ न द्विजे न कलासु न सङ्गीते न सेवायां न आर्जवे न स्त्रियां न शौर्ये न तपस्वि न साहित्ये रमते। सः मुक्तः वा खलः वा नररूपपशुः भवति । यः अन्योदया सहिष्णुश्च छिद्रदर्शी विनिन्दकः द्रोहशीलः प्रसन्नवदनः किञ्च स्वान्तमलः खलः स्मृतः । ब्रह्मकोशजं यत् पर्याप्तमस्ति तत् आशया वर्धितस्य तस्य एकस्यापि अल्पमपि पूर्तिकृत् न भवति। साशः अकार्यं करोति, अन्यं बोधयति । कृतञ्चाकार्यम् अनुमोदयते । धूर्ताः अन्योपदेशार्थे सदा साधुसमाः भवन्ति । स्वकार्यार्थं हि अकार्याणां शतं प्रकुर्वन्ति । यः पुत्रः पित्रोः आज्ञां पालयति च सेवने निरालसः छाया इव नित्यं वर्तते । आगमाय यतते तथा सर्वविद्यासु कुशलः सः पुत्रः प्रीतिकारकः भवति । यश्च दुःखदः दुर्गुणः धननाशकश्च सः पुत्रः विपरीतः भवति । या पत्यौ नित्यम् अनुरक्ता च गृहकर्मणि कुशला पुत्रप्रसूः सुशीला तथा सुयौवनाः सा पत्युः प्रिया भवति । या पुत्रापराधं क्षमते तथा पुत्रपरिपोषिणी सा माता नित्यं प्रीतिदा । अन्या कुलटा अतिदुःखदा भवति । यः पुत्रस्य विद्यागमार्थं वृत्त्यर्थं यतते, सदा पुत्रं साधु शास्ति च , सः पिता प्रीतिकृत् अनृणी च भवति । यः सदा सहायं कुर्यात्, क्वचित् प्रतिकूलं न वदेत् । तथा सत्यं हितं वक्ति सः मित्रतां याति । प्रदाने गृह्णाति । नीचस्य अतिपरिचयः ,

अन्यगेहे सदा गतिः, जातौ च सङ्घे प्रातिकूल्यं तथा दरिद्रता मानहान्यै भवति । राज्ञः सेवितत्वात् तथा व्याघ्राग्निसर्पहिंस्राणां सङ्घर्षणं न हि हितम् । एते किं कस्यापि मित्राः सन्ति ? सुहृदां दौर्मनस्यं च सदा रिपोः सुप्राबल्यं विद्वत्स्वपि दारिद्र्यं, दारिद्र्ये सन्तानाधिक्यता धनिगुणिवैद्यनृपजलहीने सदा स्थितिः पित्रोः एका कन्या तथा याचनं दुःखाय भवति । सुरूपः सधनः विद्वान् बलाधिकः स्वामी यत् यथेष्टं न कामयेत् तदा स्त्रीणां सुसौख्यकृत् नैव भवति । यो यथेष्टं कामयते स्त्री तस्य वशगा भवेत् । यथा शिशुः सन्धारणात् लालनात् वशं याति तद्वत् । ज्ञानी कार्यं तत्साधकादीन् तद्व्ययं सुविनिर्गमं विचिन्त्य कुरुते । अन्यथा लघ्वपि क्वचित् न कुर्यात् । पण्डितः व्ययाधिकं कार्यं कर्तुं न ईहेत । यत् लाभाधिक्यं क्रियते तत् व्यवसायिभिः सेव्यम् । सदा च पण्यानां मूल्यं मानं परिमाणञ्च याथात्म्यात् मृग्यते । तपः स्त्रीकृषिसेवासु उपभोग्ये भक्षणे च प्रतिनिधिः न हितः । अन्ये कार्ये नित्यं तं नियोजयेत् । मधुरभुक् जारः चोरः सदा निर्जनत्वं बलिद्विष्टः साहाय्यं तथा वेश्या धनिकमित्रतामिच्छति । कुनृपः छलं कुसेवकः स्वामिद्रव्यं ज्ञानवान् तत्त्वं तु देवजीवकः दम्भं तपः अग्निश्च इच्छति । योग्या कान्तं कुलटाजारं व्याधितः वैद्यं धृतपण्यः महार्घत्वं याचकः दानशीलं भीतः रक्षितारं तथा दुर्जनस्तु छिद्रं मृगयते । मूर्खः चण्डायते, विवदते, स्वपिति, मादकम् अश्नाति । कर्म निष्फलं करोति अथवा स्वस्य इष्टनाशनं करोति । क्षात्रं तमोगुणाधिकं तेजः। ब्राह्मं सत्त्वगुणाधिकम् अन्यत् रजोऽधिकं तेजः । तेषु सत्त्वाधिकं वरम् । ब्राह्मणस्तु स्वकर्मणा सर्वाधिकः भवति । क्षत्रियादिषु तत् तेजसः अनुतेजांसि सन्ति । ब्राह्मणं स्वधर्मस्थं दृष्ट्वा इतरे क्षत्रियाद्याश्च बिभ्यति। अन्यथा न । अतः स्वधर्मं समाचरेत् । यया वृत्त्या स्वधर्महानिः न स्यात् सा वरा भवति। यत्र कुटुम्बपोषणं भवति सः देशः श्रेष्ठतमो भवति । नदीमातृका या कृषिः सा उत्तमा वृत्तिः मता । वैश्यानां वृत्तिः मध्यमा । शूद्राणां सेवावृत्तिः अधमा भवति । याञ्चावृत्तिः अधमतरा । सा तपस्विषु उत्तमा । क्वचित् धर्मशीलनृपस्य च सेवा उत्तमा भवति । आध्वर्यवादिकं कर्म कृत्वा या भृतिः गृह्यते सा किं महाधनायैव ? वाणिज्यमलं महाधनाय किम् ? राजसेवां विना विपुलं धनं नैव जायते । किन्तु सा राजसेवा अतिगहना बुद्धिमद्भिः विना इतरेण सा असिधारा इव सदा कर्तुं न शक्या ।

व्यालग्राही व्यालं यथा मन्त्री मन्त्रबलात् नृपम् अधीनं करोति । किन्तु ज्ञानवतां राज्ञि सदा महत् भयं कुर्यात् । बुद्धिमत्सु ब्राह्मं तेजः तथा राज्ञि क्षात्रं तेजः प्रतिष्ठितम् । बुद्धिमान् दूरेऽपि तिष्ठन् सदा आरात् एवास्ति । बुद्धिपाशैः बन्धयित्वा सन्ताडयति । कर्षति । समीपस्थेऽपि दूरे अस्ति । अनुवाहकता बुद्धिः व्यवहारक्षमा न भवेत् । अतः या अनुवाकहता सा सर्वत्र गामिनी न भवति । आदौ निर्धनत्वं वरम् । अनन्तरं धनिकत्वं तथा आदौ पादगमनम् अनन्तरं यानगत्वं सुखाय कल्पते । विपरीतकं नित्यं दुःखाय भवति । मृतापत्यवतः सदा अनपत्यत्वं दुष्टयानात् पादगमः तथा विरोधतः औदासीन्यं वरम् । देशाच्छादनतः चर्मणा पादगहनं वरम् । तथा ज्ञानलवदौर्विदग्ध्यात् अज्ञता प्रवरा मता । परगृहनिवासात् अरण्ये निवसनं वरम् । प्रदुष्टभार्यागार्हस्थ्यात् भैक्ष्यं वा मरणं वरम् । श्वमैथुनम् ऋणं गर्भाधानं स्वामित्वं खलसख्यम् अपथ्यं प्राक्सुखं दुःखनिर्गमम् । कुमन्त्रिभिः नृपः कुवैद्यैः रोगी कुनृपैः प्रजा, कुसन्तत्या कुलं कुबुद्ध्या च आत्मा अनिशं हीयते । ये हस्त्यश्ववृषबालस्त्रीशुकानां शिक्षक यथा तथा ते नित्यं संसर्गगुणधारकाः भवन्ति । अवसरे उक्त्या जयः स्यात् । सद्वसनैः सुप्रसिद्धता, विद्याया सभायां मानः तु अधिकारतः त्रितयं भवन्ति। सुभार्या च सुष्ठु अपत्यं सुविद्या सुधनं सुहृत् सुदासदास्यौ सुन्दरं शरीरं स्वस्थञ्च सुन्दरं भवनं सदाचारी राजा एतानि दश गृहिणां सदा सुखाय भवन्ति । अन्यथा नास्त्येव । वृद्धाः सुशीलाः विश्वस्ताः सदाचाराः स्त्रियः वा षण्डाः नराः अन्तःपुरे यौज्याः । युवा मित्रमपि सन्दिग्धार्थेऽव्ययोऽयं प्रयुक्तः कदापि न नियोक्तव्यः । कालं नियम्य कार्याणि आचरेत् । अन्यथा क्वचित् न । किञ्च गवादिषु आत्मवत् ज्ञानमाचरेत् । किञ्च नरः अर्थधर्मयोः आत्मानमन्नसंसिद्ध्यै मातरं शिक्षणे गुरुं नियुञ्जीत । अनियमेनैव समयनिर्धारणं विनैव नरः सदैव अन्तःपुरं गच्छेत् । प्रवासे तु नृणाम् अनपत्या भार्या सत् यानं भारवाही सुरक्षकः परदुःखहरा विद्या निरालसः सेवकश्च एतानि षट् सदा सुखाय अलं भवन्ति । समर्थेनापि कर्हिचित् मार्गम् अवरुध्य न स्थेयम् । नृपोऽपि सद्यानेन विपणिमार्गे न गच्छेत् । अध्वगः सदा ससहायः स्यात् । पुनः क्वचित् अन्यथा न भवेत् । पथिकः समीपे सन् मार्गः जलञ्च अभये ग्रामे वसेत् । अतादृशे एतद्भिन्ने मार्गे न तिष्ठेत् । अरण्येऽपि रात्रौ न विरमेत् । अत्यधिकपर्यटनं

पुनः अत्यधिकव्रतोपवासः अतिमैथुनम् अतिपरिश्रमश्च सर्वेषां शीघ्रमेव महत् जराकारणं भवति । यः दुर्गुणं गुणीकृत्य कीर्त्तयेत् सः लोकस्य प्रियः भवेत् । यः गुणाधिक्यं कीर्तयति पुनः किं सखा न स्यात् ? यः सत्येन दुर्गुणं वक्ति सः प्रियोऽपि अप्रियो भवेत् । यश्च गुणं दुर्गुणीकृत्य वक्ति सः कथं प्रियः स्यात्? देवाः अपि स्तुत्या अञ्जसा वशं यान्ति । पुनः नराः किम् ? अतः कोऽपि प्रत्यक्षं दुर्गुणान् वक्तुं नैव शक्नोति । अतः स्वयं लोकतः शास्त्रश्च स्वदुर्गुणान् विमृशेत् । यः स्वदुर्गुणश्रवणतः तुष्यति, न क्रुध्यति, स्वदोषस्य प्रविज्ञाने यतते, श्रुते त्यजति, स्वगुणश्रवणात् समः तिष्ठति, अधिकः न तथा अहं दुर्गुणानां खनिः, मयि गुणाधानं कथम् ? मयि एव मूर्खता अस्ति इति मन्यते । सः अखिलात् अधिकः । सः एव साधुः । देवाः अपि तस्य कलालेशं न लभन्ति । साधुषु अल्पमपि उपकृतं महज्जायते । खलः महच्च उपकृतं सर्षपादपि अल्पं मन्यते । साधुः क्षमिणं बलिनं मन्यते । दुर्जनः अन्यथा मन्यते । अतः कारणात् साधोः दुरुक्तमपि क्षमयेत् । दुर्जनस्य न मृष्येत् । कैश्चित् तथा न क्रीडयेत् यथा तत् कलहाय भवेत् । विनोदेऽपि तव भार्या कुलटा विद्यते किमिति एवं न वदेत् । केष्वपि मित्रभावाच्च अपशब्दाश्च न वाच्याः । मित्रे गोप्यं न गोपयेत् । तद् गोप्यं न प्रकाशयेत् । पश्चात् वैरीभूतोऽपि प्राक् कथितं वा कोट्यं यत् विज्ञातं तत् कर्हिचित् सर्वदा न दर्शयेत् । गुप्तः एव प्रतिकर्तुं यतेत, प्रतिक्रियां कुर्यात् । यथार्थमपि बलवतां विपरीतकं न ब्रूयात् । क्वचित् दृष्टमपि अदृष्टवत्, श्रुतमपि अश्रुतं कुर्यात् । नरः स्वापत्काले मूकः बधिरः खञ्जः भवेत् । अन्यथा दुःखमाप्नोति व्यवहारतः हीयते । वृद्धानुकूल्यं यत्तत् वदेत्। क्वचिदपि बालक इव न ब्रूयात् । तथा च परसदनसमागतः जनः तत् नारी वीक्षणं न कारयेत् । अधनात् अननुज्ञातात् स्वामितां न गृह्णीयात् । स्व शिशुं शिक्षयेत्, अन्यशिशुमपराधिनमपि न दण्डयेत् । यः अधर्मनिरतः नीतिहीनः चलान्तरः संकर्षकः अतिदण्डः तत् ग्रामं त्यक्त्वा अन्यतः वसेत् । यतः हीनः शत्रुः भवेत् अतः उभयोः वादिनोः मतं यथार्थं विज्ञातमपि अनियुक्तः न ब्रूयात्। अन्यविवादं गृहीत्वा केनचित् नैव विवदेत् । संघशः मिलित्वा राजमन्त्रं नैव तर्कयेत् । अज्ञात शास्त्रः ज्योतिषं धर्मनिर्णयं नीतिं चिकित्सां प्रायश्चित्तं तथा क्रियाफलं न ब्रूयात् । पारतन्त्र्यात् परं दुःखं न । स्वातन्त्र्यात् परं सुखं न भवति । अप्रवासी स्वतन्त्रः। गृही

नित्यं सुखमेधते। नूतन प्राक्तनानां च व्यवहारविदां धिया प्रतिक्षणम् अभिनव व्यवहारः भवेत् । अतः प्रायः वक्तुं न शक्यते। प्रत्यक्षात् अनुमानतः उपमानेन आप्तोपदेशतः तज्ज्ञानं भवेत् । समासेन नृपराष्ट्रयोः सामान्यं कथितं नीतिशास्त्रं हिताय अलं यत् नृपे विशिष्टं स्मृतम् ।

सुहृदादिलक्षणम्

सहृदादीनां लक्षणं कथ्यते । उपकारापकारयोः मित्रः शत्रुश्च चतुर्धा स्यात् । कर्ता, कारयित्वा, अनुमन्ता च यः सहायकः स्यात् । यस्य चित्तं परदुःखेन सर्वदा सुद्रवते । यः अन्यस्य इष्टार्थे यतते, तथा अप्रेरितः सत्करोति । समये आत्मनः स्त्रियः धनानां गुह्यानां शरणं सोऽयं उत्तमः सुहृत् प्रोक्तः । अन्यश्च त्रिद्येकपदमित्रकः अस्ति। द्वयोः एकस्मिन् विषये अनन्यस्वत्वकामत्वं वा अन्येष्टनाशकारिता एतत् वैरिलक्षणम् । भ्रातुः अभावे अखिलं पितृद्रव्यं मम वै भवेत् । एतस्य न स्यात् । अयञ्च ममैव वश्यं स्यात् । अहं अन्यं विना अखिलमेतत् भोक्ष्ये। परस्परं द्वौ तौ सुवैरिणौ स्तः। यश्च द्वेष्टि द्विष्टः तौ एकतरसंज्ञकौ शत्रू स्तः । शूरस्य सदा उत्थानशीलस्य बलनीतिमतः सर्वे गूढवैराः कालप्रतीक्षकाः नृपाः मित्राः भवन्ति इति आश्चर्यं किम्? ते हि किमिति प्रश्ने राजलुब्धाः न । अपि तु राज्यलुब्धाः एव । केवलं कालं प्रतीक्षन्ते एव। कोऽपि जनः राज्ञः मित्रं न विद्यते । राजापि कस्यापि मित्रं न भवति । प्रायः नृपाः परस्परं कृत्रिममित्रे भवतः । पुनः केचित् स्वभावतः मित्राः शत्रवः सर्वदा सन्ति । माता मात्रुकुलं पिता तस्य पितरौ तथा पित्रुपित्रुव्यात्मकन्या पत्नी तत् कुलमेव पित्रुमात्रात्मभगिनीकन्यकासन्ततिश्च प्रजापालः गुरुः इति निश्चयेन एतानि सहजानि मित्राणि भवन्ति ।

विद्या शौर्यं दाक्ष्यं बलं तथा पञ्चमं धैर्यं सहजानि मित्राणि आहुः । बुधाः तैः विद्यादिभिः वर्तयन्ति । यः पित्रोः निदेशवर्ती सः पुत्रः अन्वर्थनामवान् । एकः गुणवान् श्रेष्ठः । निर्गुणैः शतैः अपि प्रयोजनं न भवति । एते स्वभावतः मित्राणि भवन्ति । तथाहि हिंस्रः दुर्वृत्तः तथा ऋणकारी पिता व्यभिचारिणी माता स्त्री शत्रुश्च । आत्मपितृभ्रातरश्च तेषां स्त्रियः पुत्राश्च तथा स्नुषा, श्वश्रूः, सपत्नी ननान्दा नाम

भर्त्रुपत्नी यातरः कदाचित् शत्रवः भवन्ति। मूर्खः पुत्रः, कुवैद्यः, अरक्षकः पतिः, चण्डः प्रभुः, चण्डाः प्रजाः, तथा यः धनिकः अथ च अदाता सः शत्रुः भवति । नृपतिः दुष्टानां शत्रुः, पतिव्रता कुलटानां शत्रुः, साधुः खलानां शत्रुः, बोधकः मूर्खाणां शत्रुः स्यात् मूर्खाणामुपदेशः क्रोधाय एव न शमाय । भुजङ्गानां पयः पानं विषाय एव न अमृताय । परितः चतुर्दिक्षु ये नृपाः सन्निकृष्टाः, ये च तत्पराः, पुनश्च तत्पराः अन्ये ते क्रमात् हीनबलारयः ते तु क्रमात् प्राकृताः मित्राणि उदासीनाः तथा शत्रवः स्युः। किञ्च अरिः मित्रम् उदासीनः अनन्तरः तत्परः तथा परः एते चतुर्दिक्षु क्रमशः नृपाः ज्ञेयाः। तथा स्वसमीपतराः भृत्याः कर्षिताः अमात्याद्याश्च अरयः ज्ञेयाः । हीनाधिकबलं मित्रं क्रमात् बृंहयेत् कर्षयेच्च । ते सर्वे शत्रवः सामादिभिः उपक्रमैः भेदनीयाः कर्षणीयाः पीडनीयाश्च विनाशनीयाः । उपायेन यथा व्यालः गजः सिंहोऽपि साध्यते। तथा यथा योग्यैः मित्रं शत्रुं स्ववशवर्तिनं कुर्यात् । उपायतः भूमिष्ठाः स्वर्गम् आयान्ति च वज्रं भिन्दन्ति । ते सामदानभेददण्डाः स्वयुक्तितः सुहृत्सम्बन्धिस्त्रीपुत्रप्रजाशत्रुषु च पृथक् पृथक् चिन्तनीयाः । ये एकशीलवयोविद्या जातिव्यसनवृत्तयः सार्जवैः नाम कपटशून्यैः एतैः साहचर्ये यदि मित्रं स्यात्, तदा त्वया समः सखा नास्ति । इदं साम स्मृतम् । किञ्च तथाविधे मित्रे मम सर्वं वस्तु तवैवास्ति। इदं सजीवितं दानं स्मृतम् । मित्रे अन्यमित्रसुगुणान् यत् कीर्तयेत् तद्गुणकथनं तस्य भेदनं इति निश्चयेन भवति। यदि एवं विधः असि, तदा भवता सह मैत्रीं न करिष्ये इति वचनं मित्रे दण्डः कथितः। यः इष्टं न संयोजयेत् अन्यानिष्टं उपेक्षते , सः उदासीनः सुसान्धिकः शत्रुः कथं न भवेत् ? त्वया मया च परस्परम् अनिष्टं न चिन्तनीयं प्रत्युत सुसाहाय्यं कर्तव्यम् इति शत्रौ साम प्रकीर्तितम् । यथा योग्येषु शत्रुषु प्रबलं रिपुं वत्सरे प्रमितैः करैः ग्रामैः वा यत् तोषयेत् तत् हि दानम् । शत्रुसाधकहीनत्वकारणात् प्रबलाश्रयात् तद्धीनतोज्जीनाच्च शत्रुभेदनमुच्यते । दस्युभिः शत्रोः पीडनं धनधान्यतः कर्षणं तत् छिद्रदर्शनात् उग्रबलैः नीत्या प्रभीषणं प्राप्तयुद्धानिवृत्तित्वैः त्रासनं दण्डः उच्यते । उपायाः यथार्हतः क्रियाभेदात् भिद्यन्ते । यथा मित्रोदासीनशत्रवः स्वाभ्यधिकाः न स्युः। तथा नीतिज्ञः पृथिवीपतिः सर्वोपायैः कुर्यात् । प्रथमं सामैव श्रेष्ठम् । तदनन्तरं तु दानं , सर्वथा शत्रोः भेदनं, प्राणसंशये शत्रोः दण्डनं कुर्यात् । अरौ प्रबले सामदानौ स्मृतौ । अधिके

सामभेदश्च, समे भेददण्डौ कार्यौ प्रहीनके दण्डः पूज्यः । मित्रे सामदानौ स्तः। कदापि भेददण्डेन न प्रयोज्ये । प्रजानां सम्भेदेन रिपोः पीडनम् इति निश्चयेन स्वजयाय च रिपुप्रपीडितानां साम्ना दानेन सङ्ग्रहः । पुनः गुणवतां दुष्टानां सदा निर्वासनं हितम् । सर्वदा यत्नमास्थितः सामदानाभ्यां स्वप्रजानां पालनं कुर्वीत । भेदेन दण्डेन नैव पालनीयः । स्वप्रजादण्डभेदैश्च राज्यविनाशनं भवेत् । यथा प्रजाः हीनाः वा अधिकाः न स्युः । तथा सदा रक्ष्याः । दण्डतः असदाचारात् निवृत्तिः दमनञ्च । तत् येन उपायेन जीवः सम्यक् वशवर्तिनो भवेत् सः उपायः दण्डः एव । सः उपायः नृपाधीनः यतः सः सर्वस्य प्रभुः वर्तते। तर्जनम् अनादरः, अन्नपानं विनावस्थापनं तथा बन्धनं ताडनं द्रव्यहरणं पुरात् निर्वासनम् अङ्कनं व्यस्तक्षौरम् असद्यानम् अङ्गच्छेदः, अङ्गभङ्गकरणं तथा वधः युद्धम् एते उपायाः शत्रुविजययुक्तयः दण्डस्यैव प्रभेदकाः ।

दण्डभयेन प्रजाः धर्मनिरता जायते । आधर्षणं तथा असत्यभाषणं नैव करोति। क्रूराः नृशंसाः परपीडकाः मार्दवं यान्ति । पुनः दुष्टाः दौष्ट्यं त्यजन्ति । पशवोऽपि सिंहव्याघ्र गोमहिषादयोऽपि वशं यान्ति । पुनः तस्कराः विद्रवन्ति । पिशुनाः मूकतां यान्ति । आततायिनः भयं यान्ति । पुनः अन्ये करदाः भवन्ति । अपरे वित्रासं यान्ति। अतः नृपः धर्मरक्षणे नित्यं दण्डधरः स्यात् ।

अवलिप्तस्य कार्याकार्यम् अजानतः उत्पथं प्रतिपन्नस्य गुरोरपि शासनं कार्यं भवति । राज्ञां सदण्डनीत्या सर्वे उपक्रमाः सिध्यन्ति । यतः दण्डः एव धर्माणां परमं शरणं स्मृतम् । श्रुतिचोदनात् पशुवत् असाधूनां हिंसा अहिंसा एव । दण्ड्यस्य अदण्डनात् अदण्ड्यस्य दण्डनात् नित्यम् अतिदण्डात् गुणिभिः त्यज्यते पातकी भवेत् । अल्पदानात् महत्पुण्यं प्रवृत्यर्थं दण्डप्रणयनात् महत् फलं च भयाय मुनिवरैः शास्त्रेषु उक्तम् । अश्वमेधादिभिः यत् पुण्यं तत् स्त्रोत्रपाठतः किं स्यात् ? क्षमया यत्पुण्यं स्यात् तत्किं दण्डनिपातनात् स्यात् ? स्वस्य प्रजानां दण्डनात् राज्ञः श्रेयः कथं भविष्यति ? तत् दण्डनात् कीर्तिधनपुण्यविनाशनं जायते । कृतयुगे नृपस्य धर्मपूर्णत्वात् दण्डः नासीदिति । त्रेतायुगे यतः प्रजाः पादाधर्माः अतः पूर्वदण्डः

आसीदिति, द्वापरे अर्धधर्मत्वात् त्रिपाददण्डः विधीयते । तथा कलौ राज्ञः दौष्ट्यात् प्रजाः निश्वाः भवन्ति। अतः दण्डार्धं विधीयते । राजा धर्मस्य अधर्मस्य च प्रशिक्षणात् युगप्रवर्तकः युगानां न प्रजानां न दोषः । किन्तु नृपस्य एव दोष इति। नृपतिः येन प्रसन्नः भवति इति निश्चयेन जनः लोभात् भयात् तदा चरति । तेन शिक्षितं किं कथमाचरेत् ? यत्र नृपतिः सुपुण्यः तत्र हि प्रजाः धर्मिष्ठाः । यत्र राजा महापापी तत्र जनः अधर्मपरः। तत्र पर्जन्यः कालवर्षी न भवति । भूः महाफलाः न भवति । पुनः राष्ट्रह्रासः, शत्रुवृद्धिः, धनक्षयः भवति । राजा मद्यपायी चेत् वरः । स्त्रीजितः नातिकोपवान् न । चण्डः लोकान् तापयति । स्त्रैणः वर्णान् विलुम्पति। मद्यपी एकश्च आत्मनैव बुद्ध्या व्यवहारतः भ्रष्टः स्यात् । कामक्रोधौ मद्यतमौ यतः तौ सर्वेषां मद्यानाम् अधिकौ भवतः । राजा अतिलोभतः प्रजायाः धनप्राणहरः । तस्मात् नृपः एतत् त्रयं त्यक्त्वा दण्डधारी भवेत् । राजा अन्तः मृदुः बहिः क्रूरः भूत्वा स्वां प्रजां दण्डयेत् । अत्युग्रदण्डकल्पः स्यात् स्वभावाः हितकारिणः । कर्णे जपैः स्वभावतः नित्यं राष्ट्रं हन्यते । अतः नृपः सूचितोऽपि आदरात् कार्यं विमृशेत् । उत्तमः नृपः आत्मनः प्रजायाश्च दोषदर्शी । आदौ आत्मानं ततः भृत्यान् ततः प्रजाः विनियच्छति । अपराधः कायिकः वाचिकः मानसिकः तथा सांसर्गिकः चतुर्विधः । सः च बुद्धि अबुद्धि कृतः द्विधा भवति । सः पुनः द्विधा ज्ञेयः । कारितः तथा अनुमोदितः । स च सकृत् असकृत् अभ्यस्तस्वभावैः चतुर्विधः भवति । नेत्रवक्त्रविकाराद्यैः भावैः मानसिकं क्रियया वीक्ष्य, कायिकं क्रूरशब्दतः वाचिकं साहचर्यैः सांसर्गिकं गौरवलाघवम् अपराधं ज्ञात्वा उत्पन्नानां तथा उत्पत्स्यमानानां कार्याणां दण्डम् आवहेत् । उत्तमः दोषं निष्पादयन् प्रथमं साहसं दण्डमर्हति । किञ्च एतत्कार्यं किमिति प्रश्ने न्याय्यं तव एवेयमसत्कृतिः इति सम्पृच्छेत् उत्तमः ततः अपराधं कुर्वन् मध्यमं साहसं दण्डं यथोक्तमपराधं द्विगुणं त्रिगुणं वा विधेयम् । प्रथमं धिग्दण्डं, तदनन्तरम् आद्यसाहसं तथा यथावृद्धि तु यथोक्तं सम्यक् दण्डं कुर्यात् । उत्तमः कुर्वन् उत्तमं साहसं दण्डम् अर्हति। आदौ प्रथमं साहसं तदनन्तरं मध्यमं पश्चात् यथोक्तं द्विगुणं ततः परम् अवरोधं कुर्यात् । बुद्धिपूर्वनृघातेन विना एतत् दण्डकल्पनं कार्यम् । अत्र उत्तमत्वं मध्यमत्वं नीचत्वं कीर्त्यते । तत् गुणेन कुलेन धनेन च मुख्यं बोध्यम् । मध्यमः कुर्वन् प्रथमं साहसं धिग्दण्डम् अर्धदण्डं वा अनुक्रमात् दण्डमर्हति । मध्यमः कुर्वन् मध्यमं साहसं द्विगुणं

त्रिगुणं वा संरोधं नीचकर्म दण्डमर्हति । मध्यमः पापं कुर्वन् आदौ पूर्वसाहसं, ततः यथोक्तं द्विगुणं, पश्चात् ताडनं, ततः बन्धनं पुरात् निर्वासनम् अङ्कनम् उत्तमं साहसदण्डमर्हति । अधमः पापं कुर्वन् आदौ प्रथमं साहसं, तदनन्तरं मध्यमं, ततः यथोक्तं द्विगुणं त्रिगुणं पश्चात् यावज्जीवं बन्धनमर्हति । अधमः पापं कुर्वन् यथोक्तम् अर्द्धं द्विगुणं त्रिगुणं ततः बन्धनं मध्यमं साहसदण्डम् अर्हति । अधमः पापं कुर्वन् आदौ पूर्वसाहसं ततः यथोक्तं द्विगुणं, ततः नित्यं मार्गसंस्करणार्थकं संरोधनम् उत्तमसाहसञ्च अथवा आदौ मध्यमं साहसं, ततः द्विगुणं यावज्जीवं बन्धनं केवलं नीचकर्म च दण्डमर्हति । यः धनगर्वात् पापं कुर्यात्। पूर्वं तस्य धनात् पादं ततः अर्धं ततः अखिलं धनं हरेत्। ततः यावज्जीवं बन्धनं कुर्यात् । यः सहायगौरवात् विद्यामदात् च बलदर्पतः पापं करोति । तं तु सदा बन्धयेत् च ताडयेत् । भार्या, पुत्रः, भगिनी, शिष्यः, दासः, स्नुषा, अनुजः ते कृतापराधाः तनुभिः रज्जुभिः सुवेणुभिः शरीरस्य पृष्ठतस्तु ताड्याः। कदाचन उत्तमाङ्गेन ताड्यः अन्यथा तु प्रहारं कुर्वन् चोरवत् दण्डमर्हति । कश्चित् पापिनं मासमात्रं त्रिमासं वा षण्मासं वापि वत्सरं वा यावज्जीवं बन्धयित्वा नीचकर्मकरं कुर्यात्। किन्तु कश्चित् वधं नार्हति । भूतानि न निहन्यात् इति श्रुतिः बोधयति । तस्मात् नृपः सर्वप्रयत्नेन वधदण्डं त्यजेत् । राजा अवरोधात् बन्धनेन ताडनेन च प्रजां कर्षयेत् । लोभात् धनदण्डेन प्रजां न पीडयेत्। अपराधिनः असहायाः पित्राद्याः न दण्ड्याः स्युः । क्षमाशीलस्य राज्ञः ईदृशं दण्डग्रहणम्। यदा नृपः प्रदण्डः तथा धनहारकः सन् अपराधं न क्षमते तदा लोकः क्षुभ्यते अथवा शत्रुभिः भिद्यते । अतः नृपः सुभागदण्डी क्षमावान् तथा रञ्जकः स्यात्।

मद्यपः कितवः स्तेनः जारः चण्डः हिंसकः त्यक्तवर्णाश्रमाचारः नास्तिकः शठः मिथ्याभिशापकः कर्णे जपार्यदेवदूषकौ असत्यवाक् न्यासहारी तथा वृत्तिविघातकः, अन्योदयासहिष्णुः उत्कोचग्रहणे रतः अकार्यकर्ता, तथा मन्त्राणां कार्याणां भेदकः, अनिष्टवाक् परुषवाक्, जलारामप्रबाधकः, नक्षत्रसूची, राजद्विट्, कुमन्त्री, कूटकार्यवित्, कुवैद्यामङ्गलाशौचशीलः मार्गनिरोधकः, कुसाक्षी, उद्धतवेशः, स्वामिद्रोही, व्ययाधिकः, अग्निदः, गरदः, वेश्यासक्तः, प्रबलदण्डकृत् पाक्षिकसभ्यः, बलाल्लिखितग्राहकः, अन्यायकारी, कलहशीलः, युद्धे पराङ्मुखः, साक्ष्यलोपी, पितृमातृसतीस्त्रीमित्रद्रोहकः,

असूयकः, शत्रुसेवी, मर्मभेदी, वञ्चकः, स्वकीयद्विद्गुप्तवृत्तिः, वृषलः, ग्रामकण्टकः, कुटुम्बभरणात् विना सदा तपोविद्यार्थिनः, तृणकाष्ठादिहरणे शक्तः सन् भैक्ष्यभोजकः कन्यायाः अपि विक्रेता, कुटुम्बानां वृत्तिह्रासकः, अधर्मासूचकः अपि राजानिष्टम् उपेक्षकः, कुलटा, पतिपुत्रघ्नी, स्वतन्त्रा, कृद्धनिन्दिता, गृहकृत्योज्झिता, नित्यं दुष्टाचारा, अप्रिय स्नुषा एतान् स्वभावदुष्टान् ज्ञात्वा राष्ट्रात् विवासयेत् ।

मद्यपादयः द्वीपे निवासितव्याः । अथवा दुर्गोदरे बद्ध्वा मार्गसंस्करणे कुत्सितान्नं, तदपि न्यूनं भुञ्जते इति तथोक्ताः कृत्वा देयाः । नृपः तैः तत्तत् जात्युक्तकर्माणि कारयीत । नृपः एवं विधान् असाधून् च संसर्गेण दूषितान् दण्डयित्वा सदा सन्मार्गे तान् शिक्षयेत् । ये शत्रुसम्बन्धात् राज्ञः राष्ट्रस्य तथा मन्त्रिगणस्य विकृतिम् इच्छन्ति। नृपः झटिति तान् हन्यात् । राजा गणदौष्ट्ये गणस्य युगपत् विनाशं न इच्छेत् । यथा वत्सः स्तनम् एकैकम् अश्नाति तथा घातयेत् । यदा नृपतिः अधर्मशीलः तदा जनः धर्मशीलस्य अतिबलवतः रिपोः आश्रयतः तं सदा भीषयेत् । यावत् नृपः धर्मशीलः स्यात् तावदेव सः नृपः भवति । अन्यथा लोकः नश्यते । नृपोऽपि सः शीघ्रमेव विनश्यति । यः मातरं पितरं भार्यां च सन्त्यज्य विवर्तते, राजा तं निगडैः बन्धयित्वा मार्गसंस्कृतौ योजयेत् । तथा तद्भृत्यर्थं तेभ्यः प्रयत्नतः राजा सन्दद्यात् । पणसहस्रम् उत्तमसाहसः दण्डः पणश्च दशमाषमितं राजमुद्रितं तत् ताम्रं सः वराटि सार्द्धशतकमूल्यः कार्षापणञ्च विद्यते । तदर्धः मध्यमः तदर्धः प्रथमः क्रमात् प्रथमे साहसे प्रथमः दण्डः क्रमात् परौ ज्ञेयौ । नृपैः मध्यमे मध्यमः, उत्तमे उत्तमः धार्यः । मिश्रे सोपायाः कथिताः।

कोशनिरूपणम्

एकार्थसमुदायः यः सः पृथक् पृथक् कोशः स्यात् । नृपः येन केन प्रकारेण धनं सञ्चिनुयात् । तेन च राष्ट्रं बलं यज्ञादिकाः क्रियाः संरक्षयेत् । बलानां प्रजानां च रक्षणार्थं यज्ञार्थं नृपस्य कोशसङ्ग्रहः परत्र च इह सुखप्रदः अन्यश्च दुःखदः । केवलं स्त्रीपुत्रार्थं च स्वोपभोगाय यः कृतः सः नरकाय एव ज्ञेयः । पुनः परत्र न सुखप्रदः भवति । येन यः अन्यायेन उपार्जितः सः तत् पापभाक् सुपात्रतः गृहीतं वा

दत्तं, तत् वर्धते । स्वागमी तथा सद्व्ययी पात्रं विपरीतकम् अपात्रम् । राजा अपात्रस्य सर्वं धनं हरेत् न दोषभाक् । नृपतिः अधर्मशीलात् धनं सर्वशः छलात् बलात् दस्युवृत्त्या हरेत् तथा परराष्ट्रात् हरेत् । येन नीतिबलं त्यक्त्वा स्वीयप्रजापीडनतः धनं सञ्चितं, तस्य तत् धनं सराज्यं शत्रुसात् भवेत् । अनापदि दण्डभूभागशुल्कानाम् आधिक्यात् तथा तीर्थदेवकरग्रहात् कोशवर्धनं न कुर्यात् । यदा शत्रुविनाशार्थं च बलसंरक्षणाय उद्यतः तदा लोकात् विशिष्टदण्डशुल्कादि धनं हरेत् । राजा स्वापत्तौ भृतिं दत्वा धनिकेभ्यः यत् धनं हरेत् स्वापत्समुत्तीर्णः तत् स्वं सवृद्धिकं दद्यात् । अन्यथा प्रजा राज्यं कोशः तथा नृपः प्रबलदण्डेन हीयते। यतः सुरथाद्याः नृपाः हीनाः अभवन् । दण्डभूभागशुल्कैः विना कोशात् यावत् विंशतिवत्सरं सम्यक् बलस्य संरक्षणं भवेत् तथा स्वप्रजारक्षणक्षमः कोशः सन्धार्यः । कोशः बलमूलो भवेत् । बलञ्च कोशमूलं स्मृतम् । बलसंरक्षणात् कोशराष्ट्रवृद्धिः अरिक्षयः भवति। प्रजासंरक्षणेन तत् त्रयं च स्वर्गः जायते । यज्ञार्थं द्रव्यम् उत्पन्नं, यज्ञः स्वर्गसुखायुषे अर्थभावः बलं कोशः राष्ट्रवृद्ध्यै तु इदं त्रयं भवति । क्षमाशीलस्य नृपस्य नीतिनैपुण्यात् तत् वृद्धिः जायते। अतः यावत् बुद्धिबलोदयं यतेत एव । यः मालाकारस्य वृत्या इव स्वप्रजारक्षणेन शत्रुं हि करदीकृत्य तद्धनैः कोशवर्धनं करोति सः नृपश्रेष्ठः । यः वैश्यवृत्तितः मध्यमः, अधमः सेवया दण्डतीर्थदेवकरग्रहैः कोशवर्धनं करोति । हीनधनाः तथा मध्यधनाः प्रजाः भृत्याः सदा रक्ष्याः । अधिकद्रव्याः उत्तमास्तु अधिकृत् यथा प्रतिभुवः दत्वा पालनीयः । उत्तमधनाः धनिकाः नृपैः न हीनाः न च अधिकाः भवन्ति। यत् धनं कुटुम्बस्य द्वादशाब्दप्रपूरं तत् नीचसंज्ञकम् । यत् षोडशाब्दानां पर्याप्तं तत् धनं मध्यमम् । यच्च त्रिंशदब्दप्रपूरं तत् उत्तमं स्मृतम् । नृपः स्वापत्तौ एषु वै क्रमात् अर्थं वा रक्षयेत् । वणिजः क्वचित् अर्द्धैः मूलैः व्यवहरन्ति न वृद्ध्या । किञ्च महार्घे विक्रीणन्ति, हीनार्थे हि सञ्चयन्ति । व्यवहारे वैश्यैः धृतं तत् धनेन विना सदा अन्यथा स्वप्रजातापः सान्वयं नृपं दहति । नृपेण आत्महिताय च स्वराष्ट्रार्थं तत्तत्काले वत्सरत्रयपूर्तिदः धान्यानां सङ्ग्रहः कार्यः । वापि समृद्धानां चिरस्थायी अधिकश्च इष्यते । सुपुष्टं कान्तिमत् जातिश्रेष्ठं शुष्कं नवीनकं ससुगन्धवर्णरसं सुसमृद्धं चिरस्थायि संवीक्ष्य महार्घमपि रक्षयेत् । अन्यथा न सञ्चयेत् । विषवह्निहिमव्याप्तं

कीटजुष्टं न धारयेत् । निःसारतां प्राप्तं व्यये तावत् न नियोजयेत् । यत् व्ययीकृतं तत् दृष्ट्वा नृपः तत्तुल्यं नवीनकं वत्सरे वत्सरे सुप्रयत्नेन गृह्णीयात् । ओषधीनां च धातूनां तृणकाष्ठादिकस्य च यन्त्रशस्त्रास्त्राग्निचूर्णभाण्डादेः तथा वाससां यत् यत् साधकं द्रव्यं सदा कार्ये भवेत् । तस्य तस्यापि कार्यसिद्धिसङ्ग्रहः कर्तव्यः । सङ्गृहीतं धनादिकं प्रयत्नेन संरक्षयेत् । आर्जने तु महत् दुःखं, तद्रक्षणे चतुर्गुणम् । यत् क्षणम् उपेक्षितं तत् झटिति विनाशं समाप्नुयात् । आर्जकस्य दुःखं तथा आर्जित विनाशने दुःखं स्यात् । स्त्रीपुत्राणामपि तथा अन्येषां तु कथं न भवेत् ? यः स्वकार्ये शिथिलः स्यात् अन्ये किं न भवन्ति ? यः स्वकार्ये जागरूकः तत् सहायाः तत्समाः। यः अर्जितुं जानाति, अर्जितं सम्यक् रक्षितुं न जानाति । अतः अस्मात् परतरः मूर्खः नास्ति । यतः तस्य अर्जनश्रमः वृथा भवति ।

यः एकस्मिन्नधिकारे द्वौ अधिकरोति सः, यः जीवद् द्विभार्यः, यः अतिविश्रब्धवान्, यश्च महाध नाशः अथ च अलसः स्त्रीभिः निर्जितः एव तथा यः चोरजाराततायिषु साक्षितां पृच्छेत् स च मूर्खः । कृपणवत् संरक्षयेत् काले विरक्तवत् दद्यात् अन्यथा स्वधनव्ययतोऽपि मूर्खत्वं याति । यस्तु याथात्म्यविज्ञाने सदा स्वयमेव यतेत् । राजा स्वयं परीक्षकैः रत्नादीन् वीक्ष्य, रक्षयेत् । वज्रं, मुक्ता, प्रवालं, गोमेदः, इन्द्रनीलकः , वैदुर्यं, पुष्परागः, मरकतं तथा माणिक्यम् एतानि नवसूरिभिः महारत्नानि प्रोक्तानि ।

इन्द्रगोपरुक् रक्तवर्णं माणिक्यं रवेः प्रियम्। मरकतपीतसितश्यामच्छविः मुक्ता विधोः प्रिया भवति। सपीतरक्तरुक् उत्तमं विदृमं भौमप्रियम् । मयूरचाषपत्राभा हरित् मरकतं बुधस्य हिता भवति । स्वर्णच्छविः पीतवर्णः पुष्परागः गुरुप्रियः अत्यन्तं विशदं तारकाभं वज्रं शुक्रस्य प्रियं भवति। धनमेघरुक् असितः इन्द्रनीलः शनेः हितः । ईषत्पीता अरुणप्रभः राहोः प्रियकृत् भवति । ओतोः अक्षण आभाचलन् तन्तुः वैदुर्यः केतोः प्रीतिकृत् भवति । वज्रं रत्नश्रेष्ठतरं, गोमेदविदृमे नीचे, गुरुमतं माणिक्यं मौक्तिकं हि श्रेष्ठमेव । इन्द्रनीलं पुष्परागः वैढूर्यं मध्यमं स्मृतम् । अहेः मणिः महाद्युतिः रत्नश्रेष्ठश्च दुर्लभः । अन्तर्जालरहितं सद्वर्णं रेखाबिन्दुविवर्जितं सत्कोणं सुप्रभं रत्नं रत्नविदः श्रेष्ठं जगुः । तत् रत्नं शर्कराभं च दलाभं चिपिटं तथा वतुलं

रत्नजाः वर्णाः प्रभाः सिताः रक्ताः पीतकृष्णाश्च । यत् रत्नं यथा वर्णं यथाच्छायं दोषवर्जितं तत् श्रीपुष्टिकीर्तिशौर्यायुःकरम् । अन्यद् असत् स्मृतम् । छाया वर्णम् आक्रमते । प्रभा वर्णप्रकाशिनी। पद्मरागस्तु माणिक्यभेदः रक्तोत्पलस्य कान्तिः पुत्रार्थिनी नारी कदाचन वज्रं न धारयेत् । मौक्तिकं विद्रुमं धृतं कालेन गुरुत्वात् प्रभया वर्णात् विस्तारात् आश्रयात् हीनं भवति । यद्रत्नं आकृत्या दोषवर्जितं तत् अधिमूल्यं स्यात् । मौक्तिकविदृमात् विना रत्नं अयसा पाषाणेन च प्रायः न उल्लिख्यते इति रत्नविदः जगुः । यद्रत्नं लघुविस्तृतं मूल्याधिक्याय भवति, यच्च गुर्वल्पं तत् सद्गुणमपि हीनमौल्याय स्यात् । शर्कराभं हीनमूल्यं चिपिटं मध्यमं स्मृतम् । दलाभं श्रेष्ठमूल्यं वर्त्तुलं यथाकामात् स्यात् । विद्रुमं मौक्तिकं विना रत्नानि जरां न यान्ति। राजदौष्टचात् रत्नानां मूल्यं हीनाधिकं भवेत् । मौक्तिकं मत्स्याहि शङ्खवाराहवेणुजीमूतशक्तितः जायते । तेषु शुक्त्युद्भवं भूरि स्मृतम् । मौक्तिकं कृष्णं सितं पीतरक्तं द्विचतुःसप्तकञ्चुकं त्रिपञ्चसप्तावरणम् उत्तरोत्तरम् उत्तमम्। शुक्त्युद्भवं क्रमात् कृष्णं कनिष्ठं सितं मध्यं रक्तं श्रेष्ठं पीतं जरठं विदुः । तदेव वेध्यम् इतराणि अवेध्यानि भवेत् । तद्वत् कृत्रिमं सिंहलद्वीपवासिनं कुर्वन्ति । तत्सन्देहविनाशार्थं मौक्तिकं सुपरीक्षयेत् । तत् उष्णे सलवणस्नेहे जले निशि उषितं, तत्पश्चात् व्रीहिभिः मर्दितं तत् वैवर्ण्यं न जायेत । तत् श्रेष्ठाभम् अकृत्रिमं शुक्तिजं ज्ञेयम् । मध्यमम् इतरत् विदुः । गोमेदकं रत्नं विना तुलाकल्पितमूल्यं स्यात् । मौक्तिकं विना रत्नानां क्षुमाविंशतिभिः रक्तिः स्यात् । चतुः कृष्णलकैः मुक्तायाः रक्तित्रयं भवेत् । चतुर्विंशतिभिः ताभिः रक्तिभिः रत्नटङ्कः चतुर्भिः टङ्कैः सदा स्वर्णविद्रुमयोः तोलः स्यात् । एकरक्तिमितस्य एकस्यैव सुविस्तृतदलस्य वज्रस्य मूल्यं पञ्चसुवर्णकं भवति । यदि रक्तिकादलविस्तारात् श्रेष्ठं, तदा पञ्चगुणं भवति। किञ्च यथा यथा न्यूनं तथा तथा हीनमूल्यं भवेत् । अत्र अष्टरक्तिकः माषः भवेत् । दशमाषः सुवर्णकः भवति । राजताशीतिकर्षकं तत् स्वर्णस्य पञ्चमूल्यं भवति । वज्रं यथा गुरुतरं तन्मूल्यं रक्तिवर्गतः भवतीति बोध्यम् । चिपिटस्य तृतीयांशहीनं प्रकीर्तितम्। शर्कराभस्य उत्तमं मूल्यम् अर्द्धम् ईरितम् । द्वे वज्रे रक्तिकायाः तत् अर्द्धं मूल्यम् अर्हतः । यथागुणैः मध्याः हीनाः बहवः हीरकाः नाम वज्रमणयः तदर्धमर्हन्ति ।

वर्गरक्तिषु पृथक् कलानां नवकं तथा अंशपञ्चकं सन्धार्यम्। तत्र पूर्वं त्रिंशद्भिः भजेत् । ततः लब्धं कलासु संयोज्यम् । कलानां षोडशांशकैः मुक्तानां यथा हीनमध्योत्तमं मूल्यं कल्पयेत् । मुक्तारक्तिवर्गशते सहस्रादधिके शते कलात्रिंशतकं त्यक्त्वा शेषात् मूल्यं प्रकल्पयेत् । ह्रसः सुविस्तृतदलस्य वज्रस्य शतात् रक्तिवर्गात् विंशति रक्तिकाः विस्तृतस्य चिपिटस्यापि वज्रस्य प्रतिशतात् ऊर्ध्वं पञ्चाशत् रक्तिकाः शर्कराभस्य एकतः पञ्चाशत् वा चत्वारिंशत् रक्तिकाः ह्रासयेत्। कृष्णैः रक्तैश्च विन्दुभिर्युतं रत्नं सदा न धारयेत् । रक्तिमात्रं गारुत्मतं माणिक्यञ्च रत्नम् उत्तमं चेत् तदा सुवर्णं मूल्यम् अर्हतः । यथा रक्तिः तथा गुरुः मूल्यं भवेत् । रक्तिमात्रः पुष्परागः नीलः स्वर्णार्धमर्हतः चलत्तिसूत्री वैढूर्यः उत्तमं वैढूर्यः उत्तमं मूल्यमर्हति । तोलकमितं प्रवालं स्वर्णस्य अर्द्धं मूल्यम् अर्हति । गोमेदः अत्यल्पमूल्यः, यतः उन्मानं मूल्यं न अर्हति ।। वज्रमणेः विहाय स्वल्परत्नानां संख्यातः मूल्यं स्यात् । अत्यन्तरमणीयानां दुर्लभानां च कामतः तथा अतिगुणशालिनां मानेन मूल्यं न भवेत्। मौक्तिकरक्तिजः वर्गः व्यङ्घिः चतुर्दशहतः चतुर्विंशतिभिः भक्तः लब्धात् मूल्यं प्रकल्पयेत् । उत्तमं तु सुवर्णार्धमूनमूनं यथागुणम् । रक्तं पीतं तथा सितं मौक्तिकं वर्तुलं चेत् उत्तमम् । चिपिटाकारं च शर्कराभं मध्यमम् अन्यत् मध्यमम् । रत्ने स्वाभाविकाः दोषाः सन्ति । धातुषु कृत्रिमाः। अतः धातून् सम्परीक्ष्य बुधः तन्मूल्यं कल्पयेत् । धातवः सप्त । यथा- सुवर्णं, रजतं, ताम्रं, वङ्गं, सीसं, रङ्गकं, लोहम् । एतेषामन्यं सङ्करा: भवन्ति । यथा पूर्वं तु श्रेष्ठं स्यात् स्वर्णं तु श्रेष्ठतरं मतम्। कांस्यं वङ्गताम्रभवं पित्तलं ताम्ररङ्गकम् । स्वर्णं मानसमं तनु स्यात् । परे पृथुलाः स्युः । यदा द्वयोः समे खण्डे एकेन छिद्रेण समाकृष्टो भवतः, तदा निर्दुष्टस्य धातोः सूत्रं मानसमं भवेत् । यन्त्रशस्त्रास्त्ररूपं यत् अयः महामूल्यं भवेत् । किञ्च स्वर्णस्य मूल्यकं षोडशगुणं रजतं भवेत् । प्रायः असीतिगुणं ताम्रं रजतमूल्यं स्यात्। सार्द्धगुणं वङ्गं ताम्राधिकं तथा परे वङ्गात्रङ्गसीसे ताम्रात् द्वित्रिगुणे लोहं तु ताम्रात् षड्गुणम् । एतत् मूल्यं विशिष्टं हि प्राक् मूल्यकल्पनम् उक्तम् । सुशृङ्गवर्णा शुदुधा बहुदुग्धा सुवत्सका तरुणी अल्पा वा महती गौः मूल्याधिक्याय भवेत् । पीतवत्सा प्रष्ठदुग्धा तत् मूल्यं पलं राजतम्, अजायाश्च मूल्यं गवादर्धं मेष्याः मूल्यम् अजादर्धकं स्यात् । दृढस्य युद्धशीलस्य मेषस्य मूल्यं पलं राजतं गवां तु उत्तमं मूल्यं दश वा अष्टौ राजतं फलम् । मेष्याः अवेश्चापि उत्तमं मूल्यं राजतं

पलम्। महिष्याः उत्तमं मूल्यं सार्द्धगुणं गवां समम्। सुशृङ्गवर्णबलिनः वोढुः शीघ्रगमस्य अष्टतालवृषस्य मूल्यं षष्टिपलं स्मृतम् । महिषस्य उत्तमं मूल्यं सप्त च अष्टौ पलानि। गजाश्वयोः द्वित्रिचतुःसहस्रं वा श्रेष्ठं मूल्यम् । उष्ट्रस्य उत्तमं मूल्यं माहिषसममीरितम्। एकेन अह्ना योजनानां शतं गन्ता अश्वः उत्तमः । तस्य उत्तमं मूल्यं सुवर्णानां पञ्चशतानि भवति । यः उष्ट्रः त्रिंशद्योजनगन्ता सः श्रेष्ठः । तस्य मूल्यं पलानां राजतं शतं परिकीर्तितम् । यः गजः उच्चेन बलेन युद्धेन मदेन अप्रतिमः । तस्य मूल्यं निष्काणां द्विसहस्रं प्रकीर्तितम् । चतुर्माषमितं स्वर्णं निष्क इति अभिधीयते । गजमौल्ये पञ्चरक्तिमितः माषः प्रकीर्तितः। भुवि यद्यत् अप्रतिमं स्यात् तत्तद्रत्नभूतम्। अतः यथादेशं यथाकालं सर्वस्य मूल्यं कल्पयेत् । गुणहीनस्य च व्यवहारक्षमस्य मूल्यं न भवति । किञ्च बुधैः सर्वस्मिन् मूल्यकल्पने लोकात् वस्तुजातस्य नीचमध्योत्तमत्वं सर्वदा चिन्तनीयम् । विक्रेत्रुक्रेत्रुतः राजभागः शुल्कम् उदाहृतम् । शुल्कदेशाः हट्टमार्गाः करसीमाः प्रकीर्तिताः । नृपैः वस्तुजातस्य प्रयत्नतः च एकवारं शुल्कं ग्राह्यम् । क्वचित् राष्ट्रेच्छलात् असकृत् शुल्कं नैव ग्राह्यम् । राजा विक्रेतुः क्रेतुः वा मूल्यविरोधकं यथा तथा द्वात्रिंशांशं विंशांशं वा षोडशांशं शुल्कं हरेत् । विक्रेतृतः हीनसममूल्यात् शुल्कं न हरेत् । नृपः लाभं दृष्ट्वा क्रेत्रुतश्च सदा शुल्कं हरेत् । सदा भागमिच्छुः पूर्वं बहुमध्याल्पफलितां मानमितां भुवं ज्ञात्वा पश्चात् भागं विकल्पयेत्। यथा सः नष्टः न भवेत् कर्षकात् तथा भागं हरेत् । मालाकार इव अङ्गारकारवत् भागः न ग्राह्यः । बहुमध्याल्पफलतः तारतम्यं विमृश्य यतः राजभागादिव्ययतः द्विगुणं लभ्यते, तत्तु कृषिकृत्यं श्रेष्ठम् । तत् न्यूनं नृणां दुःखदम् । राजा सदा तदा गवापि काकूपमातृकात् देवमातृकात् नदीमातृकात् देशात् तृतीयांशं चतुर्थांशं तथा अर्धांशं अनुक्रमतः तद्वत् ऊषरात् वा पाषाणादि समाकुलात् देशाच्च षष्ठांशं फलं हरेत् । यतः कर्षकात् रजतशतकर्षमितः राजभागः लभ्यते, नृपः तस्मै विंशांशम् उत्सृजेत् । खनिजात् व्ययशेषतः स्वर्णात् अर्धं रजतात् तृतीयांशं ताम्रतः चतुर्थांशं लोहात् वङ्गात् सीसकात् च षष्ठांशं रत्नानां अर्धं , क्षाराणाम् अर्धं कर्षकादेः लाभाधिक्यं दृष्ट्वा त्रिधा पञ्चधा सप्तधा वा दशधा कृत्वा यथा फलं हरेत् । प्रतिकर्षकाय स्वचिह्नितं भागपत्रं दद्यात् । वा ग्रामभूभागं नियम्य, एकस्मात् धनिकात् हरेत् । तत्प्रतिभुवं गृहीत्वा वा तत्समं धनं प्राक्मासि

मासि ऋतौ ऋतौ विभागशः हरेत् । षोडशद्वादशदशष्टांशतः स्वांशात् षष्ठांशभागेन ग्रामपान् अधिकारिणः वा सन्नियोजयेत् । नृपः कुटुम्बार्थात् गवादिदुग्धात् फलं न हरेत् । उपभोगे धान्यवस्त्रं क्रेतृतः फलं न आहरेत् । नृपः वार्धुषिकात् कौसीदात्द्वात्रिंशाशं हरेत् । कृष्टभूमेरिव गृहाद्याधारभूशुल्कम् आहरेत् । राजा आपणिकेभ्यः पण्यभूशुल्कम् आहरेत् । तथा मार्गगेभ्यः मार्गसंस्काररक्षार्थं फलं हरेत् । राजा सर्वतः रक्षणे दासवत् फलभुक् स्यात् इति समासात् कोशप्रकरणं कथितम् ।

विद्याकलानिरूपणम्

राष्ट्रशब्देन स्थावरं जङ्गमञ्चापि गीयते । यस्य यावत् राज्यम् अधीनं भवेत् तस्य तत् राष्ट्रं भवेत् । कुबेरता शतगुणेभ्यः अधिका , ईशता ततः सर्वगुणात् अधिकतरा, सा च अल्पतपसः फलं न भवत्येव । सः पृथिव्यां दीव्यति , यतः अन्यः देवः न स्मृतः । लोकः यस्य आश्रितः भवेत् प्रजा तद्वत् आचरति । अतः राष्ट्रफलं राष्ट्रकृतम् अघं सम्यक् भुङ्क्ते । यस्य राष्ट्रे लोकः स्वस्व धर्मपरः प्रवर्तते, स राजा धर्मनीतिपरः चिरं कीर्तिं च अश्नुते। यस्य भूमौ यावत् कीर्तिः तिष्ठति,तावत् सः स्वर्गे तिष्ठति । अकीर्तिः एवं नरकः, दिवि अन्यः नरकः नास्ति। नरदेहात् विना अन्यः देहः यः सः एव नरकः । आधिव्याधिस्वरूपकं महत् पापफलं विद्यात् । स्वयं धर्मपरः भूत्वा, धर्मे प्रजाः संस्थापयेत् । अतः प्रजाः प्रमाणभूतं धर्मिष्ठं अनुसरन्ति । सनातनाः ये दशधर्माः जातिधर्माः कुलधर्माः तथा मुनिप्रोक्ताः ये प्राचीनाः नूतनाः धर्माः सन्नृपैः ते धर्माः ज्ञात्वा, राष्ट्रगुप्त्यै यत्नेन सन्धार्याः । राजा धर्मसंस्थापनात् श्रियं कीर्तिं च प्रविन्दति । पुरा ब्रह्मणा कर्मभिः तत्तज्जातिः चतुर्था भेदिता । तेषां साङ्कर्यासाङ्कर्यात् तथा प्रति लोमानुलोमतः जात्यानन्त्यं तद्वक्तुं नैव शक्यते । ये जन्मना मनुष्याणां जातिभेदं मन्यन्ते, ते एव नामकर्मभिः पार्थक्यं विजानन्ति । जातिः सुसङ्ग्रहात् जरायुजाण्डजा स्वेदोद्भिज्जा उत्तमः नीचसंसर्गात् जन्मना नीचः भवेत् । नीचस्तु संसर्गात् जन्मना वा उत्तमः न भवेत्। कर्मणा उत्तम नीचत्वं गुणैः कालतः उत्तमनीचत्वं भवेत् । किञ्च विद्याकलाश्रयेणैव तन्नाम्ना जातिः उच्यते । द्विजन्मनाम् इज्याध्ययनदानानि कर्माणि । प्रतिग्रहः अध्यापनं याजनं च ब्राह्मणे अधिकम् । क्षत्रिये तु सद्रक्षणं

दुष्टनाशः स्वांशादानम् अधिकम् । विंशाकृषिगोगुप्तिवाणिज्यम् अधिकं स्मृतम् । शूद्रादेः दानं सेवा तथा नीचकर्म प्रकीर्तितम् । क्रियाभेदैः तु सर्वेषां भृतिवृत्तिः अनिन्दिता। यथा मन्वाद्यैः सीरभेदैः ब्राह्मणादिषु कृषिः प्रोक्ता । ब्राह्मणैः षोडशगवंसीरं तथा परैः चतुरूनम् । तथा अन्त्यजैः भूमार्दवं दृष्ट्वा द्विगवं सीरं कर्तव्यम् । ब्राह्मणेन विना अन्येषां भिक्षावृत्तिः विगर्हिता । द्विजन्मना विविधैः विधिचोदितैः तपोविशेषैः च व्रतैः सरहस्यः वेदः कृत्स्नः अधिगन्तव्यः । यः अधीतविद्यः सकलः सः सर्वेषां गुरुः भवेत् । अनधीतः जात्या गुरुः भवितुं न अर्हति । विद्याः कलाश्च अनन्ताः । यतः ताः संख्यातुं नैव शक्यते । तत्र मुख्याः विद्याः द्वात्रिंशत् तथा कला चतुःषष्ठि स्मृताः । यत् यत् कर्म सम्यक् वाचिकं तत्तत् विद्याभिसंज्ञकम् । यत् मूकोऽपि कर्तुं शक्तः तत्तु कलासंज्ञं स्मृतम् । विद्यानाञ्च कलानाञ्च लक्षणं संक्षेपतः उक्तम् । विशिष्टं तु पृथक् उच्यते । नामानि पृथक् पृथक् सन्ति । ऋक्, यजुः साम, अथर्व। एते चत्वारः क्रमेण उपवेदाः । एते चत्वारः गौणा वेदाः आयुर्वेदः धनुर्वेदः, गान्धर्ववेदः, तन्त्राणि च प्रकीर्तिताः । शिक्षा, व्याकरणं,कल्पः, निरुक्तं, ज्योतिषं, छन्दः, षडङ्गानीमानि वेदानां कीर्तितानि । मीमांसा, तर्कः, सांख्यं, वेदान्तः, योगः , इतिहासाः, पुराणानि, स्मृतयः , नास्तिकं मतम्। अर्थशास्त्रं, कामशास्त्रं, शिल्पम्, अलङ्कृतिः, काव्यानि, देशभाषा, अवसरोक्तिः, याचनं मतं देशादिधर्माः एताः द्वात्रिंशत् विद्याभिः संज्ञिताः विख्याताः । ऋगादिषु मन्त्रब्राह्मणयोः वेद नाम प्रोक्तम् । यस्य उच्चारात् जपहोमार्चनं देवताप्रीतिदं भवेत् , तत् मन्त्रसंज्ञं च तद्विनियोगिब्राह्मणम् । यत्र ऋग्रूपाः ये मन्त्राः पादशः अर्धर्चशः वा येषां होत्रं, यत्र वा समाख्यानं, सः ऋग्भागः । यत्र मन्त्राः प्रश्लिष्टं पठिताः तथा वृत्तगीतिविवर्जताः , यत्र च आध्वर्यवं कर्म, यत्र च मन्त्रब्राह्मणयोरेव त्रिगुणं पठितं, सः यजुर्वेदः उच्यते । शस्त्रादेः यज्ञे यस्य उद्गीथं भवति तत् सामसंज्ञिकं कथितम् । उपास्योपासनात्मकः अथर्वाङ्गिरसः नाम । इति वेदचतुष्कं समासतः उद्दिष्टम् । यस्मिन् आयुः विन्दति आकृत्या औषधिहेतुतः सम्यक् वेत्ति, सः ऋग्वेदोपवेदः आयुर्वेदसंज्ञकः । येन युद्धशस्त्रास्त्रव्यूहादिरचनाकुशलो भवेत् , सोऽयं यजुर्वेदोपवेदः धनुर्वेदः भवति । येन उदात्तादिधर्मैः तथा तन्त्रीकण्ठोत्थितैः सतालैः सदा गानविज्ञानं, स एव गान्धर्वो वेद इति । यत्र विविधानामुपास्यानां मन्त्राणां सोपसंहाराः षट् प्रयोगाः धर्मनियमैः सह सुविभेदतः कथिताः । स एव अथर्वणं

उपवेदः तन्त्रस्वरूपः एव ।

यच्च स्वरतः तालतः स्थानात् प्रयत्नानुप्रदानतः सवनाद्यैः वर्णानां पाठशिक्षणात् सा शिक्षा । यत्र ब्राह्मणशेषतः यज्ञानां प्रयोगः उक्तः, सः श्रौतकल्पः विज्ञेयः, तथा इतरः स्मार्तकल्पः । यत्र शब्दाः प्रत्ययाद्यैः धातुसन्धिसमासतः बहुलिङ्गतः व्याकृतः, एतद्धि व्याकरणम् । यत्र शब्द निर्वचनं वाक्यार्थैकार्थसङ्ग्रहः तत् निरुक्तं वेदाङ्गं समाख्यानात् श्रोत्रसंज्ञकम् । येन नक्षत्रग्रहगमनैः संहिताभिः होराभिः गणितैः कालः विधीयते, तत् हि ज्योतिषम् । म्यरस्तजभ्रगैर्लान्तैः पद्यं यत्र प्रमाणतः कल्प्यते , तत् छन्दःशास्त्रं तच्च वेदानां पादरूपधृक् । यत्र वेदवाक्यानां विधिभेदतः अर्थकल्पना व्यवस्थिता, सा एव मीमांसा। यत्र च भावानामभावपदार्थानां प्रत्यक्षादि प्रमाणतः सविवेकः तर्कः। यच्च कणादादिमतं सैव युक्तिवादः कीर्तितः । पुरुषः अष्टौ प्रकृतयः। षोडशविकाराः तत्त्वादिसंख्या वैशिष्ट्यात् सांख्यमित्यभिधीयते । एकं किञ्चन ब्रह्म स्यात् । इह नाना नास्ति सर्वं मायिकमज्ञानात् भाति इति वेदान्तिनं मतम् । यस्मिन् ध्यानसमाधितः प्राणसंयमनादिभिः चित्तवृत्तिनिरोधस्तु तत् योगशास्त्रं विज्ञेयम् । यस्मिन् एकराजकृत्यभिषादितः यत् प्राग्वृत्तस्य कथनं, सः इतिहासः स्यात् । स एव हि पुरावृतः । यस्मिन् सर्गः प्रतिसर्गः वंशः मन्वन्तराणि च तथा वंशानुचरितं तत् पुराणं विकीर्तितम् । यत्र वेदाविरोधकं वर्णादिधर्मस्मरणं च अर्थशास्त्राणां कीर्तनं, सा स्मृतिः प्रकीर्तिताः । यत्र युक्तिर्बलीयसी, सर्वं स्वाभाविकं मतं कस्यापि कर्ता ईश्वरः न वेदश्च न, तत् नास्तिकम् । यत्र श्रुतिस्मृत्यविरोधेन राजवृत्तादिशासनं सुयुक्त्यार्थार्जनं तत् अर्थशास्त्रम् उच्यते । पुंसां शशादिभेदतः तथा अनुकूलादिभेदतः स्त्रीणां पद्मिन्यादि प्रभेदेन तथा स्वीयादिभेदतः यत्र उभयोः सत्त्वादेः लक्ष्म तत् कामशास्त्रम् । यत्र प्रासादप्रतिमारामगृहावाप्यादिसत्कृतिः कथिताः महर्षिभिः, तत् शिल्पशास्त्रम् उक्तम् । समन्यूनाधिकत्वेन सारूप्यादि प्रभेदतः अन्योन्यगुणभूषा सा अलङ्कृतिः वर्ण्यते । सरसालङ्कृतादुष्टशब्दार्थं तत् काव्यमेव पद्यादीनां भेदकः विलक्षणचमत्कारबीजम् । लोकसङ्केततः अर्थानां सुग्रहा वाक् तु दैशिकी भवति । कौशिकशास्त्रीयसङ्केतैः विना कार्यसाधिका यथा कालोचिता या वाक् सा अवसरोक्तिः स्मृता । यत्र सदा अदृश्यः ईश्वरः जगतः कारणमस्ति तथा श्रुतिस्मृती विना धर्मधर्मौ स्तः , तत् यावनम्। यत्र च श्रुत्यादिभिन्नः धर्मः अस्ति तत् यावनं मतम् । यः देशे देशे कुले कुले लोकैः

कल्पिता श्रुतिमूलः वा अमूलः सदा धृतः सः देशादिधर्मः ज्ञेयः । विद्यानां पृथक् पृथक् लक्षणं सम्प्रकाशितं, केवलं कलानां पृथक् नाम लक्ष्म इह न विद्यते । पृथक् पृथक् क्रियाभिः कलाभेदस्तु जायते । यां यां कलां समाश्रित्य तन्नाम्ना जातिः उच्यते। हावभावादिभिः संयुक्तं नर्तनं तु कला स्मृता । अनेकवाद्यकरणे ज्ञानं तत् वादने कला स्मृता । स्त्रीपुंसोः वस्त्राणामलङ्काराणाञ्च सन्धानं कला स्मृता । तथा च अनेकरूपाणाम् आविर्भावाणां कृतौ ज्ञानं कला स्मृता । शय्यास्तरणसंयोगपुष्पादिग्रथनं कला स्मृता। तथा द्यूताद्यनेकक्रीडाभिः रञ्जनं कला स्मृता । अनेकासनसन्धानैः रतेः ज्ञानं कला स्मृता। तथा एतत् कलानां सप्तकं गान्धर्वे समुदाहृतम् । मकरन्दास्वादीनां मद्यादीनां कृतिः कला । तथा शक्यस्य गूढं यथा तथा हतौ शिरासुव्रणानां व्यधे च ज्ञानं कला भवति । हिङ्ग्वादिरससंयोगात् अन्नादि पचनं कला। वृक्षादिप्रसवारोपपालनादि कृतिः कला । पाषाणधात्वादि दृतिस्तद्भस्मीकरणं कला। यावदिक्षुविकाराणां कृतिज्ञानं कलास्मृता धात्वौषधीनां संयोगक्रियाज्ञानं कला स्मृता । धातुसाङ्कर्यपार्थक्यकरणं तु कला स्मृता। धात्वादीनां संयोगपूर्वविज्ञानं कला स्मृता । क्षारनिष्कासनं ज्ञानं कला संज्ञं तु तत् स्मृतम् । एतत् हि कला दशकम् आयुर्वेदागमेषु च वर्णितम्। पदादि न्यासतः शस्त्रसन्धानविक्षेपः कला तथा सन्ध्याघातकृष्टिभेदैः मल्लयुद्धं कला । मल्लानाम् अशस्त्रं यत् बाहुयुद्धं तत् मुष्टिभिः स्मृतम् । तस्य मृतस्य स्वर्गः तथा यशश्च इह न विद्यते । रिपोः बलदर्पविनाशान्तं नियुद्धं कस्य यशसे नासीत् । अपि तु सकलसमाजहेतवे भवति। अतः प्राणान्तं बाहुयुद्धं मुष्टिप्रहारं कुर्यात् । कृतप्रतिकृतैः चित्रैः सुसङ्कटैः बाहुभिः सन्निपातावघातैश्च तथा प्रमादोन्मथनैः यत्कृतं तन्निपीडनं ज्ञेयम् । तन्मुक्तिस्तु प्रतिक्रिया सा कला। अभिलक्षिते देशे यन्त्राद्यस्त्रनिपातनं तथा वाद्यसङ्केततः व्यूहरचनादि कला स्मृता । गजाश्वरथगत्या युद्धसंयोजनं कला । एतत् कालपञ्चकं हि धनुर्वेदागमे स्थितम् । विविधासनमुद्राभिः देवतातोषणं कला । सारथ्यं गजाश्वादेश्च गतिशिक्षा कला स्मृता। मृत्तिकाकाष्ठपाषाणधातुभाण्डादि सत्क्रिया कला, चित्राद्यालेखनं कला । एतत् कलाचतुष्कं तु पृथक् उक्तम् । तडागवापीप्रासाद समभूमिक्रिया कला । तथा घड्याद्यनेकयन्त्राणां वाद्यानां तु कृतिः कला । हीनमध्यादि संयोगवर्णाद्यैः रञ्जनं कला । जलवाय्वाग्निसंयोगनिरोधैः क्रिया कला। नौकारथादि

यानानां कृति ज्ञानं कला स्मृता । सूत्रादिरज्जुकरणाविज्ञानं तु कला स्मृता । अनेकतन्तुसंयोगैः पटबन्धः कला स्मृता । रत्नानाञ्च वेधादिसदसज्ज्ञानं कला स्मृता। स्वर्णादीनां याथात्म्यविज्ञानं कला स्मृता। कृत्रिमस्वर्णरत्नादिक्रियाज्ञानं कला स्मृता। स्वर्णाद्यलङ्कारकृतिः लेपादिसत्कृतिः कला । चर्मणां मार्दवादिक्रियाज्ञानं कला स्मृता। पशुचर्मणाम् अङ्गेभ्यः निर्हारस्य क्रियायां ज्ञानं कला । दुग्धदोहादीनां घृतान्तं विज्ञानं कला स्मृता । कञ्चुकादीनां सीवने विज्ञानं कलात्मकं जले बाह्वादिभिः तरणं कलासंज्ञं स्मृतम् गृहभाण्डादेः मार्जने विज्ञानं तु कला स्मृता । वस्त्र सम्मार्जनं क्षुरकर्म च उभे हि कले । तिलमांसादि स्नेहानां निष्कासने कृतिः सीराद्याकर्षणे ज्ञानं वृक्षादीनामारोहणे यत् ज्ञानं सा कला । मनोऽनुकूलसेवायाः कृतौ ज्ञानं कला स्मृता। तथा वेणुतृणादि पात्राणां कृतिज्ञानं कला स्मृता । काचपात्रादीनां करणे विज्ञानं कला स्मृता । तथा जलानां संसेचनं संहरणं कला स्मृता । लोहाभिसारशास्त्रास्त्रकृतिज्ञानं कला । गजाश्ववृषभोष्ट्राणां पल्याणादिक्रिया कला । शिशोः संरक्षणे क्रीडने च ज्ञानं कला । तथा अपराधिजने सुयुक्ताडनज्ञानं कला । नानादेशीयवर्णानां सुसम्यक् लेखने कला । तथा ताम्बूलरक्षादिकृतिविज्ञानं कला स्मृता । कलासु आशुकारित्वम् , आदानं, चिरक्रियाप्रतिदानं द्वौ गुणौ ज्ञेयौ । द्वे कले परिकीर्तिते । एताः चतुःषष्ठिकलाः संक्षेपेण निदर्शिताः । यः मानवः यां यां कलां समाश्रित्य निपुणः निश्चितं भवति । असौ सम्यक् नैपुण्यकरणे तां तां कलां कुर्यात्।

लोकधर्मनिरूपणम्

ब्रह्मचारी, गृहस्थः , वानप्रस्थः तथा यतिः एते चत्वारः आश्रमाः ब्राह्मणस्य सदैव । अन्येषां क्षत्रियाणां विशां शूद्राणाञ्च अन्त्येन हीनाः वेदितव्याः । विद्यार्थं ब्रह्मचारी सर्वेषां पालने गृही, सन्दमने वानप्रस्थः मोक्षसाधने सन्यासी स्यात् । याः वर्णाश्रमजातयः अन्यथा वर्तयन्ति ताः दण्ड्याः । यदि राज्ञा उपेक्षितानि च दण्डतः अतिशिक्षितानि कुलानि अकुलताम् अकुलानि कुलीनतां यान्ति । स्त्री शूद्रस्तु जपं तपः तीर्थसेवां वैराग्यं मन्त्रसाधनं देवपूजां नैव कुर्यात् । स्त्रीणां पतिं विना पृथक् त्रिवर्गाणां साधनं न विद्यते । स्त्री पत्युः पूर्वं समुत्थाय देहशुद्धिं विधाय शयनीयानि

उत्थाप्य, मार्जनैः लेपनैश्च वेश्म विशोधनं कृत्वा सानलं यवसाङ्गणं प्राप्य, यज्ञपात्राणि शोधयेत् । तानि च स्निग्धानि उष्णेन वारिणा प्रौक्षणीयानि यथास्थाने प्रकल्पयेत् । तानि शोषयित्वा पात्राणि पूरयित्वा तु धारयेत् । महानसस्य सर्वशः पात्राणि बहिः प्रक्षाल्य, मृद्भिः चुल्लीं शोधयेत् । तत्र सेन्धनम् अग्निं न्यसेत् । कृतपूर्वाह्णकृत्या इयं नियोगपात्राणि रसान्नद्रविणानि च स्मृत्वा श्वशुरौ अभिवादयेत् । ताभ्यां भर्त्रा पितृभ्यां वा भ्रात्रु मातुलबान्धवैः प्रदत्तानि वस्त्रालङ्काररत्नानि धारयेत् । भार्या मनोवाक्कर्मभिः शुद्धा स्वच्छा पतिदेशानुवर्तिनी, भर्तुः छाया इव अनुगता हितकर्मसु सखी इव सदा दिष्टकार्येषु दासी इव भवेत्। ततः सा अन्नसाधनं कृत्वा पतये विनिवेद्य वैश्वदेवोद्धृतैः अन्नैः भोजनीयान् भोजयेत् । पतिञ्च तदनुज्ञाता आत्मना शिष्टम् अन्नाद्यं भुक्त्वा सदा आयव्ययचिन्तया अहः शेषं नयेत् । साध्वी पुनः सायं पुनः प्रातः गृहशुद्धिं विधाय, कृतान्तसाधना सभृत्यं पतिं भोजयेत् । ततः स्वयं भुक्त्वा नाति तृप्ता गृहनीतिं विधाय शयनम् आस्तृत्य पतिं साधु परिचरेत् । पत्यौ सुप्ते तद्गतमानसा तत् अध्यास्य अनग्ना अप्रमत्ता निष्कामा जितेन्द्रिया च शयीत । उच्चैः न, परुषं न, बह्वाहूतम् अप्रियं केनचित् न विवदेत् । अप्रलापविवादिनी न भवेत् । अस्य व्ययशीला न धर्मार्थविरोधिनी च न स्यात् । साध्वी प्रमादोन्मादरोषेर्ष्यावचनानि अतिनिन्दितां पैशुन्यहिंसाविषयमोहाहङ्कारदर्पतां नास्तिक्यसाहसस्तेयदम्भान् विवर्जयेत्। एवं परमदैवतं पतिं परिचरन्ती सा यशस्यं परत्र सलोकताम् एषा याति एव । योषितः नित्यकर्म उक्तम्। अथ नैमित्तिकम् उच्यते । एषा रजसः दर्शनात् सर्वमेव परित्यजेत्। सर्वैः अलक्षिता एकाम्बरा कृशादीना स्नानालङ्कारवर्जिता लज्जिता शीघ्रम् अन्तर्गृहे वसेत् । अप्रमत्ता भूमौ स्वपेत्। एवम् अहस्त्रयं क्षपेत् सा त्रिरात्र्यन्ते रवौ अभ्युदिते सचेला स्नायीत । भर्तृवदनं विलोक्य, धर्मतः शुद्धा भवति । पुनः कृतशौचा पूर्ववत् कर्म समाचरेत्। द्विजस्त्रीणाम् अयं धर्मः अन्यासामपि प्रायः इष्यते । ताः कृषिपण्यादि पुंकृत्येषु प्रसाधिकाः भवेयुः । पतिः यथा स्वायत्तः भवेत् तथा सङ्गीतैः मधुरालापैः मायाभिः कामकेलिभिः वै आचरेयुः। भर्तरि मृते सति सङ्गच्छेत् वा भर्त्रुः व्रतं पालयेत्। ब्रह्मचर्ये स्थिता सती परवेश्मरुचिः न स्यात् । प्रोषितभर्त्रुका नित्यं मण्डनं वर्जयेत् । तथा देवताराधनपरा भर्तृहिते रता च तिष्ठेत् । किञ्च मङ्गलार्थानि

किञ्चित् आभरणानि धारयेत् । भर्तृसमः नाथः नास्ति । भर्त्रुसमं सुखं नास्ति। विसृज्य धनसर्वस्वं वै स्त्रियाः शरणं भर्ता । पिता मितं भ्राता मितं सुतश्च मितं ददाति। अतः का नारी अमितस्य प्रदातारं भर्तारं न पूजयेत् ? वर्णः चतुर्थोऽपि शूद्रः वर्णत्वात् वेदमन्त्रैः स्वधास्वाहावषट्कारादिभिः विना केवलं नमोऽन्तैः पुराणाद्युक्तमन्त्रैः धर्मं केवलं कर्म अर्हति । विप्रविवाहितासु प्रजाताः विप्रवत्, क्षत्रियपरिणीतासु प्रजाताः क्षत्रवत् , तथा वैश्याविवाहितासु प्रजाताः वैश्यवत् कर्म कुर्युः । क्षत्रविप्राभ्यां वैश्यासु शूद्रासु जातः शूद्रवत् अधमात् उत्तमायां जातः शूद्रादपि अधमः स्मृतः । सः शूद्रादनुनाममन्त्रेण सर्वदा सत्कार्यं कुर्यात् । एकत्र ससङ्करा: चतुर्वर्णाः एकत्र यावनाः ते वेदभिन्नप्रमाणाः प्रत्यगुत्तरवासिनः । तत् आचार्यैः तत् हितार्थकं शास्त्रञ्च निर्मितम् । तथा व्यवहाराय उभयोः अविवादिनी नीतिश्च निर्मिता । कदाचित् बीजानां माहात्म्यात् क्वचित् क्षेत्राणां माहात्म्यतः नीचोत्तमत्वं कदाचिच्च क्षेत्रबीजतः माहात्म्यात् श्रेष्ठत्वं भवति । विश्वामित्रः वसिष्ठः मतङ्गः नारदादयश्च तपोविशेषैः उत्तमत्वं संप्राप्ताः जातितः न । यः पूर्वैः स्वस्वजात्युक्तधर्मः आचरितः सा जातिः सदा तमाचरेत्। अन्यथा नृपैः दण्ड्या स्यात् । पृथक् चिह्नैः जातिवर्णाश्रमान् सर्वान् सुलक्षयेत् । धातुकाराणां यन्त्राणि वीक्ष्य सदा संरक्षेत् । कार्यनुमानतः राष्ट्रे कारुशिल्पिगणान् रक्षेत् । अधिकान् कृषिकृत्ये वा भृत्यवर्गे नियोजयेत् । स्वर्णकारादयस्तु चौराणां पित्रुभूताः । अतः ते ग्रामात् पृथक् रक्षेत् । तस्मिन् तु गञ्जागृहं मद्यपान् रक्षेत् । राष्ट्रे कश्चन दिवा मद्यपानं न तु कुर्यात् । नृपः ग्रामे ग्राम्यान् वने, वन्यान् वृक्षान् संरक्षयेत्। तेषु उत्तमान् विंशतिकरैः मध्यमान् तिथिहस्ततः सामान्यान् दशहस्तैश्च कनिष्ठान् पञ्चभिः करैः अजाविगोशकृद्भिः वा जलैः मासैश्च पोषयेत् । क्षीरवृक्षाः, अश्वत्थाः, वटाः, चिञ्चाः, चन्दनाः, जम्भलाः, कदम्बाः, अशोकाः, वकुलाः, बिल्वाः, अमृताः, कपित्थकाः, राजादनाः, आम्राः, तूदकाष्ठाः, अम्लाः, चम्पकाः, नीपाः, कोकाम्राः, सरलाः, दाडिमाः, अक्षोटाः, भिस्मटाः, शिम्भवः, वदराः, निम्बाः, जम्बीराः, क्षीरिकाः, खर्जुराः, रुचिराञ्जनाः, फल्गवः, तापिच्छाः, सिम्भलाः, लवली, धात्री, क्रमुक, मातुलङ्गक, नारिकेलः, रम्भाद्याः, अन्ये ये सत्फलाः दृमाः सुपुष्पाश्चैव वृक्षाः तान् ग्रामाभ्यर्णे नियोजयेत्।

वामभागे अथवा वासगृहे शुभम् उद्यानं कुर्यात् धर्मान्ते सायं प्रातश्च शीतकाले दिनान्तरे वसन्ते पञ्चमे अह्नस्तु सेच्याः वर्षासु क्वचिदपि न सेव्येति । फलनाशे कुलुत्थैः माषैः मुद्गैः यवैः तिलैः श्रुतशीतपयः सेकः सर्वदा फलपुष्पाय भवति । आविकाजशकृच्चूर्णं यवचूर्णं तिलानि गोमांसमुदकञ्चेति सप्तरात्रं निधापयेत्। उत्सेकः सर्ववृक्षाणां फलानां पुष्पाणाञ्च वृद्धिः भवति । ये वृक्षाः कण्टकिनः अपरे खदिराद्याः ते आरण्यकाः विज्ञेयाः । तत्र तेषां नियोजयेत् । खदिराश्मन्तशाकाग्नि मन्थश्योनाकबब्बुलाः, तमालशालकुटजधवार्जुनपलाशकाः, सप्तपर्णशमीतुन्न-देवदारुविकङ्कताः, करमर्देङ्गुदीभूर्जविषमुष्टिकरीरकाः शल्लकी काश्मरी पाठातिन्दुकः बीजहारकः हरीतकी भल्लातः शम्पाकः अर्कः पुष्करः अरिमेडः पीतहः शाल्मलिः विभीतकः नखेलः महावृक्षः च तथा मधुकादयः अपरे ये वृक्षाः याश्च प्रतानवत्यः स्तम्बिन्यः गुल्मिन्यः ते ग्राम्याः चेत्, ग्रामे चेत् वन्याः तर्हि वने प्रयत्नतः नियोज्याः। कूपवापीपुष्करिण्यः तडागाः तथा कार्याः यथा खातात् द्वित्रिगुणविस्तारपदधानिकाः सुगमाश्च अनेकाः स्युः । राष्ट्रे विपुलं जलं स्यात् । नदीनां विविधाः सुमनोहराः सेतवः कार्याः च नदीषु पारगाणि नौकादिजलयानानि रक्षणीयानि यः देवः यज्यातिपूज्यः तद्विद्यायाश्च यः गुरुः तज्जातिगृहपङ्क्तिमुखे तत् आलयानि न्यसेत् । शृङ्गाटके वा ग्राममध्ये विष्णोः शङ्करस्य गणेशस्य रवेश्च देव्याः क्रमतः प्रासादान् न्यसेत् । मेर्वादि षोडशविधलक्षणान् सुमनोहरान् वर्त्तुलान् चतुरस्रान् वा यन्त्राकारान् समण्डपान् प्राकारगोपुरगणयुतान् द्वित्रिगुणोच्छ्रितान् यथोक्तान्तः सुप्रतिमान् जलमूलान् विचित्रितान् प्रासादान् न्यसेत् । सहस्रशिखरः सपादशतभूमिकः सहस्रहस्तविस्तारोच्छ्रायः मेरुसंज्ञकः स्यात् । अपरे मन्दरादयः ततः अष्टांशहीनाः । मन्दरः, ऋक्षमाली, द्युमणिः , चन्द्रशेखरः, माल्यवान्, पारियात्रः, रत्नशीर्षः, धातुमान्, पद्मकोशः, पुष्पहासः , श्रीकरः, स्वस्तिकाभिधः, महापद्मः , पद्मकूटः तथा विजयः इति प्रसिद्धाः षोडशः। तत् मण्डपः तत्तुल्यः पादन्यूनोच्छ्रितः पुरः । तेषु स्वाराध्यदेवताध्यानैः प्रतिमाः योजयेत्। ध्यानयोगस्य संसिद्ध्यै प्रतिमाकारकः मर्त्यः यथा ध्यानरतः भवेत् तथा प्रतिमालक्षणं स्मृतम् । तथा अन्येन मार्गेण प्रत्यक्षेणापि न खलु । प्रतिमासैकती पैष्टी लेख्या लेप्या मृण्मयी वार्क्षी पाषाणधातूत्था च यथोत्तरा स्थिरा ज्ञेया । यथोक्तावयवैः पूर्णा सुमनोहरा

च पुण्यदा । अन्यथा आयुर्धनहरा नित्यं दुःखविवर्धिनी । देवानां प्रतिबिम्बानि श्रेयस्कराणि च कुर्यात् स्वर्ग्याणि च । मानवादीनां अशुभानि अस्वर्ग्याणि चेति । तद्बिम्बं मानतः अधिकं हीनं वा रम्यं न उच्यते । अलक्षणं देवबिम्बं नृणां श्रेयस्करम्। किन्तु सलक्षणं मर्त्यबिम्बं सदा न हि श्रेयस्करम् । देवप्रतिमा त्रिधा भवन्ति । सात्विकी राजसी तामसी चेति । यत्र विष्ण्वादीनां या योग्या तादृशी पूज्या कार्या। या योगमुद्रान्विता स्वस्था वराभयकारान्विता देवेन्द्रादिस्तुतनुता सा सात्त्विकी प्रकीर्तिता। या वाहनस्था तिष्ठन्ति नानाभरणभूषिता तथा शस्त्रास्त्राभयकरा राजसी स्मृता । या शस्त्रास्त्रैः दैत्यहन्त्री सदा उग्ररूपधरा युद्धाभिनन्दिनी सा तामसी प्रतिमा उच्यते । विष्ण्वादीनां ध्यानादिः प्रतिमानां तदङ्गानां सुविस्तरं प्रमाणं सङ्क्षेपतः उच्यते । स्वस्व मुष्टेः चतुर्थः अंशः अङ्गुलं परिकीर्तितम् । तदङ्गुलैः द्वादशाभिः तालस्य दीर्घता भवेत् । सप्तताला वामनी स्यात् । अष्टताला तु मानुषी, नवताला दैवी तथा दशतालिका राक्षसी स्मृता । अथवा देशभेदतः मूर्तीनां सप्ततालाद्युच्चता । स्त्री सदैव सप्तताला। किञ्च वामनः सप्ततालः । नरः नारायणः रामः नृसिंहः दशतालकः । बाणः बली इन्द्रः भार्गवः अर्जुनः, दशतालः स्मृतः । चण्डीभैरववैतालनरसिंहवराहकाः तथा हयशीर्षादयः क्रूराः द्वादशतालाः स्युः । पैशाची तथा राक्षसीमूर्तिः सदा षोडशताला ज्ञेया । हिरण्यकशिपुः वृत्रः हिरण्याक्षः रावणः कुम्भकर्णः नमुचिः निशुम्भः शुम्भः माहिषः तथा रक्तबीजकः एते षोडशतालाः स्युः । बालाः पञ्चतालाः तथा कुमारकाः षट् तालाः स्मृताः । कृतयुगे दशताला त्रेतायां नवतालिका, द्वापरे अष्टताला, कलौ तु सप्तताला स्मृता । नवताल प्रमाणे मुखं तालिमितं स्मृतम् । ललाटं चतुरङ्गुलं , तदधः नासा , तथैव स्यात् नासिकाधश्च हन्वन्तं चतुरङ्गुलम् ईरितम् । ग्रीवा च चतुरङ्गुला भवेत् । पुनः हृदयं तालेन परिमाणेन भवेत् तस्मादधः एकेन तालेन शोभितानाभिः कार्या। नाभेः अधः एकेन भागेन मेढ्रं भवेत्। ऊरूद्वितालौ आयातौ चतुरङ्गुले जानुनी जङ्घे ऊरुसमे कार्ये, गुल्फधः चतुरङ्गुलम् । इदं नवतालात्मकं बुधैः ऊर्ध्वमानं स्मृतम् । सर्वमानतः शिखावधि केशान्तं त्र्यङ्गुलम् । अनया दिशा सप्ताष्टदशतालिकं विभजेत् । अङ्गुल्यन्तौ बाहू चतुस्तालात्मकौ उदाहृतौ । स्कन्धादि कूर्परान्तं विंशत्यङ्गुलं उत्तमम् । कक्षायाः अधः कूर्परान्तकं त्रयोदशाङ्गुलं मध्यमान्तः अष्टाविंशत्यङ्गुलः करः स्मृतः । करतलं सप्ताङ्गुलं मध्या पञ्चाङ्गुला मता ।

अङ्गुष्ठः सार्धत्रयाङ्गुलः तर्जनीमूलपर्वभाक् पर्वद्वयात्मकः अन्यासां त्रीणि त्रीणि पर्वाणि भवन्ति। अनामा अर्द्धाङ्गुलेन च तर्जनी अङ्गुलेन हीना तथा कनिष्ठिका अङ्गुलोना प्रकीर्त्तिता । पादौ चतुर्दशाङ्गुलौ । तत्र अङ्गुष्ठः द्व्यङ्गुलः मतः, गुल्फः सार्धद्वयाङ्गुलः प्रदेशिनी तन्मिता वा द्व्यङ्गुला इतराः सार्धाङ्गुलम् । पाणिपादौ शिरोज्झितौ तथा गुल्फौ गूढौ प्रकीर्तितौ । ये ये मूर्तेः अवयवाः सदा तद्विज्ञैः प्रस्तुताः ते ते मानात् न हीनाः नाधिकाः सुशोभनाः ज्ञेयाः । किञ्च सर्वे न स्थूलाः तथा न कृशाश्चेत् सर्वमनोरमाः भवन्ति । कश्चित् लक्षे सर्वाङ्गैः सर्वरम्यः हि प्रजायते । किञ्च शास्त्रमानेन यः रम्यः अन्यः नैव मनोरमो भवति । यत्र च यस्य हृत् लग्नं तत् रम्यम् इति एकेषां मतम् । शास्त्रमानविहीनं यत् विपश्चितां तत् अरम्यम् । ललाटम् अष्टाङ्गुलं स्यात् । भ्रुवौ तावन्मात्रौ मतौ । भ्रुवोः लेखा अर्द्धाङ्गुलमध्ये धनुरिवायाता । नेत्रे च त्र्यङ्गुलायामे द्व्यङ्गुले विस्तृते शुभे भवति । नेत्रयोः तारका कृष्णरूपिणी तृतीयांशा, भ्रुवोर्मध्यं तु द्व्यङ्गुलं नासामूलञ्च अथाङ्गुलम्। नासाग्रविस्तरं द्व्यङ्गुलं तद्वत् तद्विलद्वयं नासा शुकनासाकृतिः पुष्पवत् द्विविधा शुभा । निष्पावसदृशं नासापुटयुग्मं सुशोभनम् । कर्णौ भ्रूसमौ दीर्घौ च चतुरङ्गुलौ ज्ञेयौ । कर्णपाली त्र्यङ्गुला स्यात्। स्थूला च अर्द्धाङ्गुला मता । नासावंशः त्र्यङ्गुलः सार्धाङ्गुलोन्नतः श्लक्ष्णः । ग्रीवा मूलात् स्कन्धान्तम् अष्टाङ्गुलम् उदाहृतम् । बाह्वन्तरं द्वितालं स्यात् । स्तनान्तरं द्वितालमात्रं स्यात् । कर्णयोरन्तरं षोडशाङ्गुलमात्रं स्मृतम्। कण्वहन्वग्रान्तरं सदैव अष्टाङ्गुलं मतम् । नासाकर्णान्तरं तद्वत् । कर्णनेत्रयोः तदर्धं मुखं तालतृतीयांशम् । ओष्ठौ तु अर्धाङ्गुलम् । मस्तकस्य परिधिः द्वाविंशदङ्गुलः प्रोक्तः । तद्विस्त्रुतिः दशाङ्गुला, द्वादशाङ्गुलदीर्घता स्यात्। ग्रीवामूलस्य परिधिः द्वाविंशत्यङ्गुलात्मकः । हृन्मध्यस्य परिधिः चतुःपञ्चाशदङ्गुलः ज्ञेयः । हृदयस्य परिधिः हीनाङ्गुलचतुस्तालः । आस्तनात् पृष्ठदेशान्ता पृथुता द्वादशाङ्गुला भवेत् । कट्याश्च सार्धत्रितालपरिधिः द्व्यङ्गुलाधिकः । उत्सेधः विस्तारः षडङ्गुलः स्यात् । स्त्रीणां नितम्बस्य पश्चात् भागे परिधिः अङ्गुलतोरधिकः। बाह्यग्रमूलपरिधिः षोडशाङ्गुलः अष्टादशाङ्गुलः स्यात्। हस्तमूलाग्रपरिधिः चतुर्दशाङ्गुलः। पादकरतलयोः विस्तृतिः पञ्चाङ्गुला स्मृता । ऊरुमूलस्य परिधिः द्वात्रिंशदङ्गुलात्मकः स्यात् । ऊर्वोः अग्रयोः परिधिः ऊनविंशत्यङ्गुलः स्यात् ।

जङ्घामूलमात्रपरिधिः षोडशद्वादशाङ्गुलः । मध्यमामूलपरिधिः चतुरङ्गुलाः विज्ञेयः। तर्जन्याः अनामिकायाश्च मूलपरिधिः सार्धत्र्यङ्गुलः । कनिष्ठिकायाः मूले परिधिः त्र्यङ्गुलः एव । स्वमूलपरिधेः पादहीनोऽग्रे परिधिः स्मृतः । हस्तपादाङ्गुष्ठयोः च क्रमात् चतुःपञ्चाङ्गुलम् । पादाङ्गुलीनां परिधिः त्र्यङ्गुलः समुदाहृतः । स्तनयोः नाभेश्च मण्डलं सार्द्धाङ्गुलम् एकाङ्गुलम्। यथा शोभि तथा सर्वाङ्गानां पाटवं परिकल्पयेत् । ऊर्ध्वदृष्टिम् अधो दृष्टिं मीलिताक्षीं न प्रकल्पयेत् । उग्रदृष्टिं न प्रसन्नाक्षीं प्रतिमां प्रकल्पयेत् । प्रतिमायाः तत् सुपीठकं तृतीयांशम् अर्द्धांशं वा रचयेत्। देवालयस्य द्वारं प्रतिमायाः द्विगुणं त्रिगुणं वा चतुर्गुणम्। पीठञ्च एकद्वित्रिचतुर्हस्तं कल्पनीयम् । भित्तेः समुच्छायः पीठतः दशकराधिकः । प्रासादस्य द्वारात् द्विगुणोच्छ्रायः ऊर्ध्वभूमिभाक् शिखरम् उच्छ्रायेण समं द्विगुणं त्रिगुणं वा कल्पयेत् । एकभूमिं समारपूय सपादशतभूमिकम् अष्टास्त्रम् पद्मसन्निभं चतुर्दिक् मण्डपं समन्ततः चतुःशालं वा प्रासादं शक्त्या कारयेत् । सहस्रस्तम्भसंयुक्तः उत्तमः , अन्यः समः, अन्यः अधमः । प्रासादे मण्डपे वापि यदि शिखरं कल्प्यते, तदा तत्र स्तम्भाः न कर्तव्याः । तत्र भित्तिरेव सुखप्रदा। प्रासादमध्यसमन्ततः विस्तारः प्रतिमायाः षड्गुणः अष्टगुणो वा पुरतः सुविस्तरः । वाहनं मूर्तिसदृशं सार्धं वा द्विगुणं स्मृतम् । यत्र देवतायाः रूपं न उक्तं तत्र चतुर्भुजं ज्ञेयम् । यत्र यदायुधं न उक्तं तत्र अधः करे अभयं वरञ्च ऊर्ध्वकरे शङ्खं चक्रम् अङ्कुशं पाशं डमरुं शूलं कमलं कलशं स्रुवं लड्डुकं मातुलुङ्गं वीणां मालां वा पुस्तकं यथामति दद्यात् । यत्र मुखानां बाहुल्यं तत्र पङ्क्त्या निवेशनम् । तत् पृथग्ग्रीवमुकुटसुमुखं स्वक्षिकर्मयुक् कार्यम् । यत्र भुजानां बाहुल्यं तत्र स्कन्धभेदनं न कुर्यात् । कूर्परोर्ध्वन्तु भुजमूलानि यथा पक्षमूलानि तथा सूक्ष्माणि चिपिटानि दृढानि कार्याणि। ब्रह्मणस्तु मुखानां चतुर्दिक्षु विनियोजनं कुर्यात् । हयग्रीवः वराहः नृसिंहः गणेश्वरश्च मुखैः विना नराकारः कार्यः । तथा च नृसिंहः नखैश्च विना नराकारः कार्यः । स्वासने तिष्ठन्तीं सूपविष्टां वाहनस्थितां हीनश्मश्रुनिमेषां सदा षोडशवार्षिकीं दिव्याभरणवस्त्राद्यां दिव्यवर्णक्रियां वस्त्रैरापादगूढां दिव्यालङ्कारभूषिताम् उक्तलक्षणाम् इष्टदेवस्य प्रतिमां कारयेत् ।

क्वचिद्देवताः हीनाङ्ग्यः अधिकाङ्गश्च न कर्तव्याः । हीनाङ्गी स्वामिनं हन्ति। अधिकाङ्गी शिल्पिनं च हन्ति । कृशा नित्यं दुर्भिक्षदा, स्थूला सदा रोगप्रदा, गूढसन्ध्यस्थिधामनी सर्वदा सौख्यवर्धिनी भवति । विष्णोः वराभयाब्जशङ्खाद्यहस्ता सात्त्विकी । सोमस्य मृगवाद्याभयवरहस्ता सात्त्विकी । इभास्य वराभयाब्जलड्डुकहस्ता सात्त्विकी । रवेः पद्ममालाभयवरकरा सत्त्वाधिका । श्रियः वीणालुङ्गाभयवरकरा सत्त्वगुणा । विष्ण्वादीनां मूर्तीनां शङ्खचक्रगदापद्मैः पृथक् आयुधैः आदितः षट् षट् भेदाश्च भवन्ति । उपाधिभेदेन यथा स्वसंयोगविभागतः समस्तव्यस्तवर्णादिभेदज्ञानं प्रजायते । लेख्या, लेप्या, सैकती, मृण्मयी तथा पौष्टिकी एतासां लक्षणाभावे कैश्चित् दोषः न ईरितः । स्वयम्भूते चन्द्रकान्तसमुद्भवे रत्नजे गण्डकोद्भूते च बाणलिङ्गे सर्वथा मानदोषः न केवलं पाषाणधातुजायाञ्च मानदोषान् विचिन्तयेत्। यदि उक्तलक्ष्मयुता श्वेता सात्विकी स्मृता । पीता रक्ता तु राजसी । कृष्णवर्णा तु तामसी स्मृता । कृतादिषु सौवर्णी राजती ताम्री वा रैतिकी प्रतिमा निर्मातव्या । शाङ्करी श्वेतवर्णा वा वैष्णवी कृष्णवर्णा सूर्यशक्तिगणेशानां च ताम्रवर्णा स्मृता वापि लोहसीसमयी यथोद्दिष्टा बुधैः स्तृताः । चलार्चायां वा स्थिरार्चायां प्रासादादिषु उक्तलक्षणां प्रतिमां स्थापयेत् । अन्यां सर्वसौख्यविनाशिनीं न स्थापयेत् । सेव्यसेवकभावेषु प्रतिमालक्षणं स्मृतम् । प्रतिमायाश्च ये दोषाः अर्चकस्य तपोबलात् सर्वत्र ईश्वरचित्तस्य किलक्षणात् नाशं यान्ति । देवतायाः पुरतः मण्डपे वाहनं न्यसेत् । गरुडः द्विबाहुः सुचञ्चुः, स्वक्षिपक्षयक्, सुनयनः, नराकृतिः, चञ्चुमुखः, मुकुटी, कवचाङ्गदी, बद्धाञ्जलिः, नम्रशीर्षः, तथा सेव्यस्य पादाब्जलोचनः निर्मातव्यः । ये ये पक्षिणः तथा सिंहवृषादयः देवतानां वाहनत्वं गताः, ते ते कामरूपधराः । एते च बुधैः स्वनामाकृतयः दिव्याः सुभूषिताः तथा ध्यानतत्पराः देवतानां सदा अग्रे कार्याः । मार्जाराकृतिकः पीतः कृष्णचिह्नः बृहद्वपुः असटः व्याघ्र इत्युक्तः । सूक्ष्मकटिः महान् बृहद्भूगण्डनेत्रः बालवेशः मनोहरः सटावान् धूसरः अकृष्णलाच्छनः महाबलः सिंहः इति उक्तः । सटालाच्छनतः व्याघ्रसिंहयोः भेदः आकृत्या नास्ति । नराकारं ध्वस्तकर्णं पृथूदरं बृहत्संक्षिप्तगहनपीनस्कन्धाङ्घ्रिपाणिनं बृहच्छुण्डं भग्नवामरदम् ईप्सितवाहनम् ईषत्कुटिलदण्डाग्रवामशुण्डम् अदक्षिणं सन्ध्यस्थि धमनीगूढं मानमितं गजाननं सदा कुर्यात् । समन्ततः सार्धचतुस्तालमितः शुण्डादण्डः दशाङ्गुलं मस्तकं चतुरङ्गुलः भूमण्डलः कार्यः । शुण्डा नासोत्तरोष्ठरूपा शेषा

सपुष्करा कर्णदैर्घ्यं दशाङ्गुलं तदष्टाङ्गुलविस्तृतम् । कर्णयोरन्तरे व्यासः द्व्यङ्गुलस्तालसम्मितः अस्यैव मस्तके परिधिः षट्त्रिंशदङ्गुलः ज्ञेयः। कण्ठदैर्घ्यं त्र्यङ्गुलं, तत्परिधिः त्रिंशदङ्गुलः ज्ञेयः । उदरे परिणाहः सदा चतुस्तालात्मिकः षडङ्गुलः वा अष्टाङ्गुलः वापि शिल्पिभिः सदा नियोक्तव्यः । दन्तः षडङ्गुलः दीर्घः , तन्मूलपरिधिः तथा अधरोष्ठश्च षडङ्गुलः तथा पुष्करं कमलान्वितम् । ऊरुमूलस्य परिधिः षट्त्रिंशदङ्गुलः मतः । तथा ऊर्वग्रपरिधिः त्रयोविंशत्यङ्गुलः स्यात् । जङ्घामूले तु परिधिः विंशत्यङ्गुलसम्मितः । बाहुमूलादेः परिधिः द्व्यङ्गुलोऽङ्गुलः अधिकः वा स्यात् । कर्ण नेत्रान्तरं नित्यं चतुरङ्गुलं विज्ञेयम् । मूलमध्याग्रान्तरं तु दशसप्तषडङ्गुलं तज्ज्ञैः गणपस्य नेत्रयोः विशेषतः कथितम् ।

स्त्रीणां कट्यां परिधिः द्व्यङ्गुलाधिकः त्रितालः प्रोक्तः । स्त्रीणां सर्वान् अवयवान् सप्ततालैः विभावयेत् । स्त्रीणां स्तने उत्सेधः पृथुता च पञ्चाङ्गुला मता। सप्ततालादिमानेऽपि मुखं द्वादशाङ्गुलं स्यात् । बालादीनामपि दीर्घता सदा पृथक् पृथक् ज्ञेया । शिशोस्तु कन्धरा ह्रस्वा शीर्षं पृथु प्रकीर्तितम् । कण्ठाधः यादृक् वर्द्धते तादृक् शीर्षं न वर्द्धते । बालः मुखमानेन कण्ठाधः सार्धचतुर्गुणः । सकथितः शेषन्तु अधः शिश्नपर्यन्तं द्विगुणः कार्यः । हस्तौ मुखेन हि सपादद्विगुणौ वा द्विगुणौ कार्यौ, स्थौल्ये तु नियमः नास्ति । यथा शोभि प्रकल्पयेत् । बालः पञ्चाब्दात् परतः नित्यं भृशं प्रवर्द्धते । स्त्री षोडशे अब्दे सर्वाङ्गपूर्णा । पुमान् विंशतौ अब्दे । ततः सप्ततालादिकं प्रमाणं सदा अर्हति । कश्चित् बाल्येऽपि शोभाढ्यः तारुण्ये वर्द्धके क्वचित् भवति । मुखाधः त्र्यङ्गुला,ग्रीवा हृदयं नवाङ्गुलं तथा उदरं वस्तिश्च नवाङ्गुलं, सकिथ नाम जानूपरिभागस्तु अष्टादशाङ्गुलं ज्ञेयम् । तथा गुल्फस्य अधः त्र्यङ्गुलम् । एतत् सप्ततालस्य प्रमाणं सर्वदा ज्ञेयम् । ग्रीवा वेदाङ्गुला हृदयं तु दशाङ्गुलं भवेत्। उदरं दशाङ्गुलं वस्तिश्चैव दशाङ्गुलं स्यात् । सकिथः एकविंशाङ्गुलं जानु चतुरङ्गुलं स्यात् । जङ्घा एकविंशाङ्गुला तथा गुल्फस्य अधः चतुरङ्गुलं स्यात् । अष्टतालप्रमाणस्य इदं मानं सदा उक्तम् । दशतालेषु मुखं हृदयम् उदरं तथा वस्तिश्च सर्वदा त्रयोदशाङ्गुलं ज्ञेयम् । गुल्फस्य अधः ग्रीवा तथा जानु पञ्चाङ्गुलं स्मृतम्। सकिथ तथा जङ्घा षड्विंशत्यङ्गुला प्रकीर्तिता । दशताले मूर्ध्नि मणिम् एकाङ्गुलं प्रकल्पयेत् । तथा

दशताले बाहु पञ्चाशदङ्गुलौ स्मृतौ । ततः हीनप्रमाणके द्व्यङ्गुलौ ऊनौ च कार्यौ । पाटवं तु सर्वमानेषु यथाशोभि कल्पयेत् । नवतालप्रमाणे ऊनाधिक्यं न हि प्रकल्पयेत् । दशताले तु पादौ पञ्चदशाङ्गुलौ विज्ञेयौ । ततः न्यूनप्रमाणके पादौ एकाङ्गुलहीनौ स्तः । दशतालोर्ध्वमाने तु ताले ताले अधिकाङ्गुलं कार्यम् । धीमान् शिल्पवित्सु मुखतः यथा तथा कल्पयेत् । दीर्घरुजङ्घा विकटाक्रा तथा भीषणा प्रतिमा आसुरी स्यात् । सुकृशापि प्रतिमा पैशाची वा राक्षसी ज्ञेया । पञ्चाङ्गुलतः हीना न पञ्चाङ्गुलतः अधिका न । तद्विदैः सर्वमानेषु करस्य मध्यमा प्रोक्ता । शिल्पी सदैव बालसदृशं वा तरुणं वपुः कल्पयेत् । क्वचित् वृद्धसदृशं न कल्पयेत् । नृपः सदा राष्ट्रे एवं विधान् देवान् संस्थापयेत् तथा प्रतिसंवत्सरं तेषां उत्सवान् सम्यक् आचरेत् । नृपः देवालये मानहीनां तथा भग्नां मूर्तिं न धारयेत् । तथा जीर्णान् प्रासादान् देवांश्च यत्नतः उद्धृत्य सर्वदा देवतां तु पुरस्कृत्य नृत्यादीन् वीक्ष्य, मनः स्वोपभोगार्थं यत्नतः न विदध्यात् प्रजाभिश्च ये ये उत्सवा विधृताः तांश्च पालयेत् । प्रजानाम् आनन्देन सन्तुष्येत् । तथा तद्दुःखैः दुःखितो भवेत् ।

राजधर्मनिरूपणम्

व्यवहारणामनुदर्शनैः दुष्टानां निग्रहणं कुर्यात् । प्रजाः स्वाधीनाः स्वाज्ञया सदा वर्तितुं शक्ता भवन्ति । दुष्टः प्रापप्रचारवान् शत्रुः स्वेष्टहानिकरः इष्टस्य सम्पादनं न्याय्यम् । तत् हि प्रजानां पालनम् । शत्रोः अनिष्टकरणात् निवृत्तिः शत्रुनाशनम् । यैः पापाचारात् निवृत्तिः तत् हि दुष्टनिग्रहणम् । येन सदसत्प्रविचारतः स्वप्रजाधर्मसंस्थानां च अर्थसंसिद्धिः जायते सः व्यवहारः। क्रोधलोभविवर्जितः सप्राड्विवाकः सामान्यः सब्राह्मणपुरोहितः सन्तः समाहितमतिः सन् धर्मशास्त्रानुसारेण अनुक्रमात् व्यवहारान् पश्येत् । प्राज्ञः नृपः रहसि च वादिनः कार्याणि कदाचन न पश्येत् । वचश्य न श्रुणुयात् । सभ्याश्च न पश्येयुः । रागलोभभयद्वेषाः वादिनोः रहः श्रुतिः पक्षपाताधिरोपस्य वै पञ्चकरणानि यः राजा सुखे स्थितः पौरकार्याणि न करोति, सः व्यक्तं नरके पच्यते, नात्र संशयः । यः नराधिपः मोहात् अधर्मेण कार्याणि कुर्यात्, शत्रवः अचिरात् तं दुरात्मानं वशीकुर्वन्ति । वाक्यं स्वयं कृतिः राज्ञाम् अस्वर्ग्यापरानीकभयावहा आयुर्वीजहरी लोकनाशाय भवति । तस्मात् राजा शास्त्रानुसारेण

कार्याणि साधयेत् । यदा नृपतिः स्वयं न कुर्यात् तदा तत्र कार्यविनिर्णये वेदपारगं कुलीनं मध्यस्थम् अनुद्वेगकरं स्थिरं परत्र भीरुं धर्मिष्ठम् उद्युक्तं क्रोधवर्जितं ब्राह्मणं नियुञ्जीत । यदा विद्वान् विप्रः न स्यात् तदा तत्र धर्मशास्त्रज्ञं क्षत्रियं वा वैश्यं योजयेत् । शूद्रन्तु यत्नेन वर्जयेत् । राजा यद्वर्णजः भवेत् तद्वर्णजः सदा योज्यः । प्रायशः तद्वर्णजः एव गुणिनः सम्भवन्ति । सर्वासु जातिषु ये च व्यवहारविदः प्राज्ञाः वृत्तशीलगुणान्विताः रिपौ मित्रे च समाः धर्मज्ञाः सत्यवादिनः निरालसाः जितक्रोधकामलोभाः प्रियंवदाः ते राज्ञा सभ्याः नियोक्तव्याः। कृषकाः कारुकाः शिल्पिनः कुसीदनः श्रेणयः नर्तकाः लिङ्गिनः तस्कराः स्वेन धर्मेण निर्णयं कुर्य्युः। अन्यैः निर्णयः अशक्यः । तस्मात् तज्ज्ञैः एव कारयेत् । आत्मनः हितं चिकीर्षुः नृपः आश्रमेषु मिथः कार्ये विवदतां द्विजातीनां धर्मे न विब्रूयात् । तपस्विनां मायायोगविदां तु कार्याणि त्रैविद्यैरेव कारयेत् । कोपकारणात् स्वयं न कुर्यात् । सम्यग्विज्ञानसम्पन्नः उत्कृष्टजातिशीलानां गुर्वाचार्यतपस्विनाम् उपदेशं न प्रकल्पयेत् । आरुण्याः स्वकैः सार्थिकाः सार्थिकैः सैनिकाः, सैनिकैः सह कुर्य्युः । किञ्च ग्रामेऽपि उभयवासिभिः । यत्र ये अभियुक्ताः यन्निबन्धनियोजनाः ते एव तत्रत्यगुणदोषाणां विचारकाः । ये पुङ्गवाः इव व्यवहारधुरं वोढुं शक्ताः राजा तान् धार्मिकान् सुपरीक्षितान् सभ्यान् नियुञ्ज्यात् । यत्र सप्तपञ्च त्रयोऽपि वा लोकवेदधर्मज्ञाः विप्राः उपविष्टाः स्युः । सा सभा यज्ञसदृशी स्यात् । तत्र सुविचक्षणाः वणिजः श्रोतारः कर्तव्याः । धर्मज्ञः अनियुक्तः नियुक्तः वा वक्तुमर्हति यः शास्त्रमुपजीवति सः दैवीं वाचं वदति । सभान् प्रवेष्टव्या वा समञ्जसं वा वक्तव्यम् । अब्रुवन् वा विब्रुवन् नरः किल्बिषी भवति । ये कुलश्रेणिगणादयः राज्ञा सम्यक् विदिताः, ते नृणां साहसस्तेयवर्ज्यानि कार्याणि कुर्युः । कुलैः यत् न विचारितं तत् श्रेणिभिः विचार्यम् । श्रेण्यविज्ञातं गणैश्च, गणाज्ञातं नियुक्तकैः विचार्यमिति । सभ्याः कुलादिभ्यः अधिकाः , अध्यक्षः तेभ्यः अधिकः कृतः, धर्माधर्मनियोजकः राजा तु उत्तमाधममध्यानां विवादानां विचारणात् सर्वेषामधिकः । यतः ईश्वरबुद्धयः बुद्धीनामुपरि उपरि चरन्ति । एकं शास्त्रम् अधीयानः कार्यनिर्णयं न विन्द्यात् । तस्मात् नृपैः विवादेषु बह्वागमः कार्यः । आत्मतत्त्वचिन्तकः एकं यं ब्रूते स वा धर्मः स्यात् । राज्ञा श्रेष्ठोत्तरैः सभ्यैः सह पृथक् पृथक् एकद्वित्रिचतुर्वारं व्यवहारानुचिन्तनं कार्यम् । यः अर्थिप्रत्यर्थिनौ सभ्यान् लेखकान् प्रेक्षकान् धर्मवाक्यैः रञ्जयति स सभाः तारताम्

आप्नुयात् । नृपः अधिकृतसभ्याः स्मृतिः गणकलेखकौ हेमाग्न्यम्बुस्वपुरुषाः एतानि दश साधनस्य अङ्गानि सन्ति । कृतमतिः पार्थिवः यस्याम् एतत् दशाङ्गकरणम् अध्यास्य न्यायान् पश्येत् सा सभा अध्वरसन्निभा भवति । एतेषां दशानाञ्च पृथक् पृथक् कर्म प्रोक्तम् । अध्यक्षः वक्ता, नृपः शास्तासभ्याः कार्यपरीक्षकाः भवन्ति । स्मृतिः विनिर्णयं जपं दानं दमं ब्रूते। शपथार्थे हिरण्याग्नी अम्बुतृषितक्षुब्धयोः गणकः अर्थं गणयेत् च लेखकः न्याय्यं लिखेत् । शब्दाभिधानतत्त्वज्ञौ गणनाकुशलौ शुची नानालिपिज्ञौ गणकलेखकौ राज्ञा कर्तव्यौ । यत्र स्थाने धर्मशास्त्रानुसारेण अर्थशास्त्रविवेचनम् अधिक्रियते तत् धर्माधिकरणम् इत्युच्यते । व्यवहारान् दिदृक्षुः पार्थिवः विनीतः सन् मन्त्रज्ञैः ब्राह्मणैः मन्त्रिभिश्च सह सभां प्रविशेत् । राजा धर्मासनम् अधिष्ठाय कार्यदर्शनम् आरभेत्। पूर्वोत्तरसमः भूत्वा राजाविवादिनौ पृच्छेत्। प्रत्यहं देशदृष्टैश्च, शास्त्रदृष्टैश्च हेतुभिः जातिजानपदान् धर्मान् श्रेणिधर्मान् तथैव कुलधर्मान् समीक्ष्य, स्वधर्मं प्रतिपालयेत् । देशजातिकुलानां च ये धर्माः प्राक् प्रवर्तिताः ते तथैव पालनीयाः । अन्यथा प्रजा प्रक्षुभ्यते । दाक्षिणात्यैः द्विजैः मातुलस्य सुता परिणीयते । मध्यदेशे कर्मकराः पुनः शिल्पिनः गोमांसभक्षकाः भवन्ति । उत्तरे सर्वे नराः मत्स्यभक्षकाः भवन्ति । स्त्रियः व्यभिचाररताः मद्यपाः भवन्ति । तथा रजस्वलाः नार्यः नृणां स्पर्शयोग्याः भवन्ति । खशजाताः अभर्तृकां भ्रातृभार्यां प्रगृह्यन्ति। अनेन कर्मणा एते प्रायश्चित्तदमार्हकाः न भवन्ति । येषां ये परस्पराप्राप्ताः पूर्वजैः अनुष्ठिताः ते धर्माः तैः जनैः तथैवानुष्ठेयाः । अत्र इतरस्य आचारान् न दुष्येयुः । कलौ ये श्रीसंयुताः प्रायः ते सदैव परस्त्रीधनसंलुब्धाः मद्यासक्तरताः विज्ञानलवदुर्दग्धाः तन्त्रकर्मरताः वेदविमुखाः स्युः । नृपः महादण्डेन एतेषां संसाधनं कुर्यात् । मध्याह्ने न्यायान् पश्येत् । पूर्वाह्णे स्मृतिदर्शनं कुर्यात् । मनुष्यमारणे स्तेये साहसे अत्यधिकं च सदा तत्र कालनियमः न । सद्यः एव विवेचनं कर्तव्यम् । धर्मासनगतं मन्त्रिभिः सह राजानं दृष्ट्वा अर्थी गच्छेत् । तत्र प्रतिरुद्धमधर्मतः यत् निवेद्यमानं यथा सत्यं चिन्तयित्वा समाहितः लिखित्वा च नत्वा प्राञ्जलिः प्रह्वः कार्यं निवेदयेत् । पार्थिवः ब्राह्मणैः सह एनं यथाहम् अभ्यर्च्य सान्त्वेन आदौ प्रशमय्य स्वधर्मं प्रतिपादयेत् । काले प्रणतं पुरतः स्थितं कार्यार्थिनं पृच्छेत् । हे मानव ! किं कार्यं ते पीडा च का ? मा भैषीः ; वद !

कस्मिन् कदा केन दुरात्मना कस्मात् पीडितोऽसि ? एवं पृष्ट्वा तस्य स्वभावोक्तं वचः संश्रुणुयात् । लेखकः तदुक्तं प्रसिद्धलिपिभाषिभिः लिखेत् । यः अर्थिप्रत्यर्थिनाम् अन्यत् उक्तं वचः अन्यत् लिखेत्, राजा अतन्द्रितः सन् तं झटिति चौरवत् शासयेत् । सभ्याश्च तादृशं लिखितं कदाचन न विब्रूयुः । यदि बलात् गृह्णन्ति तांस्तु चौरवत् दण्डयेत् । प्राड्विवाकः नृपस्य अभावे सभागतम् एवं पृच्छेत्। वादिनौ पृच्छति प्राड्वा विविनक्ति इति विवाकः नाम न्यायाधीशः । अतः सः सभ्यैः सह धर्माधर्मान् विचारयति वा विवक्ति । सभायां ये हिताः योग्याः साधवः सभ्याः ते चापि पश्येयुः । स्मृत्याचारव्यपेतेन मार्गेण परैः आधर्षितः चेत्, राज्ञे आवेदयति तत् निश्चयेन व्यवहारपदं भवति । राजा स्वयं न अस्य पुरुषोऽपि न कार्यम् उत्पादयेत्। किञ्च नृपः रागेण न लोभेन न क्रोधेन च न प्रसेत् । परैः अप्रापितान् अर्थान् स्वमनीषया न उत्पादयेत् ।

नृपः आवेदकैः विना स्वयं छलानि अपराधान् तथा नृपतेः स्वस्य पदानि तथा सूचकस्तोभकाभ्यां श्रुत्वा एतानि तत्त्वतः गृह्णीयात् । यः शास्त्रेण आनन्दितः तथा राज्ञा प्रचोदितः न किन्तु पूर्वम् आवेदयति, सः अर्थी स्तोभकः उदाहृतः । यः परदोषानुवीक्षणे नृपेण विनियुक्तः सन् नृपं संसूचयेत्, सः सूचकः उदाहृतः ।

मार्गावरोधकः, परस्याक्षेपी, प्राकारस्योपरि लङ्घकः, पयःशालायाः तथा आयतनस्य विनाशकः, परिखाणां नगरवेष्टनीभूतानां जलाधाराणाञ्च पूरकः राज्ञः दोषस्य प्रकाशकः यश्च अनियुक्तः सन्, अन्तःपुरं वासगृहं भाण्डागारं महानसं प्रविशति, यश्च भोजनं निरीक्ष्यते, विण्मूत्रश्लेष्मवातानां कामात् क्षेप्ता, नृपस्याग्रतः पर्यङ्कसम्बन्धी, अप्रस्थानस्य नृपातिरिक्तवेशः, तथा च यः विधृतः प्रविशेत्, यश्चापद्वारेण तथा अवेलायां विशेत्, शय्यासने तथा पादुके शयनासनरोहणे यश्च आसन्नशयने राजनि समीपतः तिष्ठति, राज्ञः विद्विष्टसेवी, अदत्तविहितासनः, अन्यवस्त्राभरणयोः स्वर्णस्य च परिधायकः, यश्च स्वयं ग्राहेण ताम्बूलं गृहीत्वा भक्षयेत्, अनियुक्तप्रभाषी च नृपाक्रोशकः एकवासाः अभियक्तः मुक्तकेशः अवकुण्ठितः विचित्रताङ्गः स्रग्वी, परिधानविधूनकः शिरः प्रच्छादकः छिद्रान्वेषणतत्परः आसङ्गी मुक्तवेशश्च घ्राणकर्णाक्षिदर्शकः दन्तोल्लेखनरः कर्णनाशाविशोधकः राज्ञः समीपे एतानि पञ्चाशत् दोषाः सन्ति। आज्ञोल्लङ्घनकारित्वं,

स्त्रीवधः वर्णसङ्करः परस्त्रीगमनं, चौर्यं, पतिं विना गर्भः, वाक्पारुष्यम्, आवच्छाद्मं दण्डपारुष्यं गर्भस्य पातनञ्च एते तु दश अपराधाः ।

उत्कृती, शस्यघाती, अग्निदः, राज्ञः, द्रोहकर्ता, तन्मुद्राभेदकः, तस्य मन्त्रस्य प्रभेता, बद्धस्य विमोचकः, यः अस्वामिकं द्रव्यस्य विक्रयं दानं भागं दण्डश्च विचिन्वति, सः पटहाघोषणाच्छादी अस्वामिकं यत् द्रव्यं च राजावलीढद्रव्यं तथा अङ्गविनाशनम् एतानि द्वाविंशतिपदानि नृपेन ज्ञेयानि इति पण्डिताः कथयन्ति ।

वादी, उद्धतः, क्रूरवाक्, क्रूरवेशः, गर्वितः, चण्डः, सहासनः, अतिमानी च दण्डमवाप्नुयात् । अर्थिना राज्ञे यत् कथितं तत् आवेदनसंज्ञकं प्राड्विवाकादौ कथितं यत् सा अखिलबोधिनी भाषा सः पूर्वपक्षः उच्यते । सभ्यादिः अर्थितः सन् तं यथार्थतः विमृश्य तत् हीनं चेत् पूरयेत् । अधिकञ्च तत् साक्ष्यं त्यजेत् । राजा साक्ष्यं वादिनः चिह्नितं कृत्वा विमुद्रयेत् । ये अधिकारिणः रागात् लोभात् भयात् वा पक्षम् अशोधयित्वा उत्तरं दापयन्ति, तान् स्मृत्यर्थे दण्डयित्वा, अधिकारात् निवर्तयेत् । राजा विवादं ग्राह्याग्राह्यं सुविमृश्य समाश्रयेत् । सञ्जातपूर्वपक्षं वादिनम् आज्ञया सत्यवाग्भिः मनोहरैः निरालसैः इङ्गितज्ञैः दृढशस्त्रास्त्रधारिभिः सत्पुरुषैः सन्निरोधयेत्। विवादार्थी वक्तव्ये अर्थे अतिष्ठन्तं तद्वचः उत्क्रामन्तं प्रत्यर्थिनं यावदाह्वानदर्शनं शपथैः वा नृपस्य आज्ञया आसेधयेत् ।

असेधः नामावरोधः चतुर्विधः स्यात्। स्थानसेधः, कालकृतः, प्रवासात् तथा कर्मणः । आसिद्धः तं न विलङ्घयेत् । यस्तु इन्द्रियनिरोधेन व्याहारेण नाम निष्ठुरवचनेन उच्छ्वासनादिभिः अनासेधैः आसेधयेत् सः दण्ड्यः । न तु अतिक्रमी । यः आसेधकाले आसिद्धः आसेधम् अतिवर्तते सः विनेयः । आसेद्धा च अन्यथा कुर्वन् दण्डभाक् भवति । तत्त्वेन अथवा आशङ्कया यस्य अभियोगं कुरुते, राजा मुद्रया वा पुरुषेण तमेव आह्वानयेत् । असतां संसर्गात् तथा अनुभूतकृतेः होढाभिदर्शनात् विचक्षणः तत्त्वं विजानाति । नृपः अकल्यबालस्थविरविषमस्थक्रियाकुलान् कार्यातिपातिव्यसनि नृपकार्योत्सवाकुलान् मत्तोन्मत्तप्रमर्त्तार्तभृत्यान् न आह्वानयेत् । हीनपक्षां युवतीं कुले जातां प्रसूतिकां न सर्ववर्णोत्तमां कन्यां न अज्ञातप्रभुकाः स्त्रियः न आह्वानयेत्।

परिणयेच्छुः, रोगार्तः, यज्ञकर्तुमिच्छुकः, व्यसने स्थितः तथा अन्येन अभियुक्तः राजकार्योद्यतः नृपकर्मकर्तुमुद्यतः गवां प्रचारे गोपालाः धान्यवपनकर्म समये कृषीवलाः तत्काले शिल्पिनः विग्रहे आयुधीयाः अप्राप्तव्यवहारः दूतः दानोन्मुखः व्रती तथा विषमस्थाः न अवरोधनीयाः। नृपः एतान् न हि अवरोधनीयाः । नदी सन्तरणे कान्तारे दुर्देशे उपप्लवादिषु आसिद्धः तं परासेधम् उत्क्रामन् न अपराध्नुयात् । नृपः कालं देशं कार्याणाञ्च बलाबलं विज्ञाय अकल्यादीन् अपि यानैः शनैः आह्वानयेत्। ये अभियोगं ज्ञात्वा, प्रव्रजितादयः स्युः, राजा गुरुकार्येषु तानपि अकोपयन् आह्वानयेत्। प्रत्यर्थिना अर्थिना च व्यवहारानभिज्ञेन वा अन्यकार्याकुलेन तदा तज्ज्ञः प्रतिनिधिः कार्यः । बन्धुः अथवा नियुक्तः नरः अप्रगल्भजडोन्मत्तवृद्धस्त्रीबालरोगिणं पूर्वोत्तरं वदेत् । पिता, माता, सुहृद्, बन्धुः, भ्राता च सम्बन्धिनोऽपि यदि उपस्थानं कुर्युः, तदा तत्र वादं प्रवर्तयेत् । येन केनचित् नियोगात् यः कश्चित् किञ्चित् कार्यं कारयेत्, तत् तेनैव कृतं ज्ञेयम् । तत् अनिवार्यं स्मृतम् । नियोगितस्य भृतिं विवादात् षोडशांशकीं विंशत्यंशां तदर्ध्दां वा तदर्द्धं च तदर्द्धिकां दद्यात् यदि बहु नियोगी स्यात् तदा कार्यं यथा द्रव्याधिकं तथा हीना हीना भृतिः । अन्यथा तस्य पोषणं कार्यम् । व्यवहारज्ञः धर्मज्ञः नियोक्तव्यः । अन्यथा नहि नियोक्तव्यः । किञ्च अन्यथा भृति गृह्णन्तं नियोगिनं दण्डयेत्। नृपेण स्वमनीषया नित्यं नियोगी न कार्यः। नियोगी लोभेन अन्यथा कुर्वन् दण्डम् अर्हति । यः भ्राता न, पिता न, पुत्रः न, नियोगकृत् च न, सः चेत् परार्थवादी व्यवहारेषु विब्रुवन् दण्ड्यः स्यात् ।

याः तदधीनकुटुम्बिन्यः स्वैरिण्यः गणिकाः निष्कुलाः तथा याश्च पतिताः तासाम् आह्वानम् इष्यते । वादं प्रवर्तयित्वा वादिनौ यदि मृतौ, तदा तज्ज्ञः तत्पुत्रः विवदेत् । अन्यथा तु निवर्तयेत् । मनुष्यमारणे स्तेये, परदाराभिमर्शने, अभक्ष्यभक्षणे, कन्याहरणदूषणे, पारुष्ये, कूटकरणे, नृपद्रोहे, तथा साहसे प्रतिनिधिः, न दातव्यः । कर्ता स्वयं विवदेत् । यत्र आहूतः बन्धुबलान्वितः दर्पात् न आगच्छेत्, तस्य अभियोगानुरूपेण दण्डं प्रकल्पयेत् । दूतेन आह्वानितं प्राप्ताधर्षकः, प्रतिवादिनं दृष्ट्वा, राज्ञा तयोः यथार्हप्रतिभूः चिन्त्यः । अहम् एतेन अदत्तं दास्यामि, एनं तव अन्तिके दर्शयामि । एनम् आधिं दापयिष्ये, अस्मात् क्वचित् ते भयं न भवति । अनेन अकृतं कार्यम् अहं

करिष्यामि । अयञ्च वृत्तिमान् अतन्द्रितः अस्ति इत्येतत् न मिथ्या अङ्गीकुर्यात्। प्रगल्भः बहुविश्वस्तः अनधीनः विश्रुतः धनीं तथा समर्थः प्रतिभूः उभयोः कार्यनिर्णये ग्राह्यः । ससाधनौ स्वपुष्टौ स्वभृत्या पुष्टरक्षकौ विवादिनौ सन्निरुध्य, ततः कूटसाधनशङ्कया तत्त्वम् इच्छुः सन् वादं प्रवर्तयेत् । पक्षविदः प्रतिज्ञादोषनिर्मुक्तं सत्कारणान्वितं निश्चितं लोकसिद्धञ्च साध्यं पक्षं विदुः । अन्यार्थम् अर्थहीनं प्रमाणागमवर्जितं लेख्यहीनाधिकं वा भ्रष्टं भाषादोषाः उदाहृताः ।

अप्रसिद्धं निराबाधं निष्प्रयोजनं निरर्थम् असाध्यं वा विरुद्धं तं पक्षाभासं विवर्जयेत् । यः केनचित् न श्रुतः दुष्टश्च सः अप्रसिद्धः उदाहृतः । यथा अहं मूकेन संशप्तः वन्ध्यापुत्रेण ताडितश्च । निराबाधं यत् निष्प्रयोजनं तत् यथा अयं स्व गेहे सुस्वरमधीते, गाति, स्वगेहे अयं विहरति तथा मम गेहसमीपतः मार्गमुखद्वारं धत्ते इति ज्ञेयम् । अयं जामाता मद्दत्तकन्यायां सदा विहरति, तथापि गर्भं न धत्ते । इयञ्च वन्ध्या किमर्थमिति असाध्यम् । अयं मृतः न प्रभाषते किमर्थमिति विरुद्धकं ज्ञेयम् । लोकः मद्दुःखसुखतः न दूयते, न च नन्दति इति निरर्थं वा निष्प्रयोजनं ज्ञेयम् । यत् कार्यं श्रावयित्वा त्यजेत् असौ अन्यत् वदेत्, सः अन्यत् पक्षाश्रयात् हीनः दण्ड्यः च स्मृतः । प्रतिज्ञाते पूर्वपक्षे ग्राह्याग्राह्याभ्यां विशोधिते । अतएव विनिश्चिते तथा स्थिरीभूते ततः उत्तरं लेखयेत् । तत्र प्राक् अभियोक्ता ततः अभियुक्तः पृष्ठः अनन्तरम् उभयोः सदस्याद्यैः प्राड्विवाकः उत्तरं दाप्यते । प्रतिवादिना पूर्वावेदकसन्निधौ श्रुतार्थस्य पक्षस्य व्यापकं सारम् असन्दिग्धम् अनाकुलम् अव्याख्यागम्यम् उत्तरं लेख्यम् इति एतत् निर्दुष्टं स्यात्। सन्दिग्धं प्रकृतात् अन्यत् अत्यल्पं च अतिभूरि वा तथा पक्षैकदेशे व्याप्यं यत् तत् उत्तरं नैव भवेत् । यः आहूतः सन् न किञ्चित् वदेत् सः हीनः दण्ड्यश्च भवेत् । यथार्थे पूर्वपक्षे यः प्रत्यर्थी उत्तरं न दद्यात् सः सामादिभिः उपक्रमैः दापनीयः । मोहात् वा शाठ्यात् वा पूर्ववादिनः यत् न उक्तं, यच्च उत्तरान्तर्गतं तत् द्वयोरपि प्रश्नैः ग्राह्यम् । उत्तरं चतुर्विधं स्यात् । यथा सत्यं मिथ्योत्तरं प्रत्यवस्कन्दनं तथा पूर्वन्यायविधिः । वादिना उक्तं यथार्थं यद्वाक्यं प्रतिवादिना अङ्गीकृतं तत् सत्योत्तरं विज्ञेयम् । सा च प्रतिपत्तिः स्मृता । अन्यस्तु भाषार्थं श्रुत्वा अर्थतः शब्दतः वापि यदि तं प्रतिषेधति तदा तत् मिथ्योत्तरं ज्ञेयम् । मिथ्या च चतुर्विधम् । एतत्

मिथ्या अहं न अभिजानामि तत्र न मम सन्निधिः, तत्काले अहम् अजातश्चास्मि । अर्थिना यः अर्थः लिखितः प्रत्यर्थी यदि तं तथा प्रपद्यकारणं ब्रूयात् तदा तत् प्रत्यवस्कन्दनं कथ्यते । अस्मिन् अर्थे पूर्वम् अनेन मम वादः अभूत् तदा अयं जितः, इति चेत् ब्रूयात् सः प्राङ्न्यायः उदाहृतः । प्राङ्न्यायः त्रिविधः स्मृतः । यथा - अयं मया पूर्वं जितः इति जयपत्रेण सभ्यैः वा साक्षिभिः अहं भावयामि । ये सभ्याः वादिनोः अन्योऽन्ययोः समक्षं पक्षं वा उत्तरं न नहि गृह्णन्ति ते चौरवत् सदा दण्ड्याः । लिखिते उत्तरे सम्यक् शोधिते निर्दोषे सति अर्थिप्रत्यर्थिनोः क्रिया कारणम् इष्यते । पूर्वपक्षः पादः, उत्तरात्मकः द्वितीयः, क्रियापादः तृतीयः, चतुर्थस्तु निर्णयाभिधः स्मृतः । साध्यं हि कार्यम् इत्युक्तं क्रिया साधनम् इत्युच्यते । अर्थी तु तृतीयपादे क्रियया प्रतिपादयेत् । प्रतिपत्त्युत्तरं विना व्यवहारः चतुष्पाद् स्यात् क्रमागतान् विवादान् वा कार्यस्य गौरवात् पश्येत् । अथवा यस्य पीडा अभ्यधिका वा कार्यम् अधिकं भवेत् वापि वर्णानुक्रमतः पूर्वं नयेत् विचारयेत् । सभ्यैः उत्तरं कल्पयित्वा एकस्य भावना दातव्या । साध्यस्य साधनार्थं यस्य भावना निर्दिष्टा, सः लिखितादिना अखिलं प्रतिज्ञातं विभावयेत् । एकस्मिन् विवादे द्वयोः वादिनोः क्रिया न च स्यात् । मिथ्या पूर्ववादे तथा कारणे प्रतिवादिनि क्रिया प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी क्रियां निर्दिशेत्। पूर्वपक्षोऽपि कारणात् उत्तरत्वं प्रपद्यते । ततः अर्थी सद्यः प्रतिज्ञातस्य अर्थस्य साधनं लेखयेत् । तत् साधनं तु द्विविधम्- मानुषं दैविकं च । लिखितं भुक्तिः साक्षिणश्च इति क्रिया मानुषं स्यात् । घटादि दैवं भूतस्य अलाभात् तत् भव्यं नियोजयेत् । तत्त्वस्य कपटस्य च अनुसारित्वात् साधनं द्विधा भूतं भव्यं स्मृतम् । सत्यार्थस्य अभिधायितत्त्वं कूटाद्यभिहितं छलं नाम कपटम् । नृपः युक्त्या अनुमानतश्च सामादिभिः उपक्रमैः छलं निरस्य भूतेन व्यवहारान् नित्यं नयेत् । राज्ञा साधनदर्शने कालहरणं न कार्यम्। कालात् धर्मव्याप्ति लक्षणः महान् दोषः भवेत् । नृपः अर्थिप्रत्यर्थिप्रत्यक्षं साधनानि प्रदर्शयेत् । तयोः अप्रत्यक्षं साधनं नैव गृह्णीयात् । साधनानाञ्च ये दोषाः ते विवादिना वक्तव्याः। गूढास्तु सभ्यैः काले शास्त्रप्रदर्शनात् प्रकटाः । अन्यथा दूषयन् दण्ड्यः साध्यार्थात् एव हीयते । साधनं सम्यक् विमृश्य, कार्यनिर्णयं कुर्यात् । कूटसाधनकारी कार्यानुरूपतः दण्ड्यः । कूटसाक्षी तथैव साक्ष्यलोपी द्विगुणं दाण्ड्यः। अधुना यथावदनुपूर्वशः लिखितं वच्मि । ब्रह्मणा अनुभूतस्मारकं लिखितं कृतम् । लिखितं द्विविधं स्मृतम् । राजकीयं,

लौकिकञ्च, स्वहस्तलिखितं वा अन्यहस्तेनापि विलेखितम् असाक्षिमत् साक्षिमत् देशस्थितेः तयोः सिद्धिः भवेत् । लौकिकं च एतत् भागदानक्रियादानसंविद्दानऋणादिभिः सप्तधा । राजशासनं तु त्रिविधम् - शासनार्थम्, ज्ञापनार्थं निर्णयार्थं चेति । साक्षिमत् रिकथ्यभिमतं सुभक्तियुक् भागपत्रं सिद्धिकृत् । अन्यथा पित्रा कृतमपि अकृतं स्मृतम् । स्थावरस्य दानक्रयविक्रयपत्रकं दायादाभिमतं ग्रामपादिसाक्षिकं सिद्धिकृत् स्मृतम्। राजकीयं लेख्यं राज्ञा स्वहस्तसंयुक्तं वा स्वमुद्रा चिह्नितम् अथवा प्रकृतिभिश्च मुद्रितम् ।

पक्षे कालं वर्षं मासं पक्षं तिथिं तथा वेलां प्रदेशं विषयं स्थानं जात्या आकृती वयः साध्यं प्रमाणं संख्याम् आत्मनः नाम च तथा क्रमशः राज्ञां नाम निवासं साध्यनाम पितृणाम् आत्मनः नामानि पीडाम् आहर्तुदायकौ क्षमालिङ्गानि अन्यानि सङ्कीर्त्य लेखयेत् । यत्र एतानि न लिख्यन्ते तत् हीनं लेख्यम् उच्यते । यत् भिन्नक्रमं व्युत्क्रमार्थं प्रकीणार्थं निरर्थकं वा अतीतकाललिखितं, यच्च अप्रगल्भेन स्त्रिया बलात्कारेण कृतं, तत् साधनक्षमं न स्यात् । नरः सद्भिः लेख्यैः साक्षिभिः भोगैः दिव्यैः प्रमाणतां याति । एवम् इह अमुत्र च सुखम् अश्नुते । यः स्वेतरः कार्यविज्ञानी सः साक्षी, स तु अनेकधा दृष्टार्थः शृतार्थश्च द्विधा । पुनः कृतः अकृतश्चेति द्विविधः । येन प्राक् अर्थिप्रत्यर्थिसान्निध्यात् दर्शनैः श्रवणैः वा यथा अनुभूतं सः यदि तुल्यवाक् तदा साक्षी भवति । यस्य बुद्धिः स्मृतिः श्रोत्रं च सुदीर्घेणापि न उपहता भवति, सः नित्यशः साक्षित्वं भवेत् । यः अनुभूतः सत्यवाक् स एव साक्षित्वमर्हति । यश्च धर्मवित् उभयानुमतः सः एकोऽपि साक्षी भवति । यथा जाति यथा वर्णं सर्वे सर्वेषु साक्षिणः गृहिणः न पराधीना सूरयश्च अप्रवासिनः साक्षिणः भवन्ति । युवानः साक्षिणः कार्याः च स्त्रीषु स्त्रियः कीर्तिताः । साहसेषु सर्वेषु स्तेयसङ्ग्रहणेषु तथा वाग्दण्डयोश्च पारुष्ये साक्षिणः न परीक्षेत । बालः अज्ञानात्, स्त्री असत्यात् कूटकृत् पापाभ्यासात्, बान्धवः स्नेहात्, अरिः वैरनिर्यातनात्, विजातिः अभिमानात्, शठः लोभात्, तथा भृत्यः उपजीवनसङ्कोचात् विब्रूयात् तस्मात् एते असाक्षिणः किञ्च अर्थसम्बन्धिनः विद्ययौ न सम्बन्धिनोऽपि न साक्षिणः भवन्ति ।

श्रेण्यादिषु वर्गेषु चेत्, कश्चित् द्वेष्यताम् इयात् तदा तेभ्यः तस्य साक्ष्यं न स्यात् । ते सर्वे एव द्वेष्टारः भवन्ति । राज्ञा अर्थिप्रत्यर्थिसान्निध्ये साक्षि प्रभाषणे

सन्निधौ साध्यार्थे कालहरणं न कार्यम्। प्रत्यक्षं साक्ष्यं वादयेत् कथञ्चन परोक्षं न वादयेत्। यश्च देशितः अपि साक्ष्यं नाङ्गीकरोति स दण्ड्यः स्यात् । यः साक्षात् नैव निर्दिष्टः न आहूतः, नैव देशितः, सः मिथ्या वा तथ्यं ब्रूयात्, सदा सः अपि नराधमः दण्ड्यः । द्वैधे बहूनां वचनं समेषु गुणिनां वचः अधिकगुणानां वचनं सदा गृह्णीयात्। यत्र अनियुक्तोऽपि यदि किञ्चन ईक्षेत वा शृणुयात्, तत्र सः पृष्टः सन् यथादृष्टं यथाशृतं ब्रूयात् । विभिन्नकाले साक्षिभिः अंशतः पृथक् यत् ज्ञातं, तत् एकैकं वादयेत्। तत्र एष विधः सनातनः । तेषां प्रेक्षकाणां स्वभावोक्तं वचः गृह्णीयात्, बलात् क्वचित् न गृह्णीयात् । साक्षिणा साक्ष्ये उक्ते पुनः पुनः न प्रष्टव्यम् । साक्षिणः आहूय शपथैः भृशं नियम्य पृच्छेत् । पौराणैः सत्यवचनधर्ममाहात्म्यकीर्तनैः अनृतस्य अतिदोषैः भृशं शनैः उत्रासयेत् । देशे काले कथं कस्मात् त्वया किं दृष्टं शृतं यच्च लिखितं लेखितं तत् तत् सत्यं वद। साक्षी सत्यं ब्रुवन् पुष्कलान् लोकान् इह च अनुत्तमां कीर्तिम् आप्नोति। एषा वाक् ब्रह्मपूजिता । साक्षी सत्येन पूयते, धर्मः सत्येन वर्धते । तस्मात् सर्ववर्णेषु साक्षिभिः सत्यं हि वक्तव्यम् । आत्मा एव आत्मनः साक्षी, आत्मा एव आत्मनः गतिः । तस्मात् स्वं नृणाम् उत्तमं साक्षित्वम् आत्मानं मा अवसंस्थाः । पापकारी कश्चित् मां न पश्यतीति मन्यते वै, देवाः तथा अन्तरपूरुषः तांश्च प्रपश्यन्ति। त्वया जन्मान्तरशतैः यत्किञ्चित् सुकृतं कृतं, तत् सर्वं यं मृषा पराजयसे तस्य जानीहि, किञ्च शतजन्मकृतं तत्पापं सदा समाप्नोषि । एवं सभायाम् अरहोगतं साक्षिणं श्रावयेत् राजा देशानुरूपं वा दैवराजकृतम् उपाधिं समीक्ष्य, साधनदर्शने कालं दद्यात् । लिखिते विनष्टे राजा साक्षिभिः भोगैश्च विचारयेत् । लेखसाक्षिविनाशे तु सद्भोगादेव चिन्तयेत् । सद्भोगाभावतः सदा साक्षिलेखतः विमृशेत् । किञ्च केवलेन भोगेन लेखेन साक्षिभिश्च विमृशेत् । लोकदेशादि धर्मतः राजा कार्यं न चिन्तयेत्। कुशलाः कुटिलाः सदा लेख्यबिम्बानि कुर्वन्ति । तस्मात् लेख्यस्य सामर्थ्यात् ऐकान्तिकी सिद्धिः न मता । स्नेहलोभभयक्रोधैः तथा कूटसाक्षित्वशङ्कया केवलैः साक्षिभिः सर्वदा कार्यं नैव सिद्ध्यति । यत् बलदर्पतः अस्वामिकं स्वामिकं वा भुङ्क्ते, इति शङ्कितभोगैः केवलैः कार्यं न सिद्ध्यति । नृपः शङ्कितव्यवहारेषु शङ्कयेत्, अन्यथा न हि कुर्यात् । अन्यथा शङ्कितान् सभ्यान् चोरवत् दण्डयेत् । अन्यथा शङ्कनात् नित्यम् अनवस्था प्रजायते । लोकः विभिद्यते । धर्मः व्यवहारश्च हीयते ।

आगमः दीर्घकालश्च निराक्रोशः निरन्तरः प्रत्यर्थिसन्निधानश्च भुक्तः भोगः प्रमाणवत् भवति । यस्तु केवलं सम्भोगं कीर्तयेत् । क्वचित् आगमं न। स तु भोगच्छलापदेशेन तस्करः विज्ञेयः। यत्र स्तोकापि भुक्तिः नो तत्र आगमेऽपि बलं नैव भवति । धनी यं कश्चित् अर्थं परैः सन्निधौ दशवर्षाणि भुज्यमानं प्रेक्षते, सः तं अर्थं लब्धुं नार्हति। इह यस्य भूः विंशतिः वर्षाणि परैः भुक्ता सति राज्ञि समर्थस्य तस्य सः इह न सिध्यति । यः बहूनि अब्दशतानि अनागमं भुङ्क्ते, पृथिवीपतिः चौरदण्डेन तं दण्डयेत् । या भुक्तिः अनागमापि षष्टिवर्षात्मिका तथा विच्छेदो परमोज्झिता सा केनचित् अपहर्तुं न शक्या । आधिः, सीमा, बालधनं, निक्षेपः तथा उपनिधिः राजस्वं च श्रोत्रियस्वं भोगेन न प्रणश्यति । उपेक्षां कुर्वतः तूष्णीम्भूतस्य तिष्ठतः तस्य पूर्वोक्ते काले विपन्ने धनी तत्फलं न आप्नुते । भोगः सङ्क्षेपतः तथा उक्तः, अथ दिव्यम् उच्यते । यत्र धनिनः प्रमादात् त्रिविधं साधनं न चेत् वादी अर्थम् अपह्नुते तत्र त्रिविधः विधिः उक्तः । चोदनाप्रतिकालः युक्तिलेशः तथैव शपथः च तृतीयः प्रोक्तः । तैः क्रमात् साधयेत् । विशिष्टतर्किता शास्त्रशिष्टाविरोधिनी या योजना स्वार्थसंसिद्ध्यै सा युक्तिः अन्यथा न भवति । दानं प्रज्ञापना भेदः च या सम्प्रलोभक्रिया चित्तापनयनं चैव हि विभावकाः हेतवः । अभीक्ष्णं त्रिचतुः पञ्चकृत्वो वा चोद्यमानोऽपि तत् वचः न प्रतिहन्यात्, तदा परतः स अर्थं दाप्यते । युक्तिषु अपि असमर्थासु दिव्यैः एनं विमर्दयेत् । यस्मात् महात्मभिः देवैः दुष्करार्थे परस्परविशुद्ध्यर्थं प्रयुक्तानि । तस्मात् नामतः दिव्यानि उच्यन्ते । सप्तर्षिभिः अन्नहेतवे आत्मशुद्धये दिव्यानि शपथानि स्वीकृतानि । यः स्वमहत्वात् ज्ञानदर्पतः नित्यं वसिष्ठाद्याश्रितं दिव्यं न कुर्यात्। सः नरः धर्मतस्करः । ज्ञानदुर्बलः ब्राह्मणः दिव्ये प्राप्तेऽपि न शपेत् देवाः तस्य धर्मार्थं संहरन्ति । न संशयः। यस्तु स्वशुद्धिम् अन्विच्छन् अतन्द्रितः सन् दिव्यं कुर्यात् सः विशुद्धः सन् कीर्तिं स्वर्गञ्च लभते, अन्यथा नैव लभते अग्निः विषं घटः तोयं धर्माधर्मौ च तण्डुलाः शपथाश्च एते मुनिभिः दिव्यनिर्णयो निर्दिष्टाः कृताः । कार्यं दृष्ट्वा लोकप्रत्ययतः पूर्वं पूर्वं गुरुतरं दिव्यं नियोजयेत् । प्रोक्तं सर्वं दिव्यं गुरु स्मृतम् । करे तप्तायोगोलकं धृत्वा नवपदं गच्छेत्, वा तप्ताङ्गारेषु पद्भ्यां सप्तपदानि गच्छेत् । किं वा हस्तेन तप्त तैल गतं लोहमाषं निर्हरेत् । अथवा जिह्वया सुतप्तं लोहपत्रं संलिहेत् । गरलं प्रभक्षयेद्वा हस्तैः कृष्णसर्पं समुद्धरेत्। स्वस्य तुलासाम्यं कृत्वा, हीनाधिक्यं विशोधयेत्।

स्वेष्टदेवस्नपनजम् उत्तमम् उदकम् अद्यात् । ततः यावन्नियमितः कालः तावत् अप्सु निमज्जयेत् । अधर्मधर्ममूर्तीनाम् अदृष्टस्य हरणं विनाशयेत्। विशङ्कितः कर्षमात्रान् तण्डुलान् च चर्वयेत् । पूज्यपादान् स्पर्शयेत्, पुत्रादीनां शिरांसि च धनानि संस्पृशेत्। तथा झटिति सत्येनापि शपेत् । यत् यत् दुष्कृतमस्ति तत्तत् प्राप्नुयां सर्वञ्च सत्कृतं नश्येत् । सहस्रे अपहृते अग्निः स्मृतः पुनः पादोने अपहृते विषं स्मृतम् । त्रिभागोने घटः प्रोक्तः तथा अर्धे सलिलं प्रोक्तम् । तदर्धे धर्माधर्मौ स्मृतौ । अष्टमांशे तण्डुलाः स्मृताः । षोडशांशे च शपथाः एवं दिव्यविधिः स्मृतः । परीक्षकैः निकृष्टानाम् एषा संख्या, मध्यानां द्विगुणा स्मृता । उत्तमानां च चतुर्गुणा कल्पनीया । यदा अभियोक्ता शिरोवर्ती न स्यात् तदा दिव्यं न दीयते । अभियोक्ता दिव्येषु शिरः स्थाने परिकीर्त्यते। अभियुक्ताय श्रुतिनिदर्शनात् दिव्यं दातव्यम् । कश्चित् अभियोक्तारं दिव्येषु न विनियोजयेत्। इच्छया तु इतरः कुर्यात् तदा इतरः शिरः वर्तयेत्। दस्युभिः निर्दिष्टानाम् अतः पार्थिवैः शङ्कितानाम् आत्मशुद्धिपराणां शिरः विना दिव्यं देयम् । परदाराभिशापे अगम्यागमनेषु तथा महापातकशस्ते दिव्यमेव । अन्यथा च न शुद्धिः। चौर्याभिशङ्कायुक्तानां तप्तमाषः विधीयते । प्राणान्तिकविवादे साधने विद्यमानेऽपि वादी दिव्यम् आलम्बते । तत्र साधनं न पृच्छेत् । यत्र साधनं सोपधं तत् यदि राज्ञे श्रावितं धर्मासनगतः राजा तत् दिव्येन शोधयेत् । यदा यत् लेख्यं यन्नामगोत्रैः लेख्यस्य तुल्यं भवेत्, तदा तत्र अगृहीत धने दिव्येन निर्णयः कार्यः । यत्र मानुषं साधनं न स्यात् तत्र दिव्यं प्रदापयेत् तथा च अरण्ये निर्जने रात्रौ अन्तर्वेश्मनि साहसे स्त्रीणां शीलाभियोगेषु सर्वेषाम् अर्थानाम् अपह्नवेषु तथा प्रमाणेषु प्रदुष्टेषु च दिव्यैः विशोधनं कार्यम् । राजा महापापाभिशापेषु च निक्षेपहरणेषु च साक्षिषु सत्स्वपि दिव्यैः कार्यं परीक्षेत । यत्र प्रथमाः तथा परे परेभ्यश्च अन्ये साक्षिणः भिद्यन्ते, तत्र शपथैः तं वादं नयेत्। स्थावरेषु पूगश्रेणिगणेषु भृत्यानां दत्तादत्तेषु विवादेषु स्वामिनां निर्णये विक्रयादानसम्बन्धे धनं क्रीत्वा अनिच्छति । साक्षिभिः लिखितेन तथा भुक्त्या एतान् प्रसाधयेत् । विवाहोत्सवद्यूतेषु विवादे समुपस्थिते तत्र साक्षिणः साधनं दिव्यं न लेख्यकञ्च न साधनम् । द्वारमार्गक्रिया भोग्यजलवाहादिषु भुक्तिः एव गुर्वी स्यात् । न दिव्यं न च साक्षिणः प्रमाणम् । यदि एकः मानुषीं ब्रूयात् अन्यः दैविकीं, नृपः तत्र मानुषीं क्रियां गृह्णीयात् । न तु दैवीम्। यदि मानुषी क्रिया एकदेश प्राप्तापि विद्येत सा ग्राह्या । न तु पूर्णापि दैविकीं वदतां नृणां न ग्राह्येति । प्रमाणैः हेतुचरितैः शपथेन नृपाज्ञया वादिना सम्प्रतिपत्त्या वा

षड्विधः निर्णयः स्मृतः । यत्र लेख्यं न भुक्तिश्च न साक्षिणश्च न विद्येत, दिव्यावतारश्च न अस्ति, तत्र पार्थिवः प्रमाणं कुर्यात् । ये सन्दिग्धरूपिणः सीमाद्याः वादाः निश्चेतुं न शक्याः स्युः, तत्र नृपतिः प्रमाणं स्यात् । यतः सः प्रभुः। राजापि स्वतन्त्रः अर्थान् साधयन् किल्बिषी स्यात्, तस्मात् धर्मशास्त्रविरोधेन अर्थशास्त्रं विचारयेत् । राजामात्यप्रलोभेन व्यवहारः दुष्यति । लोकोऽपि धर्मात् च्यवते कूटार्थे च सम्प्रवर्तते। अतिकामक्रोधलोभैः व्यवहारः प्रवर्तते । कर्त्रून् साक्षिणः सभ्यान् राजानञ्च व्याप्नोति। अतः तन्मूलं छित्वा, तं विमृशं नयेत् । ये अनर्थम् अर्थवत् कृत्वा, नृपाय दर्शयन्ति, यश्च नृपः अविचिन्त्य तैः निदर्शितं तथ्यं मन्यते तथा स्वयं करोति । तैः तद्वृत्तौ अष्टगुणम् अद्यं भुज्यते । सभासदः अधर्मतः प्रवृत्तं तं न उपेक्षेरन्, उपेक्षमाणाः सनृपाः अधोमुखाः नरकं यान्ति । धिग्दण्डः तथा वाग्दण्डः तौ उभौ सभ्यायत्तौ । अर्थदण्डः वधदण्डः उभावपि नृपाधीनौ उक्तौ । यः तीरितम् अनुशिष्टं विधर्मतः मन्येत सः द्विगुणं दण्डम् आधय पुनः तत्कार्यम् उद्धरेत् । साक्षिसभ्यावसन्नानां दूषणे पुनः दर्शनं च स्वचर्चावसितानां पौनर्भवः विधिः प्रोक्तः । अमात्यः प्राड्विवाकः वा ये च अन्यथा कार्यं कुर्युः, तत् सर्वं नृपतिः कार्यं कुर्यात् । तान् सहस्रं दण्डयेत् । दण्डं विना कश्चित् जातुमार्गे न हि अवतिष्ठते। सभ्यदोषे सन्दर्शिते नृपः तत् उद्धृत्य नयेत् । सभासदः अधर्मतः प्रवृत्तं तं न उपेक्षेरन्। उपेक्ष्यमाणाः सनृपाः अधोमुखाः नरकं यान्ति। धिग्दण्डः तथा वाग्दण्डः तौ उभौ सभ्यायत्तौ । अर्थदण्डः वधदण्डः उभावपि नृपाधीनौ उक्तौ । यः तोरितम् अनुशिष्टं विधर्मतः मन्येत सः द्विगुणं दण्डम् आधाय पुनः तत् कार्यम् उद्धरेत् । साक्षिसभ्यावसन्नानां दूषणे पुनः दर्शनं च स्वचर्चावसितानां पौनर्भवः विधिः प्रोक्तः । अमात्यः न्यायाधिपतिः अथवा ये सभ्याः अन्यथा कार्यं कुर्युः, तत् सर्वं नृपतिः कार्यं कुर्यात् । तान् सहस्रं दण्डयेत् । दण्डं विना कश्चित् जातुमार्गे न हि अवतिष्ठते । सभ्यदोषो सन्दर्शिते नृपः तत् उद्धृत्य नयेत् । वादी प्रतिज्ञाभावनात् प्राड्विवाकादि पूजनात् तथा जयपत्रस्य आदानात् लोके जयी निगद्यते । राजा तु सभ्यादिभिः विनिर्णिक्तं प्रतिवादिना च विधृतं दृष्ट्वा जयिने जयपत्रकं दद्यात् । अन्यथा अभियोगस्य अभियोक्तारं मिथ्याभियोगसदृशं बहुवत्सरं निरुद्यात् तथा अभियोगिनम् अभियुक्तम् अर्हयेत् । यः कामक्रोधौ संयम्य धर्मेण अर्थान् पश्यति प्रजाः सिन्धवः समुद्रमिव तम् अनुवर्तन्ते । जरयापि समन्वितः जीवितोः मातापित्रोः अस्वतन्त्रः भवेत् । तयोः बीजप्राधान्यदर्शनात् पिता एव श्रेयान् बीजिनः नाम जनकस्याभावे

माता श्रेयसी । तद्भावे तु पूर्वजः । यतः ज्येष्ठे स्वातन्त्र्यं स्मृतम्, ज्यैष्ठ्यञ्च गुणवयः कृतम् । याः सर्वाः पितुः पल्यः स्युः । तासु मातृवत् वर्तेत तथा स्वसमैकेन भागेन ताः सर्वाः प्रतिपालयन् । सर्वाः प्रजाः अस्वतन्त्राः, पृथ्वीपतिस्तु स्वतन्त्रः । शिष्यः अस्वतन्त्रः स्मृतः आचार्ये तु स्वतन्त्रता वर्तते । सुतस्य सुतदाराणाम् अनुशासने वशित्वं किञ्च सुते विक्रये दाने च पितुः वशित्वं नास्ति । परतन्त्रेषु एते सर्वे एव नित्यशः स्वतन्त्राः । यतः अनुशिष्टौ विसर्गे वा अविसर्गे ईश्वराः मताः । पिता मणिमुक्तप्रवालानां प्रभुः । किन्तु सर्वस्य स्थावरस्य पिता न पितामहश्च न प्रभुः ।

भार्या, पुत्रः, दासः, एते त्रय एव अधनाः स्मृताः । ते यत् समधिगच्छन्ति तत् एते यस्य तस्यास्ति । यत् यस्य हस्ते वर्तते स एव तस्य स्वामी नास्ति । तथा हि चौर्याद्यैः अन्यस्वम् अन्यहस्तेषु किमिति प्रश्ने न दृश्यते । तस्मात् शास्त्रतः एव स्वाम्यं स्यात् अनुभवात् अपि न । अन्यथा एतेन अस्य जनस्य अपह्नतं वक्तुं न युक्तम्। यथावर्णं पृथक् पृथक् अर्थागमः शास्त्रे विदितः । तस्य शास्त्रस्य यत् धर्मः तत् सदा म्लेच्छानामपि शास्ति। एतच्च लोकानामपि हेतवे पूर्वाचार्यैः तु कथितम् । स्वस्य च स्त्रियः तथा पुत्राश्च समानभागिनः कार्याः । कन्या स्वभागार्द्धहरा, दौहित्रस्तु तदर्धभाक् भवति । अधिपे मृतेऽपि पुत्राद्याः उक्त भागहराः भवन्ति । सुतः मात्रे चतुर्थांशं भगिन्यै मातुरर्द्धकं, तदर्द्धं भागिनेयाय, शेषं सर्वं स्वयं हरेत् । पुत्रो, पौत्रः, पत्नी, पुत्री, तस्याः सुतः नाम दौहित्रः, माता, पिता भ्राता च तथा पूर्वेषाम् अलाभात् तस्य सुतः धनं हरेत्। स्त्रीणां सौदायिकं धनं प्राप्य स्वातन्त्र्यम् इष्यते । स्थावरेष्वपि विक्रये दाने च यथेष्टं स्वातन्त्र्यम् । ऊढया कन्यया वापि पत्युः पितृगृहात् दत्तं यत् धनं तत् सौदायिकं स्मृतम् । पित्रादि धनसम्बन्धहीनं यत् यत् उपार्जितं तत् तत् सः कामम् अश्नीयात् । यतः तत् अविभाज्यं धनम् । यत्तु जलतस्कररराजाग्निव्यसने समुपस्थिते स्वशक्त्या संरक्षेत्, तस्य दशमः अंशः स्मृतः । यत्र हेमकारादयः सम्भूय शिल्पं कुर्वते ते यथार्हतः कार्यानुरूपं भृतिः लभेरन् । संस्कर्ता तत् कलाभिज्ञः मनीषिभिः शिल्पी प्रोक्तः । हर्म्यं देवगृहं वा वापिकोपस्कराणि च सम्भूय, कुर्वतां तेषां प्रमुख्यः द्व्यंशमर्हति। नर्तकानामेव एषः धर्मः सद्भिः उदाहृतः । तालज्ञः अर्थार्थं लभते, अन्ये गायनास्तु समांशिनः भवन्ति । स्वाम्याज्ञया चौरैः परराष्ट्रात् यत् धनं हृतम्, षष्ठांशं राज्ञे उद्धृत्य समांशकं विभजेरन् । प्रसृतानां तेषां चेत् ग्रहणं समवाप्नुयात् । तन्मोक्षार्थं यद्दत्तं ते

समांशतः वदेयुः । ये तु हेमधान्यरसादिना प्रयोगं समन्यूनाधिकैः अंशैः तेषां यथाविधः लाभः भवति । यः समः न्यूनः अधिकः वा अंशः अनुक्षिप्तः सः तथैव व्ययं दद्यात्, कर्म कुर्यात्, लाभं गृहीत । वणिजानां कर्षकाणाञ्च एषः एव विधिः स्मृतः । सामान्यं याचितं न्यासः आधिः दासश्च तद्धनम् अन्वाहितं च निक्षेपः अन्वये सति सर्वस्वम् एतानि नववस्तूनि पण्डितैः आपत्स्वपि न देयानि । यः अदेयं गृह्णाति, यश्च अदेयं प्रयच्छति, तौ उभौ चौरवत् शास्यौ उत्तमसाहसं दाप्यौ च । यः अस्वामिकेभ्यः चौरेभ्यः धनं विगृह्णाति वा अव्यक्तमेव क्रीणाति, सः नृपैः चौरवत् दण्ड्यो भवति। यः ऋत्विक् अदुष्टम् अनपकारिणं याज्यं तथा याज्यः अदुष्टम् ऋत्विजं त्यजेत् । तौ उभौ अपि विनेयौ भवतः । वणिक् पण्ये प्रदेशाद्यानुरूपतः तत् व्ययं ज्ञात्वा द्वात्रिंशांशं षोडशांशं वा लाभं नियोजयेत्, अन्यथा नेति वृद्धिं हित्वा अर्द्धधनैः सदा वाणिज्यं कारयेत् । यदा मूल्यात् द्विगुणा वृद्धिः अधमर्णिकात् गृहीता तदा उत्तमर्णमूलं दापयेत् । ततः अधिकं न दापयेत् । धनिकाः चक्रवृद्ध्यादिमिषतः प्रजानां धनं संहरन्ति । यतः राजा तेभ्यः प्रजां संरक्षयेत् । यः समर्थः सन् धनिकात् गृहीतं धनं न ददाति, राजा सामदण्डविकर्षणैः तस्मात् सन्दापयेत् । यदा यस्य लिखितं नष्टं तदा तेन प्रबोधितं साक्षिभिः सम्यक् विज्ञाय पूर्ववत् सदा दापयेत् । यश्च अदत्तं गृह्णाति, सुदत्तं पुनः इच्छति एतौ उभौ धर्मज्ञेन महीक्षिता दण्डनीयौ । यः कूटपण्यस्य विक्रेता सः सदा चौरवत् दण्ड्यः । शिल्पिनां कार्याणि गुमांश्च दृष्ट्वा भृतिम् आवहेत् । राजा दिने दिने राजतात् पञ्चमांशं चतुर्थांशं तृतीयांशं वा अर्द्धं कर्षयेत् । न तु अधिकम् । पलशतं शुचिः स्वर्णं विहितं हीनं न तु स्यात् । रजतं चतुः शतांशकं तथा ताम्रं शतांशकं न्यूनं न स्यात् । वङ्गं जसदं तथा सीसं षोडशांशकं हीनं स्यात्, अयः अष्टांशम् । अन्यथा शिल्पी सदा नृपैः दण्डनीयः।

सुघटिते कार्ये सुवर्णं द्विशतांशं च रजतं शतांशकं हीनं सुसंयोगे तु वर्द्धते । अन्यथा तु स्वर्णकारकः षोडशांशं दण्ड्यः स्यात् । संयोगघटनं दृष्ट्वा वृद्धिं ह्रासं प्रकल्पयेत् । स्वर्णस्योत्तमकार्ये त्रिंशांशकीं, मध्यकार्ये षष्ठ्यंशकी तथा हीनकार्ये तदर्धकी भृतिः मता । कटके तदर्धा तथा विदृते कार्ये तदर्धकी भृतिः ज्ञेया । उत्तमे राजते त्वर्धा, मध्यमे तदर्धा स्मृता । हीने तदर्धा, कटके तदर्धा, सप्रकीर्तिता । ताम्रे वङ्गे तथा यशदे च कार्ये पादमात्रा लोहे अर्द्धा वा समा वा द्विगुणा अथवा अष्टगुणा

भृतिः विज्ञेया । धातूनां कूटकारी द्विगुणं दण्डमर्हति । लोकप्रचारैः उत्पन्नः पुरा मुनिभिः विधृतः व्यवहारः अनन्तपथः । सः वक्तुं नैव शक्यते पञ्चमं राष्ट्रप्रकरणं समासात् उक्तम् । अत्र गुणाः दोषाश्च अनुक्ताः । ते लोकशास्त्रतः ज्ञेयाः ।

दुर्गनिरूपणम्

खातकण्टकपाषाणैः दुष्पथं दुर्गं कथितम् । परितः महाखातं यस्य तादृशं दुर्गमेव पारिखम् । तथा इष्टकैः पाषाणैः अथवा मृद्भिः दुर्गं परिधं स्मृतम् । महाकण्टकवृक्षौघैः व्याप्तं तत् वनदुर्गं, पारितः जलाभावस्तु धन्वदुर्गं प्रकीर्तितम् । आसमन्तात् महाजलं दुर्गं तज्ज्ञैः जलदुर्गं स्मृतम् । तथा विविक्ते सुवारिपुष्टोच्चघरं गिरिदुर्गमम् । अभेद्यं व्यूहवित् वीरव्याप्तं तत् सैन्यदुर्गम्। शूरानुकूलबान्धवं तत् सहायदुर्गं ज्ञेयम् । परिखात् ऐरिणं श्रेष्ठम् । ततः परिधिम्, ततः वनदुर्गं श्रेष्ठम् । ततः वनदुर्गात् धन्वदुर्गं, ततः जलदुर्गं, ततः गिरिदुर्गं च उत्तमं भवति । सहायसैन्यदुर्गे सर्वदुर्गप्रसाधके, ताभ्यां विना अन्यदुर्गे महीभुजां निष्कलानि सेनादुर्गं सर्वदुर्गेभ्यः श्रेष्ठं बुधैः स्मृतम् । अन्यानि तत् साधकानि, तत् नृपतिः सदा रक्षेत्। यस्य सेनादुर्गं स्यात् तस्य इयं भू वश्या । सैन्यदुर्गेण विना अन्यदुर्गं बन्धनम् । आपत्काले अन्यदुर्गाणाम् आश्रयः उत्तमः मतः। दुर्गस्थः यदि अस्त्रधरः एकोऽपि शतं योधयति, शतं सहस्राणि । तस्मात् दुर्गं समाश्रयेत् । शूरस्य सैन्यदुर्गस्य सर्वं स्थलं दुर्गमिव किञ्च राजा युद्धसम्भारपुष्टानि धान्यवीरास्त्रपुष्टानि तथा कोशपुष्टानि दुर्गाणि धारयेत् । सहायपुष्टं यद्दुर्गं तत्तु श्रेष्ठतरं कथितम् । सहायपुष्टदुर्गेण विजयः निश्चयात्मकः भवति । यत् यत् दुर्गं सहायपुष्टं तत् सर्वं सफलं भवेत् । दुर्गाणां तु परस्परानुकूल्यं विजयप्रदं भवति ।

सेनानिरूपणम्

सप्तमं प्रकरणं सैन्यमुच्यते । शस्त्रास्त्रसंयुक्तमनुष्यादि गणात्मिका सेना उच्यते । सा स्वगमा अन्यगमा चेति द्विधा । पृथक् सैव दैवी आसुरी मानवी चेति त्रिधा, पूर्वपूर्वा बलाधिका । या स्वयं गन्त्री सा स्वगमा, यानगा अन्यगमा स्मृता । यथा पादातं स्वगमम् अन्यत् रथाश्वगजगं त्रिधा । सैन्यात् विना राज्यं न, धनं न, पराक्रमः न, यदा सर्वे बलिनः वशगाः दुर्बलस्य च शत्रवः भवन्ति तदा अल्पजनस्य नृपस्यापि तु किं पुनः ? शारीरं हि बलं शौर्यबलं तथा सैन्यबलं चतुर्थम् आस्तिकबलं पञ्चमं धीबलं,

षष्ठम् आयुर्बलं स्मृतम् । एतैः उपेतः सः विष्णुः एवेति निश्चयः । बलेन विना अल्पमपि रिपुं जेतुं सदा न क्षमाः । यतः देवासुरनराः अन्योपायैः तु एव नित्यं भवन्ति। बलमेव रिपोः नित्यं परं पराजयकरम् । तस्मात् नृपः अभेद्यं बलमेव तु यत्नतः धारयेत् । सेनाबलं स्वीयं मैत्रञ्च द्विविधम् । तच्च मौलसाद्यस्कभेदाभ्यां द्विधा, तदपि सारम् असारञ्च द्विधा। तत् अशिक्षितं शिक्षितञ्च गुल्मीभूतम् अगुल्मकं दत्तास्त्रादि स्वशस्त्रास्त्रं स्ववाहिदत्तवाहनम्। सौजन्यात् साधकं मैत्रं भूत्या प्रपालितं स्वीयं बह्वब्दानुबन्धिमौलं तदन्यथा यत् साद्यस्कम् । सुयुद्धकामुकं सारं विपरीतकम् असारं व्यूहकुशलं शिक्षितं विपरीतम् अशिक्षितम्। साधिकारिगुल्मीभूतं स्वस्वामिकम् अगुल्मकं स्वामिना यत् तत् दत्तास्त्रादि अतोऽन्यथा स्वशस्त्रास्त्रं कथ्यते । तद्वत् कृतगुल्मं स्वयं गुल्मं दत्तवाहनं यत् स्वतेजसा स्वाधीनं किरातादि तत् आरण्यकम्। रिपुणा उत्सृष्टं भृत्यवर्गे निवेशितं वापि शत्रोः भेदाधीनं कृतं सैन्यं शतृबलं स्मृतम् । उभयं दुर्बलं प्रोक्तं तत् केवलं साधकं न । समैः नियुद्धकुशलैः व्यायामैः नतिभिः बाहुयुद्धार्थं भोज्यैः शारीरकं बलं वर्धयेत् । नृपः व्याघ्राणां मृगयाभिः सदा शस्त्रास्त्राभ्यासतः तथा शूरसंयोगात् शौर्यबलं सम्यक् वर्धयेत् । सुभृत्या सेनाबलं तथा तपोऽभ्यासैः तु आस्त्रिकं सदा शस्त्रचतुरसंयोगात् धीबलं वर्धयेत् । यथा नित्यं सत्क्रियाभिः राज्यं चिरस्यापि भवेत् । तथा स्वगोत्रे कुर्यात्, तदेव आयुर्बलम् उच्यते । गोत्रे यावत् राज्यम् अस्ति सः तावदेव जीवति । चतुर्थांशानिति राजा अश्वतः चतुर्गुणं पादातं पञ्चमांशान् वृषभान् तथा अष्टांशान् क्रमेलकान् उष्ट्रात् चतुर्थांशान् गजान् गजार्धान् रथान् तथा रथात् द्विगुणं बृहन्नालीकं सदा धारयेत् । पदातिबहुलं मध्याश्वं गजाल्पकं तथा वृषोष्ट्रसामान्यं सैन्यं रक्षेत्, नागाधिकं न धारयेत् । वत्सरे लक्षकर्षभाक् नृपतिः सवयः सारवेशोच्चशस्त्रास्त्रं च पृथक् शतं लघुनालिकयुक्तानां पदातीनां शतत्रयम् अशीत्यश्वान् एकं रथं बृहन्नालद्वयं दश उष्ट्रान् द्वौ गजौ द्वौ शकटौ षोडश ऋषभान् लेखकषट्कं तथा मन्त्रित्रितयं सम्यक् धारयेत् । राजा मासि सम्भारदानभोगार्थं सार्धसहस्रकं लेखकार्थे शतं मन्त्र्यर्थे शतत्रयं दारपुत्रार्थे त्रिशतं विद्वदर्थे शतद्वयं साद्यश्वपदगार्थं चतुःसहस्रकं गजोष्ट्रवृषनालार्थं चतुःशतं व्ययीकुर्यात् । राज्ञा शेषं सार्धसहस्रकं धनं कोशे स्थाप्यम् । प्रतिवर्षं स्ववेशार्थं

सैनिकेभ्यः धनं हरेत्। लोहसारमयः चक्रसुगमः मञ्चकासनः स्वान्दोलायितरूढः मध्यमासनसारथिः शस्त्रास्त्रसन्धार्य्युद्धरः इष्टच्छायः मनोरमः तथा सदश्वकः एवंविधः रथः राज्ञा नित्यं रक्ष्यः । नीलतालुः नीलजिह्वः वक्रदन्तो वा अदन्तकः दीर्घद्वेषी क्रूरमदः तथा पृष्ठविधूनकः दशाष्टोन नखः मन्दः भूविशोधनपुच्छकः एवंविधः गजः अनिष्टः विपरीतः शुभावहः । गजः, भद्रः, मन्द्रः, मृगः मिश्रः इति जात्या चतुर्विधः । मध्वाभदन्तः सबलः समाङ्गः वर्त्तुलाकृतिः सुमुखः अवयवश्रेष्ठः सदा भद्रगजः ज्ञेयः । स्थूलकुक्षिः सिंहदृक् बृहत्वग्गलशुण्डकः मध्यमावयवः दीर्घकायः मन्द्रगजः स्मृतः। तनुकण्ठदन्तकर्णशुण्डः स्थूलाक्षः सुह्रस्वाधरमेढ्रः वामनः मृगसंज्ञकः ज्ञेयः । एषां लक्ष्मैः विमलितः गजः मिश्र इति स्मृतः । त्रयाणामपि प्रमाणं तु भिन्नं भिन्नं कीर्तितम् । गजमाने अष्टभिः यवोदरैः अङ्गुलं स्यात् । तैः चतुर्विंशत्यङ्गुलैः मनीषिभिः करः प्रोक्तः । भद्रे सप्तहस्ता उन्नतिः अष्टहस्तप्रदीर्घता उदरस्य परिणाहः दशकरः सदा भवेत् । मन्द्रमृगयोः प्रमाणम् । अतः क्रमात् हस्तहीनं तथा भद्रमन्द्रयोः दैर्घ्यसाम्यं मुनिभिः कथितम् । बृहद्भ्रूगण्डफालः सदा धृतशीर्षगतिः शुभलक्षणं संयुतः गजः सर्वेषां श्रेष्ठः । पञ्चभिः यवैः अङ्गुलेन पृथक् वाजिमानं स्मृतम् । यः वाजी चत्वारिंशाङ्गुलमुखः सः उत्तमोत्तमः। षट्त्रिंशत्यङ्गुलमुखः वाजी उत्तमः परिकीर्तितः । द्वात्रिंशदङ्गुलमुखः यः वाजी सः मध्यमः उदाहृतः। यः मुखे अष्टाविंशत्यङ्गुलः सः नीचः प्रकीर्तितः । वाजिनां मुखमानेन सर्वावयवकल्पना औच्चं तु मुखमानेन त्रिगुणं परिकीर्तितम् । शिरोमणिं समारभ्य पुच्छमूलान्तं दैर्घ्यं मुखमानात् तृतीयांशेन अधिकं चतुर्गुणम् । उदरस्य परिणाहः तु त्र्यङ्गुलाधिकः त्रिगुणः । इदं मानं साधारणम्, अथ विस्तरात् उच्यते अष्टाविंशाङ्गुलमुखं नीचं पुरस्कृत्य यथा शफौच्चं त्र्यङ्गुलं तथा मणिबन्धः अङ्गुलाधिकः । जङ्घा चतुर्हस्ताङ्गुला तथा जानु त्र्यङ्गुलं कीर्तितम्। कूर्परान्तम् ऊरू चतुर्दशाङ्गुलौ बुधैः स्मृतौ । इतः कर्पूरात् स्कन्धान्तम् अष्टत्रिंशत्यङ्गुलं ज्ञेयम् । प्रत्यगूरूमुखसमौ, जङ्घा, पादमानतः ऊनाः । अश्वस्यौन्नत्यं प्रोक्ता । अनन्तरं दैर्घ्यं शास्त्रसङ्गतम् उच्यते । सुप्रसारिता ग्रीवा दैर्घ्ये षष्ठांशेन अधिका द्विगुणा तथा पूर्वतः सार्धपादहीना उच्छ्रित्रा भवति । तत्र स्कन्धादिमुष्कमूलान्तं ग्रीवातुल्यं त्रिकं यावत् शेषम् अंसं नाम स्कन्धं द्व्यंशषष्ठं प्रकल्पयेत् । पुच्छदण्डं शिश्नश्च मुखार्धम्

अण्डौ तदर्धकौ, कर्णः षडङ्गुलः क्वचित् दीर्घः चतुः पञ्चाङ्गुलः प्रोक्तः । शफस्य परिणाहः मुखार्धेन अङ्गुलाधिकः प्रोक्तः । मणिबन्धस्य जङ्घायाश्च परिधिः तदर्धः स्मृतः । रम्यस्य ऊरोः दशैकाङ्गुलपरिधिः बुधैः कीर्तितः । पृष्ठोरुपरिधिर्मूले त्रिः मुखेषु षष्ठांशः । मणिबन्धस्य मणेः परिधिः नवाङ्गुलः तथा अन्त्यजङ्घादि परिधिः पूर्ववत् बुधैः ज्ञेयः। ऊर्वोः अन्तरे पक्षमूलयोः चिह्नम् अङ्गुलम् । ग्रीवोपरि सुविस्तृतमं शिरोमणिं समारभ्य स्कन्धान्तम् उत्तमं जटानां स्थानं सार्धाङ्गुलं दीर्घः बोध्यः । अधोगमा हस्तमात्रायताशुभाजटा कार्या । पुच्छबालाः सार्द्धहस्ताः वा द्विहस्ताः सुशोभनाः । कर्णस्य दीर्घता सप्ताष्टनवदशाभिः अङ्गुलैः तथा तद्विस्तृतिः त्र्यङ्गुला चतुरङ्गुला वा ज्ञेया । ग्रीवा मयूरसन्निभा न स्थूला नापि चिपिटा ग्रीवापरिधिः मुखेनाधिकमुष्टिकः तुल्यः । ग्रीवामूलस्य परिधिः विदशाङ्गुलः द्विगुणः सत्क्रोदं वक्षः तृतीयांशेन विहीनम् ईरितम् । नेत्रोपरि परीणाहः मुखेनाष्टाङ्गुलाधिकः, नासिकोपरि नेत्राधः मुखस्य यः परिधिः सः तृतीयांश विहीनेन मुखेन सदृशः भवेत् । नेत्रस्य विस्तृतिः द्व्यङ्गुलं तस्य दीर्घता त्र्यङ्गुला वापि विस्तृतिः अर्धाङ्गुलाधिका दीर्घता च अङ्गुला ज्ञेया । ऊर्वोः मध्ये एतत् अन्तरं मुखतृतीयांशं तथा नेत्राग्रयोः अन्तरं तु मुखस्य पञ्चमांशं स्मृतम् । कर्णयोः अनन्तरं तद्वत् तथा कर्णनेत्रान्तरं तथा भूस्थयोः शफयोः यत् एतत् तत् कर्णसम्मितं प्रोक्तम् । मणिनेत्रयोः प्रान्तरं भ्रुवोः अन्तरं तथा नासानेत्रयोः अन्तरं सकथ्यङ्गुलं तृतीयांशम् । सोष्ठः प्रोथः त्रिभागपूरणं परिकीर्तितः तथा नासारन्ध्रयोः अन्तरं तयोः दैर्घ्यनवमांशकम् । कायः नरार्धविस्तारः त्रिके हृदयसम्मितः । तथा हृदयं बाहुमूलात् अधः चतुर्थांशं स्मृतम् । हृत्समीपे बाह्वोः अन्तरं षष्ठांशं प्रकीर्तितम्। अधरोष्ठात् अथ अनुचिबुकं सार्धाङ्गुलम् उन्नतम् । उन्नतग्रीवः नतपृष्ठः हयः सदा शोभते । यत् रूपं कर्तुम् उद्युक्तः सर्वतः वीक्ष्य, तद्बिम्बं कस्य यत् तत् अदृष्ट्वा तत् कर्तुं न क्षमते । अतः शिल्पी अग्रे वाजिनं ध्यात्वा अवयवान् कुर्यात् । अनया दिशा वाजिनां विभूतेः सर्वाणि मानानि विधेयानि । श्मश्रुहीनमुखः कान्तप्रगल्भोत्तुङ्गनासिकः दीर्घोद्धतग्रीवमुखः ह्रस्वकुक्षिखुरश्रुतिः तुरप्रचण्डवेगश्च हंसमेघसमस्वनः नातिक्रूरः नातिमृदुः देवसत्त्वः मनोरमः सुकान्तिगन्धर्वणश्च सद्गुणभ्रमरान्वितः तुरगः । वामदक्षिणभेदतः द्विधावर्ती भ्रमरः । स तु पूर्णः अपूर्णः तथा दीर्घः, ह्रस्वः चेति पुनः

द्वेधा भवति । वामदक्षौ स्त्रीपुंदेहे क्रमात् यथोक्तफलदौ विपरीतौ तु तथा शुभाशुभफलप्रदौ न भवतः । यतो हि वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणे इति प्रामाण्यात् । तयोः नीचोर्ध्वतिर्यङ्मुखतः फलभेदः भवेत्। शङ्खचक्रगदापद्मवेदि स्वस्तिकसन्निभः तथा प्रासादतोरणधनुः सुपूर्णकलशाकृतिः स्वस्तिकस्रङ्मीनखड्गश्रीवत्साभः भ्रमः शुभः । येषामश्वानां नासिकाग्रे , ललाटे, गण्डस्थले , कण्ठे , मस्तके , अवर्तः जायते ,ते घोटकाः तुरगोत्तमाः भवन्ति । हृदिस्कन्धे गले कटिप्रदेशे तथैव नाभौ कुक्षौ पार्श्वाग्रे मध्यमाः सम्प्रकीर्तिताः , यस्याश्वस्य ललाटे आवर्तद्वितयस्य मस्तके च तृतीयस्य समुद्भवः सः अश्वः पूर्णहर्षः अश्वः उत्तमः भवेत् । यदा यस्य पृष्ठवंशे एकः आवर्तः सम्प्रजायते , सः सूर्यसंज्ञकः स्वामिनः अश्वसङ्घातान् करोति । यस्य ललाटस्थाः त्रयः आवर्ताः तिर्यगुत्तराः सः त्रिकुटः सदा वाजिवृद्धिकरः भवति । एवमेव प्रकारेण यस्य त्रयः समावर्ताः ग्रीवां समाश्रिताः स वाजीशः नृपमन्दिरे जायते । यदा यस्य वाजिनः कपोलस्थौ द्वौ आवर्तौ दृश्येते, तदा तस्य तौ यशो वृद्धिकरौ प्रोक्तौ । अथवा यस्य एकः कपोलस्थः आवर्तः प्रदृश्यते सः सर्वनामा विख्यातः,स च स्वामिनाशनम् इच्छेत् । यदा यस्य वाजिनः गण्डसंस्थः आवर्तः दक्षिणाश्रितः सः शिवसंज्ञकः स्वामिनं महासौख्यं करोति । तद्वत् वामाश्रितः आवर्त्तः क्रूरः धनक्षयं प्रकरोति । तौ उभौ इन्दाक्षौ शस्तौ नृपराज्यविवृद्धिदौ स्तः । यदा कर्णमूले आवर्त्तौ तथा स्तनमध्ये अपरौ तदा तौ विजयाख्यौ युद्धकाले यशप्रदौ भवेताम् । यदा स्कन्धपार्श्वे आवर्तौ तदा सः अश्वः पद्मलक्षणः भवेत् । स च स्वामिनः विविधान् पद्मान् सततं सुखं करोति । यदा नासामध्ये एको वा आवर्तः यदि वा त्रयं सः वाजी भूपालसंज्ञकः चक्रवर्ती विज्ञेयः । यस्य कण्ठे एकः श्रेष्ठः महावर्तः प्रजायते सः चिन्तामणिः विज्ञेयः, चिन्तितार्थसुखप्रदः भवति । भालकण्ठस्थौ आवर्तौ शुल्काख्यौ वृद्धिकीर्तिदौ भवतः । यदि यस्य वाजिनः वक्त्रगतौ कुक्ष्यन्ते च आवर्तः सः नूनं मृत्युमाप्नोति वा स्वामिनाशनं कुर्यात् । यत् आवर्ताः जानुसंस्थाः ते प्रवासे क्लेशकारकाः । वाजिनः मेढ्रे यः आवर्तः सः विजयश्री विनाशनः भवति । यत् आवर्तः त्रिकसंस्थः सः त्रिवर्गस्य प्रणासनः , पुच्छमूले यत् आवर्त्तः सः धूमकेतुः अनर्थकृत् भवति । यः गुह्ये पुच्छे त्रिके च आवर्ती

सः कृतान्तः भयप्रदः भवति । पार्श्वगमा मध्यदण्डा अङ्गुष्ठमिता अतिदुष्टा सैव शतपदी केशे वर्तमाना सती यथायथा दीर्घा तथा तथा दुष्टा भवति । हनुगण्डहृद्गलप्रोथवस्तुषु तथा कटिशङ्खजानुमुष्ककुन्नाभिगुदेषु भ्रमरः अश्रुपातः किञ्च दक्षकुक्षौ दक्षपादे च सदा अशुभः भवति । वाजिनां गलमध्ये पृष्ठमध्ये उत्तरोष्ठे अधरे कर्णनेत्रयोः अन्तरे वामकुक्षौ पार्श्वयोः ऊरुषु तथा अग्रपादयोः शुभावर्तौ भवति। मूर्धनि सान्तरौ आवर्तौ सूर्यचन्द्रौ शुभप्रदौ भवतः । तौ मिलितौ मध्यफलौ भवतः तथा अतिलग्नौ चेत् , तदा दुष्फलौ भवतः ।

ललाटे उपरिमुखं सान्तरम् आवर्तत्रितयं शुभं तथा अतिसंलग्नं अतिसन्निकटवर्तिनम् द्विसंख्यकौ आवर्तौ अशुभं भवति । ललाटे यदि आवर्तानां त्रिकोणं त्रितयं दुःखदं भवति । गलमध्ये तु एकः आवर्तः शुभः सर्वेषाम् अशुभानां निवारणः भवति । पादे अधोमुखः मूर्धनि उन्नताननः भ्रमः शुभः भवति । पृष्ठमुखी प्रत्यङ्गमुखी शतपदी अत्यशुभा न च मता । यः वाजीमेङ्रस्य पश्चात् भ्रमरी वा स्तनी स च अशुभः कर्णसमीपे भ्रमः सः शृङ्गी स एकः निन्दितः। यः कन्धरायाः पार्श्वे भ्रमरी एकतः एकरश्मिश्च पादोर्ध्वमुखभ्रमरी कीलोत्पाटी सः निन्दितः । यस्मिन् भ्रमौ शुभाशुभौ सः वाजी मध्यमः स्मृतः । मुखे चरणेषु सितः अश्वः पञ्चकल्याणः सदा कथितः । स एव हृदये स्कन्धे तथा पुच्छे श्वेतः कर्णे च श्यामश्चेत् अष्टमङ्गलः श्यामकर्णः सर्वतः एकवर्णभाक्, वत्रापि सर्वतः श्वेतः सदैव हि मेध्यः पूज्यः भवेत् । यस्य नेत्रे वैदुर्यस्सन्निभे स्तः सः मिश्रवर्णः जयमङ्गलः, यदि एकवर्णः सुन्दरः स्यात् तदा पूज्यः । कृष्णपादः श्वेतैकपाद् अपि हरिः निन्द्यः । किञ्च रुक्षः धूसरवर्णः गर्दभाभः अपि निन्दितः । कृष्णतालुः कृष्णोष्ठश्च विनिन्दितः । यः सर्वतः कृष्णवर्णः पुच्छे श्वेतः सः निन्दितः । यः उच्चैः पदन्यासगतिः यश्च द्विपव्याघ्रगतिः यश्च मयूरहंसतित्तिरपारावतगतिः मृगोष्ट्रवानरगतिः यश्च द्विपव्याघ्रगतिः यश्च मयूरहंसतित्तिरपारावतगतिः मृगोष्ट्रवानरगतिः वृषगतिः हयः पूज्यः । अश्वारोही अतिभुक्तः भक्षितो वा अतिपीतः अपि यथा न पीड्यते,सा गति किन्तु श्रेष्ठा ज्ञेया । सः तादृग्गुणविशेषेण विभूषितः तुरगः श्रेष्ठः मतः । यः सुश्वेतफलतिलकः यस्य सः

वर्णान्तरेण विद्धः तथा दलभञ्जी सः च अतिनिन्दितः । यदि स्निग्धवर्णः बलाधिकः सुगतिः महान् सर्वाङ्गसुन्दरः च भवेत् वर्णजान् दोषान् संहन्यात् । भ्रमाद्यैः दूषितोऽपि नातिक्रूरः सदा पूज्यः । अत्यवहनात् वाजिनां सुदोषाः सम्भवन्ति , अत्यन्तवाह्नात् कृशः व्याधिपरिताङ्गः जायते । आवहितः मन्दः सर्वकर्मसु निन्दितः भवेत् । अपोषितः क्षीणः च अत्यन्तपोषणात् रोगी भवति । शिक्षकस्य गुणागुणैः नित्यं सुगतिः दुर्गतिश्च भवेत् । यः जानोः अधः चलपादः ऋजुकायः स्थिरासनः काले देशे तुलाधृतखलीनः सुशिक्षकः स्यात् । सुशिक्षकः मृदुना नातितीक्ष्णेन कशाघातेन मध्यप्रहारेण स्थाने स्वश्वम् ताडयेत्। किञ्च मध्यघातेन स्थाने स्वश्वम् ताडयेत् । हेषिते कक्षयोः तथा स्खलिते पक्षयोः भीते कर्णान्तरे च उन्मार्गगामिनि ग्रीवासु हन्यात् । कुपिते बाहुमध्ये च भ्रान्तचित्ते उदरे अश्वः सन्ताद्यते , प्राज्ञैः कर्हिचित् अन्यस्थानेषु न ताडयेत् । अथवा हेषिते स्कन्धे स्खलिते जघनान्तरं भीते वक्षःस्थलम् उन्मार्गगामिनि वक्त्रं कुपिते पुच्छसङ्घातं तथा भ्रान्ते जानुद्वयं हन्यात् । अकाले विदेशके असकृत् अश्वं न ताडयेत् । अकालस्थानघातेन वाजिदोषान् वितन्वते । यावत् असौ हयः जीवति तावत् ते दोषाः भवन्ति । दुष्टं दण्डेन अभिभवेत्। दण्डवर्जितः न आरोहेत् । उत्तमोऽश्वः षोडशमात्राभिः धनुःशतं गच्छेत् । अश्वः यथा यथा न्यूनगतिः तथा तथा हीनः भवेत् । वाजिनः गतिशिक्षणे सहस्रचापप्रमितं मण्डलम् उत्तमं तदर्थं मध्यम्, तदर्धकम्, नीचम् । शतधनुः अल्पं तथा तदर्धकम् अत्यल्पं प्रोक्तम् । हयः यथा दिनैकेन शतयोजनगन्ता स्यात्, नित्यं मण्डलविक्रमैः तथा गतिं संवर्धयेत् । हेमन्ते शिशिरे कुसुमागमे च सायं प्रातश्च ग्रीष्मे तु सायं शरदि तु प्रातः अश्वं सदा वहेत् । वर्षासु तथा विषमभूमिषु ईषः न वहेत् । सुगत्याः हरेः अग्निः बलं दार्ढ्यम् आरोग्यं वर्धते । भारमार्गपरिश्रान्तं हयं शनैः भ्रामयेत् । पश्चात् शर्करासक्तुमिश्रितं स्नेहं सम्पाययेत्। भक्षणार्थं हरिमन्थान् माषान् मकुष्ठकान् शुष्कान् आद्रान् सुस्विन्नानि मांसानि प्रदापयेत्। यदि अत्रापि स्खलितं गात्रं तत्र दण्डं न पातयेत् । अवतारितपल्याणं मार्गसमागतं हयं बलसंरक्षणाय सलवणं गुडं दत्त्वा न प्रहरेत्। गतस्वेदस्य शान्तस्य सुरूपम् उपतिष्ठतः मुक्तपृष्ठादिबन्धस्य खलीनम् अवतारयेत् । गात्राणि मर्दयित्वा पांशुमध्ये विवर्तयेत् । ततः स्नानपानावगाहैः च सम्यक् प्रपोषयेत् । मद्यजङ्गलयोः

रसः सर्वदोषहरः शक्त्या क्षीरं घृतं वा वारि सकतुकं सम्पाययेत् । अन्नं भुक्त्वा जलं पीत्वा हयः तत्क्षणात् वाहितः तदा अश्वानां कासश्वासादिकाः गदाः नाम रोगाः उत्पद्यन्ते । गतयः षड्विधाः - धारा, आस्कन्दितं, रेचितं, प्लुतं, धौरीतकं, वल्गितं, च। तासां लक्ष्म पृथक् पृथक् उच्यते । या अतिवेगतरा मता, यस्यां पादमूलाभ्याम् आघातेन अतिनुदितः भ्रान्तः भवेत् सा धारागतिः विज्ञेया । आकुञ्चिताभ्याम् अग्रपादाभ्याम् उत्प्लुत्य उत्प्लुत्य या गतिः सा वाजिनां विद्भिः आस्कन्दिता ज्ञेया । ईषत् उत्प्लुत्य अखण्डं गमनं यत् रेचितं या चतुर्भिः पादैः उत्प्लुत्य ,मृगवत् गतिः सा प्लुता स्मृता । असंवलितपद्भ्यां यत् सुव्यक्तं तुरं गमनं तत् धौरीतकं ज्ञेयम् । तत् रथसंवाहने वरम्। मयूरः धृतकन्धरः दोलायित शरीरार्द्धकायः प्रसंवलित पद्भ्यां यः गच्छति सः वल्गितम्। वृषस्य मुखात् उदरेपरिणाहः चतुर्गुणः सककुत् त्रिगुणोच्चं सार्द्धत्रिगुणादीर्घता ज्ञेया। सप्ततालः वृषः यदि एभिः गुणैः युतः तदा पूज्यः भवेत् ।

यः वृषभः न स्थायी न च मन्दः सुवोढा स्वङ्गसुन्दरः नातिक्रूर सुपृष्ठः वृषभः श्रेष्ठः उच्यते। त्रिंशद्योजनगन्ता प्रत्यहं भारवाहकः वा नवतालः सुदृढः सुमुखोष्ट्रः प्रशस्यते । मनुष्याणां गजानाञ्च परमम् आयुःशतं स्मृतम् । मनुष्यगजयोः बाल्यं विंशतिवत्सरं पर्यन्तमिति ज्ञेयम् । नृणां मध्यमं वयः षष्ठिवर्षं यावत् स्मृतम् । गजस्य अश्वस्य प्रथमाब्दे षट् सिताः दन्ताः भवन्ति । कृष्णं लोहितवर्णास्तु द्वितीये अब्दे अधोगताः भवन्ति । तृतीयेऽब्दे सन्दंशौ षडब्दतः क्रमात् कृष्णौ, चतुर्थे तु तत् पार्श्ववर्तिनौ तौ पुनः उद्गतौ । पञ्चमाब्दे अन्त्यौ द्वौ सन्दंशौ पुनरुद्गतौ , मध्यपार्श्वान्तगौ द्वौ द्वौ षडब्दतः क्रमात् कृष्णौ जातौ । तौ क्रमात् नवमाब्दात् पीतौ , ततः द्वादशाब्दतः सितौ, ततः दशपञ्चाब्दतः तौ क्रमशः काचाभौ स्मृतौ। तौ अष्टादशाब्दतः क्रमात् मध्वाभौ भवतः। ततः एकविंशाब्दात् शङ्काभौ भवतः । ततः चतुर्विंशाब्दतः त्रिके त्रिके क्रमात् दन्तानां छिद्रं सञ्चलनं पातश्च भवति। यस्य वाजिनः पूर्णायुः तस्य प्रोथे । तिस्रः सुवलयः ताः यथा यथा हीनाः तथा तथा हीनमायुः भवन्ति । जानुत्पाता ओष्ठवाद्यः धूतपृष्ठः जलासनः गतिमध्यासनः पृष्ठपाती पश्चाद्गमः ऊर्ध्वपात् सर्पजिह्वः ऋक्षकान्तिः भीरुः अश्वः अतिनिन्दितः तथा सच्छिद्रभालतिलकी आश्रयकृत् अश्वः निन्द्यः भवति । वृषस्य चतुर्थेऽब्दे अखिलाः सिताः अष्टौ दन्ताः स्मृताः । तस्य पञ्चमेऽब्दे अन्त्यौ द्वौ वै पतितोत्पन्नौ । षष्ठे तु उपान्त्यौ दशनौ भवतः, सप्तमे

तत्समीपगौ मध्यमौ दशनौ, अष्टमे खलु पतितोत्पन्नौ भवतः । ततः द्विके द्विके अब्दे तौ क्रमात् कृष्णपीतसितारक्तशङ्खच्छायौ,ततः चलनं पतनं भवतः । उक्तप्रकारेण उष्ट्रस्य तु वयसः वयोज्ञानं वा भवेत् । प्रेरकम् आकर्षकं मुखोऽङ्कुशः गजविनिग्रहे हस्तिपकैः सुगमाय तेन गजः विनेयः नाम दण्डनीयः । खलीनस्य पार्श्वगौ द्वादशाङ्गुलौ द्वौ ऊर्ध्वखण्डौ तत्पार्श्वान्तर्गताभ्यां तथा सुदृढाभ्यां वारकाकर्षखण्डाभ्यां रज्ज्वर्थबलयैः युतौ एवंविधेन खलीनेन तु वाजिनं वशीकुर्यात् । नासिकाकर्षरज्ज्वा वृषोष्ट्रं भृशं विनयेत् । एषां मलशोधने तीक्ष्णाग्रीयः सप्तकालः स्यात् । मनुष्याः पशवश्च सदा सुताडनैः विनेयाः । सैनिकास्तु विशेषेण न ते धनदण्डतः विनेयाः भवन्ति जलप्रायप्रदेशे तु वृषाश्वानां वन्यप्रदेशे गजोष्ट्राणां तथा साधारणे पदातीनां निवेशात् रक्षणं भवेत् । राष्ट्रे योजनान्ते शतं शतं सैन्यं नियोजयेत्। प्राक् गजोष्ट्रवृषभाश्वाः संभारवाहने श्रेष्ठाः । वर्षाकालं विना सर्वेभ्यः शकटाः श्रेष्ठाः स्मृताः । अल्पसाधनः लघुमपि अरिं नेतुं न गच्छेत् । सुबुद्धियुक् महता अत्यन्तसाद्यस्कबलेन एव गच्छेत् । मतिमान् अशिक्षितम् असारञ्च साद्यस्कं तूलवत् तद्बलं बुद्धं विना अन्यकार्येषु सदा योजयेत् । प्राणात्यये प्राप्ते अल्पोऽपि विकर्तुम् अनिशं यतते किन्तु बलवान् विकारकरणक्षमः अपि तथा कर्तुं न यतते । बहुबलोऽपि अशूरः रणे स्थातुं न क्षमते । अल्पसाधनः अशूरः अरिणा समं स्थातुं किं शक्तः ? न शक्तः भवति । सुसिद्धाल्पबलः शूरः रिपुं विजेतुं क्षमते। महान् सुसिद्धबलयुक् शूरः विजयी भविष्येव। राजा मौलशिक्षितसारेण रणे रिपुं गच्छेत् । मौलं प्राणात्ययेऽपि स्वामिनं त्यक्तुं न शक्यते । वाग्दण्डपरुषेणैव न्यूनवेतनकरणेन भीतितः नित्यं प्रवासेन विदेशस्थित्या आयासेन च अवश्यं भेदः सैन्येषु प्रजायते । यस्य बलं भेदमुपगतं तस्य नृपस्य मनागपि जयः कुतः ? अतः शत्रोः स्वस्यापि सेनायाः भेदं विचिन्तयेत् । यथा शत्रुसेनायाः अवश्यं भेदः भवेत् तथा नृपतिः सदा कौटिल्येन प्रदानेन त्वरितमेव शत्रुसैन्यं कुर्यात् । अत्यन्तप्रबलम् अरिं सेवया नत्या च प्रबलम् अरिं मानदानाभ्यां तथा हीनबलम् अरिं युद्धैः वशं नयेत् । किञ्च समबलम् अरिं भेदैः सर्वान् वशं नयेत्। सुबलभेदतः अन्यः शत्रुसंसाधनोपायः न यावत् स्वयं सुबलवान् तावत् परः नीतिवान् स्यात् । पुष्ठाग्नेः पवनः यथा तावत् मित्रं भवति । त्यक्तं रिपुबलं समूहसमीपतः न धार्यम् । तत् प्राक् रिपुबलं पृथक् नियोजयेत्। युद्धार्थं कल्पयेच्च। किञ्च मैत्र्यम् आरात् पृष्ठभागे पार्श्वयोः वा बलं

न्यसेत् । यत्तु मन्त्रयन्त्राग्निभिः वा अस्यते क्षिप्यते तत् अस्त्रम् । तदन्यतः यत् असिकुन्तादिकं तत् शस्त्रम् । अस्त्रं द्विविधं ज्ञेयम् - नालिकं तथा मान्त्रिकं चेति । यदा तु मान्त्रिकं नास्ति तत्र नृपतिः सर्वदा विजयार्थं शस्त्रेण सह नालिकं धारयेत् । तद्विदव्यवहाराय लघुदीर्घाकारधाराभेदैः शस्त्रास्त्रनामकं नवं भिन्नं प्रथयन्ति। नालिकं बृहत् क्षुद्रविभेदतः द्विविधं ज्ञेयम् । तिर्यगूर्ध्वछिद्रमूलं पञ्चवितस्तिकं मूलाग्रयोः लक्ष्यभेदि सदा तिलबिन्दुयुतं यन्त्राघाताग्निकृत् ग्रावचूर्णधृक् कर्णमूलकं सुकाष्ठोपाङ्गबुध्नञ्च मध्याङ्गुलविलान्तरं स्वान्तेऽग्निचूर्णसन्धातृशलाकासंयुतं दृढम् । एतत् लघुनालिकमपि पदातिभिः अश्वारोहिभिश्च सन्धार्यम् । त्वक् सारं यथा यथा तु यथास्थूलबिलान्तरं यथा दीर्घं बृहत् गोलं तथा तथा दूरस्थलक्ष्यभेदनं करोति। यत् मूलकीलभ्रमात् लक्ष्यसमसन्धानभाजिकाष्ठबुध्नविनिर्मितं तत् बृहन्नालिकसंज्ञं शकटाद्यैः प्रवाहं सुयुक्तं विजयप्रदं भवति । सुवर्चि लवणात् पञ्चपलानि गन्धकात् फलम् अन्तर्धूमविपक्वार्कस्नुह्याद्यङ्गारतः शुद्धात् पलं संग्राह्य सञ्चूर्ण्य तथा सम्मील्य स्नुह्यार्काणां रसैः प्रपुटेत् । ततश्च रसोनस्य आतपेन शोषयेत् । अनन्तरं शर्करवच्चैतदग्निचूर्णं खलु भवेत् । सुवर्चिलवणात् षड्वा चत्वारः एव भागाः गन्धाङ्गारौ पूर्ववत् नालास्त्रार्थाग्निचूर्णे नियोक्तव्यम् । लघुनालार्थे केवलोऽपि मोहमयः गोलः गर्भघुटिकः वा सीसस्य वा अन्यधातुमयः ग्राह्य आग्नेयास्त्रं लोहसारमयं वा अन्यधातुजं चेत् , नित्यसम्मार्जनेन स्वच्छं तथा अस्त्रपातिभिः शूरैः परिवृतं विधेयम् । अङ्गारस्य गन्धस्य च सुवर्चि लवणस्य शिलायाः हरितालस्य तथा सीसमलस्य हिङ्गुलस्य कान्तरजसः च कर्पूरस्य लाक्षायाः नील्याः तथा सरलनिर्यासस्य सर्जरससस्य समैः न्यूनैः अधिकैः अंशैः अनेकशः नानाविधानि अग्निचूर्णानि तस्य विद्याः जनाः कल्पयन्ति। अग्निसंयोगात् सुनालगं गोलं लक्ष्यं क्षिपन्ति । आदौ नालास्त्रं शोधयेत् , तत्र अग्निचूर्णं दद्यात् । नालमूले दण्डेन यथादृढं निवेशयेत् । ततः सुगोलकं दद्यात् । ततश्च कर्णे अग्निचूर्णं दद्यात् । कर्णचूर्णाग्निदानेन गोलं लक्ष्ये निपातयेत् । यथा बाणः धनुर्जाविनियोजितः लक्ष्यभेदी भवेत्। तथा सन्धाय द्विहस्तश्च शिलीमुखः कार्यः । पृथुबुध्ना अष्टाश्राहृदयसम्मिता गदापट्टीशः स्वसमः हस्तबुध्नः उभयतोमुखः स्यात् । एकधारः ईषद्वक्रः विस्तारे चतुरङ्गुलः क्षुरप्रान्तः नाभिसमः दृढमुष्टिः सुचन्द्ररुक्

कार्यः । खड्गः प्रासश्च चतुर्हस्तदण्डबुध्नः क्षुराननः कुन्तः दशहस्तमितः फालाग्रः शङ्कुतुल्यः स्यात् । चक्रं षट्हस्तपरिधिः क्षुरप्रान्तं सुनाभियुक् सुपाशकः त्रिहस्तदण्डः त्रिशिखः तथा लोहरज्जुः भवति । गोधूमसम्मितस्थूलपत्रं दृढं लोहमयं सशिरस्त्राणम् ऊर्ध्वकायविशोभनं कवचं कार्यः । तीक्ष्णाग्रं लोहसारमयं दृढं करजं श्रेष्ठं भवति । यः राजा सुपुटसम्भारः षड्गणमन्त्रवित् तथा बहुभिः अस्त्रैः संयुतः स एव हि योद्धुम् इच्छेत् , अन्यथा दुःखमाप्नोति च स्वराज्यात् भ्रश्यते । शत्रुभावम् आबिभ्रतोः संयतात्मनोः उभयोः स्वार्थसिद्ध्यर्थम् अस्त्राद्यैः व्यापारः युद्धमुच्यते । मन्त्रास्त्रैः दैविकं तथा नालाद्यस्त्रैः आसुरं शस्त्रबाहुसमुत्थं मानवं युद्धमीरितम् । तत् एकस्य बहुभिः सार्धं वा बहूनां बहुभिः एकस्य एकेन वा द्वयोः द्वाभ्यां खलु भवेत् । कालं देशं शत्रुबलं स्वीयबलम् उपायान् षड्गुणं मन्त्रं च दृष्ट्वा युद्धकामुकः भवेत् । युद्धेषु शरद्धेमन्तशिशिरकालश्च उत्तमः, वसन्तः, मध्यमः ज्ञेयः । ग्रीष्मस्तु सदा अधमः स्मृतः। वर्षासु युद्धं न प्रशंसन्ति । तदा साम स्मृतः । यदा नृपः युद्धसम्भारसम्पन्नः अधिकबलः मनोत्साही तदा सुशकुनोत्पाती शुभः फलः । यदा शुभः कालः नो चेत् अत्यावश्यके कार्ये प्राप्ते ह्रदिगेहे विश्वेशं भक्त्या विधाय नूनं व्रजेत् । गोस्त्रीविप्रविनाशने तत्र न कालनियमः । यस्मिन् देशे यथाकालं सैन्यव्यायामभूमयः परस्य विपरीताः सः देशः उत्तमः स्मृतः । यत्र आत्मनः परेषां तुल्यव्यायामभूमयः देशः शास्त्रविचिन्तकैः मध्यमः उद्दिष्टः । यः देशः अरातिसैन्य व्यायामसुपर्याप्तमहीतलः आत्मनः विपरीतश्च सः अधमः स्मृतः । यदि शत्रुबलं स्वसैन्यात् तृतीयांशहीनम् अशिक्षितम् असारं वा साद्यस्कं वै स्वजयाय भवति । यत्तु स्वसैन्यं पुत्रवत् पालितं दानेन मानेन विवर्धितं युद्धसम्भारैः सम्पन्नं तत् विजयप्रदम् । सन्धिं विग्रहं यानम् आसनं समाश्रयं द्वैधीभावं च एतान् तु मन्त्रस्य षड्गुणान् संविद्यात् । बलवान् रिपुः याभिः क्रियाभिः मित्रतां वै याति सा क्रिया सन्धिः इति उक्ता । तां तु यत्नतः विमृशेत् । येन कर्मणा शत्रुः विकर्षितः सन् अधीनो भवेत् तं विग्रहं नृपः मन्त्रिभिः सह चिन्तयेत् । स्वाभीष्टसिद्धये शत्रुनाशार्थगमनं यानम् । स्थानं स्वरक्षणं शत्रुनाशः भवेत् तत् आसनम् । दुर्बलोऽपि यैः गुप्तः बलवान् भूयात् स आश्रयः । स्वसैन्यानां गुल्मगुल्मतः स्थापनं द्वैधीभावः भवति । बलीयसा अभियुक्तः अनन्यप्रतिक्रियः । अत एव आपन्नः नृपः कालयापनं

कुर्वाणः सन्धिम् अन्विच्छेत् । एक एव हितः उपहारः एषः सन्धिः स्मृतः । मैत्रवर्जिताः सर्वे अन्ये भेदाः तु उपहारस्य भेदाः एव । अभियोक्ता बलीयस्त्वात् अलब्ध्वा न निवर्तते । तस्मात् उपहारात् ऋते अन्यः सन्धिः न विद्यते । शत्रोः बलानुसारेण उपहारं प्रकल्पयेत् । तथाहि सेवां वा स्वीकुर्यात् वा कन्यां भुवं वा धनं दद्यात् । नृपः अन्यजयाय मन्त्रेण स्वसामन्तान् सन्धीयात् । अनार्येणापि सन्धिः कार्यः । यतः सः संप्राप्य उत्पादयेत् । यथा निविडैः कण्टकैः वृतः सङ्घातवान् वेणुः समुच्छेत्तुं न शक्यते , तथा सङ्घातवान् वेणुः । अतिबले सन्धिः, साम्ये युद्धं , दुर्बले यानं , सुहृद्भिः आश्रयः स्थानं तथा दुर्गाभिभजनं द्विधा कर्तव्यम् । यदि बह्विमित्रेषु तथा साधारणे भये यः बलिना सह सन्धायकाले आत्मानं गोपयेत् सः बुद्धिमान् । बलिना सह न योद्धव्यम् इति निदर्शनमस्ति । तथा हि धनः कदाचिदपि प्रतिवातं न सर्पति। बलीयसि प्रणमतां तथा काले विक्रमतामपि सम्पदः निम्नगाः इव प्रतीपं विसर्पन्ति । बुद्धिमान् राजा सन्धितोऽपि हि विश्वासं न गच्छेत् । पुरा इन्द्रः अद्रोहसमयं कृत्वा वृत्रम् अवधीत्। परेण पीड्यमानः आपन्नः देशकालबलोपेतः अभ्युदयाकांक्षी विग्रहं च प्रारभेत । राजा प्रहीनबलामित्रं तु दुर्गस्थम् अत्यन्तविषयासक्तं प्रजाद्रव्यापहारकं भिन्नमन्त्रिबलम् आगतं शत्रुं परिवेष्टयन् पीडयेत् । स च विग्रहः विज्ञेयः अन्यश्च कलहः स्मृतः । अत्यल्पबलः बलीयसा शूरेण सह विग्रहं न कुर्यात् । यस्मात् तथा सति पुंसां सर्वनाशः प्रजायते । एकार्थाभिनिवेशित्वं कलहस्य कारणं वा तु उपायान्तरनाशे ततः विग्रहम् आचरेत् । निपुणैः यानं पञ्चविधं स्मृतम् । यथा विगृह्य यानं सन्धाय यानं सम्भूय यानम् अथवा प्रसङ्गतः किं वा उपेक्षया यानम् । यदा बलात् सर्वान् शत्रुगुणान् विगृह्य याति तत् यानज्ञैः आचार्यैः विगृह्य यानं प्रचक्षते । सर्वाणि अरिमित्राणि सर्वतः स्वमित्रैः बलात् विगृह्य चारिभिः गन्तुं यत् गमनं तत् विगृह्य गमनं वेति । अन्यत्र यात्रायां पार्ष्णिग्राहेण शत्रुणा सन्धाय फलार्थिनः जिगीषोः यत् यानं तत् सन्धायगमनं प्रोक्तम् । एकः भूपः शक्ति शौर्ययुतैः सम्परायिकैः सामन्तैः एकत्र यत् यानं तत् सम्भूय गमनं हि। अन्यत्र प्रस्थितः सङ्गात् यत् अन्यत्र एव च गच्छति तत् यानविद्भिः च प्रसङ्गयानं प्रोक्तम् । रिपुं यातस्य बलिनः विकृतं फलं सम्प्राप्य, तस्मिन् उपेक्ष्य, यत् यानं तत् उपेक्षायानम् उच्यते । दुर्वृते अपि अकुलीने दातरि

बलं रज्यते, तस्मात् पारितोष्यप्रदानतः स्वीयबलं हृष्टं कृत्वा नायकः प्रवीरपुरुषैः आवृतः पुरतः यायात् मध्ये कलत्रं कोशश्च स्वामी फल्गु च यद्धनं तत् , सः सदोद्युक्तः दिवानिशं ध्वजिनीं गोपायेत् । नद्यद्रिवनदुर्गेषु यत्र यत्र भयं भवेत् तत्र तत्र सेनापतिः व्यूहकृतैः बलैः गच्छेत् । पुरोभये महतामकारेण व्यूहेन उभयपक्षेण श्येनेन धीवक्त्रया वा सूच्या व्यूहेन यायात् । पश्चात् भये शकटं पार्श्वयोः वज्रसंज्ञिकं, सर्वतः भये सर्वतो भद्रं चक्रम् अथवा व्यालं शत्रुसेनाविभेदकं व्यूहं यथादेशं कल्पयेत्। स्वसैनिकैः विना कोऽपि वाद्यभाषासमीरितान् तथाविधान् व्यूहरचनसङ्केतान् न जानीयात् । मतिमान् नानाविधान् व्यूहान् सदा नियोजयेत् । नृपः अश्वानां च गजानां च पदातीनां पृथक् पृथक् सैनिकान् व्यूहसङ्केतान् उच्चैः संश्रावयेत् । वामदक्षिणसंस्थः वा मध्यस्थः वा अग्रसंस्थितः सैनिकैः तान् श्रुत्वा यथा अनुशिष्टं तथा कार्यम् । सम्मीलनं प्रसरणं परिभ्रमणं आकुञ्चनं यानं प्रयाणम् अपयानकं पर्य्यायेण च साम्मुख्यं समुत्थानं लुण्ठनम् अष्टदलवत् संस्थानं चक्रवत् गोलतुल्यकं सूची तुल्यं शकटवत् वा अर्धचन्द्रसमं वा पृथक् भवनम् अल्पाल्पैः पर्यायैः पङ्क्तिवेशनं शस्त्रास्त्रयोः धारणं सन्धानं लक्ष्यभेदनम् अस्त्राणां मोक्षणं शस्त्राणां परिधातनं प्राक् सन्धानं पुनः प्रातः ग्रहः मोक्षः स्वगूहनं शस्त्रास्त्रपदविक्रमैः प्रतीघातः द्वाभ्यां त्रिभिः चतुर्भिः पङ्क्तिः गमनं तथा प्राक्भवनम् अपसरणं तथा उपसर्जनं चेति । व्यूहस्थः सैनिकः अस्त्रसिद्ध्यर्थम् अपसृत्य, विमोक्षणे उपसृत्य प्राग्भूत्वा सदा अस्त्रं मोचयेत् । विमुक्तास्त्रः आसीनः स्याद्वा प्राक् अपसरेत् तु उपसृतः, प्रागासीनं दृष्ट्वा यथा बोधितः तथा एकैकशः द्विशः वा सङ्घशः स्वास्त्रं विमोचयेत् । खे क्रौञ्चानां यादृक् पङ्क्तिशः गतिः सम्प्रजायते तादृक् देशबलं क्रौञ्चव्यूहं सञ्चारयेत् । सूक्ष्मग्रीवं मध्यपुच्छं स्थूलपक्षं पङ्क्तितः बृहत् पक्षं मध्यगलपुच्छं मुखे तनुश्येनम् । चतुष्पात् दीर्घस्थूलवक्त्रद्विरोष्ठकः मकरः सूक्ष्ममुखः दीर्घसमदण्डान्तरन्ध्रयुक् सूची व्यूह इति ख्यातः । अष्टधा कुण्डलीकृतः एकमार्गः चक्रव्यूहः । चतुर्दिक्षु अष्टपरिधिः अमार्गः अष्टवलयीगोलकः सर्वतोमुखः सर्वतो भद्रः संज्ञकः । शकटः शकटाकारः व्यालः सदा व्यालकृतिः । सैन्यमल्पं वा बृहत् दृष्ट्वा व्यूहेन व्यूहाभ्यां वा व्यूहैः सङ्करेणापि मार्गं रणस्थलं कल्पयेत् । येभ्यः स्थलेभ्यः यन्त्रास्त्रैः शत्रुसेनायाः भेदः प्रजायते, स सैन्यः तेषु सन्तिष्ठेत् तदेव आसनम् । तृणान्नजलसंभाराः ये च अन्ये शत्रुपोषकाः चिरम् आसनात् परितः यत्नात् तान्

सम्यक् निरुद्य विच्छिन्नवीवधासारं प्रक्षीणयवसेन्धनं विगृह्यमाणप्रकृतिं कालेन एव वशं नयेत् । विग्रहे हीयमानयोः अरेः विजिगीषोः सन्धाय यत् अवस्थानं तत् सन्धायासनम् उच्यते । बलिना उच्छिद्यमानः निरुपायप्रतिक्रियः कुलोद्भवम् आर्यं बलोत्कटनृपम् आश्रयेत् । विजिगीषोः सह्यार्थाः ये सुहृत्सम्बन्धिबान्धवाः प्रदत्तभृतिकाः अन्ये भूपाः अंशप्रकल्पिताः महात्मभिः सैवाश्रयः कथितः दुर्गाणि च भवन्ति ।

अनिश्चितोपायकार्यः समयानुचरः नृपः काकाक्षिवत् अलक्षितं द्वैधीभावेन वर्तेत। कदाचित् अन्यकार्यं प्रदर्शयेत् वा अन्यम् आलम्बयेत् । अल्पजनस्य सदुपायैः सन्मन्त्रैः अथ उद्यमैः कार्यसिद्धिः भवेत् , नृपतेः पुनः किं न भवति । उद्योगेनैव कार्याणि सिद्ध्यन्ति,न मनोरथैः । प्रसुप्तसिंहस्य मुखे गजाः न निपतन्ति खलु । अभेद्यम् अथः उपायेन द्रवताम् उपनीयते । एतच्च लोकप्रसिद्धं वारि वह्नेः नियामकं भवति । उपायोपगृहीतेन तेन तेन एतत् परिशोष्यते । उपायेन मत्तहस्तिनां मूर्ध्नि पदं न्यस्यते। उपायेषु भेदः षड्गुणे समाश्रयः उत्तमः विजिगीषुणा तौ द्वौ सर्वदा कार्यौ । राजा ताभ्यां विना युद्धं कदाचन नैव कुर्यात् । रिपुसेनमन्त्रिणां तत् प्रजायाः तत् स्त्रियः यथा परस्परं प्रातिकूल्यं भवेत् तथा कुर्यात् । शत्रोः स्वस्यापि उपायान् षड्गुणान् सर्वदा वीक्ष्य प्राणात्यये तथा सर्वस्वहरणे सति युद्धं कुर्यात् । स्त्री विप्राभ्युपपत्तौ ब्राह्मणैः गोविनाशेऽपि च प्राप्ते युद्धे क्वचित् पराङ्मुखः नैव भवेत् । यः युद्धम् उत्सृज्य याति सः देवैः भृशं हन्यते । प्रजाः पालयन् राजा समोत्तमाधमैः आहूतः क्षत्रधर्मम् अनुस्मरन् सङ्ग्रामात् न निवर्तेत । सर्पः विलशयान् इव भूमिः अवियोद्धारं राजानम् अप्रवासिनं ब्राह्मणञ्च, एतौ निर्गलति। आपत्तौ क्षत्रधर्मेण वर्ततः ब्राह्मणस्यापि जीवितं लोके प्रशस्तम् । यतः क्षत्रं ब्रह्मसम्भवमेव । शय्यायां मरणं भवेत् एषः क्षत्रियस्य अधर्मः । श्लेष्मपित्तानि विसृजन् कृपणं परिदेवयन् अविक्षतेन देहेन प्रलयं यः अधिगच्छति पुराविदः अस्य तत्कर्म न प्रशंसन्ति । क्षत्रियाणां रणात् विना गेहे मरणं न शस्त्रम् । यतः शौण्डीराणां तत् कृपणम् अशौण्डीरम् अधर्मं भवति । क्षत्रियः ज्ञातिभिः परिवारितः रणेषु अकदनं कृत्वा शस्त्रास्त्रैः सुविनिर्भिन्नः वधम् अर्हति । आहवेषु मिथः अन्योऽन्यं जिघांसन्तः परं शक्त्या युद्ध्यमानाः अपराङ्मुखाः स्वर्गं यान्ति । यः शूरः अर्थे वाहिनी मुखे विक्रमेत् व्ययात् न निवर्तेत , तस्य अनन्तकः

स्वर्गः मिलति । आहवे निहतं शूरं कदाचन न शोचेत । सर्वपापेभ्यः निर्मुक्तः पूतः सन् सुलोकतां याति । वरात्सरः सहस्राणि त्वरमाणाः आयोधने हतं शूरम् अयं मम भर्ता भवेत् इति प्रधावन्ति । मुनिभिः दीर्घतपसा यत् महत् पदं प्राप्यते तत् युद्धाभिमुखनिहतैः शूरैः झटिति अवाप्यते । यः युद्धे न पलायते तत् एतत् तपः पुण्यं धर्मं च सनातनः ,तस्य चत्वारः आश्रमाः । त्रिषु लोकेषु शौर्यात् परं किञ्चित् न हि विद्यते । यतः शूरः सर्वं जनं पालयति शूरे च सर्वं प्रतिष्ठितम् । चराणाम् अचराः अन्नं दंष्ट्रिणाम् अदंष्ट्राः, अन्नं पाणिमताम् अपाणयः तथा शूरस्य कातराः अन्नम् । यः योगयुक्तः परिव्राट् पुनः यः रणे सम्मुखं हतः , इमौ द्वौ पुरुषौ लोके सूर्यमण्डलभेदिनौ भवतः । श्रुतिनिदर्शनात् युद्धे आततायिनः सुविद्यब्राह्मणगुरोऽपि वधेन आत्मानं गोपयेत्। महाभये प्राप्ते कारुणिकाः अपापदर्शिनः प्राज्ञाः आचार्याः एते कथञ्चन न सम्प्रष्टव्याः। विचित्रेषु प्रासादेषु गोष्ठीषु उपवनेषु विचित्राः कथाः कुर्वाणाः पण्डिताः तत्र शोभनाः । जनसंसदि बहून्याश्चर्यरूपाणि कुर्वाणाः उपसन्धाने ते च पण्डिता ईड्याः तत्र शोभनाः भवन्ति । परेषां विवरज्ञाने मनुष्याचरितेषु हस्त्यश्वरथचर्यासु खरोष्ट्राजातिकर्मणि गोधनेषु प्रतोलीषु स्वयं वरमुखेषु च अन्नसंस्कारदोषेषु ये पण्डिताः तत्र शोभनाः भवन्ति । परेषां गुणवादिनः पण्डितान् पृष्ठतः कृत्वा अरेः चित्तगुणान् ज्ञात्वा भङ्गशङ्कया तथा नीतिः विधीयतां यथा परः वध्यः भवेत् । आततायित्वम् आपन्नः ब्राह्मणः शूद्रवत् स्मृतः । आततायिवधे हन्तुः कश्चन दोषः न भवति । यः दुर्मतिः विश्रम्भात् शरणं प्राप्तं सन्त्यजति सः चतुर्दशः इन्द्राः यावत् घोरे नरके याति । यदा तु ब्राह्मणाः शस्त्रास्त्रैः युद्धं कृत्वापि सुदुर्वृत्तं क्षत्रं नाशयेयुः तदा ते पापभागिनः न भवन्ति । यदा तु हीनं क्षत्रकुलं नीचैः लोकैः प्रपीड्यते , तदापि ब्राह्मणाः युद्धे तान् हृतं नाशयेयुः । मान्त्रिकास्त्रेण युद्धमुत्तमम् । नालिकास्त्रेण मध्यमम् । शस्त्रैः कनिष्ठम् बाहुयुद्धं तु ततः अधमम् । मन्त्रेरितमहाशक्तिबाणाद्यैः यत् शत्रुनाशनं तत् मान्त्रिकास्त्रेण युद्धं सर्वयुद्धोत्तमं स्मृतम् । नालेन अग्निचूर्णसंयोगात् लक्ष्ये गोलनिपातनं तत् नालिकास्त्रेण युद्धं रिपोः महात्रासकरम् । कुन्तादिशस्त्रसङ्घातैः यत् रिपूणां नाशनं च तत् शस्त्रयुद्धं नालास्त्राभावतः सदा ज्ञेयम् । युक्त्या शत्रोः सन्धिमर्मणां कर्षणैः प्रतिलोमानुलोमतः बन्धनैः यत् घातनं तत् बाहुयुद्धम् । नियुद्धम् अष्टधा स्मृतम् । यथा वामपाणिकचोत्पीडा बलात् भूमौ निष्पेषणं

, मूर्ध्नि पादप्रहरणं , जानुना उत्पीडनं मालूराकारया मुष्ट्या कपोले दृढताडनम्, असकृत् कफोणि पातः सर्वतः तलेन ताडनं तथा छलेन युद्धेन भ्रमणम् । चतुर्भिः क्षत्रियं , पञ्चभिः क्षत्रियाधमं ,षड्भिः वैश्यं, सप्तभिस्तु शुद्धम् अष्टभिः सङ्करं हन्यात् । एतानि शत्रुषु युञ्जीत। मित्रेषु कदाचन न प्रयुञ्ज्यात् । लघूनि च महान्ति नालास्त्राणि पुरस्कृत्य पादातान् तत्पृष्ठगान् तथा गजाश्वान् च पार्श्वयोः स्थितान् कृत्वा भिन्नामात्यबलारिणा युद्धं प्रारभेत । युद्धानुकूलभूमेः यावल्लाभः तथाविधं यथा साम्मुख्येन प्रपातेन च पार्श्वाभ्याम् अपयानतः सेनापतिभिः सैन्यानाम् अर्धांशेन सह प्रथमं युद्धम् ईरितम् । पश्चात् अमात्यगोपितैः अमात्यैः सह तत् भवेत्, पश्चात् नृप सङ्गोपितैः तैः ततश्च प्राणात्यये स्वतः युद्धं कुर्यात् । दीर्घाध्वनि परिश्रान्तं क्षुत्पिपासा हितश्रमं तं व्याधिदुर्भिक्षकरकैः पीडितं दस्युविहतं पङ्कपांशुजलस्कन्नं व्यस्तं तथा श्वसातुरं प्रसुप्तं भोजने व्यग्रम् अभूयिष्ठम् असंस्थितं घोराग्नि भयवित्रस्तं वृष्टिवातसमाहतम् एवमादिषु जातेषु व्यसनैः समाकुलं स्वसैन्यं साधु रक्षेत् , तु परसैन्यं विनाशयेत् । मनीषिभिः इह यानि बलस्य व्यसनानि उक्तानि तेषां भेदः मुख्यः पापिष्ठः विदुषां मतः। हे पुरुषव्याघ्र ! नृपतेः नानासमुत्थितासेना भिन्ना इह दुःसन्देहा भवति ,मौला सेना किं वक्तव्यम् ? शत्रोः स्वस्यापि उपायान् षड्गुणान् मन्त्रं च चिन्तयेत् , तथा धर्मयुद्धैः कूटयुद्धैः वा सदा रिपुं हन्यात् । नृपः याने स्वभृत्यान् सपादभृत्या वर्धयन् युद्धे चर्मणा कवचेन स्वदेहं गोपयेत्। सैनिकान् शौर्यवर्धनं मदं सम्यक् पाययित्वा उत्तेजितान् तथा निर्द्वैधान् वीरान् युद्धे नियोजयेत् । सैनिकः नालिकास्त्रेण खड्गाद्यैश्च सादी नाम अश्वारोही कुन्तेन रथगः तथा गजगः बाणेन अरीन् पातयेत् । गजेन गजः तुरगेण तुरङ्गमः यातव्यः । रथेन रथः , पदगामिना पदगामी शत्रुः योज्यः। तथा एकेन मात्रैकवीरेण एकः योज्यः शस्त्रेण शस्त्रम् , अस्त्रेण अस्त्रधारिणम् अवरोधनीयम् ।

सतां धर्ममनुस्मरन् स्थलारूढं न क्लीबं, न कृताञ्जलिं, न मुक्तकोशं, न आसीनं, न तवास्मीति वादिनं, न सुप्तं, न विसन्नाहं, न नग्नं निरायुद्धं , न अयुद्धमानं, न पश्यन्तं, न परेण युद्धमानं, न पिबन्तं व भुञ्जानं, न अन्यकार्येषु आकुलं न भीतं, न परावृतं, न च हन्यात्। बुद्धः बालः न हन्तव्यः । तथा स्त्री केवलः नृपः न हन्तव्यः। यथा योग्यं तु संयोज्यं निघ्नन् धर्मः न हीयते । धर्मयुद्धे तु अमी नियमाः निश्चयेन

सन्ति । कपटयुद्धे अमी नियमाः न सन्ति । बलवतः रिपोः कूट सदृशं नाशनम् अन्यः नास्ति। पुरा रामकृष्णेन्द्रादिदेवैश्च कूटमेव आदृतम् । कूटेन वालिः निहतः । कृष्णेन यवनः निहतः, इन्द्रेण नमुचिः निहतः प्रफुल्लवदनेन तथा कोमलया गिरा अङ्गीकृतापराधेन सेवादाननतिस्तवैः उपकारैः स्वाशयेन दिव्यैः परं विश्वासयेत् । परन्तु क्षुरधारेण मनसा रिपोः छिद्रं सुलक्षयेत् । प्राज्ञः अवमानं पुरस्कृत्य पृष्ठतः मानं कृत्वा स्वकार्यं साधयेत् । यतः कार्यध्वंसः एव मूर्खता भवति। मञ्चासीनः शतानीकः सेनाकार्य्यं विचिन्तयन् राजराष्ट्रहितैषिणः सैनिकाः व्यूहसङ्केतवाद्यशब्दान्तवर्तिनः सदैव सञ्चरेयुः । ततश्च शत्रुणा भेदितां स्वसेनां दृष्ट्वा तां घातयेत् । योधैः प्रत्यग्रे कर्मणिकृते नृपः सदा तान् क्रमतः अर्हं पारितोष्यं धनम् अधिकारञ्च दद्यात् । वेगवान् पुरस्तात् जलान्नतृणसंरोधैः यत्नतः शत्रून् सम्पीड्य पश्चात् विषमे देशे हन्यात् । कूटस्वर्णमहादानैः द्विषद्बलं विलोभ्य भेदयित्वा नित्यविश्रम्भसंसुप्तं प्रजागरकृतश्रमं शत्रुभयात् निद्रारहितं परानीकं विनाशयेत्। व्यसनाप्तमपि तस्य सहायबलं क्वचित् नैव विनाशयेत् । अन्यस्मात् क्वचित् स्वसमीपतरं राज्यं न ग्राहयेत् । क्षणं युद्धाय सज्जेत, क्षणं पुनः अपसरेत् तथा अकस्मात् दूरात् परितः दस्युवत् सदा निपतेत् । यः रूप्यं हेम च कुप्यं यत् जयति, हृष्टः सन् कार्यानुरूपं योधान् प्रहर्षयन् तत् विजयेन प्राप्तं धनम् अर्जकस्य दद्यात् । एवं रिपून् विजित्य , करं तथा राज्यांशं वा सर्वराज्यं समादद्यात्। ततः प्रजाः नन्दयीत । ततः तूर्यम् अस्य मङ्गलघोषेण स्वकीयं पुरं प्रवेशं कुर्यात् । तथा आत्मसात्कृताः सर्वाः रिपोः जनाः पुत्रवत् पालयीत । मन्त्रिगणम् अपरे मन्त्रचिन्तने देशे च काले पात्रे च आदिमध्यावसानतः नियोजयेत् । मन्त्र्याद्यधिकृतः युवराजाय मन्त्रफलं कीदृक् उपायेन भवेत् तत् कथं वा इति सर्वं कार्यं बोधयेत् । पश्चात् युवराजः तैः साकं राज्ञे निवेदयेत् । राजा आदौ युवराजं ततः सः युवराजः मन्त्रिगणान् संशासयेत् । ते च अधिकारिणः राजाग्रे सत् असत् कर्म बोधयेयुः । ततः पुरोहितः राजानं निश्चयेन बोधयेत् । ग्रामात् बहिः समीपे सदा सैनिकान् धारयेत् । ग्राम्यसैनिकयोः उत्तमर्णाधमर्णता न स्यात् । सैनिकार्थं पण्यानि सैन्ये पृथक् सन्धारयेत् तु तथा वत्सरं सैन्यं कदाचन एकत्र न वासयेत् । यथा सेनासहस्रं क्षणात् सज्जं स्यात् तथा संशासयेत् , तथा अष्टमे दिने सैनिकान् स्वनियमान् संशासयेत् । सैनिकाः नित्यं चण्डत्वम् , आततायित्वं, राजकार्ये विलम्बनं, राज्ञः अनिष्टस्य उपेक्षणं,

स्वधर्मस्य परिवर्जनमपि वा परैः सल्लापं त्यजन्तु। नृपाज्ञया विना कदाचन ग्रामं न विशेयुः । स्वाधिकारिगणस्यापि अपराधं नः दिशन्तु । अखिलैः स्वामिकृत्ये मित्रभावेन सदा वर्त्तध्वम् । सूज्ज्वलानि शस्त्रास्त्रवसनानि च शासनात् अन्नं जलं प्रस्थमात्रं बह्वन्नसाधकं पात्रं रक्षन्तु । अन्यथाचारान् यमालयं विनेष्यामि तथा रिपुधनं गृहीत्वा भेदायितान् मां दर्शयन्तु । नृपः सैनिकैः व्यूहाद्यनुकृतिं नित्यम् अभ्यसेत् , तथा अयने अयने अस्त्रपातैः लक्ष्यं विभेदयेत् । नृपः सायं प्रातः सैनिकानां जात्याकृतिवयोदेशग्रामवासान् विमृश्य च सङ्गणनं कुर्यात् । भृत्यस्य भृत्यवधिं कालं तथा देयं दत्तं कति दत्तं वेतनं पारितोषिकम् इति लेखयेत् । तत्प्राप्तिपत्रं गृह्णीयात् च वेतनपत्रकं दद्यात् ।

ये ये सैनिकाः शिक्षिताः तेषु पूर्णा भृतिः स्मृता । व्यूहाभ्यासे नियुक्ताः तेषु अर्धा भृतिम् आवहेत् । असत्कर्त्राश्रितं सैन्यं शत्रुयोगतः नाशयेत् । के नराः असद्गुणरताः? के वा नृपस्य गुणद्वेषिणः ? के च असद्गुणोदासीनाः ? नृपः विमृशन् तान् हन्यात्। किञ्च नृपः गुणिनोऽपि भृत्यान् सदा सुखासक्तान् त्यजेत् । सुखान्तलोकविश्वस्ताः अन्तःपुरादिषु योज्याः। सुखान्तविश्वस्ताः च जनाः धनादिव्ययकर्मणि धार्याः। तथा हि लोकविश्वस्तः राजकृत्ये नियुज्यते । अन्यथा ते हि योजिताः केवलं परिवादाय भवन्ति । ये ये शत्रुसम्बन्धिनः भिन्नाः मन्त्रिगणादयः ये च गणाधिकाः नृपस्य दुर्गुणतः नित्यं हतमानाः स्वकार्यसाधकाः तान् सुभृत्या पोषयेत् । ये च लोभेन असेवनात् भिन्नाः नृपः तेषु अर्द्धां भृतिम् आवहेत् । शत्रुत्यक्तान् सुगुणिनः सुभृत्या पालयेत्। परराष्ट्रेवृते भिन्नावधिं भृतिं दद्यात् । तथा तस्य पुत्रे अर्धां स्त्रियै पादमितां भृतिं किल दद्यात् । हृतराजस्य सद्गुणे पुत्रादौ पादसम्मितं दद्यात् । अगुणशालिनि तु द्वात्रिंशांशं प्रकल्पयेत् । हृतराज्यस्य सञ्चितं कोशं स्वस्य भोगार्थमाहरेत् । अथवा तत् धनस्य कौसीदं नाम वृद्धिधनं पूर्वोक्तमर्थभागं यावत् तद्धनं द्विगुणं भवेत् । तावत् प्रकल्पयेत् । कदाचन तस्मात् ऊर्ध्वं न दद्यात्। हृतराज्यान् यदि स्वमहत्वद्योतनार्थं प्राङ्मानैः सद्वृत्तान् धारयेत्। दुर्वतांस्तु प्रपीडयेत् । यामिकान् वीक्ष्य यामिकार्थम् अहोरात्रम् अष्टधा दशधा वा द्वादशधापि कुर्यात् । अन्यथा न । यामिकाः आदौ तथा प्रकल्पितान् अंशान् भजेयुः । किञ्च आद्यः अन्तिमांशं ततः अपरे पुनः स्वपूर्वांशं गृह्णीयुः । पुनश्च

आद्ये अन्त्यं तद्वत् तथा अन्तिमे वा आद्यं तथा द्वितीये अह्नि द्वितीयादिक्रमागतं स्वपूर्वांशं योजयेत् । दिने चतुर्भ्यः अधिकान् यामिकान् योजयेत् वा कार्यगौरवं दृष्ट्वा युगपत् बहून् योजयेत् । यत् रक्ष्यं यच्च उपदेश्यं तत् यामिकाय आदेश्यम् । यतः सर्वं तत् समक्षं स्यात्। तस्मात् यामिकोऽपि तत् तथा शिक्षेत । यामिकः नियमितावधि स्वर्णादिकीलकोष्ठे रक्षेत् । स्वांशान्ते अन्ययामिकं यथार्थकं तत् दर्शयेत् । क्षणे क्षणे दूरात् सुबोधनं यामिकानां कार्यम् । नृपः यदा सत्कृतान् सर्वान् नियमान् सम्पालयेत् तदैव नृपतिः सर्वेषु पूज्यः भवेत् । अन्यथा न। यस्य नियतं कर्म तथा नियतः सद्ग्रहः तथा असद्ग्रहत्यागः नियतः, सः चिरं नृपत्वमश्नुते । यस्य कर्म साधुत्वं तथा वचनम् अनियमितं सदैव कुटिलं , सः सख्युः स्वपदात् झटिति विनश्यति । यथा व्याघ्रगजाः मृगेन्द्रं शासितुं न शक्ताः तथा तेन निभृताधिकृताः सर्वे मन्त्रिणः स्वछन्दगामिनं नृपं शासितुं न समर्थाः भवन्ति । अतः तेषु निःसारत्वं तूलानां भारसहस्रकैः गजः नैव निबध्यते । बली गजः पङ्कलग्नं गजं शीघ्रमेव उद्धर्तुं शक्तः तु अन्यनृपः नीतिभ्रष्टनृपम् उद्धरणक्षमः । बलवन्नृपभृत्ये अल्पेऽपि यथाश्रीः तेजश्च भवेत् हीननृपतौ तथा न। तस्य मन्त्रिष्वपि तथा नो भवेत् । बहूनाम् ऐकमत्यं नृपतेः अपि बलवत्तरम् । तथाहि बहुभिः सूत्रैः कृतः रज्जुः सिंहादीनामाकर्षणेक्षमः भवति । हीनराज्यः दुष्टभृत्यः बहुसैन्यं न धारयेत् । स्वपुत्राद्यभिवृद्धये सदा कोशवृद्धिं कुर्यात् । सर्वम् अशनं शयनं च यथा शुभं भवेत् तथा कुर्यात् । अन्यथा क्षुधया निद्रया च आशु दरिद्रकृत् भवेत् । नृपः अनया दिशा नित्यं व्ययं कुर्यात् अन्यथा न । ये नृपाः दुर्बलाः तथा धर्मनीतिविहीनाः ते सुधर्म बलयुग्राज्ञा सदा चौरवत् दन्ड्याः । नीचनृपोऽपि सर्वधर्मावनात् श्रेष्ठताम् इयात् । तथा उत्तमोऽपि नृपः धर्मनाशनात् नीचताम् इयात् । नृपः एव धर्माधर्मप्रवृत्तौ हि कारणम् । यः नृपत्वं समाप्नुयात् लोके सः एव श्रेष्ठतमः। यः अर्थः मन्वाद्यैः आदृतः भार्गवेण शुक्राचार्येण तदर्थः आदृतः द्वाविंशतिशतम् श्लोकाः नीतिसारे प्रकीर्तिताः। यः शुक्रोक्तिनीतिसारम् अनिशं चिन्तयेत् सः सदा व्यवहारधुरं वोढुं शक्तः भवेत् । त्रिषु लोकेषु कवेः सदृशी नीतिः न विद्यते । तस्मात् काव्यैव नीतिः। अन्या तु व्यवहारिणां कुनीतिः । ये कातर्यात् धनलोभात् वा नीतिं नाश्रयन्ति ते नृपाः मन्दभाग्याः नरकभाजनाः स्युः ।

खिलनीतिनिरूपणम्

खिले राज्यस्य सप्ताङ्गानां सर्वजनेषु हितं शास्त्रसम्मतम् अखिलं नीतिशेषं वक्ष्यते । शतसंवत्सरान्तेऽपि रिपुम् आत्मसात् करिष्यामि इति मनसा सञ्चिन्त्य रिपोः छिद्राणि लक्षयेत् । स्वयं सुमन्त्र बलयुक् नृपः यथा रिपुः राष्ट्रभृत्यविशङ्की तथा हीनमन्त्रबलः स्यात् । युक्त्या तथा प्रकुर्वीत । सावधानः सेवया वा वणिग्वृत्त्या रिपुराष्ट्रं विमृश्य मार्जारलुब्धबकवत् सन्तिष्ठन् दत्ताभयं व्यसनासक्तचेतसम् अरिं नाशयेत् । प्रत्यनीकविनाशिनीं सेनां युद्धे नियुञ्जीत । रिपुराष्ट्रस्थां न मिथः स्वद्वेषिणीं न च युञ्ज्यात् । युद्धकामुकः सहसा स्वसेनां न नाशयेत् । भृत्या दानमानैः वियुक्तोऽपि भूपतिं न त्यजेत् । जीवधनाशया समये शत्रुसात् नैव गच्छेत् । मेघोदकैः या पुष्टिः सा नद्यादि वारितः किम् ? यथा नृपस्य द्रव्यैः प्रजानां पुष्टिः तथा धनिनां धनात् पुष्टिः किम् ? महावीर्यबलोऽपि नित्यं मार्दवं दर्शयन् । रिपुराष्ट्रे प्रविश्य आदौ तस्य कार्यसाधकः भवेत् । अथ सञ्जातबद्धमूलः तु बलात् मूलम् उन्मूलयन् अखिलं तस्य राज्यं हरेत् । तथा तस्य द्विष्टान् दायादान् सेनपान् तत् राज्यस्य अंशदानतः वशीकुर्यात् । यथा संक्षीणमूलस्य तरोः शाखाः शुष्यन्ति तथा सेनपाद्याः पतिं विना सद्यः केचित् च कालेन शुष्यन्ति । नृपतिः राज्यवृक्षस्य मूलं, मन्त्रिणः स्कन्धाः सेनाधिपाः शाखाः, सेनाः पल्लवाः प्रजाः कुसुमानि भूभागाः फलानि भूमिः बीजं प्रकल्पिता। विश्वस्तान्यनृपस्य विश्वासं न समाप्नुयात् । तस्य गृहे वा एकान्ते अल्पसहायवान् न गच्छेत् । सदा निकटे स्ववेषरूपसदृशान् रक्षयेत् । विशिष्टचिह्नगुप्तः स्यात् तथा समये अन्यादृशः भवेत् । वेश्याभिः नटैः मद्यैः गायकैश्च अरिं मोहयेत् । सुवस्त्राभरणैः कुटुम्बेन संयुतः न विशिष्टचिह्नितः भीतश्च न क्वचित् युद्धे गच्छेत् जीवन् सन् क्षणमपि भृत्यस्त्रीशतृपुत्रुषु असावधानः न स्यात् । स्वभावसद्गुणेऽपि पुत्रे क्वचित् अखिला स्वामिता न देया, यस्मात् सा महानर्थमदावहा । तस्मात् विष्ण्वाद्यैः स्वपुत्रे स्वाधिकारता न दत्ता। स्वायुषः स्वल्पशेषे तु सत्पुत्रे स्वाम्यम् आदिशेत् । युवराजादयः स्वाम्यलोभचापलगौरवात् अराजकं राष्ट्रं क्षणमपि धर्तुं न क्षमाः भवन्ति । पुत्रः उत्तमं पदं प्राप्य, सुनीत्या प्रजाः पालयन् पूर्वामात्येषु पितृवत् गौरवं संप्रधारयेत्

। तैस्तु तस्यापि शासनं चेत् युक्तं, तदा पूर्वतोऽपि अधिकं प्रधार्यम् , अन्यथा काललम्बनैः कार्यं निषेध्यम् । धनाशया तेन साकं तत् अनीत्या न वर्त्तेयुः । यत् ते अनीत्या वर्त्तन्ते तदा तेन साकं वै पतन्ति । यः कुलभक्तान् द्वेष्टि नवीनं जनं भजते सः शत्रुसात् गच्छेत् च धनं प्राणैः वियुज्यते । नव्योऽपि गुणी तथा सुनीतिः चेत् पूर्ववत् परिपाल्यः, अनुभूय प्राचीनैः सह तं नियोजयेत् । मायिकैः यावत् कार्यं अतिमृदुस्तुतिनतिसेवादानप्रियोक्तिभिः नृपः सेव्यते, सत्यवाग्भिः साधुभिः नित्यं प्रत्यक्षं वा परोक्षं याथार्थ्यतः । खभुवोः यथा तयोः ईदृक् अन्तरम् । धूर्तजारचौरबहुश्रुताः मायायाः जनकाः । यथा धूर्तः प्रतिष्ठितः तथा जारचौरौ न भवतः । लोके परस्वहरणे जारचोरौ निन्दितौ । तौः अप्रत्यक्षं हरतः, धूर्तः प्रत्यक्षमेव हरति । ते वञ्चकाः अज्ञं हितम् अहितवत् तथा अहितं हितवत् दर्शयित्वा अन्ते सदा स्वकार्यं साधयन्ति । ते अत्यर्थं विश्रम्भयित्वा मायया घातयन्ति । यस्य अप्रियम् अन्विच्छेत् सदा तस्य प्रियं कुर्यात् । व्याधः मृगवधं कर्तुं सुस्वरं गीतं गायति । जनैः मायां विना झटिति महाद्रव्यं न सम्पाद्यते । परस्वहरणात् विना कश्चित् महाधनः न स्यात् । मायया विना यथा यत् ईप्सितं तत् न हि साध्यं भवति । नृपाः परस्वहरणं परमं स्वधर्मं मत्वा परस्परं महायुध्दं कृत्वा प्राणामपि त्यजन्ति । यदि राज्ञः पापं न स्यात् तदा दस्यूनामपि पापं नो भवेत् । आश्रयभेदतः सर्वं पापं धर्मरूपं स्थितम्। यः बहुभिः स्तुतः सः धर्मः एव बहुभिः निन्दिनः अधर्म एव। धर्मतत्त्वं हि गहनं, केनापि ज्ञातुं न उचितम् । इह अतिदानं तपः सत्ययोगः दारिद्र्यकृत् । यत्र धर्मार्थौ न स्यातां सा वाणी कामं निरर्थिका । अर्थे वा धर्मेवा समर्थः देशकालवित् निःसंशयः नरः पूज्यः । सदा संशयिता नरः न इष्टः ।

पुरुषः अर्थस्य दासः । अर्थस्तु न कस्यचित् दासः । अतः यत्नमास्थितः सर्वदा अर्थाय यतेत एव । अर्थात् नृणां धर्मश्च कामश्च मोक्षश्च भवेत् । शौर्यं शस्त्रास्त्राभ्यां विना गार्हस्थ्यं स्त्रियं विना , युद्धम् ऐकमत्यं विना, कौशल्यं ग्राहकं विना तथा विपत् सुसहायं विना नित्यं दुःखाय जायते। विपदि सुहृत्समं सुसहायं न विद्यते । मैत्र्या अविभक्तधनान् भृत्याभक्तधनान् पृथक्स्थान् स्वसदृशैः भोगैः सत्यैश्च

मित्रं परितोषयेत् । तथा नृपसम्बन्धिस्त्रीपुत्रसुहृद्भृत्यगणान् तोषयित्वा यस्तु स्वकं धनं भुङ्क्ते स एव सुखी भवति । नृपतिः दर्पकार्पण्यमानोद्वेगभयानि च त्यक्त्वा स्वार्थसिद्ध्यै विशेषभृतितः तथा प्रेममानाधिकारतः नित्यं भृत्यं कुर्यात्, अन्यथा न । धनवान् ब्राह्मणाग्निजलैश्चैव सदा भक्ष्यते । सः सुखी नित्यं मोदते । अन्यथा दुःखमश्नुते। परत्रासेच्छा, दर्पः अहं सर्वतोऽधिकः इति मानः , व्यये दैन्यं कार्पण्यं, स्वोच्छेदशङ्कनं भयं तथा मानसस्य अनवस्थानम् उद्वेगः परिकीर्तितः । लघोरपि अपमानः महावैराय जायते । दानमानसत्यशौर्यमार्दवं सुसुहृत्करं भवति । नृपः विनतः आपदि सदसि सर्वान् बुधान् गुरून् भ्रातॄन् बन्धून् भृत्यान् ज्ञातीन् तथा सभ्यान् समाहूय पृथक् पृथक् यथार्हं पूज्य स्वाभीष्टं याचयेत्। आपदं प्रतरिष्यामः यथा यूयं तथा युक्त्या वदिष्यथ। भवन्तः मम मित्राणि भवत्सु भृत्यता नास्ति । भवत्सदृशाः अन्ये सहायाः न सन्ति । अतः इदानीं भृतेः तृतीयांशं वा अर्द्धं भोजनार्थकं ग्राह्यम् । आपत्समुत्तीर्णः प्रत्युपकारवित् शेषं दास्यामि । यः भृत्यः षोडशाब्दधनी सः भृतिं विना समाष्टकं स्वामिकार्यं कुर्यात् इतरः अर्थानुरूपतः स्वामिकार्यं कुर्यात् । निर्धनैः नृपात् अन्नवस्त्रं ग्राह्यम् । अन्यथा न। यतः नृपात् सम्यक् सुखं भुक्तं चेत् , तद्दुःखैः दुःखितः न भवेत् तदा स्वामी वा अन्यः कृतघ्नं भृत्यं विनिन्दति । यस्य अन्नं सकृत् सुभुक्तं भृत्यः तदर्थं जीवितं त्यजेत्, स एव भृत्यः सुश्लोकः । यः आपत्तौ स्वामिनं न त्यजेत् तथा स एव स्वामी भृत्यार्थे जीवितं त्यजेत् । पृथिव्यां रामसदृशः नीतिमान् राजा न अभूत् । यन्नीत्या वानरैरपि सुभृत्यता स्वीकृता । चोराणाम् एकचित्तता राष्ट्रविनाशाय शक्ता भवेत् , शत्रुनाशाय नृपभृत्ययोः किन्न भवेत् ? भवत्येव । कश्चिदपि नृपः श्रीकृष्णसदृशः कूटनीतिः न अभवत् । स्वस्य भगिनी सुभद्रा छलात् अर्जुने प्रापिता। नीतिमतां सा युक्तिः या हि अखिला स्वश्रेयसे भवति । मध्यमस्थः आदौ तद्धितकृत्स्नेहम् अनन्तरं कार्यम् । सधर्मवादं कृत्वा हितं साधयेत् । परस्परं यथा प्रीतिः भवेत् तद्गुणवर्णनम् इष्टेन अन्नेन धनेन वसनेन च लोभनं कार्यं सिद्धं भवेत् । मध्यस्थकुट्टिनीमायिनां दिव्यालम्बनं मिथ्यासल्लापं धैर्यवर्धनम् इमे उपायाः मताः । यः आत्मगोपने युक्तिं न चिन्तयेत् सः पशोः जडः । स्त्रियः अपि

जारसङ्गोपने कपटमाश्रयन्ति । छलात्मिका प्रायः युक्तिः अन्यासत्यरूपिका । यः छद्मचारी भवति तस्मिन् छद्मसमाचरेत् । अन्यथा महतामपि शीलनाशाय जायते । किञ्च बुद्धिमतां श्रेणिः अस्ति न तु एकः बुद्धिमान् । अतः कुशलाः तात्विकीं युक्तिं रुद्धाम् अवलोक्य देशे काले च अनेकधा नीतिं युक्तिञ्च कल्पयन्ति । इह मायासु कुशलाः मन्त्राणाम् औषधीनां पृथक् वेशानां वाचाम् अर्थानां च संश्रयात् कपटमुत्पादयन्ति । लोके विक्रीतं वस्त्रभाण्डादिकं दत्तं तथा क्रीतम् अधिकारिप्रत्यक्षं स्वचिह्नैः चिरमङ्कयेत् । स्तेनकूटनिवृत्त्यर्थं राजज्ञातं समाचरेत् । नृपः जडान्धबालद्रव्याणां सदा वृद्धिं दद्यात् । स्त्री स्वीया सामान्या परकीया चेति त्रिविधा । तथा सेवकः उत्तमः मध्यमः अधमः चेति त्रिविधः भवति । यः भृतकः स्वामिनि एव अनुरक्तः सः उत्तमः स्मृतः। यः पुष्टभृतिदं स्वामिनं सेवते सः मध्यमः । यश्च स्वामिना पुष्टोऽपि अव्यक्तम् अन्यं भजते सः अधमः । यः अपकृतोऽपि उपकरोति स हि उत्तमः । अन्यथा अधमः । मध्यमः साम्यमन्विच्छेत् , अपरः स्वार्थेषु तत्परः भवति । उपदेशं विना प्रमाणैः अखिलं सम्यक् न ज्ञायते । बुद्धिमता प्रायः बाल्यं वा तारुण्यं प्रारम्भितसमाप्तिदं ज्ञेयम् । कदाचन वार्द्धक्यं न तस्य आरम्भं कुर्यात् , यत् सुखं समाप्तिं व्रजेत् । एकदैव बहुकार्याणाम् आरम्भः न सुखावहः । आरम्भितस्य समाप्तिं विना अन्यं न समाचरेत् । यतः पूर्वं हि न सम्पाद्यते अपरं न लभ्यते तत् कृती तत् नित्यं कुर्यात् यत् समाप्तिं व्रजेत् । येन कलहेन यदि अर्थः सिध्यति सः वरः । अन्यथा सदा आयुर्धनसुहृद्यशोधर्महरः भवति। ईर्ष्या लोभः मदः प्रीतिः क्रोधः भीतिः साहसं च एतानि सप्त कार्ये प्रवृत्तिच्छिद्रहेतूनि बुधाः जगुः । यथा कार्यं अछिद्रं भवेत् तथैव हि समाचरेत्। अनापादिकाले अतीते अपि विदुषाम् अभिमतमेव कार्यं समाचरेत्। दशग्रामी शतानीकः परिचारकसंयुतौ अश्वस्थौ विचरेयाताम् । ग्रामपाः अपि अश्वगाः भूत्वा विचरेयुः । साहस्रिकः शतग्रामी दशशस्त्रास्त्रभिः युक्तौ एकाश्वरथवाहनौ वा अश्वसङ्गतौ गच्छेताम् । सहस्रग्रामपः आयुतिकः विंशतिभिः सेवकैः नराश्वद्व्यश्वयानगः वा हस्तिना नित्यं व्रजते । अयुतग्रामपः पञ्चायुती सेनयोऽपि बहुसेवकः चतुरश्वगः सर्वयानैश्च सञ्चरेत् । यथाधिकाधिपत्यं वीक्ष्य आधिक्यं प्रकल्पयेत् । तथा धनिकेषु गुणिष्वपि

यथाधिक्यं कल्पयेत् । यथा श्रेष्ठः मानहीनः न स्यात् न्यूनः मानाधिकोऽपि न श्रेयोऽर्थी नृपतिः राष्ट्रे तथा नित्यं प्रकुर्वीत । नृपः ग्रामे हीनमध्योत्तमानां तथा कुटुम्बिनां गृहार्थं पत्तनेऽपि भूमिं प्रकल्पयेत्। अधमा नीच निवासभूमिः द्वात्रिंशत्प्रमितैः हस्तैः दीर्घा विस्ततौ अर्द्धा द्विगुणाचतुष्षष्ठिहस्तदीर्घा तथा द्वात्रिंशत् हस्तविस्तृता मध्या निवासभूमिः सार्द्धमाना अष्टचत्वारिंशत् हस्तदीर्घा चतुर्विंशतिहस्तविस्तृतेति यावत् कुटुम्बानां संस्थितौ समा न्यूना वाधिकापि न देया । ये ये नृपैः अधिकृताः ते ग्रामात् बहिः वसेयुः । कश्चित् सैनिकः नृपकार्यं विना ग्रामं न विशेत् । तथा सैनिकः कुत्र कदापि ग्रामवासिनं न पीड़येत् । ग्राम्यजनोऽपि नित्यं सैनिकैः न व्यवहरेत् । नित्यं सैनिकान् शौर्यविवर्द्धनं धर्मं तथा शौर्यवृद्धिकराणि सुवाद्यनृत्यगीतानि च श्रावयेत् । सैन्यं युद्धक्रियां विना अन्यकर्मणि न योजयेत् । सत्याचाराः धनिकाः यदि व्यवहारे हताः, राजा तान् तथा अन्यान् कृषीवलान् समुद्धरेत् । ये सैन्यधनिकाः तेभ्यः तथार्हं भृतिं तथा तद्धनव्ययात् अधिकं पारदेश्यं त्रिंशांशम् आवहेत् । स्वात्मकोशवत् तेषां धनं यत्नतः संरक्षेत् । किञ्च नृपः मिथ्याचारात् धनिकात् सर्वं संहरेत् । यदा धनिके न अधमर्णात् चतुर्गुणा बुद्धिः गृहीता तदा धनिने धनं न दातव्यम् ।

।। इति शुक्रनीतिः समाप्ता ।।

पञ्चतन्त्रे मित्रभेदः

नीतिशास्त्रकर्तृभ्यः नमः

मनवे, वाचस्पतये, शुक्राय, पराशराय, व्यासाय, चाणक्याय विदुषे नीतिशास्त्रकर्तृभ्यः नमः । जगति सकलनीतिशास्त्रसारं समालोक्य, विष्णुशर्मा पञ्चभिः तन्त्रैः नाम नीतिभिः सुमनोहरं शास्त्रं पञ्चतन्त्रं चकार । तत्र प्रथमः मित्रभेदः ।

यावज्जीवं जडो दहेत् (the insensible burns for a life time)

अजातमृतमूर्खेभ्यः मृताजातौ वरम् । यतः तौ स्वल्पदुःखाय कारकौ । मूर्खः पुत्रः यावज्जीवं दहेत्।

न वरमविद्वान् तनयः (a son without learning is worthless)

वरं गर्भस्रावः, वरम् ऋतुषु नैवाभिगमनम्, वरं जातः प्रेतः, वरमपि कन्यैव जनिता, वरं वन्ध्या भार्या, वरमपि च गर्भेषु वसतिः, न च वरमविद्वान् तनयः, रूपद्रविणगुणयुक्तोऽपि।

कोऽर्थः पुत्रेण जातेन ? (of what use such a son that was born ?)

या धेन्वा न सूते, न दुग्धधा, तया किं क्रियते ? यो न विद्वान्, न भक्तिमान् जातेन पुत्रेण अर्थः कः ?

जारज इव लज्जते (feels ashamed like the son of a prostitute)

वरमिह सुतमरणं, मा कुलप्रसूतस्य मूर्खत्वम् । किमर्थमित्युक्ते - विबुधजनमध्ये मनुजः जारज इव लज्जते ।

वन्ध्या कीदृशी (who is a barrer woman ?)

गुणिगुणगणनारम्भे यस्य कठिनी ससम्भ्रमा न पतति तेन सुतिनी अम्बा यदि, वन्ध्या कीदृशी भवति ? वद ।

ततो सारं ग्राह्यम् (the essence should be grasped)

शब्दशास्त्रम् अनन्तपारम् । तथा आयुः स्वल्पम् । विघ्नाः बहवश्च । यथा हंसैः अम्बुमध्यात् क्षीरमिव अपास्य फल्गु ततो सारं ग्राह्यम् ।

पञ्चतन्त्राणि (the five methods)

मित्रभेदः, मित्रप्राप्तिः, काकोलूकीयः, लब्धप्रणाशः, अपरीक्षितकारकाणि चेति पञ्चतन्त्रकं नाम नीतिशास्त्रम् । बालावबोधनार्थं भूतले प्रवृत्तम् ।

न पराभवमाप्नोति (doesn't get insulted)

यः नित्यं नीतिशास्त्रं अधीते, शृणोति च, कदापि शक्रादपि पराभवं नाप्नोति।

अर्थं प्रसाधयेत् (money must be acquired)

अर्थेन यत् न सिद्ध्यति, तत् किञ्चित् न विद्यते । तस्मात् मतिमान् यत्नेनार्थं प्रसाधयेत् ।

स च पण्डितः (he is the scholar)

यस्यार्थाः तस्य मित्राणि, तस्य बान्धवाः, सः लोके पुमान्, स च पण्डितः ।

याचकैः न गीयते (he is praised by the beggers)

धनिनां याचकैः न गीयते चेत् न सा विद्या, न तद्दानं, न तच्छिल्पं, न सा कला, न तत् स्थैर्यं च ।

स्वजनः दुर्जनः (one's own and the enemy)

इह लोके धनिनां परोऽपि स्वजनायते । दरिद्राणां स्वजनोऽपि सर्वदा दुर्जनायते।

प्रवर्तन्ते क्रियाः सर्वे (all good actions lead to welfare)

पर्वतेभ्यः आपगाः इव अर्थेभ्योऽपि वृद्धेभ्यः इतस्ततः संवृतेभ्यः सर्वाः क्रियाः प्रवर्तन्ते ।

धनस्य प्रभावः (the power of money)

यदपूज्योऽपि पूज्यते, यदगम्येऽपि गम्यते, यदवन्द्योऽपि वन्द्यते स च धनस्य प्रभावः ।

वित्तं सर्वसाधनम् (money achieves everything)

अशनादीन्द्रियाण्यीव कार्याण्यखिलानि च स्युः । एतस्मात् कारणात् वित्तं सर्वसाधनमुच्यते।

अर्थार्थी (the seeker of money)

जीवलोकोऽयं श्मशानमपि सेवते अर्थार्थी जनयितारं स्वं त्यक्त्वा दूरतः निःस्वं गच्छति ।

अर्थस्य प्रभावः (the effect of wealth)

गतवयसामपि पुंसां येषामर्थाः भवन्ति ते तरुणाः । ये अर्थेन हीनाः ते यौवनेऽपि स्युः ।

षड्भिरुपायैर्भवति अर्थः (money is acquired through six means)

भिक्षया, नृपसेवया, कृषिकर्मणा, विद्योपार्जनेन, व्यवहारेण, वणिक्कर्मणा वा षड्भिरुपायैः अर्थः सिद्ध्यति । वाणिज्येनातिरस्कृतः अर्थलाभः स्यात् ।

वाणिज्यं परमं वर्तनम् (trade is good means of acquiring wealth)

कृता भिक्षा अनेकैः वितरति । नृपः नोचितम् । विद्या क्लिष्टागुरु विनयवृत्त्या अतिविषमा । परकरगतगन्थिशमनात् कुसीदात् दारिद्र्यम् । वाणिज्यं तु परमं वर्तनम्।

धनार्थं शस्यते ह्येकः (there is only one way for acquiring wealth)

सर्वेषामुपायानाञ्च उपायः पण्यसंग्रहः । धनार्थं शस्यते ह्येकः । तदन्यः संशयात्मकः ।

वाणिज्यं सप्तविधम् (commerce is of seven types)

गान्धिकव्यवहारः, निक्षेपप्रवेशः, गोष्ठिककर्म, परिचितग्राहकागमः, मिथ्याक्रयकथनं, कूटतुलामानं, देशान्तरभाण्डानयनं चेति ।

स्वल्पात् भूरिरक्षणम् (protection of much with little)

मतिमान् नरः स्वल्पस्य कृते न नाशयेत् भूरि । एतदेवात्र पाण्डित्यं यत् स्वल्पात् भूरिरक्षणमिति।

दैवरक्षितम् (protected by god)

अरक्षितं तिष्ठति दैवरक्षितम् । सुरक्षितं दैवहतं विनश्यति ।वने विसर्जितः अनाथोऽपि जीवति कृतप्रयत्नोऽपि गृहे विनश्यति ।

स एव निधनं याति (he alone dies)

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति स एव निधनं याति ।

तन्नाम जीवितम् (that is called life)

यस्मिन् बहवः जीवन्ति सः अत्र जीवतु । विज्ञानविभवशौर्यादिगुणैः समेतं, मनुष्यैः प्रथितं क्षणमपि यज्जीव्यते, तन्नाम जीवितमिह वदन्ति सज्जनाः ।

किं तस्य जीवितफलम् (what is the use of that life ?)

यः आत्मना, परेण, बन्धुवर्गे, दीने, मर्त्यवर्गे, च दयां न कुरुते, मनुष्यलोके तस्य जीवितफलं किम् ? काकोऽपि चिराय जीवति, बलिञ्च भुंक्ते ।

तस्य जन्म निष्फलम् (his life is worthless)

यः स्वस्य वंशाग्रेध्वज इव न विराजते, मातुर्यौवनहारिणा जातेन तेन किं फलम्?

सोऽत्र गण्यते (he alone is reckoned)

परिवर्तिनि संसारे जातः म्रियते, मृतः जायते । परन्तु यः श्रियाधिकः स्फुरेत् सोऽत्र गण्यते।

जन्मसाफल्यम् (worthy life)

अप्रसिद्धस्य जन्मतः नदीतीरे जातस्य तृणस्यापि जन्मसाफल्यम् । यत् सलिलमज्जनाकुलजनहस्तालम्बनं भवति । स्थिमितोन्नतसञ्चाराः जनसन्तापहारिणः जलदा इव सज्जनाः लोके विरलाः जायन्ते ।

स्मरन्ति विद्वांसः (the scholars remember)

महतामपि यो गुरुर्भवति यत्किमपि गर्भं वहति तेन स्मरन्ति विद्वांसः जनन्याः निरतिशयं गरिमाणम् ।

तिरस्क्रियां लभते (gets insulted)

अप्रकटीकृतशक्तिः शक्तोऽपि जनः तिरस्क्रियां लभते । निवसन्नन्तर्दारुणि लङ्घ्वो वह्निः न तु ज्वलितः।

लभते च विडम्बनम् (gets deceived)

यः अप्रधानः अपृष्टः राज्ञः पुरतः कुथीः ब्रूते सः केवलमसम्मानं विडम्बनञ्च लभते । तथाच यत्रोक्तं फलं लभते तत्र वचः प्रयोक्तव्यम् । यथा शुक्लपटे रागः अत्यन्तं स्थायी भवति ।

प्रधानः अप्रधानः (the chief becomes irrelevant)

यदि प्रार्थिवं सेवते, अप्रधानः प्रधानः स्यात् । यदि सेवाविवर्जितः प्रधानोऽपि अप्रधानः स्यात् ।

तत् परिवेष्टयन्ति (they cover with it)

विद्याविहीनम्, अकुलीलनम्, असंस्कृतं, वा आसन्नमेव मनुष्यं नृपतिः भजते । प्रायेण भूमिपतयः प्रमदाः लताश्च यत्पार्श्वतो भवति तत् परिवेष्टयन्ति ।

उन्नतपदमारोहन्ति (attain high posts)

ये सेवकाः कोपप्रसादवस्तूनि विचिन्वन्ति, पश्चात् शनैः पार्थिवमुन्नतपदमारोहन्ति।

पार्थिवं विना नाश्रयः (no standing without the support of king)

विद्यावतां महेच्छानां शिल्पविक्रमशालिनां सेवावृत्तिविदां पार्थिवं विना नाश्रयः।

प्रायश्चित्तं भिक्षा (begging is the atonement)

ये जात्यादिमहोत्साहात् नरेन्द्रात् नोपयान्ति, तेषामामरणं विनिर्मितं प्रायश्चित्तं भिक्षा ।

निजानि ख्यापितानि (exposing their foolishners)

महीभुजः दुराराध्यः इति ये च दुरात्मनः प्राहुः, तैः प्रमादालस्यजाड्यानि निजानि ख्यापितानि ।

धीमतां कियतीमात्रा (this is nothing for the intellectuals)

सर्पान् व्याघ्रान् गजान् सिंहान् दृष्ट्वा उपायैः वशीकृतान् अप्रमादिनां धीमतां राजेति कियतीमात्रा ।

विद्वान् परां गतिं याति (the scholar attains the highest position)

राजानमेव संश्रित्य विद्वान् परां गतिं याति । मलयपर्वतं विनान्यत्र चन्दनं न प्ररोहति ।

परेङ्गितज्ञानफलाः बुद्धयः (the benefit of intelligence lies in grapping others ideas / aspiration)

उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च चोदिताः वहन्ति । पण्डितजनः अनुक्तमपि ऊहति । परेङ्गितज्ञानफला हि बुद्धयः ।

लक्ष्यतेऽन्तर्गतं मनः (comprehend the inner feelings of men)

आकारैः इङ्गितैः गत्या चेष्टया भाषणेन च नेत्रवक्त्रविकारैश्च अन्तर्गतं मनः लक्ष्यते ।

सेवाधर्माः (the dharmas of servitude)

शूरश्च कृतविद्यश्च यश्च सेवितुं जानाति नराः त्रयः सुवर्णपुष्पितां भूमिं विचिन्वन्ति। या प्रभुहिता सा सेवावाक्यविशेषतः ग्राह्या । तद्द्वारेणैव विद्वान् पार्थिवमाश्रयेत्। नान्यथा ।

पण्डितः तं न सेवेत् (a scholar wilnot serve him)

यस्य गुणान् यः न वेत्ति, तं पण्डितः न सेवेत् । सुकृष्टात् ऊषरादिव तस्मात् न किञ्चित् फलम् ।

गुणान्वितः सेव्यः (a virtuous man should be served)

द्रव्यप्रकृतिहीनोऽपि सेव्यगुणान्वितः सेव्यः । तस्मात् कालान्तरादपि आजीवनं फलं भवति ।

अज्ञानात्मसम्पन्नात् वृत्तिं न ईहेत (cannot do the work for lake of knowledge)

राजनीतिज्ञः पण्डितः स्थाणुवदासीनः अपि क्षुधा परिगतः शुष्यन् अपि अज्ञानात्मसम्पन्नात् वृत्तिं न ईहेत ।

सेव्यासेव्यं न वेत्ति (doesnot know whom to serve and whom not to serve)

यः सेवकः स्वामिनं कृपणं परुषाक्षरं द्वेष्टि सः आत्मानं द्वेष्टि । सेव्यासेव्यं न वेत्ति ।

सदा त्याज्यः (should always be avoided)

यस्याश्रित्य सेवकाः क्षुधार्ताः विश्रामं न यान्ति, सः नृपतिः अर्कवत् सदा पुष्पफलोऽपि सन् त्याज्यः ।

राजवत् वर्तेत (should be like a king)

राजमातरि, देव्यां, राजकुमारे, मुख्यमन्त्रिणि, पुरोहिते, प्रतीहारे च राजवत् सदा वर्तेत ।

भवेत् राजवल्लभः

प्रभुप्रसादजं वित्तं सुप्राप्तं यो निवेदयेत्, वस्त्राद्यं च दधात्यङ्गे सः राजवल्लभः भवेत् । कृत्याकृत्यविचक्षणः सेवकः प्रभुणा प्रोक्तः जीवेति प्रब्रुवन् यः निर्विकल्पं करोति सः राजवल्लभः भवेत् । प्रभुप्रसादजं वित्तं सुप्राप्तं यो निवेदयेत्, वस्त्राद्यं च अङ्गे यो दधाति सः राजवल्लभः भवेत् । अन्तःपुरजनैः सार्थं कलत्रैः यः मन्त्रं न समाचरेत् सः राजवल्लभः भवेत् । यः द्यूतं यमदूताभं, मद्यं हालाहलोपमां राजकान्ताः

वृथाकारान् पश्येत्, सः राजवल्लभः भवेत् । यः युद्धकाले अग्रणीः, पुरे पृष्ठानुगः सदा स्यात् हर्म्ये प्रभोः द्वाराश्रितः सः राजवल्लभः भवेत् । नित्यं विभोः सम्मतोऽहम् इति मत्वा कृच्छ्रेष्वपि मर्यादां न व्यतिक्रमेत्, सः राजवल्लभः भवेत् । यः नित्यं नरनाथस्य इष्टानामिष्टकर्मकृत्, द्वेषिद्वेषपरः नरः सः राजवल्लभः भवेत् । प्रभुणा प्रोक्तः विरुद्धं प्रत्युत्तरं नाह यः प्रभुसमीपे उच्चैः न हसति सः राजवल्लभः भवेत् । य भयवर्जितः रणं शरणं, प्रवासं स्वपुरावासं तद्वत् मन्यते सः राजवल्लभः भवेत् । नरनाथस्य योषिद्भिः सह सङ्गतिं न कुर्यात् न निन्दां न विवादञ्च कुर्यात् यः सः राजवल्लभः भवेत् ।

बीजाद्बीजमिवापरम् (another , just as one seed from another)

सुवृष्टिगुणसम्पन्नात् बीजात् अपरं बीजमिव उत्तरादुत्तरं वाक्यं वदतां सम्प्रजायते।

नीतिगुणप्रयुक्ता (employed by moral istic qualities)

अपायसन्दर्शनजां विपत्तिम्, उपाय सन्दर्शनाजाञ्च सिद्धिं मेधाविनः नीतिगुणप्रयुक्तां परिस्फुरन्तीमिव वर्णयन्ति ।

सूक्तयः प्रकटयन्ति (they proclaim the morals)

एकेषां वाचि शुकवत्, अन्येषां हृदि मूकवत्, तथा अन्येषां हृदि वाचि सरलतां सहृदयतां च सूक्तयः प्रकटयन्ति ।

अप्राप्तकालं वचनम् (speaking , that is irrelevant for that time)

बृहस्पतिरपि अप्राप्तकालं वचनं ब्रुवन् बहु अवज्ञानं पुष्कलमपमानं च लभते ।

दुराराध्याः राजानः (worshipping kings is very difficult)

व्यालाकीर्णाः सुविषमाः कठिनाः दुष्टसेविताः पर्वताः इव राजानः सर्वदा दुराराध्याः।

मन्त्रसाध्याः राजानः (kings are controlled by the wisdom of ministers)

भोगिनः, कञ्चुकाविष्टाः, कुटिलाः, क्रूरचेष्टिताः सुदुष्टाः राजानः पन्नगा इव मन्त्रसाध्याः ।

दूरतोऽपि पश्यन्ति राजानः (the kings can look even from far)

द्विजिह्वाः, क्रूरकर्माणः अनिष्टाः, चिद्रानुसारिणः भुजगा इव राजानः दूरतोऽपि पश्यन्ति ।

दह्यन्ते पापचेतसः (the sinful are tormented)

ये महीपतेः अभीष्टां स्वल्पमपि अपकुर्वन्ति ते पापचेतसः पतङ्गाः वह्नाविव दह्यन्ते ।

ब्राह्मण्यमिव दुष्यति

सर्वलोकनमस्कृतं दुरारोहं राज्ञां पदं स्वल्पेनाप्यपकारेण ब्राह्मण्यमिव दुष्यति।

संस्थिताः तिष्ठन्ति (stand near him)

राज्ञां श्रियः दुराराध्याः, दुरापाः, दुष्परिग्रहाः, आधारपात्रे आप इव आत्मनि चिरं संस्थिताः तिष्ठन्ति।

आत्मवशं नयेत् (his brings them under his control)

यस्य यस्य हि यो भावः तेन तेन समाचरेत् । परं तु मेधावी अनुप्रविश्य क्षिप्रमात्मवशं नयेत् ।

राक्षसाश्चापि गृह्यन्ते (even the demous come under subjugarion)

भर्तुः चित्तानुवर्तित्वं, सुवृत्तं चानुजीविनां छन्दानुवर्तिभिः नित्यं राक्षसाश्चापि गृह्यन्ते।

अमन्त्रतन्त्रं वशीकरणम् (without chants & incantation)

सरुषि नृपे स्तुतिवचनं, तदभिमते प्रेम, तद्द्विषि द्वेषः, तद्दानस्य शंसा च अमन्त्रतन्त्रं वशीकरणम् ।

सर्वैरपि राज्ञां प्रयोजनम् (king benefits by all)

दन्तस्य निष्कोणकेन, कर्णस्य कण्डूयनकेनवापि तृणेनापि ईश्वराणां कार्यं भवति । तर्हि वागादीन्द्रिययुक्तबलेन नरेणावश्यं प्रयोजनं विद्यते ।

स्थानेष्वेव नियोक्तव्याः (should be appointed at appropriate places

only)

भृत्याः आभरणानि च स्थानेष्वेव नियोक्तव्याः । नहि चूडामणिः पादे बध्यते ।

भृत्यैः नानुगम्यते (the servants donot support)

यः गुणानामनभिज्ञः भृत्यैः नानुगम्यते धनाढ्योऽपि कुलीनोऽपि भूपतिः क्रमायातोऽपि।

अर्थपतिं त्यजति भृत्यः (the servants leaves the king)

असमैः समीयमानः समैश्च परिहीयमाणसत्कारः धरि यः न युज्यमानः त्रिभिः कारणैः भृत्यः अर्थपतिं त्यजति ।

भूपतेर्दोषः (the blemish of the king)

यच्च अविवेकितया राजा भृत्यानुत्तमपदयोग्यात् हीनाधमस्थाने नियोजयति, न ते तत्रैव तिष्ठन्ति, सः भूपतेर्दोषः । न तेषाम् ।

आर्यः क्षणमपि तत्र न भवेत् (the man of morals shouldn't stay there even a second)

यत्र सव्यदक्षिणयोः हस्तयोः विशेषः नास्ति, तत्रार्यः विद्यमानमतिः न भवेत् ।

नाममात्रोऽपि न तिष्ठति (doesn't stay even for name sake)

काचे मणिः मणौ काचः येषां बुद्धिः विकल्पते तेषां सन्निधौ भृत्यः नाममात्रोऽपि न तिष्ठति । यत्र देशे परीक्षकाः न सन्ति तत्र समुद्रजानि रत्नानि नार्घन्ति ।

रत्नविक्रयः न क्रियते (diamond busines doesn't take place)

पद्मरागस्य लोहिताख्यस्य च मणेः आन्तरं यत्र नास्ति, तत्र रत्नविक्रयः न क्रियते ।

उत्साहः परिहीयत (enthusiasm fades away)

यदा स्वामी निर्विशेषं भृत्येषु समं वर्तते, तत्र उद्यमसमर्थानाम् उत्साहः परिहीयते।

प्रभुसेवकव्यवहारः अनन्यापेक्षितः (the business of marter and servent is relatives)

विना भृत्यैः न पार्थिवः, पार्थिवं विना न भृत्याः । तेषां च व्यवहारोऽयं परस्पर निबन्धनः।

स्वयं न शोभते (doesn't shine on its own)

तेजस्व्यपि दीप्तांशुः मयूखैः इव भृत्यैर्विना लोकानुग्रहकारिभिः राजा स्वयं न शोभते ।

वृत्तिचक्रं प्रवर्तते (the cycle of activity goes on)

अरैः सन्धार्यते नाभिः । नाभौ च अराः प्रतिष्ठिताः । स्वामिसेवकयोः एवं वृत्तिचक्रं प्रवर्तते।

स्नेहेन परिपालिताः (protected by affection / friendship)

केशाः शिरसा विधृताः नित्यं स्नेहेन परिपालिताः । तथैव सेवकाः अपि स्नेहेन परिपालिताः । निःस्नेहाः केशाः यथा तथैव सेवकाः अपि विरज्यन्ते ।

प्राणैः उपकुर्वते (help with one's own life)

तुष्टः राजा भृत्यानामर्थमात्रं प्रयच्छति भृत्यास्तु सम्मानमात्रेण प्राणैरपि उपकुर्वते। एवं ज्ञात्वा नरेन्द्रेण कार्यविचक्षणाः भृत्याः कुलीनाः शौर्यसंयुक्ताः शक्ताः भक्ताः क्रमागताः कार्याः ।

सहायसेवकः (a servent who is helpful)

यः राज्ञः सुकृतं दुष्करं हितम् उत्तमं कृत्वा न किञ्चित् लज्जया वक्ति सः सहायसेवकः ।

सः सेवकः स्यात् (he is a servent)

राजा यस्मिन् सेवके कृत्यं समावेश्य, निर्विशंकेन चेतसा आस्यते सः अपरं कलत्रमिव सेवकः स्यात्।

स भृत्योऽर्हः (he is fit to be the king's man)

यः अनाहूतः समभ्येति, सर्वदा द्वारि तिष्ठति, पृष्टः मितं सत्यं ब्रूते सः महीभुजां भृत्योऽर्हः । अनादिष्टोऽपि भूपस्य हानिकरं दृष्ट्वा यः तस्य नाशाय यतते

सः महीभुजां भृत्योऽर्हः । महीभुजा ताडितोऽपि दुरुक्तोऽपि दण्डितोऽपि यः पापं न चिन्तयते सः महीभुजां भृत्योऽर्हः । माने गर्वं न कुरुते अपमाने च न तप्यते यस्तु स्वाकारं रक्षयेत् सः महीभुजां भृत्योऽर्हः । यस्तु क्षुधा निद्रया च न कदाचन पीड्यते न च शीतातपाद्यैश्च पीड्यते सः महीभुजां भृत्योऽर्हः । साङ्ग्रामिकीं वार्तां शृत्वा भविष्यां स्वामिनं प्रतिप्रसन्नास्यः भवेद्यस्तु सः महीभुजां भृत्योऽर्हः । यस्मिन् संस्थिते नियोगः शुक्लपक्षचन्द्र इव सीमावृद्धिं समायाति सः महीभुजां भृत्योऽर्हः ।

सः भृत्यः त्याज्यः (that servent should be abondoned)

यः यस्मिन् स्थिते वह्नौ अहितं चर्ममिव सीमासंकोचमायाति राज्याभिवृद्ध्यर्थं सः भृत्यः त्याज्यः ।

स्वापकारिणी हन्तव्या (the person that cansed harm should be killed)

मूषिका गृहजाता अपि स्वापकारिणी हन्तव्या । हितकृत् मार्जालः भक्ष्यप्रदानैः जनैः प्रार्थ्यते।

अज्ञैः प्रयोजनं नास्ति (no purpose is served by a fool)

एरण्डभिण्डार्कनलैः प्रभूतैरपि सञ्चितैः दारुकृत्यं यथा नास्ति तथैवाज्ञैः प्रयोजनं नास्ति । असमर्थेन भक्तेन, अपकारिणा शक्तेन च प्रयोजनं नास्ति ।

षट्कर्णं वर्जयेत्सुधीः (the intelligent should leave six ears)

स्वल्पतरं कार्यमपि पृथ्वीपतेः यद्भवेत्, तत् सभामध्ये न वाच्यम् । इदं प्रोवाच बृहस्पतिः । षट्कर्णो भिद्यते मन्त्रः । चतुष्कर्णो स्थिरो भवेत् । तस्मात् सर्वप्रयत्नेन सुधीः षट्कर्णं वर्जयेत् ।

विचिन्त्य वदेत् विपश्चित् (the wise should talk after thinking)

दारेषु किञ्चित् स्वजनेषु किञ्चित् वयस्येषु किञ्चित् सुतेषु किञ्चित् गोप्यम्। महतः अनुरोधात् इदं युक्तं वा न युक्तमिति विचार्य विपश्चित् वदेत् ।

दुःखं निवेद्य सुखी भवति (becomes happy by talking about his pain)

निरन्तरचित्ते सुहृदि, गुणवति भृत्ये, अनुवर्तिनि कलत्रे सौहृदयुक्ते स्वामिनि

दुःखं निवेद्य सुखी भवति ।

आतुरः भिद्यते वाग्भिः (the nervous gets agitated by mere talk)

अम्भसा भिद्यते सेतुः, अरक्षितः मन्त्रः भिद्यते, पैशुन्यात् स्नेहः भिद्यते, वाग्भिः आतुरः भिद्यते ।

न याति पराभवम् (doesn't get insulted)

अत्युत्कटे च रौद्रे च शत्रौ प्राप्ते च न हीयते । यस्य धैर्यं सः महीनाथः पराभवं न याति ।

धैर्यध्वंसो न भवेत् धीराणाम् (the brave doesn't lose their boldness)

दर्शितभयेऽपि धातरि धैर्यध्वंसो न भवेत् धीराणाम् । निदाघे शोषितसरसि, सिन्धुः नितरामेवोद्धतः ।

भुवनत्रयतिलकम् (magnanimous of three worlds)

यस्य विपदि न विषादः, सम्पदि न हर्षः, रणे न भीरुत्वं, तं भुवनत्रयतिलकं सुतं जननी विरलं जनयति ।

तृणस्य च समा गतिः (his life is equal to grass blade)

शक्तिवैकल्यनम्रस्य, निस्सारत्वात् लघीयसः जन्मतः मानहीनस्य जन्मनः गतिः तृणस्य समा भवति ।

जतुजाभरणस्येव व्यर्थः (worthless like lac ornament _)

अन्यप्रतापमासाद्य यः दृढत्वं न गच्छति सः जतुजाभरणस्येवाप्रयोजकः ।

न सन्तापमाप्नुयात् (doesn't get into grief)

भये वा यदि हर्षे वा सम्प्राप्ते विमर्शयेत् । यः वेगात् कृत्यं न कुरुते सः न सन्तापमाप्नुयात् ।

पुरुषविशेषं प्राप्ता भवन्ति (are acheived depending on the person)

अश्वः, शस्त्रं, शास्त्रं, वीणा, वाणी, नरः, नारी च पुरुषविशेषं प्राप्ताः योग्याः अयोग्याश्च भवन्ति ।

न भीः सञ्जायते क्वचित् (doesn't get fear any time)

स्वाम्यादेशात् सुभृत्यस्य न भीः सञ्जायते क्वचित् । महार्णवं दुस्तरं वा आहेयं मुखं प्रविशेत् । स्वाम्यादिष्टे कार्ये सारल्यं काठिन्यादिकं यः न मन्यते सः भूतिमिच्छता भूभुजा सः सन्धार्यः ।

यतन्ते तस्य नाशाय (they strive for his destructoin)

महीपस्य सम्मानितविमानिताः ये भवन्ति ते कुलीना अपि सर्वदा तस्य नाशाय यतन्ते ।

विश्वस्तास्त्वेव वध्यन्ते (they are being killing by those whom they believe)

दुर्बला अपि अविश्वस्ताः बलिभिः न वध्यन्ते । बलवन्तोऽपि विश्वस्तास्त्वेव दुर्बलैः वध्यन्ते । यः आत्मनः वृद्धिमायुष्यञ्च सुखानि च इच्छेत् सः प्राज्ञः बृहस्पतावपि विश्वासं न व्रजेत् । शपथैः सन्धितस्यापि रिपोः विश्वासे न व्रजेत् । राज्यलाभोद्यतः वृत्तः शक्रेण शपथैः हतः । देवानां शत्रुः अपि विश्वासं विना न सिद्ध्यति । विश्वासात् त्रिदशेन्द्रेण दितेः गर्भः विदारितः ।

मन्त्रिणां वाक्ये प्रवर्तते (they donot follow the advise of ministers)

न कौलीन्यात् न सौहार्दात् नृपः मन्त्रिणां वाक्ये प्रवर्तते । व्यसनं शोकमेव च यावदभ्येति तदानीं प्रभुः मन्त्रिणां वाक्ये प्रवर्तते ।

राजा भोग्यो भवति (the king becomes the object of enjoyment)

सदैवापद्गतः राजा मन्त्रिणां भोग्यो भवति । अत एव हि मन्त्रिणः नृपं सापदं वाञ्छन्ति ।

राजा सचिवं नाभिवाञ्छति (the king doesn't want the minister)

यथा कदाचित् नीरोगः चिकित्सकं न वाञ्छति तथा आपद्रहितः राजा सचिवं नाभिवाञ्छति।

स विनश्येत सुमहानपि (gets destoryed , even a great person)

भूभुजां देवानां च पुरतः यः स्वल्पमपि असत्यं वदति सः सुमहानपि दृतं विनश्येत । राजा सर्वदेवमयः इति मनुना सम्प्रकीर्तितः । तस्मात् तं देववत् पश्येत्। न कर्हिचित् व्यलीकेन ।

सद्यः शुभाशुभफलम् (immediate result of good or bad)

सर्वदेवमयस्यापि नृपतेः अयं विशेषः शुभाशुभफलं सद्यः भवति नृपात् । देवात् भवान्तरे स्यात् ।

महान् महत्स्वेव करोति विक्रमम् (the great display their power on great people only)

प्रभञ्जनः मृदूनि तृणानि नीचैः प्रणतानि सर्वतः नोन्मूलयति । उन्नतचेतसामयं स्वभावः । महान् महत्स्वेव विक्रमं करोति ।

तुल्ये बले तु बलवान् परिकोपमेति (a powerful man becomes angry on another powerful man)

गण्डस्थलेषु मदवारिषु बद्धरागमत्तभ्रमद्भ्रमरपादतलाहतोऽपि, मत्तगजः नितान्तबलोऽपि कोपं न गच्छति । तुल्ये बले तु बलवान् परिकोपमेति ।

कार्यं संसिद्धिमभ्येति (the action becomes fruitful)

बुद्ध्या प्रसाधितं कार्यं यथा संसिद्धिमभ्येति तथा शस्त्रैः, नागेन्द्रैः, हयैः, पदातिभिश्च न सिद्ध्यति ।

न महीपस्य चित्तान्तः (not able to grasp the mind of the king)

भूमेः समुद्रस्य गिरेरपि पर्यन्तो लभ्यते । क्वचित् केनचित् कथञ्चित् महीपस्य चित्तान्तः न लभ्यते।

मन्त्रिभिः धार्यते राज्यम् (the kingdom is maintained by the ministers)

अन्तः सारैः अकुटिलैः अच्छिद्रैः सुपरीक्षितैः मन्त्रिभिः धार्यते राज्यं यथा मन्दिरं सुस्थम्भैः इव।

कर्मणि व्यज्यते प्रज्ञा (expertise gets experssed in action)

भिन्नसन्धाने मन्त्रिणां प्रतिभा, सान्निपातके भिषजां प्रतिभा च व्यज्यते । प्रज्ञा व्यज्यते कर्मणि स्वस्थे को वा न पण्डितः ?

अमृतम् (nectar)

शिशिरे वह्निः अमृतम् । प्रियदर्शनम् अमृतम् । राजसम्माननममृतम् । क्षीरभोजनममृतम् ।

धर्मेण विभवाः स्युः (riches are obtained by dharma)

आखेटकस्य धर्मेण विभवाः नृणां वशे स्युः । एकः नृप्रजाः प्रेरयति । अन्यः अत्र मृगानिव हन्ति ।

कार्यकर्ता दुर्लभः (a good worker is difficult to get)

नरपति हितकर्ता द्वेष्यतां याति लोके । जनपदहितकर्ता पार्थिवेन्द्रैः त्यज्यते। इति महति विरोधे वर्तमाने समाने नृपतिजनपदानां कार्यकर्ता दुर्लभः ।

चणकः भ्राष्ट्रकं न भंक्ति (doesn't break the pot of canaka)

यः अपकर्तुमशक्तः सः निर्लज्जः कुप्यति किं प्रयोजनम् ? चणकः उत्पतितोऽपि भ्राष्ट्रकं भंक्तुं न शक्तः भवति खलु ।

तत्स्वप्नेऽपि ब्रूते (utters it even in dream)

मर्त्यः दिवा यद्वाञ्छति, वीक्षते वा, करोति वा तत् स्वप्नेऽपि तदभ्यासात् ब्रूते अथवा करोति । शुभं वा यदि पापं वा नृणां हृदि यत् संस्थितं तत् सुगूढमपि स्वप्नवाक्यात् तथा मदात् ज्ञेयम् ।

योषितां प्रियः कः (who is dear to women ?)

जल्पन्ति सार्धम् अन्येन । पश्यन्ति अन्यं सविभ्रमाः । हृद्गतमन्यं चिन्तयन्ति।

योषितां प्रियः को नाम ? एकेन स्मितपाटलाधररुचः अल्पाक्षरं जल्पन्ति । अन्यम् इतः स्फुटत्कुमुदिनी फुल्लोल्लसत् लोचनाः वीक्षन्ते । अन्यं दूरोदारचरित्रचित्रविभवं धिया ध्यानन्ति इत्थं वामभ्रुवां परमार्थतः अर्थवदिव प्रेमा केनास्ति ?

न तृप्यति वामलोचना (the women is not satisfied)

अग्निः काष्ठानां न तृप्यति । महोदधिः नदीनां न तृप्यति । अन्तकः यमः सर्वभूतानां न तृप्यति । वामलोचना पुंसां न तृप्यति ।

नारीणां सतीत्वम् (charity of women)

एकान्तस्यालभ्यत्वात्, विश्रान्तेरभावात्, प्रार्थयिता नरः कोऽपि अभावात् च नारीणां सतीत्वमुपजायते ।

भवेत्क्रीडा शकुन्तवत् (becomes a play bird)

इयं कामिनी मयि अनुरागवती इति मोहात् यः मन्यते, सः मूढः तस्याः वशगः नित्यं क्रीडाशकुन्तवत् भवेत् ।

सर्वतः लघुत्वं याति (becomes cheap everywhere)

स्त्रीणां वाक्यानि कृत्यानि स्वल्पानि सुगुरूण्यपि यः करोति, कृतैः लोके सर्वतः लघुत्वं याति ।

तमेवेच्छन्ति योषितः (the women want him only)

स्त्रियं च यः प्रार्थयते सन्निकर्षं च गच्छति, ईषत् सेवां च कुरुते तमेवेच्छन्ति योषितः ।

स्त्रियस्तिष्ठन्ति मर्यादायाम् (the women are in control)

मनुष्याणामनर्थित्वात् परिजनस्य भयात् च अमर्यादाः स्त्रियः

सर्वदा मर्यादायां तिष्ठन्ति ।

पुमानित्येव भुञ्जते (gets enjoyed being a man)

स्त्रीणां गम्यागम्यविचारः बालवृद्धादिपरिशीलनं, विरूपसुरूपादि विचक्षणं च न सन्ति केवलं पुमानित्येव भुञ्जते ।

रक्तो भोग्यो जायते (the infactuated becomes an object of enjoyment)

नारीणां शाटिका यथा तथा अनुरक्तः पुरुषः भोग्यो जायते । यो दशालम्बी नितम्बे विनिवेशितः घृष्यते । अलक्तको यथा तथा रक्तः पुरुषः निष्पीड्य, अबलाभिः अनुरक्तः बलात् पादमूले निपात्यते ।

नास्ति -नास्ति (not)

अर्थान् प्राप्य न गर्वितः नास्ति । विषयिणः आपदो स्तङ्गतः नास्ति । स्त्रीभिः न खण्डितः मनः भुवि नास्ति । राज्ञां प्रियः नास्ति । कालस्य न गोचरान्तरगतः नास्ति । अर्थी गौरवं गतः नास्ति । दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् नास्ति। काके शौचं नास्ति । द्यूतकारे सत्यं नास्ति । सर्पे क्षान्तिः नास्ति । स्त्रीषु कामोपशान्तिः नास्ति । क्लीबे धैर्यं नास्ति । मद्यपे तत्त्वचिन्ता नास्ति ।

सर्वत्र प्रपूज्यते (becomes venerable everywhere)

अकुलीनोऽपि मूर्खोऽपि यः भूपालं सेवते, सः सम्मानहीनोऽपि सर्वत्र प्रपूज्यते।

नृपतिसेवकः (the king's servant)

कुत्सितः, भीरुः अपि नृपतिसेवकः जनात् पराभूतिं नाप्नोति ।

सुसदृशी चेष्टा (equals)

तुलायष्टेः खलस्य च चेष्टा सुसदृशी । स्तोकेन उन्नतिमायाति । स्तोकेनाधोगतिमायाति ।

सकृत्सज्जनसङ्गतम् (the companion of the virtuous)

यदृच्छयापि उपनतं सकृत्सज्जनसङ्गतम् अत्यन्तमजरं भवति ।

नाभ्यासक्रममीक्षते।

त्यज्यान्यत्र गच्छन्ति (leaving , go elsewhere)

उन्नतिं कुलीनमपि च फलहीनं नृपां भृत्याः अण्डजाः शुष्कं वृक्षमिव त्यज्याः सन् अन्यत्र गच्छन्ति । कुलीनाः भक्तितत्पराः सम्मानसंयुक्ताः अपि वृत्तिभङ्गात् सेवकाः महीपालं त्यजन्त्येव ।

न मुञ्चन्ति सेवकाः (the servants donot leave)

यः भूपतिः वृत्तेः कालातिक्रमणं न कुर्वीत तं कदाचित् भर्पिता अपि सेवकाः न मुञ्चन्ति । तथा केवलं सेवकाः एव न । इत्थम्भूताः यावत्समस्तमपि एतत् जगत् परस्परं भक्षणार्थं सामादिभिः उपायैः तिष्ठति ।

दिवानिशं प्रतीक्षन्ते (they observe day and night)

देशानामुपरिक्ष्माभृदातुराणां चिकित्सकाः, वणिजः, पण्डिताः, ग्राहकाः, प्रमादिनः, चौराः, भिक्षुकाः, गृहस्थाः, गणिकाः, कामिनः, शिल्पिनः सर्वलोकस्य च सामादिसज्जितैः पाशैः दिवानिशं प्रतीक्षन्ते । जलजाः जलदानिव शक्त्या उपजीवन्ति ।

तेनेदं वर्तते जगत् (to world exists , because of this)

सर्पाणां परद्रव्यापहारिणां खलानां च अभिप्रायाः न सिद्ध्यन्ति । तेनेदं जगत् वर्तते ।

जगतः स्वरूपं तत् (that is the nature of the world)

शाम्भवः फणिः क्षुधार्तः गणपतेः मूषिकम् अत्तुं वाञ्छति । क्रौञ्चरिपोः शिखी फणिम् अत्तुं वाञ्छति । गिरिसुता सिंहोऽपि नागाशनम् अत्तुं वाञ्छति । इत्थं शम्भोः गृहेऽपि परिग्रहस्य घटना स्यात्, अस्य जगतः तत्राप्यस्य कथम् ? यस्मात् जगतः स्वरूपं तत् ।

अश्रुण्वन्नपि बोद्धव्यः (should tell them , even if they donot listen)

पृथ्वीपतिः अश्रुण्वन्नपि मन्त्रिभिः बोद्धव्यः । यथा स्वदोषनाशाय विदुरेण धृतराष्ट्राय बोधितः ।

दुःखं दुःखं दुःखम् (misery,misery)

अर्थानामार्जने दुःखम् । आर्जितानां च रक्षणे दुःखम् । आये दुःखम् । व्यये दुःखम् । धिगर्थान् कष्टसंश्रयान् ।

निःस्पृहो नाधिकारी (one without hope , qualified)

निःस्पृहः अधिकारी न स्यात् । अकामी न मण्डनप्रियः । नाविदग्धः प्रियं ब्रूयात् । स्फुटवक्ता न वञ्चकः ।

शमः कस्य न जायते ? (who will not become peaceful ?)

पूर्वे वयसि यः शान्तः सः शान्तः इत्युच्यते । धातुषु क्षीयमाणेषु कस्य शमः न जायते ?

नैव चित्ते कदाचन (never comes to the mind)

आदौ चित्ते ततः काये सतां सम्पद्यते जरा । असतां तु पुनः काये नैव चित्ते कदाचन ।

भस्माङ्गः शिवो भवेत् (one with ash , becomes Shiva)

शूद्रो वा यदि वा अन्योऽपि चण्डालोऽपि जटाधरः शिवमन्त्रेण दीक्षितः सः भस्माङ्गः शिवो भवेत् ।

न भूयो अभिजायते (willnot be born again)

षडक्षरेण मन्त्रेण स्वयम् एकं पुष्पमपि लिङ्गस्य मूर्ध्नि यः दद्यात् सः भूयः नाभिजायते ।

नश्यति नश्यति (is destoryed)

दुर्मन्त्रात् नृपतिः, सङ्गात् यतिः, लालनात् सुतः, अनध्ययनात् विप्रः, कुतनयात् कुलं, खलोपासनात् शीलं, अप्रणयात् मैत्री, अविनीत्या समृद्धिः, प्रवासाश्रयात् स्नेहः, गर्वात् स्त्री, अनवेक्षणात् कृषिः, त्यागात् प्रमादात् धनं च नश्यन्ति ।

देवत्वं प्रयान्ति (attain divinity)

सायं सूर्योढः सम्प्राप्तः यो अतिथिः तस्य पूजया गृहमेथिनः देवत्वं प्रयान्ति ।

नोच्छिद्यन्ते कदाचन (will not move away at any time)

तृणानि, भूमिः, उदकं, सत्यप्रियभाषणम् एतानि सतां हर्म्येषु कदाचन नोच्छिद्यन्ते।

अतिथेः तृप्ताः (satisfied due to guests)

अतिथेः स्वागतेन अग्नयः, आसनेन शतक्रतुः, पादशौचेन पितरः, तथार्घात् शम्भुः तृप्ताः स्युः ।

परमसुखं जघनचपलायाः (extreme pleasure for the women)

घनतिमिरे दुर्दिवसे नगरवीथिषु दुःसञ्चारासु पत्युः विदेशगमने जघनचपलायाः परमसुखं भवति । चौर्यरतलुब्धाः कामिन्यः पर्यंकेषु आस्तरणं, मनोहरं शयनम् अनुकूलं पतिं, तृणमिव लघु मन्यन्ते ।

न किञ्चिदिष्टं भवेत् पत्यौ (doesnot like the husband at all)

बन्धक्याः लज्जा केलिं प्रदहति, शृङ्गारः अस्थीनि प्रदहति । चाटवः कटवः भवन्ति । परितोषः न भवति । पत्यौ न किञ्चिदिष्टं भवेत् ।

परपुरुषसंसक्ता (woman interested in other men)

सततं परपुरुषसंसक्ता कुलटा कुलपतनं, जनगर्हां, बन्धनं, जीवितस्य सन्देहमङ्गीकरोति ।

सन्निपातस्य चिह्नानि (marks of drinking)

वैकल्यं, धरणीपातम्, अयथोचितभाषणं, सन्निपातस्य चिह्नानि सर्वाणि मद्यं दर्शयेत् । करस्पन्दः, अम्बरत्यागः, तेजो हानिः, सरागता, वारुणीसङ्गजावस्था च भानुनापि अनुभूयते ।

धन्याः तारुण्यफलभाजः (girls who attained puberty are blessed)

सन्दिग्धे परलोके जनापवादे च बहुचित्रे जगति स्वाधीने पररमणे धन्याः तारुण्यफलभाजः । दैवयोगात् पुमान् विरूपोऽपि यदि भवति रहसि रमते ।

जानाति नरस्य वृत्तम् (they know the behaviour of man)

आदित्यः, चन्द्रः, अनिलः, अनलः, द्यौः, भूमिः, आपः, हृदयं, यमः, अहः, रात्रिः, उभे च सन्ध्ये नरस्य वृत्तं धर्मश्च जानाति ।

सर्वाः योषितो विदुः (women knows everything)

शम्बरस्य च या माया, नमुचेरपि या माया, बलेः कुम्भीनसेश्चैव ताः सर्वाः योषितो विदुः । हसन्तं प्रहसन्त्येताः । रुदन्तं प्ररुदन्त्यपि । कालयोगतः अप्रियं प्रियवाक्यैश्च गृह्णन्ति । उशना नाम शुक्राचार्यः यच्छास्त्रं वेद, बृहस्पतिः यच्चवेद, स्त्रीबुद्ध्या न विशेष्येत । तस्मात् कथं हि ताः रक्ष्याः ? अनृतं सत्यमित्याहुः । सत्यं चापि अनृतमाहुः । इति याः ताः धीरैः पुरुषैः कथमिह संरक्ष्याः ? प्रमदासु अतिप्रसङ्गः न कार्यः । स्त्रीषु विवर्धमानं बलं नेच्छेत् । यतः अतिप्रसक्तैः पुरुषैः लूनपक्षैः काकैः इव ताः स्त्रियः क्रीडन्ति । सुमुखेन सुरुचिरं वदन्ति । शितेन चेतसा प्रहरन्त्येव । योषितां वाचि मधु तिष्ठति, हृदि केवलं हालाहलमेव तिष्ठति । अत एव अधरः निपीयते । हृदयं मुष्टिभिरेव ताड्यते । सुखलेशवञ्चितैः मधुलुब्धैः पुरुषैः कमलं यथालिभिः निपीयते तथा ।

अमृतयुतं विषम् (poison mixed with necter)

स्त्रीयन्त्रं विषममृतयुतं स्त्रीयन्त्रं धर्मनाशाय लोके केन सृष्टं तत् संशयानामावर्तम्, अविनयभवनं, साहसानां पत्तनं, दोषाणां, सन्निधानं, कपटशतगृहम्, अप्रत्ययानां क्षेत्रं, महद्भिः नखरवृषभैः दुर्ग्राह्यं, सर्वमायाकरण्डं, विषममृतमयं, स्त्रीणां स्तनयोः कार्कश्यं, तरलता, मुखे अलीकं दृश्यते । कचसञ्चये कौटिल्यं, प्रवचने मान्द्यं, त्रिके स्थूलता, हृदये भीरुत्वं, प्रिये सदैव मायाप्रयोगः कथितम् । दोषगणः मृगदृशां स्त्रीणां गुणाः मन्यन्ते ।

नार्यः वर्जनीयाः

स्त्रियः कार्यहेतोः हसन्ति रुदन्ति च । परं च विश्वासयन्ति । न तु विश्वसन्ति। तस्मात् कुलशीलवता नरेण सदैव नार्यः श्मशानवाटिकाः इव वर्जनीयाः ।

पुरुषाः परमका भवन्ति (men become cowards)

व्याकीर्ण केसरकरालमुखाः मृगेन्द्राः भूरिमदराजिविराजमानाः नागाश्च, मेधाविनश्च पुरुषाः, समरेषु शूराः, स्त्रीसन्निधौ परमका पुरुषा भवन्ति ।

मीनमिवोद्धरन्ति (bring them under subingation like fish)

यावत् नरं प्रसक्तं जानन्ति तावत् प्रथमं प्रियाणि कुर्वन्ति । मन्मथपाशबद्धं तं ज्ञात्वा च ग्रस्तमिषं मीनमिवोद्धरन्ति ।

निष्पीडिता लक्तकवत् त्यजन्ति (quit them like powdered lac)

समुद्रवीचीवचलस्वभावाः सन्ध्याभ्ररेखेव मुहूर्तरागाः कृतार्थाः स्त्रियः पुरुषं निरर्थनिष्पीडितालक्तकवत् त्यजन्ति ।

स्त्रीणां स्वभावजाः दोषाः (blemishes natural to women)

अनृतं, साहसं, माया, मूर्खत्वम्, अतिलोभता, अशौचं, निर्दयत्वं च स्त्रीणां स्वभावजाः दोषाः।

सर्वं समाचरन्ति वामनयनाः (women do everything)

सम्मोहयन्ति, मदयन्ति, विडम्बयन्ति, निर्भत्सयन्ति, रमयन्ति, विषादयन्ति, नराणां हृदयं सरलं प्रविश्य स्त्रियः सर्वं समाचरन्ति । अन्तर्विषमया ह्येताः बहिश्चैव मनोरमाः, गुञ्जाफलसमाकाराः ।

दुष्टचारित्रलक्षणः (possing the marks of sinful acts)

भिन्नस्वरमुखवर्णः, शंकितदृष्टिः, समुत्पततेजाः, स्वकर्मसन्त्रासितः पुरुषः पापं कृत्वा भवति । मुखवैवर्ण्यसंयुतः स्खलितैः पादैः आयाति । ललाटस्वेदभाग् भूरिगद्गदं वचः भाषते । पापं कृत्वा सभां प्राप्तः नरः अधो दृष्टिः वदेत् । तस्मात् विचक्षणैः एतैः चिह्नैः यत्नात् परिज्ञेयाः ।

शुचिः नरः सावष्टम्भः (a pure man speaks boldly)

निर्दोषयुक्तः शुचिः नरः सावष्टम्भः सभायां प्रसन्नवदनः, दृष्टः, सरोषदृक् स्पष्टवाक्यः सामर्षं वक्ति।

अपराधे अवध्याः (shouldn't be punished , even if perforned a wrongful act)

ब्राह्मणः, बालः, स्त्री, तपस्वी, रोगभाक् च महत्यपि अपराधे अवध्याः । तेषां व्यङ्गिता विहिता ।

बुद्धिमता सृष्टा बुद्धिः (wisdom created by the knowledgeable)

धनुष्मता मुक्तः इषुः एकं हन्यात् न हन्यात् वा । बुद्धिमता सृष्टा बुद्धिः सनायकं राष्ट्रं हन्ति ।

न त्याज्यं धैर्यम् (shouldn't leave boldners)

दैवे विधुरेऽपि धैर्यं न त्याज्यम् । कदाचित् धैर्यात् सः स्थितिमाप्नुयात् । पोतभङ्गे समुद्रेऽपि याते । यस्मात् कारणात् सांयात्रिको कार्यमेतत् वाञ्छति ।

यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः (of what harm if one doesn't succed inspite of effort ?)

उद्योगिनं सततं समेति लक्ष्मी । कापुरुषाः दैवेन देयमिति वदन्ति । दैवं निहत्य आत्मशक्त्या पौरुषं कुरु । यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ? सुप्रयुक्तस्य दम्भस्य ब्रह्मापि अन्तं न गच्छति ।

असाध्यं नास्ति लोके (there is nothing impossible in the world)

औषधानां सुमन्त्राणां महात्मनां बुद्धेः ब्रह्माण्डस्य मध्यगं लोकेऽत्र नास्ति असाध्यम् ।

कष्टं कन्यापितृत्वम् (being father of a girl is difficult)

जाता पुत्रीति महतीव चिन्ता । कस्मै प्रदेयेति महान् वितर्कः । दत्ता सुखं प्राप्स्यति वा नवेति सन्देहः । कन्यापितृत्वं नाम कष्टं खलु ।

नद्यः नार्यः (rivers and women)

नद्यश्च नार्यश्च सदृक् प्रभावाः । तासां कुलानि कूलानि तुल्यानि । तोयैश्च

दोषैश्च नद्यः नार्यः कुलानि कूलानि निपातयन्ति ।

दुरतिक्रमाः दुहितरो विपदः (difficult to cross difficulties in the form of girls)

तवती जननी मनो हरति । सुहृदां शुचा सह परिवर्धते । परसात्कृतापि मलिनं कुरुते । दुहितरो विपदः दुरतिक्रमाः ।

फणाटोपो भयंकरः (the hood of a snake is fearful frightenis)

निर्विषेणापि सर्पेण महती फणा कर्तव्या विषं भवतु वा मा भूत् फणाटोपो भयंकरः ।

सनातनाः लोकाः (eternal divine worlds)

गवामर्थे ब्राह्मणार्थे स्वाम्यर्थे अथवा स्त्रीकृते स्थानार्थे यः प्राणान् त्यजेत् तस्य सनातनाः लोकाः सिद्धेयुः ।

विपदपि श्लाघ्या तेजस्विनाम् (even difficulties)

चन्द्रे मण्डलसंस्थे दिनाधीशः राहुणा विगृह्यते । शरणागतेन सार्धं विपदपि तेजस्विनां श्लाघ्या एव ।

प्राणसंशयः (doubt about life)

यस्य नदीतीरेक्षेत्रं, परसङ्गता भार्या, ससर्पे गृहे च वासः, तस्य शान्तिः नास्ति । सर्पयुक्ते गृहे वासः मृत्युरेव, न संशयः । यद्ग्रामान्ते सर्पः वसेत् तस्य प्राणसंशयः स्यात् ।

उपायज्ञः (the knower of the means)

उपायेन यादृक् जयः, तादृक् रिपोः हेतिभिः न लभ्यते । उपायज्ञः अल्पकायोऽपि शूरैः न परिभूयते । यस्य बुद्धिः तस्य बलं, निर्बुद्धेः बलं नास्ति ।

परमां पुष्टिं व्रजेत् (gets good strength)

प्राज्ञः रसायनमिव यः राज्यं यथा बलं शनैः शनैश्च उपभुंक्ते सः परमां पुष्टिं व्रजेत् ।

प्रयच्छति फलं भूमिः (the earth yeilds the crop / result)

विधिना मन्त्रयुक्तेन रूक्षापि मथितापि च हुताशनमरणीव भूमिः फलं प्रयच्छति।

पीडनं धर्मनाशाय (hara others causes destruction of dharma)

प्रजानां पालनं प्रशंसनीयम् । स्वर्गकोशस्य वर्धनं स्यात् । प्रजानां पीडनं धर्मनाशाय पापायायशशे स्थितम् ।

न्याय्यां वृत्तिं समाचरेत् (should act right manner)

गोपालेन प्रजाधेनोः वित्तदुग्धं शनैः शनैः पालनात् पोषणात् ग्राह्यम् । न्याय्यां वृत्तिं समाचरेत् ।

द्वितीया न तृप्तिः (no satisfaction in the second time)

यः पृथ्वीपतिः मोहात् अजामिव प्रजां हन्यात्, तस्यैका तृप्तिः जायते । न कथञ्चन द्वितीया तृप्तिः ।

पालयेत् यत्नमास्थितः (rule with effort)

मालाकारः दानमानादि तोयेन अंकुरानिव फलार्थो नृपतिः यत्नमास्थितः लोकान् पालयेत्।

नृपदीपः (the lamp called 'king')

प्रभु नाम दीपः प्रजाभ्यः धनं नाम तैलं संहरन्नपि अन्तरस्थैः गुणैः शुभ्रैः केनचित् नैव लक्ष्यते।

पाल्यते प्रजाः (the people are ruled)

यथा गौः काले दुह्यते, लता पुष्पफलप्रदा सिच्यते चीयते च तथा च प्रजाः पाल्यते ।

फलप्रदो भवेत्

यथा बीजांकुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः तद्वत् सुरक्षितः लोकः काले फलप्रदो भवेत् ।

प्रजाभ्यः स्यात् (gets from the people)

हिरण्यधान्यरत्नानि यानानि विविधानि च तथान्यदपि यत्किञ्चित् महीपतेः

प्रजाभ्यः स्यात् ।

क्षयं यान्ति न संशयः (they will get destroyed there is no doubt)

नरेश्वराः लोकानुग्रहकर्तारः प्रवर्धन्ते लोकानां संक्षयात् चैव क्षयं यान्ति । न संशयः ।

युद्धं न कुर्यात् (should not do war)

भूमिः, मित्रं, हिरण्यञ्च, विग्रहस्य फलत्रयम् । यदि एषाम् एकमपि नास्ति, युद्धं कथञ्चन न कुर्यात् । यत्र भूरिफलं न स्यात्, यत्र च पराभवः स्यात्, तत्र मतिमान् समुत्पाद्य युद्धं न समाचरेत् ।

दुर्गेणैकेन सिद्ध्यति (it is acquired with a single fort)

यत्कृत्यं न गजानां सहस्रेण, न च लक्षेण वाजिनां साध्यते राज्ञां, तत् एकेन दुर्गेण सिद्ध्यति । प्राकारस्थो धनुर्धरः एकोऽपि शतं सन्धत्ते, तस्मात् नीतिशास्त्रविचक्षणाः दुर्गं प्रशंसन्ति । पुरा गुरोः समादेशात् हिरण्यकशिपोः भयात् विश्वकर्मणः प्रभावात् शक्रेण दुर्गं विहितम् । यस्य दुर्गं स भूपतिः विजयी स्यात् इति विश्वकर्मणा वरः दत्तः। ततः भूमौ सहस्रशः दुर्गाणि स्युः । दंष्ट्रा रहितः नागः मदहीनः गजः यथा सर्वेषां वश्यः जायते, तथा दुर्गहीनः नृपः वश्यः स्यात् ।

महाबलोऽपि हन्यते (is killed, inspite of being very powerful)

यः शत्रुं रोगं च जातमात्रं न प्रशमं नयेत् तेनैव वृद्धिं प्राप्य, महाबलोऽपि सः हन्यते । परः उत्तिष्ठमानस्तु पथ्यमिच्छता नोपेक्ष्यः ।

असाध्यतां प्रयाति (becomes invincible)

मदान्धैः पुरुषैः उपेक्षितः शत्रुः प्रमाददोषात् क्षीणबलोऽपि प्रथमं साध्योऽपि भूत्वा, ततः व्याधिरिव असाध्यतां प्रयाति ।

एकोऽपि बहून् हन्ति (a single person , kills many)

आत्मनः शक्तिमुद्वीक्ष्य, मनोत्साहं च यः व्रजेत् यथा भार्गवो क्षत्रियान् तथा सः एकोऽपि बहून् हन्ति ।

पतङ्गवत् नाशं याति (gets destoryed like a fire fly)

आत्मनः परस्य च शक्तिं अविदित्वा, समुत्सुकः अभिमुखः गच्छन्, वह्नौ पतङ्गवत् नाशं याति ।

विमदः निवर्तेत (returns back, having lost arrogance)

यः बलात् प्रोन्नतं बलोऽत्परिं निहन्तुं याति सः शीर्णोदन्तो गजो यथा तथा विमदः स निवर्तेत ।

अपृष्टोऽपि हितं वक्ष्येत् (that which is good, must be told, even if not asked)

प्रियं वा यदि द्वेष्यं यदि शुभमशुभं वा यस्य पराभवं नेच्छेत् अपृष्टोऽपि हितं वक्ष्येत् ।

स्वातन्त्र्यस्पृहा (the desire of freedom)

भूमिपतिः यदा प्रमाणं राज्ये एकं सचिवं करोति । तं मोहात् श्रयते मदः । स च मदात् दास्येन निर्विद्यते निर्विण्णस्य तस्य हृदये स्वतन्त्रस्पृहा पदं करोति । ततः स्वातन्त्र्यस्पृहया सः नृपतेः प्राणेषु अभिदृह्यते ।

अशक्ता एव नरेन्द्रं पर्युपासते (only the weak are devoted to the king)

यः राज्ञां श्रियं न कामयते सः पुरुषः नास्ति । सर्वत्र अशक्ता एव नरेन्द्रं पर्युपासते ।

यः प्रियः प्रिय एव सः (the one who is dear, is the one liked)

अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः ? व्यलीकानि कुर्वन्नपि यः प्रियः प्रिय एव सः।

श्रिया भाजनं सः

पार्थिवः यस्मिन्नेवाधिकं चक्षुरारोपयति, सः अकुलीनः कुलीनो वा प्रिया श्रिया भाजनं नरः।

पतनाद्भयमेव नास्ति (he is not at all afraid of a fall)

आदौ प्रणयिनां प्रणयो न विधेयः । अथवा दत्तः प्रतिदिनं परिपोषणीयः । उत्क्षिप्य यत् क्षिपति तत् लज्जां प्रकरोति । भूमौ स्थितस्य पतनाद्भयमेव नास्ति ।

स साधुः सद्भिरुच्यते (he is called sadhu by the learned)

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ? अपकारिषु यः साधुः सः सद्भिः साधुः इत्युच्यते ।

यो न हन्यात् स हन्यते (the one who dosen't kill. gets killed)

- तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम् अर्थराज्यहरं भृत्यं यः न हन्यात् स हन्यते ।

तादृग्भवति पुरुषः (the man so becomes)

यादृशैः भृत्यैः सेव्यते, यादृशांश्चोपसेवते तादृक् पुरुषः भवति । न कदाचिदत्र सन्देहः ।

संवासतो जायते गुणः (acquires qualities by association)

सन्तप्तायसि संस्थितस्य पयसः नामापि न ज्ञायते । तदेव नलिनीपत्रस्थितं मुक्ताकारतया राजते । स्वातौ सागरशुक्तिकुक्षिपतितं तत मौक्तिकं ज्ञायते । प्रायेण अधममध्यमोत्तमगुणः संवासतो जायते ।

असतां सङ्गदोषः (association with the wicked is reperhencible)

असतां सङ्गदोषेण साधवः विक्रियां यान्ति । दुर्योधनप्रसङ्गेन भीष्मः गोहरणे गतः । अविज्ञातशीलस्य प्रतिश्रयः न प्रदातव्यः ।

धर्मोऽयं गृहमेधिनाम् (this is the duty of the householder)

एहि, आगच्छ ! समाश्वासनमिदं, कस्मात् चिरात् दृश्यसे ? का वार्ता ? अतिदुर्बलोऽसि कुशलं वा ? प्रीतोऽस्मि ते दर्शनात् । एवं सर्वदा सतां गृहे प्राप्ते नीचजनेऽपि युज्यति । गृहमेधिनां धर्मोऽयं स्मार्तैः लघुः निगदितः स्वर्गदः ।

जिह्वा सौख्यार्थं यतते जीवः (man efforts to please the tongue)

रंकस्य नृपतेर्वापि जिह्वासौख्यं समं स्मृतम् । तन्मात्रं च स्मृतं सारं यत् तदर्थं यतते जनः ।

जिह्वा प्रतुष्टिदं कर्म (action performed to please the tougue)

जिह्वा प्रतुष्टिदं कर्म एवं यदि न भवेत् लोके न कश्चित् भृत्यः भवेत्, अथवा न कस्यचित् वशगः । मर्त्यः यदसत्यं वदेत्, यद्वा असेव्यञ्च सेवते, यद्गच्छति

विदेशञ्च तत्सर्वमुदरार्थतः ।

स्वभावः अन्यथा कर्तुं न शक्यते (it is not possible to change the behaviour / nature)

उपदेशेन स्वभावः अन्यथा कर्तुं न शक्यते । पानीयं सुतप्तमपि पुनः शीततां गच्छति । यदि स्यात् शीतलो वह्निः, शीतांशुः दहनात्मकः अत्र मर्त्यानां स्वभावः अन्यथा कर्तुं न शक्यते ।

न तस्य विश्वसेत् प्राज्ञः (the wise shouldnot belive the unknown)

यस्य चेष्टितं कुलं, पराक्रमं न विद्यात् आत्मनः श्रियां यदि इच्छेत् प्राज्ञः न तस्य विश्वसेत् ।

सुहृदः जनाः (people who are goodhearted)

कार्यार्थं येषां गृहे सुहृदः जनाः आगच्छन्ति ते धन्याः, विवेकज्ञाः, इह भूतले सभ्याः इति उच्यन्ते ।

राजसेवकाः (the servant of the king)

ये राजसेवकाः तेषां स्वजीवितेऽपि अविश्वासः । सम्पत्तयः परायत्ताः । सदा चित्तमनिर्वृतम् । सेवया धनमिच्छद्भिः सेवकैः मूढैः शरीरस्य स्वातन्त्र्यं यत् तदपि हारितम् । तावत् जन्मातिदुःखाय ततो दुर्गतता सदा । तत्रापि सेवया वृत्तिः अहो दुःखपरम्परा ।

जीवन्तोऽपि मृताः (dead, inspite of being alive)

महाभारते पञ्च श्रूयन्ते जीवन्तोऽपि मृताः । ते दरिद्रः, व्याधितः, मूर्खः, प्रवासी, नित्यसेवकः चेति । स्वेच्छया, औत्सुक्यात् नाश्नाति । विनिद्रः न प्रबुध्यते । निश्शंकं वचः न ब्रूते । सेवकः अपि जीवति । सेवा श्ववृत्तिराख्याता यैः तैः मिथ्या प्रजल्पितम् । श्वा सच्छन्दं चरति । सेवकः परशासनात् सञ्चरति ।

सेवकः यतिः (servant and the monk)

सेवकयत्योः समानधर्माः भूशय्या, ब्रह्मचर्यं, कृशत्वं, लघुभोजनं च ।

सेवकस्याचरणं पापहेतुः । यतेः आचरणं मुक्तिहेतुः ।

धनाय कष्टानि अल्पानि (difficulties for money sake are small)

सेवकः यदि धर्मात् न मुच्यते शीतातपादिकष्टानि यानि सहते धनाय तानि चाल्पानि ।

स्वयं च नरकं व्रजेत् (himself goes to hell)

यः साचिव्ये सन्नियोजितः मन्त्रं भिन्द्यात् सः तत् नृपकार्यं हत्वा स्वयं च नरकं व्रजेत् । नारदः इत्याह येन सचिवेन यस्य महीपतेः भेदः कृतः तेन राज्ञा तस्यामात्यस्य अशस्त्रवधः करणीयः । मनुः इदं वचनं प्राह यस्य विश्रम्भात् कथञ्चन यः मृत्युमवाप्नोति तस्य हत्या तदुत्था।

न कथञ्चित् सुह्रद्दृहः

ब्रह्मवधं कृत्वापि प्रायश्चित्तेन शुद्ध्यति । तदर्हेण विचीर्णेन न कथञ्चित् सुह्रद्दृहः ।

विपश्चिता निहन्तव्यः (should be killed by an expert of polity)

अन्योपायैः अशक्यः यः वैरी कन्यकां दत्वापि निहन्तव्यः विपश्चिता । तथा हते दोषः न विद्यते । युधि सङ्गतः क्षत्रियः कृत्याकृत्यं न मन्येत । पुरा द्रोणपुत्रेण प्रसुप्तः दृष्टद्युम्नः हतः ।

नाधिकारेण सम्पदः (wealth without authority)

वनं वरम् । भैक्ष्यं वरम् । भारोपजीवनं वरम् । मनुष्याणां व्याधिः वरम् । नाधिकारेण सम्पदः ।

सख्यं समानशीलव्यसनेन (friendship with equals)

ययोरेव समं वित्तं, ययोरेव समं कुलं तयोः मैत्री विवाहश्च न तु पुष्टविपुष्टयोः। मृगाः मृगैः सङ्गमनुव्रजन्ति । गावः गोभिः तुरगाः तुरङ्गैः, मूर्खाश्च मूर्खैः, सुधियः सुधीभिः समानशीलव्यसनेन सख्यं करणीयम् ।

अकारणद्वेषपरः (enemity without reason)

यः निमित्तमुद्दिश्य प्रकुप्यति, तस्यापगमे सः प्रशाम्यति । यः अकारणद्वेषपरः भवेत्, तं कथं परितोषयिष्यति ।

सदा शंकिनी सेवा (service is always doubted)

शक्तानामुपकारिणां परहितव्यापारयुक्तात्मनां सेवा संव्यवहारतत्त्वविदुषां द्रोहच्युतानामपि स्खलितान्तरेषु व्यापत्तिः नियता सिद्धिः भवेद्वा न वा । तस्मात् अम्बुपतेः इव अवनिपतेः सेवा सदा शंकिनी ।

सेवाधर्मः (duty)

भावस्निग्धैः उपकृतमपि लोके द्वेष्यतां याति । साक्षादन्यैः अपकृतमपि प्रीतये च उपयाति। नैकभावाश्रयाणां नृपति मनसां दुर्गाह्यत्वात् परमगहनः सेवाधर्मः योगिनामपि अगम्यः ।

न सहन्ति सेवकाः (the servants cannot tolorate)

सपत्न्याः सुकृतेरपि सपत्न्य इव संकृद्धाः । प्रभोः प्रसादमन्यस्य न सहन्तीह सेवकाः । भवति च एवं यत् गणवत्सु समीपवर्तिषु गुणहीनानां प्रसादः न भवति । गुणवत्तरपात्रेण गुणिना गुणाः छाद्यन्ते । रात्रौ दीपशिखाकान्तिः भानुवुदिते सति न भवति ।

कृत्यमकृत्यं वा कुर्युः (they do those that should be done, and those that should not)

लघूनामपि दुर्जनानां मध्ये वस्तुं न शक्यते । उपायान्तरं विधाय ते नूनं घ्नन्ति । बहवः पण्डिताः क्षुद्राः मायोपजीविनः सर्वे कृत्यमकृत्यं वा कुर्युः ।

शतब्राह्मणघातजम् (the sin of killing hundred brahmins)

विश्वस्तम कुतो भयं गृहे प्राप्तं शत्रुमपि यो हन्यात् तस्य पापं शतब्राह्मणघातजं स्यात् ।

सर्वप्रदानेषु अभयप्रदानम् (of all danas, abhaya (protection) is great)

न गो प्रदानं, न महीप्रदानं, न चान्नदानं हि तथा प्रधानम् । बुधाः यथा वदन्तीह प्रधानं सर्वप्रदानेषु अभयप्रदानम् ।

सर्वयत्नैः परिरक्षणीयः (should be protected at all costs)

यस्मिन् कुले यः पुरुषः प्रधानः सः सर्वयत्नैः परिरक्षणीयः । कुलसारभूते विनष्टे तस्मिन् अरयो वहन्ति । न नाभिभङ्गः करणीयः ।

भृत्यो नरकं व्रजेत् (such servant will go to hell)

यस्य भृत्यस्य पश्यतः स्वामी आपदं प्राप्नुयात् प्राणेषु विद्यमानेषु सः भृत्यः नरकं व्रजेत् ।

परमपदमाप्नोति (he attains heaven)

भक्तिसमन्वितः भृत्यः स्वाम्यर्थे प्राणान् यः त्यजेत् स जरामरणवर्जितं परमपदमाप्नोति ।

लोकद्वयविनाशकम् (destroys both the world)

प्राज्ञः प्राणैः कण्ठगतैरपि अभक्ष्यं न भक्षयेत् । विशेषात् तदपि स्तोकं लोकद्वयविनाशकम्।

न गच्छन्ति विक्रियाम् (they will never change)

नृपाः एतदर्थं कुलीनानां सङ्ग्रहं कुर्वन्ति आदिमध्यावसानेषु ते विक्रियां न गच्छन्ति ।

स्वर्गे अक्षयो वासः (eternal stay in heaven)

अनुवर्तिनां भृत्यानां स्वामिनः कार्ये मृतानां धरणीतले कीर्तिश्च स्वर्गे अक्षयो वासः भवेत् ।

तस्य तान्येव भवन्ति (he experiences these only)

स्वजात्यानां मनसापि यः अनिष्टानि प्रचिन्तयेत् इहलोके परत्र च तस्य तान्येव भवन्ति ।

स्वाम्यर्थे सेवकोत्तमाः (best servants for the king)

स्वाम्यर्थे सेवकोत्तमाः प्रोज्झितप्राणाः यां यान्ति तां गतिं नैव योगिनः, न

यज्वानोऽपि गच्छन्ति ।

जनता नानुरज्यते (the people won't be happy)

यथा गृध्रसमासन्नः कलहंसः समाचरेत् अशुद्धप्रकृतौ राज्ञि जनता नानुरज्यते।

सः नृपः सन्त्याज्यः (such a king should be abandoned)

हंसाकारैः सभासदैः गृध्राकारोऽपि सेव्यः । नृपः हंसाकारोऽपि गृध्राकारैः सभासदैः सन्त्याज्यः ।

चेतांसि मृदूनि न भवन्ति (their hearts are not soft)

मृदुना सलिलेन गिरेः स्थलान्यपि खन्यमानानि अवघृष्यन्ति । उपजापविदां कर्णजापैः मानवानां चेतांसि मृदूनि न भवन्ति ।

कर्णविषेण भग्नः (destroyed because of rumours / false talk)

कर्णविषेण च भग्नः बालिशः लोकः किमपि करिष्यति । क्षणिकतामपि धत्ते । नरकपालेन सुरां पिबति ।

हन्ति परं समूलम् (kills along with foundations)

पादाहतोऽपि दृढदण्डसमाहतोऽपि यं दंष्ट्रया स्पृशति तं हन्ति किल सर्पः । कोऽपि एष एव पिशुनोग्रमनुष्यधर्मः कर्णे परं स्पृशति । परं समूलं हन्ति ।

परित्यागः विधीयते (should be abandoned)

कार्याकार्यमजानतः अवलिप्यस्य गुरोः अपि उत्पथं प्रतिपन्नस्य परित्यागः विधीयते ।

गुणावेतौ सुदुर्लभौ (these two qualities are difficult)

समरे मृतैः स्वर्गः सम्प्राप्यते । जीवद्भिः उत्तमा कीर्तिः सम्प्राप्यते । तदुभावपि गुणावेतौ शूराणां सुदुर्लभौ । यस्य शूरस्य ललाटदेशे रुधिरं स्रवत्तु, यस्य वक्त्रे प्रविशेच्च सङ्ग्रामयज्ञे विधिवत् प्रदिष्टं तत् सोमपानेन समं भवेत् ।

तत् क्षणात् सम्प्राप्यते (they attain immediately)

विधिवत् प्रदानविधिना होमार्थैः सद्विप्रबृन्दार्चनैः यज्ञैः भूरिसुदक्षिणैः सुविहितैः यत्फलं सम्प्राप्यते स तीर्थाश्रमवासहोमनियमैः चान्द्रायणाद्यैः कृतैः यत्फलं सम्प्राप्यते तत् क्षणात् पुम्भिस्तत्फलमाहवे विनिहतैः सम्प्राप्यते ।

पराभवमाप्नोति (he gets insulted)

बलवन्तं रिपुं दृष्ट्वा आत्मानं प्रगोपयेत् । शरच्चन्द्रप्रकाशता बलवद्भिश्च कर्तव्या । शत्रोर्विक्रममज्ञात्वा यः वैरमारभते सः पराभवमाप्नोति ।

तस्य माता वन्ध्या (his mother is barrer woman)

यः नरः पराभवसन्त्रस्तः स्वस्थानं सन्त्यजेत्, तस्य माता वन्ध्या इति कथ्यते।

बुद्धिमान् (the wiseman)

मित्रार्थे बान्धवार्थे च आपत्सु जातासु सदा यतते बुद्धिमान् । मनुः इदं वचनं जगाद ।

यद्भविष्यो विनश्यति (one who is fateful in thinking gets ruined)

अनागतविधाता च प्रत्युत्पन्नमतिः तथा द्वावेतौ सुखमेधेते । यद्भविष्यः विनश्यति।

नान्या तेषां गतिर्भवेत् (there is no other go)

अशक्तैः बलिनः शत्रोः प्रपलायनं कर्तव्यम् । अथवा दुर्गो संश्रितव्यः । नान्या तेषां गतिर्भवेत् ।

देहभङ्गं न पश्यन्ति (they cannot see their destruction)

अन्यत्रापि सुखावहा गतिः विद्यमाना येषां ते विद्वांसः देहभङ्गं कुलक्षयं न पश्यन्ति ।

स्वदेशे निधनं यान्ति (they die in their own country)

परदेशभयात् भीताः बहुमायाः नपुंसकाः काकाः कापुरुषाः मृगाः स्वदेशे निधनं यान्ति ।

क्षारं जलं कापुरुषाः पिबन्ति (the timid drink the saltish water)

यस्य सर्वत्र गतिरस्ति, सः स्वदेशरागेण कस्मात् नाशं याति ? तातस्य कूपोऽयमिति ब्रुवाणाः कापुरुषाः क्षारं जलं पिबन्ति ।

गृहे विनश्यति (gets ruined in his house)

दैवरक्षितम् अरक्षितं तिष्ठति । दैवहतं सुरक्षितं विनश्यति। वने विसर्जितः अनाथोऽपि जीवति। कृतप्रयत्नोऽपि गृहे विनश्यति ।

आत्मनः उपद्रवाय भवेत् कोपः (anger is self destruction)

असमर्थानां पुंसां कोपः आत्मनः उपद्रवाय भवेत् । ज्वलदतिमात्रं पिठरं निजपार्श्वानेव दहतितराम् ।

वह्नौ पतङ्गवत् नाशं याति (gets ruined like the fly in fire)

आत्मनः परस्य च शक्तिमविदित्वा समुत्सुकः अभिमुखः गच्छन् वह्नौ पतङ्गवत् नाशं याति ।

शत्रोः अमर्षणः याति (he attacks the enemy)

विशेषात् परिपूर्णस्य शत्रोः अमर्षणः याति यथा राहुः अद्यापि शशांकस्याभिमुख्यं गच्छति । केसरी गण्डश्याममदच्युते अधिकस्यापि प्रमाणात् मत्तदन्तिनः मूर्ध्नि पदं समाधत्ते । बालसूर्यस्य पादाः अपि भूभृतामुपरि पतन्ति । तेजसा सह जातानां वयः कुत्रोपयुज्यते ?

यस्य तेजः स विराजते (who has brilliance, shines forth)

हस्ती स्थूलतरः । स चांकुशवशः । अंकुशः हस्तिमात्रः नास्ति । दीपे प्रज्वलिते तमः प्रणश्यति । तमः दीपमात्रं नास्ति । गिरयः अपि वज्रेण हताः पतन्ति। गिरिः वज्रमात्रं नास्ति । तस्मात् तेजसा सह जातानां वयः कुत्रोपयुज्यते ?

परभागो दुरधिगमः

यावत्पुरुषेण पौरुषं न कृतं, तावत् परभागो दुरधिगमः । भास्वान् तुलामधिरूढः अपि जलदपटलानि जयति ।

नागोऽपि बध्यते (even an elephant gets trapped)

असाराणामपि बहूनां समवायः दुर्जयः। तृणैः आवेष्ट्यते रज्जुर्यया नागोऽपि बध्यते ।

पण्डिताः नानुशोचन्ति (the learned are not rejected)

पण्डितानाञ्च मूर्खाणां विशेषोऽयं यतः स्मृतः नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।

द्वावनर्थौ निषेवते (he experiences two sufferings)

अशोच्यानीह भूतानि, यो मूढः तानि शोचति, सः दुःखे दुःखं लभते । द्वावनर्थौ निषेवते ।

पुनरपि जातं सिद्धम् (birth again is sure)

आपदि येनापकृतं, विषमासु दशासु येन च हसितं तयोरुभयोः अपकृत्य पुनरपि जातं सिद्धम् ।

सः सुहृत् (he is friend)

अन्यजात्युद्भवोऽपि सन् यः व्यसने स्यात् सः सुहृत् । वृद्धौ सर्वोऽपि मित्रं स्यात् सर्वेषामेव देहिनाम् । यः व्यसने सः बुद्धिमान् । यः बुद्धिमान् सः पुत्रः । यः विधेयज्ञः सः भृत्यः । यत्र निर्वृतिः सा भार्या ।

न विकल्पन्ते नयाः (moral doesnot fail)

हितैः, साधुसमाचारैः, शास्त्रज्ञैः, मतिशालिभिः, विद्वद्भिः चिन्तिताः नयाः कथञ्चित् न विकल्पन्ते ।

दुःखं सुखी भवति (pain turns to pleasure)

सुहृदि निरन्तरचित्ते गुणवति भृत्ये अनुवर्तिनि कलत्रे स्वामिनि शक्तिसमेते निवेद्य दुःखं सुखी भवति ।

गतानुगतिको लोकः (the world blindly follows)

एकस्य कर्म संवीक्ष्य, अन्योऽपि गर्हितं करोति । गतानुगतिको लोकः ।

लोकः न पारमार्थिकः ।

प्रजाः रक्ष्याः (people should be protected)

चाटुतस्करदुर्वृत्तैः तथा साहसिकादिभिः तथा कटुच्छद्मादिभिः प्रजाः रक्ष्याः।

राज्ञः षड्भागो जायते (one sixth is the king's share)

प्रजानां रक्षितुः राज्ञः धर्मः षड्भागो भवति । यो न रक्षति तस्य अधर्मादपि षड्भागो जायते ।

नादग्ध्वा विनिवर्तते (it doesnot cool, without burning)

प्रजापीडनसन्तापात् समुद्भूतः हुताशनः राज्ञः श्रियं, कुलं, प्राणान् नादग्ध्वा विनिवर्तते ।

बन्धुः राजा (the king is the relatives)

अबन्धूनां बन्धुः राजा । अचक्षुषां चक्षुः राजा। न्यायवर्तिनां सर्वेषां माता च पिता च राजा एव ।

लोकान् पालयेत् (the people should be ruled)

फलार्थी मालाकारः तोयेन अंकुरानिव पार्थिवः दानमानाभ्यां यत्नमास्थितः लोकान् पालयेत्।

फलप्रदो भवेत् (it becomes fruitful)

यथा बीजांकुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः काले फलप्रदो भवेत् तद्वत् सुरक्षितः लोकः फलप्रदो भवेत् ।

नृपस्य स्यात् प्रजाभ्यः

हिरण्यधान्यरत्नानि विविधानि यानानि च तथान्यदपि यत्किञ्चित् नृपस्य स्यात् तत् प्रजाभ्यः एव ।

न तं सेवेत (he shouldn't be served)

यस्य नीतिशास्त्रपण्डितस्य गुणान् यः राजा न वेत्ति, तं न सेवेत पण्डितः । सुकृष्टा दूषरादिव तस्मात् न किञ्चित्फलम् ।

पुत्रवत् लालयेत् नित्यम् (he should be fondled like a child)

भक्तं शक्तं कुलीनञ्च भृत्यं न अवमानयेत् । यः आत्मनः श्रियमिच्छेत् सः तं भृत्यं पुत्रवत् लालयेत् । तुष्टोऽपि राजा भृत्यानामर्थमात्रं प्रयच्छति । ते तु सम्मानिताः तस्य प्राणैः उपकुर्वते ।

तत्कर्म न कुर्यात् (that act shouldn't be done)

येन प्रभोः चित्ते लघुता वाथ पीडा स्यात् क्वचित्, तत्कर्म प्राणत्यागेऽपि कुलसेवकः न कुर्यात् ।

भृत्यापराधजो दण्डः (for the mistake of the servent the master is punished)

भृत्यापराधजो दण्डः स्वामिनः जायते । यतः तेन लज्जापि तस्योत्था तथा भृत्यस्य पुनः न भवति।

स्वात्मार्थे पृथिवीं त्यजेत्

कुलस्यार्थे एकं त्यजेत् । ग्रामस्यार्थे कुलं त्यजेत् । जनपदस्यार्थे ग्रामं त्यजेत् । स्वात्मार्थे पृथिवीं त्यजेत् ।

आत्मानं रक्षेत् (one should protect oneself)

आपदर्थे धनं रक्षेत् । धनैः दारान् रक्षेत् । धनैरपि दारैरपि आत्मानं सततं रक्षेत्।

प्राणान् रक्षेत (one should protect his life)

पुत्रकलत्रैर्वापि प्राणान् रक्षेत पण्डितः। विद्यमानैः यतस्तैः देहिनां सर्वं भूयोऽपि स्यात् ।

समर्थः धर्ममाचरेत् (the capable should perform dharma)

येन केनाप्युपायेन शुभेनाप्यशुभेन वा दीनमात्मानमुद्धरेत् । समर्थः धर्ममाचरेत्।

तस्य प्राणाः प्रणश्यन्ति (his life will be lost)

धनादिषु प्राणत्यागे यो मूढः मायां कुरुते तस्य प्राणाः प्रणश्यन्ति । तैः नष्टैः नष्टमेव तत्।

यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ? (ever after, if there is no result, how does matter ?)

विपश्चिता दैवे पराङ्मुखेऽपि अत्र कृत्यं कार्यम् । आत्मदोषविनाशाय स्वचित्तसम्भवाय च। तथा च उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः । दैवेन दैवमिति कापुरुषा वदन्ति । दैवं निहत्य आत्मशक्त्या पौरुषं कुरु । यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ?

जन्मजन्मान्तरं दुःखी (suffers for lives to come)

यः अविरुद्धं सुखस्थं दुःखमार्गे नियोजयेत् स नरः जन्मजन्मान्तरं दुःखी स्यात् असंशयम्।

नीचः (the wretched)

परकार्यं घातयितुमेव वेत्ति नीचः । न प्रसादयितुम् । वृक्षं पातयितुं शक्तिरस्ति वायोः । न च उन्नमितुम् ।

सः हन्यते (he is being killed)

जातमात्रं शत्रुं व्याधिं च यः प्रशमं नयेत्, वृद्धिं प्राप्य तेनैव महाबलोऽपि सः हन्यते ।

सहजः शत्रुः (the natural enemy)

पित्रुपैतामहं स्थानं यः यस्यात्र जिगीषते सः तस्य सहजः शत्रुः प्रिये स्थितः

अपि उच्छेद्यः।

अधमानामवकाशः न देयः (opportunity shouldn't be given to the rogues)

यदि साधुः निजपदे दुर्जनाय प्रवेशं दद्यात् सः स्वयं वाञ्छमानः ततः तन्नाशाय भवति । तस्मात् विपुलमतिभिः अधमानामवकाशः न देयः । अत्र वाक्यतः श्रूयते जारोऽपि गृहपतिः स्यात् इति ।

हन्यात् अपकारिणम् (the one who harms must be killed)

हृदयं निस्त्रिंशं वाणीम् इक्षुरसोपमां कृत्वा तत्रापकारिणं हन्यात् । अत्र विकल्पः न कर्तव्यः।

मूढः बुद्धिः (misdirected intellect)

परस्य पीडनं कुर्वन् स्वार्थसिद्धिञ्च राजनीतिपण्डितः करिष्यति । मूढबुद्धिः लब्धमपि न भक्षेत ।

बुद्धेः विनियोजयेत् (wisdom should be employed)

अवध्यं चागम्यं चाकृत्यं वा लोके बुद्धिमतां बुद्धेः नास्ति किञ्चन । तस्मात् तां विनियोजयेत् । स्वामिनो हिते कृते सुकृतशतं कृतं भविष्यति ।

मृत्युमुपगृह्णाति (he will die)

यः पुमान् अगम्यान् याति असेव्यांश्च निषेवते सः मृत्युमुपगृह्णाति ।

उपशान्तये नीतिः कार्यः (for peace, one should follow the moralistic palm)

धर्मार्थं यततामपि क्वचित् द्वैवात् यदि विपदः स्युः तत्तासामुपशान्तये सुमतिभिः विशेषात् नीतिः कार्यः । सकले लोके ख्यातिमुपागतात्र एषा लोकोक्तिः यतः वह्निना दग्धानां हितकरः सेकोऽपि तस्योद्भवः ।

यद्भावि तद्भवति (whatever has to happen, happens)

लोके तनुभृतां निजकर्मपाकं, नित्यं समाश्रितवतां सुहितक्रियाणां भावार्जितं शुभं च अशुभं वापि निकामं यद्भावि तद्भवति । नात्र विचारहेतुः ।

विपदेव गरीयसी (even difficulties have merit)

महद्भिः स्पर्धमानस्य विपदेव गरीयसी । गिरिविदारणे दन्तभङ्गोऽपि नागानां वरम् ।

नीचोऽपि श्लाघ्यं गच्छति (even a rogue also is praiseed)

महतोऽपि क्षयं लब्ध्वा नीचोऽपि श्लाघ्यं गच्छति । यद्वत् दानार्थी मधुपः गजकर्णसमाहतः।

वार्धिवत् राज्ञां गृहम् (the house of a king is like an dear)

अन्तर्लीनभुजङ्गमं गृहमिव, ज्वालाकुलं वनमिव, अभिरामकमलाच्छाया-सनाथं सरः ग्राहाकीर्णमिव, नानादुष्टजनैः असत्यवचनासक्तैः अनार्यैः प्रचकितैः राज्ञां गृहं वार्धिवत् दुःखेन प्रतिगम्यते ।

श्रीः तुलामारोप्यते

उत्तमदण्डसाहसफलानि अनायाससाध्यानि कार्याणि ये नीतिकुशलाः साम्नैव प्रीत्या संशमयन्ति ते मन्त्रिणः । ये निस्साराल्पफलानि अविधिना वाञ्छन्ति दण्डोद्यमैः तेषां दुर्नयचेष्टितैः नरपतेः श्रीः तुलामारोप्यते ।

दण्डः न विनियोज्यः

यत्र साम्नैव सिद्धिः बुधेन तत्र दण्डः न विनियोज्यः । यदि पित्तं शर्करया शाम्यति पटोलेन अर्थः कः ? सामादिदण्डपर्यन्तः नयः स्वयम्भुवा प्रोक्तः । तेषां दण्डस्तु पापीयान् । तं पश्चात् विनियोजयेत् ।

सामसाध्यानि कार्याणि (works can be accomplished through friendliners)

आदौ साम प्रयोक्तव्यं विजानता पुरुषेण । सामसाध्यानि कार्याणि न क्वचित्

विक्रियां यान्ति । विद्वेषप्रभवं तमः साम्नैव विलयं याति, न चन्द्रेण, न चौषध्या न सूर्येण, न वह्निना ।

कर्मणि व्यज्यते प्रज्ञा (skill gets expression in work)

सान्निपातके भिषजां, मन्त्रिणां भिन्नसन्धाने च कर्मणि व्यज्यते प्रज्ञा । स्वस्थे सर्वेऽपि सर्वेऽपि पण्डिताः एव ।

मन्त्रः पञ्चविधः (mantra is of five types)

कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपातप्रतीकारः, कार्यसिद्धिश्चेति ।

अनर्थपञ्जरं प्रविशन्ति (they enter the cage of anartha)

ये नराधिपाः नीचजनानुवर्तिनः बुधोपदिष्टेन पथा न यान्ति, ते समस्तसम्बाधम्, अमार्गनिर्गमं अनर्थपञ्जरं प्रविशन्ति ।

नृपतिः नाधिगम्यते (they donot approach the king)

नृपतिः सद्गुणालयोऽपि असन्मन्त्री चेत् नाधिगम्यते । यथा ह्रदः प्रसन्नस्वादुसलिलः दुष्टग्राहः चेत् नाधिगम्यते खलु ।

श्रिया रमन्ते रिपवः (enemies revel in riches)

चित्रास्वादकथैः अनायासितकार्मुकैः भृत्यैः ये नृपाः रमन्ते तेषां रिपवः श्रिया रमन्ते ।

नाशिष्यायोपदिश्यते (shouldnot instruct who is not sisya)

नानाम्यं दारु नमते । क्षुरक्रिया नाश्मनि स्यात् । न अशिष्याय उपदिश्यते।

नालापयेत् विवेकज्ञः (knowledgeable person shouldn;t take)

मुहुर्विर्घ्नितकर्माणं, परजितं, द्यूतकारं यदि आत्मनः सिद्धिमिच्छेमत् विवेकज्ञः नालापयेत् ।

सः पराभवं गच्छति (he will be insulted)

आखेटकं, वृथाक्लेशं, व्यसनसंस्थितं मूर्खं यो मूढः आलापयति सः पराभवं गच्छति ।

सर्पाणां पयः पानं विषवर्धनम् (drinking of milk leads to increase of poison)

उपदेशो हि मूर्खाणां प्रकोपाय स्यात् । न शान्तये । भुजङ्गानां पयः पानं केवलं विषवर्धनम् । यादृशे तादृशे जने उपदेशः न दातव्यः ।

अरण्यरुदितोपमम् (similar to crying in a forest)

श्रद्धासमेतस्य विशेषतः पृच्छतश्च वाच्यम् । श्रद्धाविहीनस्य प्रोक्तम् अरण्यरुदितोपमम् ।

अस्थाने पाण्डित्यं व्यर्थम् (learning is worthless in the wrong place)

अस्थाने विनियोजितं पाण्डित्यं अन्धकारे प्रतिच्छन्ने घटे दीप इव अहितः ।

पुत्रः चतुर्विधः (son is of four types)

पुत्रः जातः, अनुजातः, अतिजातः, अपजातः इति चतुर्विधः लोकेऽस्मिन् मन्तव्याः शास्त्रवेदिभिः । मात्रुतुल्यगुणः जातः । पितुः समः अनुजातः । तस्मादधिकः अतिजातः। अधमाधमः अपजातः ।

परव्यसनहृष्टः (one who becomes happy at others misery)

खलः परव्यसनहृष्टः आत्मनः विनाशमपि न गणयति । समरमुखे प्रायः मस्तकनाशे कबन्धः नृत्यति ।

तस्य जन्मनः फलं व्यर्थम् (his living is useless)

धरणीपीठे भ्रमता देशान्तरेषु बहुविधभाषावेषादिषु येन न ज्ञातं तस्य जन्मनः फलं व्यर्थम्।

तावत् नाप्नोति (doesn't get as much)

मानवः सम्यक् देशात् देशान्तरं हृष्टः भूमौ यावत् न व्रजति, तावत् विद्यां,

वित्तं, शिल्पं नाप्नोति ।

शतयोजनवद्भवेत् (seems like hundred yojanas)

देशान्तरनिवासिनां प्राप्तविद्यार्थशिल्पानां भूभागः क्रोशमात्रोऽपि शतयोजनवद्भवेत्।

वित्तं न दर्शयेत् (money shouldn't be displayed)

प्राज्ञः कस्यचित् वित्तं न दर्शयेत् । यतः मुनेरपि तस्य दर्शनात् मनः चलते । आश्चर्यम् ।

सर्वत्र वित्तवान् भक्ष्यते

जले मत्स्यैः, भुवि श्वापदैः, आकाशे पक्षिभिश्च आमिषं भक्ष्यते तथा सर्वत्र वित्तवान् भक्ष्यते।

धर्मबुद्धयः (the noble- minded)

मात्रुवत् परदाराणि परद्रव्याणि लोष्टवत् आत्मवत्सर्वभूतानि वीक्षन्ते धर्मबुद्धयः।

दिव्यं प्रवदन्ति

विवादे प्रथमतः पत्रमन्विष्यते । तदभावेऽपि साक्षिणः पृच्छन्ते । साक्षिणः न सन्ति चेत् दैवप्रमाणं पृच्छते ।

पुरुषाधमः (lower type of humanbeing)

यत्र देशे अथवा स्थाने स्ववीर्यतः भोगान् भुक्त्वा तस्मिन्नेव विभवहीनरूपेण यः वसेत् सः पुरुषाधमः ।

सः निन्दितः (he is

येनाहंकारयुक्तेन पुरा चिरं विलसितं यः तत्रैव परेषां दीनं वदति सः निन्दितः।

प्रियं न प्रकुरुते (he doesn't do good)

भयं प्रलोभं वा कार्यकारणमेव वा मुक्त्वा नरः भक्त्या कस्यचित्कोऽपि प्रियं न कुरुते ।

तत्र शंका प्रकर्तव्या (one has to doubt it)

यत्र कार्यकारणवर्जितः अत्यादरः भवेत् तत्र शंका प्रकर्तव्या परिणामे असुखावहा।

सदा निन्दन्ति मूर्खाः (the foolish always scold)

प्रायेणात्र कुकुलजाः कुलान्वितं, दुर्भगाः श्रीवल्लभं, कृपणाः दातारं, अनृजवः ऋजून्, निर्धनाः वित्ते स्थितं, वैरूप्योपहताः कान्तवपुषं, पापिनः धर्माश्रयं, मूर्खाः नानाशास्त्रविचक्षणं पुरुषं च सदा निन्दन्ति ।

द्वेष्याः (who should be hated)

मूर्खाणां पण्डिताः द्वेष्याः । निर्धनानां महाधनाः द्वेष्याः । पापशीलानां व्रतिनः द्वेष्याः । असतीनां कुलस्त्रियः द्वेष्याः।

हितकारकोऽपि मूर्खः न श्रेष्ठः (even if he helps, a fool doesn't become

शत्रुरपि पण्डितः वरम् । हितकारकोऽपि मूर्खः न वरम् । तस्मात् चिरायुरिच्छता मूर्खः न रक्षणीयः ।

प्रियवक्ता च भवति धूर्तजनः (the crook speaks sweet)

असती सलज्जा भवति । क्षारं नीरञ्च शीतलं भवति । दम्भी भवति विवेकी। प्रियवक्ता भवति धूर्तजनः ।

स याति परमां गतिम् (he attains salvation)

गवार्थे ब्राह्मणार्थे च प्राणत्यागं करोति यः सः सूर्यस्य मण्डलं भित्वा परमां गतिं याति ।

ते नरकं यान्ति (they will go to hell)

मित्रद्रोही कृतघ्नश्च यश्च विश्वासघातकः, ते नराः यावच्चन्द्रदिवाकरौ नरकं यान्ति ।

हन्तव्यो नास्ति पातकम् (there is no sin in killing them)

पिता वा यदि वा भ्राता पुत्रो भार्या अथवा सुहृत् प्राणद्रोहं यदा गच्छेत् हन्तव्यो नास्ति पातकम् ।

अमी त्याज्याः (one should leave them)

राजा, घृणी, ब्राह्मणः, सर्वभक्षी, स्त्री, दुष्टमतिः, सहायकः, प्रेष्यः, प्रतीपः अधिकृतः प्रमादी, यश्च कृतं न वेत्ति, अमी त्याज्याः ।

राजनीतिः (polity)

सत्यानृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि च अर्थपरा वदान्या, भूरिव्यया, प्रचुरवित्तसमागमा च वेश्याङ्गनेव राजनीतिः अनेकरूपा ।

महानपि न पूज्यते (not adored, even if great)

कश्चित् अकृतोपद्रवः महानपि न पूज्यते नराः नागान् पूजयन्ति । नागघातिनं तार्क्ष्यं न पूजयन्ति ।

पञ्चतन्त्रे द्वितीयं तन्त्रम् मित्रप्राप्तिकम्

कार्याणि आशु साधयन्ति (completes the works quickly)

बहुश्रुताः बुद्धिमन्तः प्राज्ञाः असाधनाः अपि काकाखुमृगकूर्मवत् कार्याणि आशु साधयन्ति ।

स एव दृमः श्लाघ्यः (that tree is praise worthy)

छायासुप्तमृगः, शकुन्तनिवहैः विष्वग्विलुप्तच्छदः, कीटैरावृतकोटरः, कपिकुलैः स्कन्धे कृतप्रश्रयः, विश्रब्धं मधुपैः निपीतकुसुमः, सर्वाङ्गैः बहुसत्त्वसङ्गसुखदः दृमः यः सः एव श्लाघ्यः। अपरः भूभारभूतः ।

अचिन्तितो वधो अज्ञानाम् (death is sudden for fools)

जिह्वा लौल्यप्रसक्तानां जलमध्यनिवासिनां मीनानामिव अज्ञानां वधः अचिन्तितः जायते ।

प्रायो मतिः क्षीयते (generally their intelligence decrease)

अन्यदारहरणे दोषं पौलस्त्यः कथं न विज्ञातवान् ? हेमहरिणस्यासम्भवः रामेणापि कथं न लक्षितः? युधिष्ठिरेणापि अक्षैः अनर्थः कथं सहसा प्राप्तः ? प्रत्यासन्नविपत्तिमूढमनसां प्रायः मतिः क्षीयते । कृतान्तपाशबद्धानां दैवोपहतचेतसां महतामपि बुद्धयः कुब्जगामिन्यः भवन्ति ।

प्रभावात् पारमभ्येति

व्यसनेष्विव सर्वेषु यस्य बुद्धिः न हीयते सः तत्प्रभावात् तेषां पारमभ्येति । असंशयम् ।

महतामेकरूपता (they are equal at all times)

सम्पत्तौ च विपत्तौ च महतामेकरूपता । सविता यथा उदये रक्तः तथास्तमये रक्तः ।

सतामुपमा (comparison of the good people)

तन्तवः बहुलाः समाः नित्यमाप्यायता बहून् बहुत्वात् आयासान् सहन्ति इति सतामुपमा ।

करतलगतमपि नश्यति (even that which is in the palm gets lost)

यन्न भाव्यं न हि भवति । भाव्यं यत्नेन विनापि च भवति । यस्य हि भवितव्यता नास्ति करतलगतमपि नश्यति ।

शंखनिधिरिव नश्यति

विधौ पराङ्मुखे चेत् कथञ्चित् द्रविणोदयः स्यात् तत अन्यदपि संगृह्य यथा शंखनिधिः तथा नश्यति ।

मित्रादन्यो न सन्दधे (other than a friend, none helps)

सर्वेषामेव मर्त्यानां व्यसने समुपस्थिते वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न सन्दधे ।

सर्वेषां वश्यो जायते (he comes under the influence of everyone)

दंष्ट्रा विरहितः सर्पः मदहीनः गजः यथा तथा दुर्गहीनः नृपः सर्वेषां वश्यो जायते ।

दुर्गेणैकेन सिद्ध्यते (it is achived by a single fort)

न गजानां सहस्रेण, न च लक्षेण वाजिनां यत्कर्म सिद्ध्यते राज्ञां रणे तत् दुर्गेणैकेन सिद्ध्यते ।

प्रशंसन्ति नीतिशास्त्रविदः (the moralogists praise)

प्राकारस्थः धनुर्धरः एकोऽपि शतं सन्धत्ते । तस्मात् नीतिशास्त्रविदः जनाः दुर्गं प्रशंसन्ति।

नित्यं नागच्छन्ति

सुहृदः स्नेहसम्पन्नाः लोचनानन्ददायिनः गृहे गृहवतां महात्मनां नित्यं नागच्छन्ति।

दिने दिने अपूर्वाणि (there is novelty every day)

आदित्यस्योदयः , ताम्बूलं , महाभारतकथा, इष्टाभार्या , सुमित्रञ्च दिने दिने अपूर्वाणि ।

न किञ्चित्प्रतिमं सुखम् (there is nothing that equals happiness)

यस्य सुहृदः भवने नित्यशः समागच्छन्ति , चित्ते च तस्य सौख्यस्य न किञ्चित्प्रतिमं सुखम् ।

कृतान्तवशादुपैति (he attains due to past life)

येन यस्मात् यदा यथा यच्च यावच्च यत्र च शुभाशुभमात्मकर्म तस्माच्च तेन तदा तथा च तच्च तावच्च तत्र च कृतान्तवशादुपैति ।

बन्धनं न च पश्यति (he doesn't understands the bond)

अर्धार्धाद्योजनशतादामिषं वीक्षते खगः । सोऽपि पार्श्वस्थितं दैवाद्बन्धनं न च

पश्यति ।

बलवान् विधिः (fate is powerful)

रविनिशाकरयोः ग्रहपीडनं गजभुजङ्गविहङ्गमबन्धनं, मतिमताञ्च दारिद्र्यं विलोक्य अहो विधिः बलवानिति मे मतिः ।

दूरादपि गृह्णाति कालः (time attracts even from far)

व्योमैकान्तविचारिणोऽपि विहगाः आपदं सम्प्राप्नुवन्ति । अगाधसलिलात् समुद्रादपि मीनाः निपुणैः बध्यन्ते । अस्मिन् प्रपञ्चे दुर्नीतं सुकृतं किमस्ति ? स्थानलाभे गुणः कः ? कालः सर्वजनान् प्रसारितकरः दूरादपि गृह्णाति ।

न त्यजन्ति कर्हिचित् (they never leave)

यः क्षितिपः अधिकं सम्मानं भृत्यानां सदा धत्ते, तं दृष्ट्वा वित्ताभावेऽपि ते न त्यजन्ति कर्हिचित् ।

विश्वासः सम्पदां मूलम् (faith is the baris for wealth)

विश्वासः सम्पदां मूलम् । तेन यूधपति गजः । मृगाधिपत्येऽपि सिंहः मृगैः न परिवार्यते ।

परत्रेह च सीदति (perishes in this and the other world)

सदाचरेषु भृत्येषु संसीदत्सु च यः प्रभुः सुखी स्यात् सः नरकं याति । परत्रेह च सीदति ।

त्रैलोक्यरक्षकः (the protector of the three worlds)

कारुण्यं संविभागश्च भृत्येषु सर्वदा यस्य सम्भवेत् , सः महीपालः त्रैलोक्यस्यापि रक्षकः भवेत् ।

मित्राणि कुर्वीत (should make friends)

मित्रवान् अर्थान् पुनः दुःसाध्यानपि साधयति । तस्मात् आत्मनः समानान्येव

मित्राणि कुर्वीत ।

बुधैः कर्तव्याः सुह्रदः (the wise should make friends)

सम्पूर्णतायुक्तैः अपि बुधैः सुह्रदः कर्तव्याः । नदीशः परिपूर्णोऽपि चन्द्रोदयमपेक्षते।

तयोर्मैत्री विवाहश्च (for those two, friendship and marraige)

ययोरेव समं वित्तं , ययोरेव समं कुलं, तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः।

हास्यतां यात्यसौजनः (he becomes a laughing stuck)

यः मूढः कुधीः आत्मानः असदृशं हीनं वाप्यधिकं वापि मित्रं कुरुते असौ जनः हास्यतां याति।

वैरिणा न सन्दध्यात् (shouldn't get associated with an enemy)

सन्धिना सुश्लिष्टेनापि वैरिणा न हि सन्दध्यात् । पानीयं सुतप्तमपि पावकं शमयत्येव ।

न क्षयं याति (doesn't decay)

कृत्रिमैः गुणैः द्राक् वैरं कृत्रिमं नाशमभ्येति । सहजं वैरं प्राणदानं विना न क्षयं याति।

मित्रत्वमेव योज्यं धीमता (with wise, only friendship should be done)

कारणात् मित्रतां याति । कारणादेति शत्रुताम् । तस्मात् मित्रत्वमेवात्र योज्यं, न वैरं धीमता योज्यम् ।

तिरश्चां कोऽर्थः गुणैः? (how do qulities matter for the animals ?)

व्याकरणस्य कर्तुः पाणिनेः प्रियान् प्राणान् अहरत् सिंहः । मीमांसाकृतं जैमिनिं मुनिं हस्ती सहसा उन्ममाथ । छन्दो ज्ञाननिधिं पिङ्गलं वेलातटे मकरो जघान । अज्ञानवृतचेतसां अतिरुषां तिरश्चां गुणैः कोऽर्थः ?

मैत्री स्यात् दर्शनात् (friendship takes place by looking)

लोकानामुपकारात्, मृगपक्षिणां निमित्तात्, मूर्खाणां भयात् लोभात् च सतां दर्शनात् मैत्री स्यात् ।

सज्जनस्नेहः (friendship with good people)

दुर्जनस्नेहः मृद्घट इव सुखभेद्यः दुस्सन्धानश्च भवति । सज्जनस्नेहः कनकघट इव दुर्भेदः सुकरसन्धिश्च । सज्जनमैत्री इक्षोरग्रात् क्रमशः पर्वणि पर्वणि यथा रसविशेषः तद्वत् भवति। विपरीतानां तु विपरीता आरम्भगुर्वी क्रमेण पुरा वृद्धिमती च पश्चात् लघ्वी क्षयिणी भवति दुर्जनस्नेहः । सज्जनस्नेहः दिनस्य पूर्वार्धपरार्धभिन्ना छायेव भवति ।

विश्वासः (faith)

शपथैः सन्धितस्यापि रिपोः विश्वासं न व्रजेत् । शपथं कृत्वा शक्रेण सूदितः वृत्रः । विश्वासं विना शत्रुः देवानामपि न सिद्ध्यति । विश्वासात् त्रिदशेन्द्रेण दितेः गर्भः विदारितः । वृद्धिमायुष्यं सुखानि च आत्मनः यः इच्छेत् सः प्राज्ञः अस्मिन् प्रपञ्चे बृहस्पतेरपि नैव विश्वसेत् ।

शनैः नाशयेत् (destroyed showly)

सुसूक्ष्मेणापि रन्ध्रेण प्रविश्याभ्यन्तरं रिपुः पश्चात्प्लवं सलिलपूरवत् शनैः नाशयेत्। अविश्वस्ते न विश्वसेत् । विश्वस्तेऽपि न विश्वसेत् । विश्वासादुत्पन्नं भयं मूलान्यपि निकृन्तति । अविश्वस्तः दुर्बलोऽपि बलोत्कटैः वध्यते। विश्वस्ताः बलवन्तोऽपि दुर्बलैः आशु वध्यन्ते ।

नीतिसन्धिः त्रिधा स्थितः (morality is of three types)

विष्णुगुप्तस्य सुकृत्यं, भार्गवस्य मित्राप्तिः,बृहस्पतेः अविश्वासः त्रिधा स्थितः नीतिसन्धिः ।

तदन्तं तस्य जीवितम् (his life ends there)

यः महताप्यर्थसारेण शत्रुषु विश्वसिति सुविरक्तासु भार्यासु तदन्तं तस्य जीवितम्।

साप्तपदं मैत्रम् (friendship by seven steps)

विबुधाः जनाः सतां साप्तपदं मैत्रमित्याहुः ।

पश्चात् प्रहेलया प्रवर्तते (he then behaves without fear)

जारहस्तः अङ्गनास्विव शत्रुः पुरा भीतभीतैः मन्दं मन्दं विसर्पति । ततः भूमौ प्रहेलया प्रवर्तते ।

षड्विधं प्रीतिलक्षणम् (six characteristics of friendship)

ददाति, प्रतिगृह्णाति, गुह्यमाख्याति पृच्छति, भुङ्क्ते , भोजयते चैव षड्विधं प्रीतिलक्षणम्।

उपयाचितदानम् (offering the oblation)

कथञ्चित् कस्यचित् उपकारं विना प्रीतिः न भवेत् । यतः उपयाचितदानेन देवाः अभीष्टदाः भवन्ति ।

परित्यजति मातरम् (leaves away mother)

यावद्दानं प्रदीयते तावत् लोके प्रीतिः भवेत् । क्षीरक्षयं दृष्ट्वा वत्सः मातरं परित्यजति ।

द्वेषी मित्रतां याति (enemy becomes friends)

पश्य दानस्य माहात्म्यं, सद्यः प्रत्ययकारकम् । यत्प्रभावादपि द्वेषी तत्क्षणात् मित्रतां याति।

पुत्रादपि प्रियतरं (dearer than son)

विवेकवर्जितस्य पशोरपि, पुत्रादपि दानं प्रियतरं खलु । येन खले दत्ते ससुतापि महिषी नित्यं दुग्धं ददाति।

ते धन्याः (they are blesses)

अनावृष्टिहते देशे सस्ये च प्रलयं गते कुलक्षयं देशभङ्गं च ये न पश्यन्ति ते धन्याः ।

प्रियवादिनां परः नास्ति (there is no enemy for those who speaks sweet)

समर्थानां मतिभारः नास्ति । व्यवसायिनां दूरं नास्ति । सविद्यानां विदेशः नास्ति । प्रियवादिनां परः नास्ति ।

विद्वान् सर्वत्र पूज्यते (scholar is respected everywhere)

विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन । स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते।

मित्रम् (friend)

किं चन्दनैः सकर्पूरैस्तु हिनैः किञ्च शीतलैः ? सर्वे ते मित्रमात्रस्य कलां नार्हन्ति षोडशीम्। आपदां च परित्राणं, शोकसन्तापभेषजं मित्रमित्यक्षरद्वयम् ।

न तेन सङ्गतिं कुर्यात् (shouldn't be friend him)

यस्य वीर्यं, कुलं, विचेष्टितं न ज्ञायते तेन सङ्गतिं न कुर्यात् इत्युवाच बृहस्पतिः ।

मूल्यविवर्जितः (invaluable)

कायक्षालनसम्भवैः अमृतस्य प्रवाहैः किं प्रयोजनम् ? चिरान्मित्रपरिष्वङ्गः यः असौ मूल्यविवर्जितः ।

सदा गन्तुं युक्तम् (should go always)

एहि, आगच्छ ,समाश्रयासनमिदं, कस्मात् चिरं दृश्यसे , का वार्ता , अतिदुर्बलोऽसि, कुशलं, प्रीतोऽस्मि, ते दर्शनात् । एवं समुपागतान् ये प्रणयिनः आदरात् प्रह्लादयन्ति , तेषाम् अशङ्कितेन मनसा हर्म्याणि सदा गन्तुं युक्तम् ।

शृङ्गरहिताः वृषाः (bulls without horns)

यत्र गृही आगतं दृष्ट्वा दिशो वा अधः वीक्षेत, तत्र ये सदनं यान्ति ते शृङ्गरहिताः वृषाः।

तत्र हर्म्यं न गम्यते (shouldn't go to that house)

अतिथेः आगमने नाभ्युत्थानक्रिया,नालापा मधुराक्षराः, नैव गुणदोषकथाः तत्र हर्म्यं न गम्यते ।

मठाधिपत्यं दिनत्रयम् (master of monartery for three days)

ते नरकाय मतिश्चेत् पौरोहित्यं समाचर वर्षं यावत् । अन्येन किम् ? मठचिन्तां दिनत्रयं पर्याप्तम् ।

तेजो नयति देहिनाम् (increases the brilience of the humanbeing)

वित्तजो वृद्धिं ऊष्मापि देहिनां तेजो नयति । त्यागकर्मसमन्वितः सम्भोगः तस्य पुनः किम् ?

इच्छानुरूपः विभवः (desired

ग्रासादपि तदर्थञ्च अर्थिषु कस्मात् नोदीयते ? तथा कृतं चेत् इच्छानुरूपः विभवः सर्वदा सर्वत्र लभ्यते ।

काकिण्या प्राप्नुयात् (can be acquired by a dime)

ऐश्वर्यसम्पन्नाः भूरिदानेन यत् फलं लभ्यन्ते तच्च दरिद्रः काकिण्या प्राप्नुयादिति श्रुतिः ।

लघुरपि सेव्यो भवति (becomes fit for service, even throgh a lonly person)

दाता लघुरपि सेव्यो भवति । कृपणः महानपि न सेव्यः । कूपोऽन्तः स्वादुजलः लोकस्य प्रीत्यै । समुद्रः तथा न भवति ।

अकृतत्यागमहिमा (doesn't have the effect of dana)

अकृतत्यागमहिम्ना मिथ्या राजराजशब्देन निधीनां गोप्तारं न प्रयोजनम् । तं विबुधाः न कथयन्ति महेश्वरम् ।

निन्द्य एव हि गर्दभः (an ars is good for abnse)

सदा दानपरिक्षीणः करीश्वरः शस्त एव । अदानः पीनगात्रोऽपि गर्दभः निन्द्य एव ।

तदनन्ताय कल्पते (dana results in enders merit (punya)

यथोचिते काले देशे महती श्रद्धा सत्पात्रं विवेकज्ञैः यद्दीयते, तदनन्ताय कल्पते।

तृष्णां नैव परित्यजेत् (hope shouldn't be left)

अतितृष्णा न कर्तव्या। तृष्णां नैव परित्यजेत् । अतितृष्णाभिभूतस्य सर्वनाशो स्यात् ।

विधिना संनियोजितम् (attains by divine grace)

अकृतेप्युद्यमे पुंसामन्यजन्मकृतं फलं शुभाशुभं समभ्येति विधिना संनियोजितम्।

रसायनमिव भोक्तव्यम् (should eat like medicine)

प्राज्ञैः स्वयमुपार्जितं वित्तं शनैः शनैश्च रसायनमिव भोक्तव्यम् । न कदाचन हेलया ।

पञ्चैतानि सृज्यन्ते (these five are divided)

आयुः, कर्म, धनं, विद्या, मरणं च पञ्चैतानि देहिनः गर्भस्थस्यैव सृज्यन्ते ।

निपुणाः विजानन्ति (the experts know / understand)

विबुधाः पुरुषं सकृदपि दृष्ट्वा तस्य सारतां जानन्ति । हस्ततुल्यापि पलप्रमाणं निपुणाः विजानन्ति ।

वाञ्छैव सूचयति (the desire indicates)

पुंसां पूर्वतरं भविष्यं यदन्यतनुजं तु अशुभं शुभं वा वाञ्छैव सूचयति। शिशुरजातकलापचिह्नः प्रत्युद्गतैः अपसरन् कलापी सरलः विज्ञायते ।

तत्सर्वं वित्तजं बलम् (that is the strength acquired through money)

मर्त्यः सदा यदुत्साही, यज्जनान् पराभवति, यदुद्धतं वाक्यं वदेत् , तत्सर्वं वित्तजं बलम् । अर्थेन बलवान् । सर्वोऽपि अर्थयुक्तः । सः पण्डितः ।

पुरुषः नामधारकः (man is for namesake)

दंष्ट्राविरहितः सर्पः, मदहीनः गजः यथा तथा अर्थेन विहीनः पुरुषः अत्र नामधारकः ।

उच्छिद्यन्ते क्रियाः सर्वाः (all the activities get spoiled / ruined)

अर्थेन च विहीनस्य पुरुषस्याल्पमेधसः यथा ग्रीष्मे कुसरितः सर्वाः क्रियाः उच्छिद्यन्ते ।

धनहीनाः नाममात्राः (moneyless is worthless)

काकयवाः यथा प्रोक्ताः यथारण्यभवाः तिलाः नाममात्राः न सिद्धौ हि तथा धनहीनाः नराः ।

श्रीर्गुणानां प्रकाशिनी (wealth illuminates qualities)

दरिद्रस्येतरे गुणाः सन्तोऽपि न हि राजन्ते । भूतानामादित्य इव श्रीः गुणानां प्रकाशिनी । सम्प्राप्य विहीनः द्रव्याणि सम्प्राप्य, तैर्विहीनः असुखे स्थितः यथा बाध्यते तथा न बाध्यते लोके प्रकृत्या निर्धनो जनः ।

अर्थिनः जन्म अवरम् (life of a bigger is of the lower type)

शुष्कस्य कीटखातस्य वह्निदग्धस्य सर्वतः ऊषरस्थस्य तरोः जन्म वरम् । अर्थिनः जन्म अवरम् ।

दरिद्रता शङ्कनीया (poverty causes doubt)

निष्प्रतापा दरिद्रता हि सर्वत्र शङ्कनीया । उपकर्तुमपि प्राप्तं निःस्वं सन्त्यज्य गच्छति।

निर्धनानां मनोरथाः

उन्नम्योन्नम्य निर्धनानां मनोरथाः तत्रैव हृदयेष्वेव विधवा स्त्रीस्तनाविव लीयन्ते। न केनापि इह दृश्यते व्यक्तेऽपि वासरे नित्यं दौर्गत्यतमसावृतः अग्रतोऽपि स्थितः यत्नान् न केनापि इह दृश्यते ।

दूरतः त्याज्यः (should be avoided from a distance)

यत्सकाशात् न लाभः स्यात् , केवलाः विपत्तयः स्युः स स्वामी अनुजीविभिः विशेषात् दूरतः त्याज्यः ।

मृतः मृतम् मृतः तुल्याः (equal to the dead)

दरिद्रः पुरुषः मृतः । अप्रजं मैथुनं मृतम् । अश्रोत्रियं श्राद्धं मृतम् । अदक्षिणः यज्ञस्तु मृतः ।

दैन्यस्य पात्रतामेति (friends becomes foes)

शश्वद्दौर्गत्यकलुषीकृतः विपदामाश्रयः पराभूतेः परं पदं दैन्यस्य पात्रतामेति । मित्राणि अमित्रतां यान्ति यस्य कपर्दकाः न स्युः तेन बान्धवाः लज्जन्ते , सम्बन्धं गोपयन्ति च। मित्राणि अमित्रतां यान्ति ।

निर्धनत्वम् (poverty)

शरीरिणां निर्धनत्वं मूर्तं लाघवमेव एतदपायानां गृहमिदम् । मरणस्यायं पर्यायः।

त्यज्यते निर्धनो जनैः (people abondon the poor)

अजाधूलिरिव, त्रस्थैः मार्जनीरेणुवत् दीपखट्वोत्थछायेव जनैः निर्धनः त्यज्यते।

न तु किञ्चित्प्रयोजनम् (it is totally uselers)

शौचावशिष्टयापि क्वचिन्मृदा किञ्चित्कार्यमस्ति । निर्धनेन जनेनैव न तु किञ्चित्प्रयोजनम् ।

धिक् देहिनां दारिद्र्यम् (poverty is wretched)

दातुकामोऽपि अधनः धनिनां गृहं सम्प्राप्तः याचकोऽयमिति मन्यते । धिक् देहिनां दारिद्र्यम् ।

पितरोऽपि न गृह्णन्ति (even donot accepts)

यः नरः स्ववित्तहरणं दृष्ट्वा असून् रक्षति, तद्दत्तं सलिलाञ्जलिं पितरोऽपि न गृह्णन्ति ।

तस्य सनातनाः लोकाः सिद्ध्यन्ति (he attains eternal blissful worlds)

गवार्थे, ब्राह्मणार्थे, स्त्रीवित्तहरणे च युद्धे यः प्राणान् त्यजति, तस्य सनातनाः लोकाः सिद्ध्यन्ति ।

यदस्मदीयं न तत्परेषाम् (whatever is ours, isn't of others)

मनुष्यः प्राप्तव्यमर्थं लभते । देवोऽपि तं लज्झयितुं न शक्तः । तस्मात् न विस्मयः । यदस्मदीयं न हि तत्परेषाम् ।

तमाहुः ब्रह्मघातिनम् (he is terned brahmaghatin)

लोकेऽस्मिन् यः पुमान् गुरोः सुतां, मित्रभार्यां, स्वामीगेहिनीं,

सेवकगेहिनीं गच्छति तमाहुः ब्रह्मघातिनम्

तत्कर्म न समाचरेत् (that shouldn't be done)

येन अयशः प्राप्यते, येन चापि अगतिर्भवेत्, येन स्वर्गाच्च भ्रश्यते तत्कर्म न समाचरेत् ।

कारयेत् मित्रमुत्तमम् (a nobleman should be made friend)

यस्य वित्ते कदाचन चित्तं विकारं न याति, सर्वकाले च मित्रं स्यात् तमुत्तमं मित्रं कारयेत् ।

दुर्जनोऽपि सुहृद् भवेत् (even a crook may become friend)

आपत्काले तु सम्प्राप्ते यं मित्रं तत् मित्रमेव । वृद्धिकाले तु सम्प्राप्ते दुर्जनोऽपि सुहृद् भवेत् ।

न मित्रं न च वैरकृत् (not a friend, not an enemy)

कस्यापि नितान्तं न कोऽपि मित्रं, न च वैरकृत् । कार्यात् वैरिविवर्धिताः, मित्रविध्वस्ताः दृश्यन्ते ।

किञ्चित्कालोपभोग्यानि (pleasurable for short time)

अभ्रच्छाया, खलप्रीतिः, सिद्धमन्नं,योषितः, यौवनं , धनं च किञ्चित्कालोपभोग्यानि अत एव विवेकिनः जितात्मनः धनस्पृहां न कुर्वन्ति ।

पञ्चपदी न दीयते (dosen't come along even five steps)

सुसञ्चितैः जीवनवत् सुरक्षितैः, न क्वचित् निजदेहेऽपि न वियोजितैः, निष्ठुरैः एतैः धनैः पुंसो यमान्तं व्रजतोऽपि पञ्चपदी न दीयते ।

वित्तवान् सर्वत्र भक्ष्यते (the rich is extracted everywhere)

यथा मांसं जले मत्स्यैः, भुवि श्वापदैः, आकाशे पक्षिभिः भक्ष्यते तथैव वित्तवान् सर्वत्र भक्ष्यते।

वित्ताढ्यः निर्धनः (the rich and the poor)

वित्ताढ्यः निर्दोषोऽपि दोषैः योजयते नृपः । निर्धनः प्राप्तदोषोऽपि सर्वत्र निरुपद्रवः ।

दुःखं दुःखं दुःखम् (sorrow sorrow sorrow)

अर्थानामार्जने दुःखम् । आर्जितानां च रक्षणे दुःखम् । नाशे दुःखम् । व्यये दुःखम् । सर्वं दुःखदायकं धनम् ।

मोक्षमाप्नुयात् (gets salvation)

मूढोऽयं जनः अर्थार्थी यानि कष्ठानि सहते शतांशेन मोक्षार्थी तानि चेत् मोक्षमाप्नुयात् ।

धीरमनस्वी (the bold intellectual)

धीरस्य मनस्विनः स्वदेशः कः ? विदेशः कः ? यं देशं श्रयते बाहुप्रतापार्जितं तमेव कुरुते यत् दंष्ट्रानखलाङ्गुलप्रहरणैः सिंहः वनं गाहते । तस्मिन्नेव हतद्विपेन्द्ररुधिरैः आत्मानः तृष्णां छिनति ।

प्रज्ञावान् न सीदति (the knowledgeable doesn't feel bad)

परदेशे गतोऽपि यः अर्थहीनः प्रज्ञावान् भवति सः कथञ्चिदपि न सीदति ।

समर्थानामतिभारः कः ? व्यवसायिनां दूरं किम् ? सुविद्यानां विदेशः कः ? प्रियवादिनां परः कः?

लक्ष्मीः स्वयं मार्गति (Godess Lakshmi herself seeks him)

उत्साहसम्पन्नम्, अदीर्घसूत्रं, क्रियाविधिज्ञं, व्यसनेष्वसक्तं,शूरं,कृतज्ञं,दृढसौह्रदं च वासहेतोः लक्ष्मीः स्वयं मार्गति ।

विधिना अपह्रियते (taken away by fate)

धनं प्राप्तोऽपि दुष्टप्रारब्धकर्मप्राप्त्या नश्यति । अनात्मीयं मुहूर्तमपि भोक्तुं न लभ्यते । स्वयमागतमपि विधिना अपह्रियते । अर्थस्योपार्जनं कृत्वा महदरण्यमासाद्य मूढः भोगं नैव समश्नुते।

नादत्तमुपतिष्ठति (one that is not given, cannot be obtained)

पक्षिणां यदाकाशे उत्पतन्ति, महीतले निपतन्ति । तदपि प्राप्त्या । पूर्वजन्मनि अदत्तं नोपतिष्ठति ।

यत् भाव्यं तत् भवति (that which should happen, happens)

यन्न भाव्यं तन्न भवति । भाव्यं यत्नेन विनापि भवति । यस्य तु भवितव्यता नास्ति तत् करतलगतमपि नश्यति ।

कर्म कर्तारमनुगच्छति (deeds of part life follow)

धेनुसहस्रेषु वत्सः यथा मातरं विन्दति तथा पुराकृतं कर्म कर्तारमनुगच्छति। प्राक्तनं कर्म नराणां प्राक्तनं कर्म आत्मना सह नित्यं तिष्ठेत् । गच्छन्तमनुगच्छति शयानेन सह शेते ।

संश्लिष्टावितरेतरम् (they are so closely associated, as cannot be separates)

यथा चायातपौ नित्यं परस्परं सुसमृद्धौ, एवं कर्म च कर्ता च संश्लिष्टावितरेतरम्।

व्यवसायं विना कर्म न फलति (without effort, there is no result)

यथा एकेन हस्तेन तालिका न सम्प्रपद्यते, तथा उद्यमपरित्यक्तं कर्मणः फलं

न स्मृतम् । भोज्यकालेऽपि कर्मवशात्प्राप्तं भोजनं हस्तोद्यमं विना वक्त्रे न कथञ्चन प्रविशेत् ।

उद्यमेन हि सिद्ध्यन्ति कार्याणि (only with effort , works get done)

सुप्तस्य सिंहस्य मुखे मृगाः न प्रविशन्ति । उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः । उद्यमेन विना मनोरथाः न सिद्ध्यन्ति । यद् भाव्यं तद् भविष्यति इति कातराः जल्पन्ति ।

दैवान्तरितपौरुषः (the effort of man is overpowered by the will of God)

स्वशक्त्या कर्म कुर्वतः सिद्धिं न प्रयच्छति चेत् , पुमान् नोपालभ्यः । तत्र दैवान्तरितपौरुषः।

सेव्यते स नरलोके (he is respected by the people)

यद्यपि तस्य धनस्य भोगो नास्ति तथापि भवतु धनम् । कृपणोऽपि, अकुलीनोऽपि, सज्जनैः वर्जितः अपि यस्य वित्तसञ्चयः स्यात्, स नरः लोके सेव्यते ।

सदैव उत्साहवता भाव्यम् सदैव उत्साहवता भाव्यम् (one must always be enthusiastic)

यत्रोत्साहसमारम्भः, यत्रालस्यविहीनता, नयविक्रमसंयोगः तत्र श्रीः अचला ध्रुवम् ।

आत्मनः उद्योगं न त्यजेत् (one shouldn't stop his effort)

तद्दैवमिति सञ्चिन्त्य, आत्मनः उद्योगं न त्यजेत् । अनुयोगं विना तिलानां तैलं नोपजायते।

भाग्यविहीनः (the unfortunate)

यः मन्दधीः जनः स्तोकेनापि सन्तोषं कुरुते तस्य भाग्यविहीनस्य दत्ताश्रीरपि मार्ज्यते ।

कृतनिश्चयिनो वन्द्याः (the determined get respected)

चातकः को वराकः ? तस्येन्द्रः वारिवाहकः। तुङ्गिमा न प्रशस्यते। कृतनिश्चयिनो वन्द्याः।

पुरुषोऽत्र स्वयं प्रभुः (man himself is the Lord)

अस्मिन् प्रपञ्चे स्त्रीवाक्याङ्कुशविक्षुण्णः बलात् यावत् न उद्धिर्यते, तावत् पुरुषः स्वयं प्रभुः सर्वकृत्येषु स्यात् ।

दत्तभुक्तफलं धनम् (money given to help others, and personal enjoyment becomes wormful)

अग्निहोत्रफला वेदाः । शीलवित्तफलं श्रृतम् । रतिपुत्रफला दारा । दत्तभुक्तफलं धनम् ।

त्याग एव हि रक्षणम् (protection of money lies in charity)

उपार्जितानामर्थानां त्याग एव हि रक्षणम् । तटकोदरसंस्थानां जलमिव परीवाहः सस्यरक्षणं भवति ।

दातव्यं भोक्तव्यम् (should give in charity should enjoy oneself)

धनविषये सञ्चयो न कर्त्तव्यः । दातव्यं भोक्तव्यं च । मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ।

तिस्रः गतयः (the three possiblities)

वित्तस्य दानं भोगो नाशः इति तिस्रः गतयः सम्भवन्ति । यः न ददाति , न भुङ्क्ते तस्य तृतीया गतिर्भवति । एवं ज्ञात्वा विवेकिना स्थित्यर्थं वित्तोपार्जनं न कर्तव्यम् ।

शैत्यार्थं हुताशनं सेवन्ते (they approach fir for coolness)

ये मुर्खाः सुखाशयाः धनादिकेषु विद्यन्ते ते तप्तग्रीष्मेण शैत्यार्थं हुताशनं

सेवन्ते ।

पुरुषस्य परं निधानम् (the best investment of man)

सर्पाः पवनं पिबन्ति । न च ते दुर्बलाः । वनगजाः शुष्कैः तृणैः बलिनो भवन्ति। मुनिवराः कन्दै फलैः कालं गमयन्ति । सन्तोष एव पुरुषस्य परं निधानम्।

सन्तोषामृततृप्ताः (satisfied by drinking the nector of happyness)

शान्तचेतसां सन्तेषामृततृप्तानां यत्सुखं तत् धनलुब्धानामितश्चेतश्च धावतां नास्ति ।

परा निर्वृतिः (the ultimate happiness)

पीयूषमिव सन्तोषं पिबतां परानिर्वृतिः भवति । पुनः असन्तोषवतां पुंसां निरन्तरं दुःखं भवति ।

इन्द्रियाणां स्वाधीनम् (control of senses)

चेतसः निरोधात् अखिलानि इन्द्रियाणि निरुद्धानि भवन्ति । यथा मेघैः आच्छादिते रवौ गभस्तयः आच्छन्नाः स्युः ।

वाञ्छाविच्छेदनम् (destorying the desires)

शान्ताः महर्षयः वाञ्छाविच्छेदनं स्वास्थ्यं प्राहुः । अग्निसेवनैः पिपासेव अर्थैः वाञ्छा न निवर्तते ।

धनार्थं सर्वं कुर्वते (everything is done for money)

मानवाः स्वापतेयकृते अनिन्द्यमपि निन्दन्ति । अस्तुत्यं स्तुवन्ति । धनार्थं सर्वं कुर्वते ।

धर्मार्थं धनावश्यकता नास्ति (money is not nessary for the purpose of dharma)

धर्मार्थं यस्य वित्ते हा तस्यापि न शुभावहा । पङ्कस्य प्रक्षालनात् दूरादस्पर्शनं

वरम् ।

सन्तोषतुल्यं धनमन्यत् नास्ति (there is no wealth that equals happiness)

दानेन तुल्यः निधिः अन्यः नास्ति । पृथिव्यां लोभादन्यः रिपुः नास्ति । शीलसमं विभूषणं न चान्यत् । सन्तोषतुल्यं धनं नास्ति अन्यत् । दारिद्र्यस्य पराभूतिः मानद्रविणाल्पता । जरद्गवधनः शर्वः तथापि परमेश्वरः ।

सज्जनः मूर्खः (the good and the bad)

आर्यः पतन्नपि सकृत्कन्दुकपातेन पतति । पुनः शीघ्रमुत्थायते । मूर्खस्तु मृत्पिण्डपतनं यथा तथा पतति पुनः नोत्थायते ।

वक्ता श्रोता च दुर्लभः (the lister and speaker are difficult to get)

सततं प्रियवादिनः पुरुषाः सुलभाः । अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ।

सुहृदः प्रोक्ताः (are termed friends)

अप्रियाण्यपि पश्यन्ति ये वदन्ति, ते एव सुहृदः प्रोक्ताः । अन्ये नामधारकाः स्युः ।

न स्वास्थ्यं व्रजति क्वचित् (doesn't get peace anywhere)

भयत्रस्थः नरः मुहुः श्वासं प्रभूतं कुरुते । दिशो अवलोकयत्येव । न क्वचित् स्वास्थ्यं व्रजति ।

शत्रुदर्शने प्रोक्तौ उपायौ (Two upayas when the enemies come)

शत्रुदर्शने विमुक्तौ नीतिशास्त्रे द्वावुपायौ इह प्रोक्तौ । हस्तयोः चालनादेकः द्वितीयः पादवेगजः ।

सुधियः सुखमासते (The wise stay happy)

सुभाषितरसास्वादबद्धरोमाञ्चकञ्चुकाः स्त्रीणां सङ्गमं विनापि सुधियः

सुखमासते।

प्रस्तावयज्ञः (the yajna of speech)

सुभाषितमयद्रव्यसङ्ग्रहं यः न करोति, सः प्रस्तावयज्ञेषु कां दक्षिणां प्रदास्यति।

सुभाषितम् (well said word)

यः सकृदुक्तं न गृह्णाति, स्वयं वा न करोति यस्य सम्पुटिका नास्ति , सः सुभाषितं वक्तुमनर्हः ।

दुःखावेशो अधिको भवेत् (the pain gets greater)

मन्दत्वमापन्नोऽपि नष्टो वापि इष्टदर्शनात् प्रायेण प्राणिनां भूयः दुःखावेशः अधिको भवेत् ।

मित्रदर्शनम् (seeing the friends)

प्राणात्यये समुत्पन्ने यदि मित्रदर्शनं स्यात् तत् द्वाभ्यां सुखदं, पश्चात् जीवतोऽपि मृतस्य च।

भुवनत्रयतिलकम् (the best in the three worlds)

यस्य सम्पदि न हर्षः, विपदि न विषादः, रणे न भीरुत्वं, तं भुवनत्रयतिलकं सुतं जननी विरलं जनयति ।

न तरत्यापदं कश्चित् (one without friends cannot cross over difficulties)

आपन्नाशाय विबुधैः कर्त्तव्याः सुहृदः अमलाः । मित्रवर्जितः यः अत्र कश्चित् आपदं न तरति ।

बुद्धयः कुब्जगामिन्यः भवन्ति

कृतान्तपाशाबद्धानां दैवोपहतचेतसां महतामपि बुद्धयः कुब्जगामिन्यः भवन्ति।

अतिपण्डिताः न शक्ताः (even the best of scholars are not capable)

विधात्रा ललाटे या सा अक्षरमालिका रचिता तां मार्जयितुं स्वबुद्ध्यापि अतिपण्डिताः न शक्ताः ।

वयस्यजनसङ्गमः (meeting the friends)

यदि समहौषधकल्पः वयस्य जनसङ्गमः न स्यात्, दयितजनविप्रयोगः वित्तवियोगश्च केन सह्याः स्युः ।

मित्रे विश्रम्भः (faith in the friend)

पुंसां निरन्तरे मित्रे यादृक् विश्रम्भः तादृशः न चात्मजे, न सोदर्ये, न दारेषु, न मातरि च।

मित्रस्यैतत्फलत्रयम् (the three fruits of friends of friendship)

आसम्पत्तौ परो लाभः ,तथा गुह्यस्य कथनम्, आपद्विमोक्षणं चैव मित्रस्यैतत्फलत्रयम् .

सर्वेषामेव देहिनाम् (for all the bodily entitiess)

कायः सन्निहितापायः, सम्पदः क्षणभङ्गुराः, समागमाः सापगमाः सर्वेषामेव देहिनाम् ।

अनर्थाः बहुली भवन्ति (difficulities come in groups)

क्षते प्रहारा निपतन्त्यभीक्ष्णम्, धनक्षये दीप्यति जाठराग्निः, आपत्सु वैराणि समुल्लसन्ति छिद्रेषु अनर्थाः बहुली भवन्ति ।

मित्रमित्यक्षरद्वयम् (the two letters of mitra)

प्राप्ते भये परित्राणं, प्रीतिविश्रम्भभाजनं मित्रमित्यक्षरद्वयं रत्नमिदं सृष्टम् ।

क्रन्दनं वर्धयत्येव (increases difficulities)

यः व्यसनं प्राप्य मोहात् केवलं परिदेवयेत् तत्क्रन्दनं विपदं वर्धयत्येव । तस्यान्तं नाधिगच्छति ।

विषादपरिवर्जनम् (leave sorrow away)

नयपण्डितैः केवलं व्यसनस्योक्तं भेषजं विषादपरिवर्जनं, तस्योच्छेदसमारम्भः।

परमो हि मन्त्रः (the mantra is great)

अतीतलाभस्य सुरक्षणार्थं भविष्यलाभस्य च सङ्गमार्थम् आपत्प्रपन्नस्य च मोक्षणार्थं यन्मन्त्र्यते असौ परमो हि मन्त्रः ।

तत्प्राज्ञो वेत्ति नेतरः (that is understood only by the wise ; not others)

सिद्धं वा यदि असिद्धं वा चित्तोत्साहः निवेदयेत् । सहजमिदं सर्वजन्तूनाम्। तत् प्राज्ञः वेत्ति नेतरः ।

मित्रसङ्ग्रहः (the essence of friendship)

विवेकिना मित्रसङ्ग्रहः कार्यः । मित्रेण सह व्याजेन वर्तितव्यम् । यः मित्राणि सम्पाद्य, न कौटिल्येन वर्तते, तैः समं कथञ्चन पराभूतिं न सम्प्राप्नोति ।

पञ्चतन्त्रे तृतीयतन्त्रं काकोलूकीयम्

शत्रोश्च न विश्वसेत् (enemy shouldn't be believed)

पूर्वविरोधितस्य शत्रोः पश्चात् मित्रत्वम् उपागतस्यापि नैव विश्वसेत् । काकप्रणीतेन हुताशनेन दग्धां गुहां पश्य ।

शत्रावुपेक्षायां दोषः (neglecying the enemy is dangerous)

यः आलस्यसंयुक्तः सन् यदृच्छया प्रसरन्तं स्वकीयं शत्रुं रोगञ्च उपेक्षेत,सः शनैः तेन शत्रुणा रोगेण च हन्यते । अतः एतयोः प्रथमतः एव प्रतीकारः श्रेयान् यः जातमात्रं शत्रुं व्याधिञ्च प्रशमं न नयेत् सः महाबलोऽपि तेनैव वृद्धिं प्राप्य हन्यते ।

राज्ञः सचिवेषु जिज्ञासायामौचित्यम् (there is appropriaters in enquiring the welfare or king and ministers)

अत्र सचिवेन अपृष्टेनापि वक्तव्यं विशेषेण महीपतेः पथ्यं प्रियमप्रियञ्च वाच्यम्।

पृष्टस्यापि सचिवस्य हितानुपदेशे दोषः (it is mistake if a minister dosen't advise , even if indirectly)

यः पृष्टः सन् अपि परिणामे सुखावहं हितं न ब्रूते, स मन्त्री प्रियवक्ता च केवलं रिपुः स्मृतः ।

मन्त्रणायाः करणीयता (making thoughtful)

तस्मात् हितकथनौचित्यात् एकान्तमासाद्य महीपतेः मन्त्रः कार्यः ।

देशकालानुसारेण सन्धिविग्रहयोः उपकारिता (depending on the place (country) and time, appropriateness of sandhi or vigraha liesin)

बलीयसे प्रणमतां काले प्रहरतां सम्पदः निम्नगाः प्रतीपमिव नापगच्छन्ति । सत्याढ्यः धार्मिकः आर्यः भ्रात्रुसङ्घातवान् बली । अनेकविजयी रिपुः सन्धेयः भवेत्। अनार्येण प्राणसंशयं विज्ञाय सन्धिः कार्यः । यतः संरक्षितैः प्राणैः सर्वं रक्षितं भवति।

अनेकयुद्धविजेतृणा विशेषात्सन्धेयः (one should make friends with one who has won many battles)

अनेकयुद्धविजयी यस्य सन्धानं गच्छति, तस्य प्रभावेण शत्रवः आशु वशं गच्छन्ति । युधिविजयः सन्दिग्धः समेनापि सन्धिमिच्छेत् । न हि सांशयिकं कुर्यात् इत्युवाच बृहस्पतिः ।

सहसा विग्रहकर्तव्यतामाह (immediately battles should be done)

इह युद्ध्यतां जनानां युद्धे विजयो सन्दिग्धे । तस्मात् उपायत्रितयादूर्ध्वं युद्धं समाचरेत् । मानान्धः असन्दधानः आमकुम्भ इव उभयसङ्क्षयं करोति । अशक्तस्य शक्तिमता मृत्यवे भवति । दृषत्कुम्भमिवाभित्वा शक्तिमान् नावतिष्ठेत ।

लाभालाभौ विचार्य युद्धं कर्तव्यम् (estimating gain and lose , war

भूमिः, मित्रं, हिरण्यं वा विग्रहस्य फलत्रयम् । यदि एषां नास्त्येकमपि विग्रहं

न समाचरेत्। अतिसामान्यलाभाकांक्षया सामान्यस्यापि कदाचित् लाभविरहसम्भावनायां महान् प्रयत्नो नाश्रयणीयः । तस्मात् यत्र फलं न स्यात् किं तु केवलं युद्धं भवेत् । तत्कार्यं न समुत्पाद्यम् । अन्येन समुत्पादितमपि तादृशं कार्यं सर्वथा वर्जनीयम् । अक्षयं सम्पदं वाञ्छन् बलीयसा समाक्रान्तः वैतसीं वृत्तिमाचरेत् । कदापि भौजङ्गीं नाचरेत् । तथा कृते पतनस्यावश्यं भावित्वात्। वैतसीं वृत्तिं कुर्वन् महतीं श्रियं प्राप्नोति । भुजङ्गवृत्तिमापन्नस्तु केवलं वधमर्हति । मतिमान् कौर्मं सङ्कोचं प्रहारान् मर्षयेत् । पुनः प्राप्तकाले कृष्णसर्पवत् उत्तिष्ठेत् । आगतं विग्रहं दृष्ट्वा सुसाम्ना प्रशमं नयेत् । विजयस्य हि अनित्यत्वात् रभसा न समुत्पतेत् । तत्र च पराजयस्यापि सम्भवात् । बलिना सह योद्धव्यमिति निदर्शनं नास्ति । तथाहि मेघः प्रतिवातं कदाचित् न उपसर्पति । वातस्य प्रबलत्वात् । सुश्लिष्टेनापि सन्धिना शत्रुणा सह न हि सन्दध्यात् । सुतप्तमपि पानीयं पावकं शमयत्येव । सत्यधर्मविहीनेन कथञ्चन न सन्धिं कुर्यात् । सुसन्धितोऽपि असाधुत्वात् अचिरात् विक्रियां याति । क्रूरः, लुब्धः, अलसः, असत्यः , मिथ्यावादी, प्रमादी, भीरुः, अस्थिरः , मूढः, युद्धावमन्ता रिपुः सुखोऽच्छेद्यः भवेत् । अतएव युद्धे निरुत्साहताप्रदर्शनं नोचितम् । युद्धसाध्ये रिपौ सान्त्वम् अपक्रिया स्वेद्यम् आमज्वरं प्राज्ञः अम्भसा परिषिञ्चति । सकोपस्य शत्रोः सामवादाः दीपकाः प्रतप्तस्य सर्पिषः सहसा तोयबिन्दवः इव प्रत्युतदीपकाः न तु शान्तिकराः । अतः कोपवृद्धिहेतुसमाचरणं तत्र न कर्त्तव्यम् । उत्साहशक्तिसम्पन्नः लघुः गुरुं शत्रुं हन्यात् । यथा कण्ठीरवः नागे सुसाम्राज्यं प्रपद्यते । ये शत्रवः बलेन अवध्याः स्युः, ते मायया वध्याः । यथा भीमेनस्त्रीरूपमास्थाय कीचकः हतः । द्विषः मृत्योरिव उग्रदण्डस्य राज्ञः वशं यान्ति । रिपवः दयालुं नृपं शष्पतुल्यं मन्यन्ते । तथा च जगति प्रभुत्वकामनां नृपाणां तेजस्विता कदाचिदपि न परित्यक्तव्या इति भावः ।

यस्य तेजः तेजस्विनः तेजसा शमनं न गच्छति । मातुः यौवनहारिणा वृथाजातेन न किमपि प्रयोजनम् । या लक्ष्मीः वैरिणां शोणितकुङ्कुमैः नानुलिप्ताङ्गी सा कान्तापि मनस्विनां मनसः प्रीतिं न धत्ते । युद्धप्रियत्वात् शक्तिमतां स्वयङ्ग्रहस्वभावानां मनस्विनां न अनायाससाध्ये प्रीतिरिति भावः । यस्य भूपस्य भुमिः रिपुरक्तेन तथा तत्स्त्रीनेत्राम्बुभिः संसिक्ता,तस्य जीवने का श्लाघ्या ? का प्रशंसा ? न कापि ।

बलोत्कटेन दुष्टेन मर्यादारहितेन च सन्धिविग्रहौ नैव कार्यौ । यानमेव तत्र योग्यम्। यानं द्विप्रकारं भवेत् । एकं भयत्रस्तप्ररक्षणम् । अन्यत् जिगीषोः यात्रालक्षणमुच्यते।

कार्तिके वा अथ चैत्रे वा उत्कृष्टवीर्यस्य विजिगीषोः शत्रुदेशे यानं प्रशस्यते। व्यसने वर्तमानस्य तथा छिद्रान्वितस्य च शत्रोः अवस्कन्दप्रदानस्य सर्वे कालाः प्रकीर्तिताः । तादृशशत्रुनिधनाय कालाकालविचारः न करणीयः इति भावः । शूरैः महाबलैः आप्तैः स्वस्थानं सुदृढं कृत्वा , ततः अग्रतः प्रणिधिभिः व्याप्तं परदेशं गच्छेत्। राज्ञः चक्षुः सदृशा एव चाराः । अतः तान् अग्रतः अनियोज्य शत्रुराज्याभिगमने अन्धवत् पदे पदे स्खलनमिति तात्विकम् । अज्ञातविविधासारतोयशस्यो यः परराष्ट्रं व्रजेत् । सः भूयः स्वराष्ट्रं नाधिगच्छति । शत्रुभिः पराजीयते इति भावः । बलिना पापिना विग्रहो संधानं च न कर्त्तव्यम् । कार्यलाभमपेक्ष्य अपसरणं क्रियते बुधैः ।

यः बलवन्तः रिपुं दृष्ट्वा देशत्यागं करोति सः पुनर्जीवन् युधिष्ठिर इव मेदिनीमाप्नोति । अतः जाग्रति प्रबले वैरिणि भाविराज्यस्थैर्यमिच्छुना देशत्यागोऽपि कर्त्तव्यः इति भावः । यः दुर्बलः अहङ्कृतिं कृत्वा बलीयसा सह युद्ध्यते, सः तस्य वाञ्छितं स्वपराभवरूपम् आत्मनः कुलक्षयञ्च कुर्यात् ।

स्थानबलम् (strength of the place)

नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति । स एव स्थानात् प्रच्युतः शुनापि परिभूयते। बलवता शत्रुणा अभियुक्तः जनः प्रयत्नवान् सन् दुर्गे तिष्ठेत् । तत्रस्थः आत्ममुक्तये आत्मनस्त्राणाय सुहृदां मित्राणामाह्वानं प्रकुर्वीत साहय्यार्थं मन्त्रणार्थं वा । यः रिपोः आगमं युद्धार्थमिति श्रुत्वा, भयेनातिभीतमानसः सन् स्वस्थानं सन्त्यजेत्। सः नरः तत्र स्वस्थाने भूयः न वसेत् । नातः स्थानभ्रष्टेन भवितव्यमिति भावः । दंष्ट्राविरहितः सर्पः मदहीनः गजश्च यथा एतौ यथा निर्वीर्यत्वात् सर्वैरेव अभिभवनीयौ स्याताम् तथा स्थानहीनः भ्रष्टः राजा सर्वेषु गम्यः स्यात् । एकोऽपि नरः निजस्थानस्थितः सन् शक्तानामपि शत्रूणां शतं योद्धुं सहेत् । तस्मात् स्थानं न सन्त्यजेत् । तस्मात् युद्धाय कृतनिश्चयः सन् दुर्गं सुभटैः आसारैः संयुक्तं प्राकारैः परिखात्युक्तं शस्त्रादिभिः अलङ्कृतं दृढं कृत्वा, मध्यगतः सन् नित्यं तिष्ठेत् एवं कृते जीवन् क्ष्मन्तं सम्प्राप्स्यसि।

मृतो वा स्वर्गं प्राप्स्यसि । धर्मार्थयोः द्वयोरेव पुरुषार्थत्वात् युगपदुभयप्राप्तेरसम्भवाच्च तदेकतराभ्युदय एव महोदयः पुरुषाणाम् । स च इत्थं कृते भवितव्यमेव ।

मरुता एकस्थानवीरुधः यथा न बाध्यन्ते , तथा बलिनापि विपक्षेणापि, लघवोऽपि न बध्यन्ते । महान् बलवान् सुप्रतिष्ठितोऽपि एकजः वृक्षः वातेन प्रसह्य इव धर्षयितुं शक्यः । तस्मात् एकाकी न सन्तिष्ठेत् । अथ ये वृक्षाः संहताः सर्वतः सुप्रतिष्ठिताः ते शीघ्रेण वातेन एकसंश्रयात् न हन्यन्ते । अत एव स्वावासे एव सर्वैः मिलित्वा अवस्थातव्यमिति भावः । द्विषन्तः शौर्येण समन्वितमपि एकं मनुष्यम्,एवम् एकं वृक्षं वायुरिव शक्यं मन्यन्ते । ततः परं हिंसन्ति च । वीर्यवन्तमपि शत्रुम् एकाकिनमवलोक्य को नाम विरमेत् ?

संश्रयस्य प्रयोजनम् (the benefit of)

तेजस्वी जनः समर्थोऽपि असहायः चेत् किं करिष्यति ? तथा हि निर्वाते वह्नेः वायुसखत्वात् ज्वलितो वह्निः स्वयमेव प्रशाम्यति । वायोः सहायतामन्तरेण यथा तेजसा प्रदीप्तोऽपि वह्निः स्वयमुपशाम्यति ,तथा तेजः शक्तिसम्पन्नोऽपि पुमान् सहायहीनश्चेत् शमतामेव धत्ते इति निष्कर्षः ।

पुंसां सङ्गतिः विशेषतः स्वपक्षे श्रेयसी । तथा हि तण्डुलाः तुषैरपि परिभ्रष्टाः सन्तः न प्ररोहन्ति । मारुतः वनानि दहतः वह्नेः सखा भवति । स एव दीपनाशाय प्रभवति । तथा हि कृशे कस्यापि सद्भावः नास्ति ।

महतः संसर्गः (great concommittence)

महाजनस्य सम्पर्कः कस्य जनस्योन्नतिकारकः न भवति । तथा हि पद्मपत्रस्थितं तोयं मुक्ताफलस्य श्रियं धत्ते महतः संसर्गादिति भावः ।

द्वैधीभावस्य कालः (time with two feeling at the same time)

सन्धिना विग्रहेण च अविश्वासं सदा तिष्ठेत् । द्वैधीभावं समाश्रित्य नैव शत्रौ बलीयसि । तच्छत्रुं विश्वास्याविश्वस्तैर्लोभं दर्शयद्भिः सुखेनोच्छिद्यते रिपुः विद्वांसः उच्छेद्यमपि अरिम् एकदा वर्धयन्ति । तथाहि गुडेन वर्धितः श्लेष्मा वृद्ध्या सुखं

निपात्यते ।

स मानवः न जीवति (that man cannot live)

स्त्रीणां शत्रोः कुमित्रस्य विशेषतश्च पयस्त्रीणां सम्बन्धे एकभावेन यः भवेत् सः मानवः न जीवति ।

द्वैधं समाश्रितम् (spoken in two ways)

दैवद्विजातीनाम् आत्मनः तथा गुरोः कृत्यं एकभावेन कर्त्तव्यं, शेषं द्वैधं समाश्रितम्।

एको भावः सदा शस्तः (standing on the same word always is advisable)

भावितात्मनां यतीनां सदा एको भावः शस्तः । स्त्रीषु लुब्धानां लोकानां विशेषेण महीभृतां न एकोभावः शस्तः ।

सः दुर्गतिं नाप्नुयात् (he dosen't get into difficulties)

गावः गन्धेन पश्यन्ति । द्विजाः वेदैः पश्यन्ति । राजानः चारैः पश्यन्ति । इतरे जनाः चक्षुभ्यां पश्यन्ति । यः नृपः गुप्तैः चारैः निजे पक्षे विशेषतः परपक्षे तीर्थानि वेत्ति सः दुर्गतिं नाप्नुयात् ।

शत्रुषु सर्वं जानन्ति (the enemies are knowing everything)

चाराः अहितुण्डिकोन्मत्ताः यथा शत्रुषु सर्वं जानन्ति तथाधिकृताः वैद्यवात्सरिकाचार्याः स्वपक्षे सर्वं जानन्ति । अतः एषां वैरद्वारेण स्वपक्षे विघातः इति बोध्यम् ।

कार्यज्ञाः गुप्तचराः (the spies know their jobn well)

कृत्यविधः प्रणिधयः तीर्थेषु अन्तः पदं कृत्वा महतः विद्विषदम्भसः विदाङ्कुर्वन्तु।

राजरूपेण यमः (Yama , in the form of king)

यः परैः पीड्यमानान् सदा वित्रस्तान् जन्तून् नाम प्रजान् न रक्षति , सः पार्थिवरूपेण यमः। अत्र संशयः नास्ति ।

नौरिव विप्लवेत (becomes floated like a boat)

यदि सम्यक् नेता नरपतिः न स्यात्, ततः प्रजाः जलधौ नाविकशून्या नौः इव इह म्रियेत । पुरुषः अर्णवे भिन्नां नावमिव अप्रवक्तारम् आचार्यम् अनधीयानम् ऋत्विजम् अरक्षितारं राजानम् अप्रियवादिनीं भार्यां ग्रामकामं गोपालं वनकामं नापितञ्च इमानि षट् त्यजेत् । एषां परिग्रहे कार्यवैफल्यस्य अवश्यं भावित्वात् ।

विद्वद्भिः चिन्तिताः नयाः (morals contemplated by scholars)

नराणां मध्ये नापितः , पक्षिणां मध्ये वायसः, दंष्ट्रिणां मध्ये शृगालः, तपस्विनां मध्ये श्वेतभिक्षुः चतुराः । विद्वद्भिः चिन्तिताः बहुभिः सार्धं बहुधा चिन्तिताः सुनिरूपिताः नयाः कथञ्चित् न विलीयन्ते ।

विपत्तये बहवः सन्ति (there are many for caueing mishop)

एक एव तेजस्वी पार्थिवः भुवः हितार्थाय भवति । युगान्ते बहवः भास्वन्त इव संसारे विपत्तये बहवः नृपाः भवन्ति ।

क्षेमं तत्क्षणादेव जायते (if happens immediately)

स्वामिसम्भवे गुरूणां नाममात्रे गृहीते अपि, दुष्टानां पुरतः तत्क्षणादेव क्षेमं जायते । महतां व्यपदेशेन परा सिद्धिः सञ्जायते । तथा हि शशिनः व्यपदेशेन सुखं वसन्ति शशकाः ।

भयप्रदर्शनेनापि कदाचित् शत्रुजयः स्यात् (victory may be obtained sometimes even by merely causing fear)

निर्विषेणापि सर्पेण महती फटा कर्त्तव्या । विषं भवतु मास्तु वा फटाटोपो भयङ्करः । भयप्रदर्शनेनापि कदाचित् शत्रुजयः स्यात् ।

सः दूतः इष्यते (is called an ambassadar)

यः साकारः निस्पृहः वाग्मी नानाशास्त्रविचक्षणः परिचितावगन्ता सः राज्ञः दूतः इष्यते।

तस्य कार्यं न सिद्ध्यति (his effort will not be fruitful)

यः मूर्खं लौल्यसम्पन्नं विशेषेण मिथ्यावादं जनं राजद्वारिकमाचरेत् । तस्य कार्यं न सिद्ध्यति ।

दूता न वध्या (emissery shouldn't be killed)

शस्त्रेषु उद्यतेषु अपि बन्धुवर्गवधेष्वपि दूता परुषाणि जल्पन्तः अपि भूभुजा न वध्याः ।

स्वामित्वेन नाभियोजयेत्

जीवितकामः क्षुद्रमलसं कापुरुषं नाम निन्दां व्यसनिनम् अकृतज्ञं पृष्ठप्रलपनशीलं पुरुषं स्वामित्वेन न स्वामिनं कुर्यात् । पुरा न्यायान्वेषणतत्परौ शशकपिञ्जलौ उभावपि क्षुद्रं प्रभुं प्राप्य क्षयं गतौ ।

धर्मसङ्ग्रहः कर्तव्यः (should make dharmasangraha)

शरीराणि अनित्यानि । विभवः नैव शाश्वतः । मृत्युः नित्यं सन्निहितः । अत एव धर्मस्योपार्जनं कर्त्तव्यम् ।

श्वसन्नपि न जीवति (breaths only ,but doesn't live)

यस्य दिनानि धर्मविहीनानि सन्ति, आयान्ति, यान्ति च स लोहकारस्य अग्न्युद्दीपनार्थं चर्मनिर्मित यन्त्रविशेष इव श्वसन् अपि न जीवति ।

पाण्डित्यं व्यर्थम् (his scholarship is uselers)

यः जनः दंशमशकापहं कौपीनमाच्छाद्यति तत् धर्मवर्जीतं पाण्डित्यं शुनः पुच्छमिव व्यर्थं स्यात् ।

मशका इव अतिहीनाः (degraded like phies)

धर्मः येषां न कारणं , ये धर्मं प्रमाणीकृत्य न व्यवहरन्ति ते धान्येषु पुलका इव पक्षिषु पूतिका इव मर्त्येषु मशका इव अतिहीनाः इति भावः ।

धर्मस्तु श्रेयान् (dharma is virtuous)

वृक्षात् पुष्पं फलञ्च श्रेयः । दध्नः घृतं श्रेयः स्मृतम् । पिण्याकात् तैलञ्च श्रेयः। मानुषात् धर्म एव श्रेयान् । यथाहि सारतया वृक्षादिषु फलादीनां श्रेयस्त्वं

मानुषस्यापि तथैव सारत्वेन धर्मस्य श्रेष्ठत्वमिति निष्कर्षः ।

वृथैव तेषां जन्म (their lives are wasteful)

ये पुरषाः केवलं मूत्रपुरीषार्थं तथा आहाराय च सृष्टाः विधात्रा, ते धर्महीनाः पुरुषाः पशवो यथा परार्थाय भवन्ति । जनाः तैः नीचोचितं कर्म साधयन्ति । उत्तमपुरुषार्थरूप धर्मस्थानपेक्षणात् वृथैव तेषां जन्म इति भावः ।

धर्मस्य त्वरिता गतिः (dharma has quick movement)

नीतिज्ञाः जनाः सर्वेषु कृत्येषु स्थैर्यं विविच्य शंसन्ति । किन्तु वह्न्यन्तराययुक्तस्य धर्मस्य गतिः त्वरिता । कालविलम्बे सति विघ्नापातस्य सम्भवात् धर्मः विचारं विनैव त्वरितमनुष्ठातव्यः। 'शुभस्य शीघ्रम्' इति नीतिस्मरणात् ।

संक्षेपात् कथ्यते धर्मः (dharma is explained breifly)

हे जनाः ! युष्मभ्यं विस्तरेण किम् ? संक्षेपात् कथ्यते धर्मः परोपकारः पुण्याय पापाय परपीडनम् । तथा च परोपकारकरणम् एव जगति मुख्यो धर्मः । परपीडनं तु महत् पापम् इति निष्कर्षः ।

धर्मसर्वस्वम् (the nature of dharma)

धर्मस्य सर्वस्वं यत् तत् श्रूयताम् । श्रुत्वा च अवधार्यताम् । आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।

अहिंसैव धर्ममार्गः (the path of drama is virtuous)

यस्मात् साधुभिः धर्मः अहिंसपूर्वकः उदाहृतः, तस्मात् तान् यूकमत्कुणदंशादीन् अपि रक्षयेत्। यः हिंसकानि अपि भूतानि हिनस्ति सः निर्दयः। अपि च सः घोरं नरकं याति। यश्च शुभानि हिनस्ति तस्य किं वक्तव्यम् ? अवश्यमेव तेन अतिघोरं नरके गन्तव्यमिति भावः।

सः नरकं याति (he goes to hell)

मानाद्वा, यदि वा लोभात् क्रोधाद्वा, यदि वा भयात् यः न्यायमन्यथा ब्रूते सः नरः नरकं याति। साधारणपशुविषयकमिथ्याकथने पञ्चपुरुषान् नरके पातयन्ति। गोरूपविशेषपशुविषयकमिथ्याकथने दशपुरुषान् नरके पातयन्ति। कन्याविषयकमिथ्याकथने शतं हन्ति। पुरुषविषयकमिथ्याकथने सहस्रपुरुषान् हन्ति। अतः मिथ्या न वक्तव्येति भावः।

ऋतं कीर्तयेत् (truth must be grolified)

यः जनः सभामध्ये उपविष्टः सन् स्फुटं यथा तथा वचः सत्यं न वक्ति, विषदभावेन तत्त्वार्थं न प्रकाशयति सः अस्फुटभाषी। तस्मात् अस्फुटकथनात् यथार्थस्याप्रकाशनात् दूरेण त्याज्यः। न्यायो वा ऋतं कीर्तयेत्।

विषमेव तद्वचः (the age is poison)

अत्र यः आदेशकालज्ञम् अनायतिक्षमम् अप्रियम् आत्मनः लाघवकारि कारणवर्जितं यत् वचः अब्रवीत् तस्य तत् वचः न स्यात्। तद्वचः विषमेव स्यात्।

विचक्षणः कः विषं भक्षयेत् (which discerning man takes poison ?)

बुद्धिमान् नरः बलोपपन्नोऽपि स्वयं परं वैरितां नैव प्रापयेत्। तथाहि विचक्षणः कः मम भिषक् अस्तीति विचिन्त्य अकारणात् विषं भक्षयेत्।

सत्यमपि तन्न वाच्यम् (even if it is, should not be told)

पण्डितेन कथञ्चिदपि परिषदि परपरिवादः न वक्तव्यः। यदुक्तमसुखावहं तत् सत्यमपि न वाच्यं भवति।

स एव लक्ष्म्याः यशसाञ्च पात्रं भवति (even alone becomes fit to attin wealth and fame)

यः आप्तैः विश्वस्तः सुहृद्भिः असकृत् पुनः पुनः विचारितं, स्वयञ्च बुद्ध्या

प्रविचारिताश्रयं यस्य तथाविधं कार्यं करोति। स एव बुद्धिमान् लक्ष्म्याः यशसाञ्च भाजनं भवति। न कदाचिदपि असौ विपद्यते इति फलितम्।

वञ्चयितुं शक्ताः भवन्ति (becomes capabke to cheat)

बहुबुद्धिसमायुक्ताः सुविज्ञाः जनाः वञ्चकाः बलोत्कटानपि शत्रून् वञ्चयितुं स्वाधिकारात् समर्थाः भवन्ति।

तान् नैव स्पृशेत् (they should not be touched)

श्वानकुक्कुटचाण्डालाः समस्पर्शाः प्रकीर्तिताः। रासभोष्ट्रौ विशेषेण तादृशाः। तस्मात् तान् नैव स्पृशेत्।

पञ्चगव्येन शुद्धिः स्यात् (it is purified by pancaganya

तिर्यञ्चं मानुषं वापि यः कुधीः मृतं स्पृशेत् तस्य पञ्चगव्येन चान्द्रायणेन च शुद्धिः स्यात्।

सचेलं स्नानमुद्दिष्टम् (bath along with clothes is advised)

यः मर्त्यः ज्ञानात् अज्ञानतो वापि रासभं स्पृशेत् तस्य पापप्रशान्तये सचेलं नाम स्वपरिधे योत्तरीयवस्त्रसहितं स्नानं कथितम्।

स्वकार्यसाधनाय मधुरवचनादिभिः प्रतारयन्ति (for complition of their words, they praise using sweet words)

अस्मिन् जगति कोऽपि जनः अभिनवस्य सेवकस्य विनयैः आगन्तुकवचनैः विलासिनीनां नारीणां विलापैः धूर्तजनानां वाक्प्रपञ्चैः अवञ्चितः नास्ति। एते स्वकार्यसाधनाय मधुरवचनादिभिः जनान् विश्वास्य प्रतारयन्ति।

बहवः न विरोद्धव्याः (should not have many as enemies)

बहवः नाम सङ्घवृत्तयः दुर्बला अपि न विरोद्धव्याः। यतः महाजनाः जेतुमशक्याः। तथा हि पिपीलिकाः क्षुद्राः अपि समवेताः दीप्यमानं भुजगेन्द्रमपि भक्षयन्ति।

पलायनमार्गरहितं दुर्गं कारागारमेव (a fort without escape route is a jail)

नीतिकुशलैः जनैः दुर्गं पलायनोपायसमन्वितं कर्तव्यम् । पलायनमार्गरहितं दुर्गं व्याजेन दुर्गरूपेण बन्धनमेव ।

स्वप्रिय कार्यकारिणामेव राजा वश्यो भवति (the king becomes subjgated to there who cause happiness)

शत्रोः पलायने एकं छिद्रम् अन्यच्च संश्रयं पलायितस्य शत्रोरेव । रजसेविनां व्यग्रत्वे यदि भृत्याः जानन् वश्यः जायते । स्वप्रियकार्यकारिणामेव राजा वश्यतां गच्छतीति भावः ।

धन्यः स पुरुषो भुवि

पतिव्रता पतिप्राणा पत्युः प्रियहिते रता भार्या ईदृशी यस्य स्यात् सः धन्यः पुरुषः भुवि।

गृहिणी हीनमरण्यम्

न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते। गृहं हि गृहिणी हीनम् अरण्यसदृशं मतम्।

तुष्टाः स्युः सर्वदेवताः

यस्यां स्त्रियां भर्ता न तृप्यति सा स्त्री इति न वाच्या। पत्यौ तुष्टे सति नारीणां सर्वदेवताः तुष्टाः भवेयुः। नारीणां पत्युः सर्वदेवमयत्वात् तत्सन्तोषेणैव सकलदेवानां सन्तोष इति भावः।

सा नारी भस्मी भवतु (let that woman be bust)

भर्ता यस्यां स्त्रियां न तुष्यति सा नारी दावाग्निना विदग्धा पुष्पगुच्छवती लतेव भस्मी भवतु । भर्तुः अप्रियाणां पुत्रादि समन्वितानामपि रमणीनां मरणमेव भवतीति भावः ।

भर्तुः अन्येभ्यः स्वप्रियजनेभ्यः उत्कर्षम् (getsmore, attracted by those who are dear to heart than the husband)

पिता मितं हि ददाति कन्यायै । भ्राता भगिन्यै मितं ददाति । पुत्रः मात्रे मितं ददाति । दातारं भर्तारं पूजयेत् । स्वामिनः स्त्रीषु आदेयं किमपि नास्ति । अतः सर्वथा स्त्रीणां स्वामी एव परमपूजनीयः इति भावः ।

आश्रितरक्षणं विधेयम् (should protect who takes refuge)

हितकरं वचनं यत् तत् अवहितः सन् श्रुणुष्व । त्वया शरणागतः जनः नित्यं प्राणैरपि परित्रातव्यः । शरणागतरक्षणं हि महाप्रत्यवायजनकम् । अतः अवश्यमेव आश्रितरक्षणं विधेयम् ।

सुकृतञ्चापकर्षति (takes away the good)

यः जनः प्राप्तम् अतिथिं यथाशक्ति न पूजयेत्, असौ अतिथिः तस्य जनस्य पापं दत्वा,तस्मात् पुण्यं स्वीकृत्य, गच्छति ।

देहिनां फलानि

दारिद्र्यरोगदुःखानि बन्धनव्यसनानि च आत्मापराधवृक्षस्य फलान्येतानि देहिनाम्।

पापकर्मणः फलं भोक्तव्यम्

यः नरः पापं करोति धृवं तस्यात्मा प्रीतिकरः न भवति । पापस्य दुःखजनकतया आत्मनि दुःखोत्पत्तेः अवश्यं भावित्वात् । यतः आत्मना कृतं पापम् आत्मना एव भुज्यते । मत्कृतस्य पापकर्मणः फलं मयैव भोक्तव्यम् । पापमतिः सदा पापकर्मरतः सोऽहं महाघोरे नरके पतिष्याम्येव । अत्र नरकपतने संशयः नास्ति। पापरतानां नरकपतनस्यावश्यम्भावित्वात् ।

वैधव्येन प्रणश्यति

मनोदर्पस्तु अहङ्कारः, बन्धुषु कुलपूजा च , दासभृत्यजनेष्वाज्ञा वैधव्येन प्रणश्यति । स्वर्गे वसेत् तिस्रः कोट्योऽर्द्धकोटी च यानि रोमाणि मानुषे तावत् कालं वसेत् स्वर्गे भर्तारं यानुगच्छति।

तरुण्यः वृद्धं पतिं नेच्छन्ति

शिरसि शिरोरुहाणां यत् श्वेतं पदं नाम चिह्नं तदेव पुंसां परिभवस्य नाम तरुणस्त्रीकृतानादरस्य स्थानम् । तरुण्यः चाण्डालकूपमिव आरोपितास्थिशकलं परिहृत्य अतिदूरं गच्छन्ति । वृद्धपतिं नेच्छन्तीति भावः ।

अङ्गवैकल्येन सार्धं सर्वमेव विकलं भवति

वृद्धस्य गात्रं सर्वावयवानां शैथिल्यात् सुसङ्कुचितं, पादन्यासः स्खलिता, दन्ताः नाशं गताः , दृष्टिः भ्रान्ता भवति, क्षीणत्वात् सर्वं यथायथं न पश्यति, रूपमपि विनष्टं, वक्त्रं च लालायते । बान्धवजनः वाक्यं नैव करोति, नालपति । पत्नी न सेवते । हा धिक् ! पुत्रोऽपि जरया आक्रान्तं वृद्धं अवमन्यते । सर्वकार्येषु असामर्थ्यात् गात्रसङ्कोचादि विकृतिदर्शनाच्च अङ्गवैकल्येन सार्द्धं सर्वमेव विकलं भवति ।

त्रीणि तत्र प्रवर्तन्ते

यत्र अपूज्याः पूज्यन्ते, पूज्यानाञ्च अवमानना क्रियते, तत्र दुर्भिक्षं,मरणं,भयञ्च नराणाम् । एतानि त्रीणि प्रवर्तन्ते । अकार्यकरणेन तस्मिन् देशे नियतममङ्गलमेव जायते ।

सर्वं वेत्ति लोकोऽयम्

वेदेषु शास्त्रेषु च यत् न दृष्टं, न च संश्रुतं,ब्रह्माण्डमध्यगं यत् तत् सर्वं वेत्ति अयं लोकः।

परमसुखं जघनचपलायाः

घनतिमिरे, जलदे वर्षति , महाटवीप्रभृतौ, तथा पत्युर्विदेशगमने कामुक्याः परमसुखं भवति । दुर्दिनादौ च ज्ञातुमशक्यत्वात्, पत्युः विदेशगमने च गृहेऽपि सर्वथा विघ्नाभावात् इति भावः ।

शत्रवः मित्राणि

ये जनाः हितं वाक्यमुत्सृज्य विपरीतोपसेविनः भवन्ति, विचक्षणैः ते मित्ररूपा रिपवः एव मन्यन्ते अहितोपदेष्टार एव शत्रवः । हितोपदेष्टार एव मित्राणीति फलितम्।

बुद्धिकौशलमेव कार्यसिद्धौ हेतुः

सूर्योदये तमः यथा विनश्यति, तथा देशकालविरोधिनः यस्मिन् देशे यस्मिन् काले यत्कर्त्तव्यं तद्विपरीतमाचरतः, अत एव अप्रज्ञान् मन्त्रिणः प्राप्य, सन्तोऽपि अर्थाः राज्ञ विनश्यति । मन्त्रिबुद्धिकौशलमेव कार्यसिद्धौ हेतुः ।

स्त्रियः निष्कल्मषाः (woman are clean hearted)

स्त्रियः प्राक् सोमगन्धर्ववह्निभिः सुरैः भुक्ताः पश्चात् मानुषाः भुञ्जते । तस्मात् भोगजनितहेतोः दोषः न विद्यते । सोमः स्त्रीणां शौचं ददौ अतः स्त्रियः सर्वाः पवित्राः गन्धर्वाः तासां शिक्षितां स्वभावतः कृतशिक्षामिव सुसंस्कृतां वाक्यं भोगसन्तुष्टतया वरत्वेन ददुः । पावकः सर्वाङ्गेषु पवित्रत्वं भोगप्रीततया वरत्वेन ददौ । तस्मात् स्त्रियः निष्कल्मषाः भवन्ति ।

असम्प्राप्तरजा गौरी रजसि प्राप्ते रोहिणी अव्यञ्जना कन्या कुचहीना च नग्निका भवेत् । स्तनोद्गमात् प्राक् नग्निकासंज्ञा ।

सोमः समुत्पन्नैः चिह्नैः कुचाभिः उपलक्षितामीषदुद्भिन्नस्तनीं कन्यकां भुङ्क्ते। गन्धर्वाः पयोधराभ्यां उपलक्षितां भुञ्जते । रजसि जाते अग्निः प्रतिष्ठितः भोक्तुं प्रवृत्तः भवति ।

तस्मात् यावत् ऋतुमती न भवेत्, तावत् ऋतुप्रकाशात् प्रागेव कन्यां विवाहयेत्। अष्टवर्षायास्तु कन्यायाः विवाहः प्रशस्यते ।

व्यञ्जनं नाम ईषत्प्रकटितस्त्रीचिह्नविशेषं कन्यायाः पूर्वं पित्रोः पुण्यं हन्ति । पयोधरौ उद्गतौ परत्र जन्मनि लभ्यं पित्रोः पुण्यं हतम् । रतिः अविवाहितायाः इष्टान् स्वर्गादीन् तथा रजः पितरं हन्यात् । यौवनचिह्नादीनां सम्भवात् प्राक् कन्यादानं कर्त्तव्यमिति भावः ।

ऋतुमत्यां तिष्ठन्त्यां स्वेच्छादानं नाम कन्यायाः इच्छानुसारेण दानं विधीयते। न तदानीं पित्रादीनां पात्रापात्रपरीक्षणं कर्तव्यम् । कन्या यमभिलषेत् तस्मै एव सा दातव्या । तस्मात् नग्नां नामानागतार्तवामरजस्कां उद्वाहयेत् इति स्वायम्भुवो मनुः बभाषे ।

या कन्या पित्रुवेश्मनि स्थिता विवाहिता एव ऋतुमती भवति । जघन्या तथा वृषली सा अविवाह्या स्मृता ।

यतः दोषः तादृश्यामवस्थायां नीचपात्रेऽपि कन्यादानरूपः न भवति । तस्मात् पित्रा विनिश्चित्य, रजस्वला श्रेष्ठेभ्यः स्वस्मात् प्रकृष्टेभ्यः सदृशेभ्यः स्वसमानान्वयगुणेभ्यः तथा जघन्येभ्यः अधमेभ्यो वा यस्मै कस्मैचित् दातव्या । कन्यायां ऋतुमत्यां पात्रापात्रविचारः न कर्त्तव्यः इति भावः ।

ययोः जनयोः वित्तं समं,ययोरेव कुलं समं तयोरेव विवाहः मैत्री च शस्तम् । पुष्टविपुष्टयोः साधननिर्धनयोः नैव शस्तम् । तादृशपरिणयादिकं परिणामे दुःखावहमेव भवेत् ।

पापम् (sin)

सञ्चरन्तीह पापानि युगेष्वन्येषु देहिनाम् । कलौ तु पापसंयुक्ते यः करोति स लिप्यते । आसनात् शयनात् यानात् सङ्गतेश्चापि भोजनात् । कृते सञ्चरते पापं तैलबिन्दुरिवाम्भसि ।

पञ्चपितरः (the five fathers)

जनिता, उपनेता, विद्याप्रदाता, अन्नदाता, भयत्राता पञ्चैते पितरः स्मृताः ।

सप्तविचिन्त्य देया (these seven should be given after proper thinking)

कुलं, शीलं, सनाथता, विद्या, वित्तं, वपुः, वयश्च सप्तगुणानेतान् विचिन्त्य बुधैः कन्या देया। शेषमचिन्तनीयम् ।

कालः पिबति तत्फलम् (that result is being eaten by time)

यस्य यस्य विशेषतः फलितस्य कार्यस्य शीघ्रम् अक्रियमाणत्वं स्यात् । कालः विलम्बरूपः। तस्य कार्यस्य फलं पिबति ।

उत्तमगुणाः न परित्यजन्ति (doesn't leave those good qualities)

नीचैः विघ्नभयेन न प्रारभ्यते खलु । मध्याः प्रारभ्य विघ्नविहिताः विरमन्ति । विघ्नैः सहस्रगुणितैरपि हन्यमानाः प्रारब्धं न परित्यजन्ति उत्तमगुणाः ।

प्राज्ञः न सीदति (the intellectual doesn't grive)

प्राज्ञः जनः ऋणशेषम्, अग्निशेषं तथा व्याधिशेषञ्च निःशेषं सम्यक् विनष्टं कृत्वा न निषण्णो भवति । अनिश्शेषितेषु एतेषु पुनरभ्युत्थानसम्भवेन एतेषां भूयोऽपि कष्टप्रदत्वात् ।

सन्मूलोन्मूलनकरी प्रज्ञा (intellect is that which uproots completely)

शस्त्रैः हताः रिपवः न हि हताः नूनं न विनष्टाः भवन्ति । प्रज्ञया हतास्तु रिपवः सम्यक् हताः भवन्ति । शस्त्रं पुरुषस्य केवलं शरीरं निहन्ति । प्रज्ञा कुलञ्च विभवञ्च यशश्च हन्ति । एतत् सर्वमेव विनाशयति । महतां प्रज्ञा समूलोन्मूलनकरी खलु ।

प्रज्ञापूर्वकपौरुषानुष्ठानस्य गुणः (performance backed by knowledge)

भविष्यतः प्रज्ञापुरुषकाराभ्यां युक्तस्य नरस्य कार्यारम्भे मतिः प्रसरति । स्मृतिः दृढी भवति । मन्त्रः स्वयम् अर्थान् उपनयन् हृदये उद्भावयन् विप्लवं न गच्छति । तर्कः सफलः सन् स्फुरति । चित्तं समुन्नतिं अश्नुते । तथा श्लाघ्ये कृत्ये रतिः भवति । प्रज्ञा पौरुषवतः कार्याणि सिद्ध्यन्ति । न तथा बुद्धिप्रयत्नहीनानाम् इति विवेकः ।

नयादिसम्पन्ने राज्यं सयुक्तिकम् (for one who is adobt at morology ruling the kingdom is with sound logic \)

त्यागिनि शूरे पौरुषनिष्ठे तथा विदुषि च नीतिज्ञे जने, एतत् त्रितयवति महापुरुषे संसर्गरुचिः अनुरागी जनः गुणी भवति । संसर्गजा दोषगुणाः भवन्ति । गुणवति जने धनं, धनात् श्रीः श्रीमति आज्ञा अप्रतिहतादेशः । ततः आज्ञावति जने राज्यं सर्वत्र तिष्ठति । नीतिमवलम्ब्य दानं शूरत्वप्रकाशनञ्च राज्यमूलमिति भावः ।

दण्डसाध्येऽपि विषये प्राक् सामप्रयोग प्रशंसा (that which can be achieved by 'danda' the use of sama is appricable)

तीक्ष्णैः उपायैः सामादिषु चतुर्थैः दण्डरूपैः या प्राप्तिः तया गम्योऽपि यः अर्थः अरिविजयरूपः तस्याप्यादौ संश्रयः षाड्गुण्यप्रयोगेषु षष्ठः सामपूर्वकं वश्यतास्वीकारः

साधुयुक्तः एव । अतिदुरुहार्थसाधनेऽपि प्रथमं सान्त्वेनैव प्रवर्तितव्यम् । अत्युन्नताग्रः वनानां सारभूतः पादपेन्द्रः मानितः अभ्यर्थितश्च सन् छिद्यते जनैः । यथा हि लोके वनस्पतिच्छेदे कर्त्तव्ये प्रथमं तत्सम्मानसत्कारौ प्रयुज्यते । तथा महारिपुसाधने कर्तव्ये प्रथमं सान्त्वेनैव तदन्तः प्रवेष्टव्यम् इति तात्पर्यम् ।

असमाप्तिजिगीषस्य शान्तिर्नास्ति (there is no peace for one who derives to win , until he succeds)

मनोत्सेकपराक्रमव्यसनिनः अभिमानधनाः सत्पुरुषाः विस्तीर्णैः व्यवसायैः साध्यानि महतां दुष्पारतया आयाससाध्यानां स्निग्धैः नाम बन्धुभिः सततमेव सिद्ध्यर्थं चिन्त्यमानानां नीतिः साहसम्,उन्नतिः मतां नाम नीत्युत्साहात्मोन्नतिसमन्विताना‌म् इच्छापदारोहिणाम् कार्याणां पारं यावत् न गताः तावत् सामर्षेनामातिव्याकुले हृदये अवकाशविषये निवृत्तिः कथम् ? नैव निर्वृत्तिर्लभ्यते । अकृतकार्याणां महामहिमशालिनां हृदयं सर्वदा औत्सुक्येन त्वरापूरितं सदिव वर्तते। अतः सुखानि तत्र न स्थातुमर्हन्ति, स्थानाभावात् । एकस्यानपसरणे कथमपरस्य तत्र स्थानम् इति भावः ।

तस्य राज्यं निरर्थकम् (his kingdom is waste / worthless)

यस्तु राजा रक्षणादिभिः गुणैः तत्तत्कर्मजन्यैः प्रजाः न रञ्जयेत्, अजागलस्तनस्येव तस्य राज्ञः राज्यं निरर्थकम् ।

स चिरं भुङ्क्ते (he enjoys for a long time)

यस्य नृपस्य गुणेषु दयादाक्षिण्यादिषु रागः व्यसनेषु अनादरः , सुभृत्येषु प्रीतिः , सः नृपः चलं चामरमेवांशुकां सितातपत्राभरणां राज्यलक्ष्मीं चिरं भुङ्क्ते ।

नृपतयः अभिषेकसमकालमेव विपन्नाः भवन्ति (the kings are exposed to dangerous, even from the time of consecration)

यदैव राज्ये अभिषेकः क्रियते ,तदैव बुद्धिः राज्ञां व्यसनेषु योज्या । राज्यलिप्सया बहूनां शत्रूणां सद्भावात् अभिषेकसमय एव मम विपद्भिः भवितव्यम् इति सततमेव प्रत्यग्रसिंहासनसमारूढैः नृपतिभिः मन्तव्यम् इति भावः । मदान्धाः व्यसनेषु आसक्ताः भवन्ति । अतुलविभवमधिगत्य नृपतयः प्रायशः एव विवेकरहिताः मदोद्धताश्च सन्तः

स्वेच्छाचारिणः भवन्ति । नृपतयः अभिषेकसमकालमेव विपन्नाः भवन्ति । धनलाभात् कर्त्तव्यज्ञानशून्या भवन्ति राजानः ।

कः कं परित्रायते ? (who protects whom ?)

रामस्यारण्यगमनं, दैत्यराजस्य बलेः बन्धनं, पाण्डवानां वनवासं, वृष्णीनां ध्वंसं, नलस्य राज्यात् परिभ्रंशनम्, अर्जुनस्य नाट्याचार्यकं, रावणे पतनं विचार्यात्र संसारे जनः कालवशात् सर्वं सहते कः जनः कं परित्रायते ? यदि ईदृशानां भुरिधाम्नां महीयसामेतादृशी गतिः ,तदा अल्पीयोभिरन्यपरिरक्षणं सुतरामेव दुष्करमिति भावः ।

कालेनैव निमीलिताः (eyes won't close at the time)

महेन्द्रस्य सुहृत्सखा भूत्वा स्वर्गे गतः सः दशरथः क्व ? तथा जलनिधेः वेलां बद्धा । लोकं पालयन्, समुद्रवेलामपि नियम्य, सागरपरिवृतां भूमिं शासत्, सः नृपः सागरः क्व ? करतलमन्थनात् जातः अयोनिसम्भवः सः पृथुः क्व ? अदिराजः मनुः क्व ? कालेनैव निमीलिताः। कालोहि बलवत्तरः । मान्धाता, नहुषः, सत्यव्रतः, सरथाः, सकुञ्जखराः शक्रासनध्यासिनः महात्मना कालेनैव अनुकृताः , कालेन निर्वासिताः । कालोहि जगदाधारः ,कालाधारो न विद्यते, इति न्यायप्रवादात् सर्वं कालेनैव जायते, कालेनैव विलीयते इति भावः ।

पञ्चतन्त्रे चतुर्थं तन्त्रं लब्धप्रणाशम्

अतिथिसत्कारात् स्वर्गलाभो जायते (by serving the guests one heavenly comforts)

प्रियो वा द्वेष्यो वा मूर्खो वा यदि पण्डितो वा वैश्वदेवान्तमापन्नः यः सः अतिथिः स्वर्गसंक्रमः । वैश्वदेवान्ते श्राद्धे अतिथिं गृहं न, गोत्रं च न । विद्यां तथा कुलञ्च वंशञ्च न पृच्छेत् । जिज्ञासामन्तरेणैवासौ सत्कर्त्तव्यः । यस्तु दूरेण मार्गेण यः श्रमः तेन श्रान्तं वैश्वदेवान्तं गृहस्थैः यथाविधि तत्कर्मसमापनानन्तरम् आगतम् अतिथिं पूजयेत् । भोजनदानादिना तोषयेत् सः परमां गतिं याति । अतिथिः अपूजितः यस्य गृहात् विनिश्वसन् याति, तस्य देवताः पितृभिः सह विमुखाः सत्यः गच्छन्ति । इतोऽपि अतिथिः सत्कार्यः इति भावः ।

प्रीतिलक्षणम् (the nature of affection)

ददाति प्रीतिपात्राय, प्रतिगृह्णाति प्रीतिपात्रात्, रहस्यमालपति प्रीतिपात्रेण सह, पृच्छति प्रीतिपात्रं गुह्यमेवेति, भुङ्क्ते प्रणयिगृहे, भोजयते च भक्षणं प्रणयिनम् । दानं, ग्रहणं, रहस्यकथनं, रहस्यप्रश्नः, भोजनं, भोजनदानञ्च एतत् षट्कं प्रीतिलक्षणम्।

मूलान्यपि निकृन्तति (destorys the very vitals)

अविश्वस्तेन विश्वसेत् । विश्वस्ते न अतिविश्वसेत् । विश्वासादुत्पन्नं भयं मूलान्यपि निश्शेषेण छिनत्ति । विश्वस्तत्वेन अनवहिततया अवस्थानात्। साकल्येन मनुजहृदयमजानद्भिः पुरुषैः सततमेव सावहितैः भवितव्यमिति तात्पर्यम् ।

मित्रञ्च वैरमापन्नं शत्रुतोऽपि सुदारुणम् (treating a friend as an enemy, even if differences arise , is highly objectionable)

यः सकृत् एकवारं दुष्टं मित्रं पुनः सन्धातुम् इच्छति सः अश्वतरी गर्भं यथा तथा मृत्युमाश्रयति ।

बुभुक्षितः (those that were eaten)

क्षुदितः जनः बुभुक्षानिवारणार्थं सर्वमेव पापं करोति, क्षीणाः भोज्याद्यभावात् निष्करुणा भवन्ति ।

प्राज्ञः (the wise man)

बुद्धिमान् जनः तीक्ष्णेन अतीव बलवता स्वशत्रोः शत्रुणा, तीक्ष्णं शत्रुं,कण्टकम् कण्टकेनेव सुदृढेन सुखार्थाय एकत्र शत्रुविनाशात्, अन्यत्र शरीरस्थ कण्टकापसारणात् उन्मूलयेत्। समूलमेव तमुत्पाटयितुं यतेत ।

सर्वसुखोपाया वृत्तिः (endowed with all comforts / pleasures)

यः जनः प्राणपरिक्षीणः सहायपरिवर्जितः, सः बधः चेत् तदा सर्वसुखोपायां वृत्तिमारचयेत् । बलसहायहीनानां हि यया वृत्त्या सुखेन प्राणयात्रा भवेत्, सा एव अवलम्बनीया ।

स्वयं विषभक्षणं करोति (observes the matter personally)

यः जनः आत्मनः वीर्येण अधिकबलं शत्रुं मित्रं कुरुते सः स्वयं हि विषभक्षणं करोति । अत्र सन्देहः न । क्षुद्रशत्रुविनाशार्थं प्रबलेन रिपुणा सह मित्रत्वसम्पादनस्य स्वयं विषभक्षणमिव अवश्यमृत्युजनकत्वम् । अत्र संशयः नास्ति ।

सर्वनाशे समुत्पन्ने किञ्चित् त्यक्त्वापि रक्षयेत् (when total destruction is imminent , one should save even by sacrificing a part)

सर्वनाशे समुत्पन्ने अर्द्धं त्यजति पण्डितः । अर्द्धेन कुरुते कार्यं, सर्वनाशो हि दुस्तरः । मतिमान् नरः स्वल्पस्य कृते भूरि न नाशयेत् । एतदेव हि पाण्डित्यं यत् स्वल्पात् भूरिरक्षणम् ।

वित्तशेषं न रक्षति (the remnant wealth doesn't protect)

मलिनैः वस्त्रैः यथा यत्र तत्र उपविश्यते, स्वतः एव मलिनतया तस्य वस्त्रस्य पुनः मालिन्यशङ्काविरहात् एवं तथा चलितवित्तः जनः वित्तशेषं न रक्षति । यत्प्राप्नोति तदेव व्ययं करोति । सर्वधननाशानन्तरं किञ्चिन्मात्ररक्षणे सञ्चयसम्भवाभावतया आग्रहातिशयविरहादिति भावः ।

अमृतविषोभयकल्पा (mixed with both nectar and posion)

एकां नितम्बिनीं मुक्त्वा किञ्चिदपि वस्तु अमृतं न , विषञ्च न । रमण्येव एकाधारेण अमृतरूपिणी विषरूपिणी च । तत्संयोगस्य स्वर्गसुखोपमपरमप्रीतिजनकत्वात्, वियोगस्य च मृत्युक्लेशतुल्यक्लेशप्रदत्वादिति भावः । यस्याः नितम्बिन्याः सङ्गेन जीव्येत, वियोगतः म्रियेत च जनेन । एकैव रमणी संयोगवियोगजनितकालविशेषवशेन अमृतविषोभयकल्पा भवति ।

कठिनहृदया (with hardened heart)

यासां दर्शनं सङ्गमं वा विनापि नाम्नापि कामः स्यात्, तासां नारीणां नेत्रसङ्गमं प्राप्य, यत् न द्रवति जीवजातम् तत् आश्चर्यकरम् । ते जीवाः प्रस्तरवदतिकठिनहृदयाः इति भावः ।

न प्रहर्तव्यम् (should not steal)

स्त्रीविप्रलिङ्गिबालेषु विशेषतः विश्वस्तेषु प्राणत्यागेऽपि सञ्जाते न कर्हिचित् प्रहर्तव्यम् ।

एष धर्मः सनातनः (this is the ancient dharma)

प्राणत्यागेऽपि संस्थिते अकृत्यं नैव कर्त्तव्यम् । कृत्यं च न परित्याज्यम् । एष धर्मः सनातनः ।

योधान् वाच्छन्ति भूपाः (the kings want warriors)

एकेनापि सुधीरेण सोत्साहेन सेनानायकेन सैन्यं रणं प्रति सोत्साहं जायते भग्ने, एकस्मिन्नेव सेनानायके भङ्गमवाप्नुयात् । प्रधानसेनानायके नियमितं हि सैन्यम् इति भावः । अतः एव भूपाः महाबलान् शूरान् वीरान् कृतोत्साहान् योधान् वाञ्छन्ति । रणभीरुन् वर्जयन्ति ।

यथारण्यं तथा गृहम् (as the forest , so is the house)

यस्य गृहे माता नास्ति, प्रियवादिनी भार्या च नास्ति तेनारण्यं गन्तव्यम् । यथारण्यं तथा गृहम् ।

भार्या काराकारिता जरा (oldness is made in the form of wife)

या भार्या दुष्टचारित्रा,सततं कलहप्रिया,पण्डितैः जनैः सा भार्यारूपेण संस्थिता दारुणा जरा । वार्द्धकं सर्वथा शान्तिविधातकत्वात् स्वशरीरक्षयकरीति भावः ज्ञेया । भार्याकाराकारिता जरा एव सा, न तु तात्विकी पत्नी । तस्मात् हेतोः इह संसारे यः आत्मनः सुखमिच्छेत्, स सर्वप्रयत्नेन विशेषचेष्टया सर्वासामेव स्त्रीणां नामापि परिवर्जयेत्। इह भुवि स्त्रीपरतन्त्राणां नास्ति मनागपि सुखमिति समुदिताशयः ।

स्त्रियः विचित्रचरिताः अद्भुतस्वभावसम्पन्नाः भवन्ति । आसामन्तः मनसि यत् विद्यते, जिह्वायां तत् न, जिह्वायां यत् विद्यते तत् व्यवहारे न ब्रूते । एता हि यत् हितं तच्च न कुर्वन्ति ,हितबुद्धिरसां कदापि नोदेति । अतश्च सर्वथैव परित्याज्या एता ।

ये मोहोपहतचेतसः बुद्धिविपर्ययात् शलभाः दीपाभां यथा आलोकशिखामिव रमणीं सेवन्ते, ते विनश्यन्ति । शलभा यथा प्रदीपस्य रमणीयतरमालोकमवलोक्य, तत्पतिता विनाशमुपयान्ति, सुखलालसया रमणीमुपगता अपि तथा विनाशमुपयान्ति।

यतः एता योषितः स्वभावादेव अन्तर्विषमयाः बहिश्च मनोरमाः हृदयहारिण्यः लावण्यविलासादिभिरेव नितरां चेतः मथ्नन्ति । अत एव गुञ्जाफलैः समाकाराः गुञ्जाफलानि यथा आरक्तवर्णानि बहिरेव सुदर्शनानि सेव्यमानानि तु विषवदनिष्टजननानि भवन्ति, तथा नार्यः अपि बहिरेव रमणीयः,सेव्यमानास्तु प्राणनाशिन्यः इति । अतः ललनाजनस्य रूपोपभोगलालसा सुधीभिः सर्वथैव हेया इति निष्कर्षः । पयोमुखविषकुम्भकल्पाः भवन्ति रमण्यः इति भावः ।

स्त्रियः दण्डेन ताडिताः अपि, शस्त्रैः विखण्डिता अपि दानैश्च, संस्तवैः आदरातिशयैः परिचर्यैर्वा न वशं यान्ति । सर्वथा ताः अवशीभूताश्च ।

इह संसारे योषितामन्येन वर्णिष्यमाणादितरेण दौरात्म्येन वर्णितेन किमन्यत् वक्तव्यम् । अतः तत् आस्तां तावत् अन्यदौरात्म्योपवर्णनं तिष्ठतु तावत् , एताः स्वोदरेण विधृतं पुत्रमपि क्रोधेन नाशयन्ति । तेष्वपि जीवितोपमेषु वात्सल्यं नास्ति ।

बालः मूढमतिरेव । बालिकायां कर्कशस्वभावायां स्नेहसद्भावं,तथा कठोरायां सुमार्दवं तथा नीरसायां रसं , रूक्षापि स्नेहवती, कठोरापि कोमलां,नीरसापि सानुरागा विरुद्धकल्पनां कुर्यात् । विद्वांसस्तु न तथा । ते तु तासु कठोरासु नीरसासु च स्त्रीषु ईषदपि स्नेहमार्दवरसयोगः नास्तीति विभावयन्ति ।

न जायते विघ्नः

यः जनः प्रष्टव्यान् स्वहितान् निजमङ्गलकामिनः गुरून् स्वापेक्षया श्रेष्ठान् जनान् पृष्ट्वा कार्यं कुरुते तेषामनुमत्या तस्य कस्मिंश्चिदपि कर्मणि विघ्नः न जायते। आदिष्टं सतां वचनं मदेन यः न करोति सः विनाशमवाप्नोति ।

सः साधुः इति सद्भिरुच्यते (he is declared ' noble ' by the virtuous)

उपकारिषु यः साधुः तस्य साधुत्वे को गुणः ? यः अपकारिषु यः साधुः सः साधुः इति सद्भिरुच्यते ।

नीतिमार्गं न परिलङ्घयन्ति (they willnot trangress the path of morality)

वने मृगमांसभक्ष्याः सिंहाः बुभुक्षिताः सन्तः नैव तृणं भक्षयन्ति । एवं कुलीनाः सत्कुलप्रसूता महिमवन्तः व्यसनेनाक्रान्ताः अपि नीतिमार्गं न त्यजन्ति । न हि सिंहः परालीढयामिषं भोक्तुमिच्छति इति माघोक्तं स्मर्तव्यम् ।

श्वेतभावं न त्यजति शंखः (the conch cannot leave its whiteness)

महान् जनः अन्त्यावस्थः अपि शुद्धतया उन्नतान्तः करणतया सति स्वामिगुणान् प्रभुभावान् न तु जहाति । शङ्खः अग्नेः भुक्तिः तस्याः मुक्तोऽपि श्वेतभावं न त्यजति।

सः वशकारकः (he subjugates)

यत्र सान्त्वनप्रयोगः अथवा दानमपि कर्तुं न शक्यते जनैः तत्र भेदोपायः प्रयोक्तव्यः । यतः सः भेदः शत्रुवशीकरणोपायः । एवमेव बहुसहायशालिनोऽपि वीरपुरुषाः भेदेन वश्यतां नीयन्ते ।

यत्परिणामे हितं तदाद्यं भक्षणीयम् **(one should eat according to one's ability)**

यद्वस्तु भक्षयितुं शक्यं तथा यत् ग्रस्तं प्रशस्तं परिणमेत्, यच्च परिपाके हितकरं स्यात्, अभ्युदयार्थिना तदाद्यं भक्षणीयम् ।

शूरं भेदेन योजयेत् **(the brave must be conquered through ' bheda')**

सामदानभेददण्डोपायेषु कः उपायः कुत्र अवलम्बनीयः इत्यपेक्षायाम् उत्तमं बलाधिकं प्रणिपातेन साम्ना शूरं भेदेन स्वपक्षीयैः सह विच्छेदसाधनेन नीचं शत्रुम् अल्पप्रदानेन यत्किञ्चित् ज्ञानेन तथा समशक्तिं पराक्रमैः योजयेत् । तत्र तत्र सामादिचतुष्कं प्रयुज्य तान् रिपून् विजयेत् ।

जातितः भयं मन्तव्यम् **(fear is to be known through one's class jati ?)**

गोषु सम्पन्नं सम्भाव्यम् । ब्राह्मणे तपः सम्भाव्यम् । स्त्रीषु चापल्यं सम्भाव्यम्। जातितः भयं सम्भाव्यम् ।

पञ्चतन्त्रे पञ्चमं तन्त्रम् अपरीक्षितकारकम्

वित्तविहीनता (poverty)

निर्धनस्य पुरुषस्य शीलं शौचं क्षान्तिः दाक्षिण्यं मधुरता कौलीन्यम् नाम आभिजात्यम् एते सर्वे गुणाः नैव स्फुरन्ति । दरिद्रस्य सन्तोऽपि एते गुणाः धनाभावादेव सर्वैः अनादृतत्वेन नैव विकासं प्राप्नुवन्ति ।

यदा पुरुषः वित्तविहीनः स्यात् तदा मानो वा चित्तोन्नतिर्वा यद्वा सम्मानं वा दर्पो वा गर्वो वा विज्ञानं विभ्रमः विलासित्वं वा सुबुद्धिः वा एतत् सर्वं प्रणश्यति ।

वसन्तवातेन आहता शिशिरऋतोः श्रीरिव बुद्धिमतामपि निर्धनानां बुद्धिः सततं कुटुम्बभरचिन्तया लयं याति धनराहित्येन । वसन्तवायुना यथा शिशिरस्य शोभा विलुप्ता भवति, तथा धनाभावकृतचिन्तया बुद्धिरपि बुद्धिमतामिति निष्कर्षः ।

महाबुद्धेरपि निर्धनस्य पुरुषस्य बुद्धिः सततं घृतलवणतैलतण्डुलवस्त्रेन्धनानां चिन्तया धनाभावतया कथं नित्यप्रयोजनी यान्यपि एतानि द्रव्याणि सङ्ग्रहीतव्यानि इत्येवं रूपया नश्यति।

धनहीनस्य लोकस्य गृहं प्रियदर्शनमपि नष्टाः अदृश्याः विलीननक्षत्रं गगनमिव शुष्कं सरः इव अप्रीतिकरं श्मशानमिवाप्रियं भवति ।

वित्तैः हीनाः लघवः क्षुद्रत्वेन गण्याः जनाः, सततं पुरः निवसन्तोऽपि पयसि जाता एव विनष्टाः, पयसां बुद्बुदा इव न विभाव्यन्ते कैरपि असारत्वात् ।

जननिवहाः सुकुलं कुशलं सुजनं निर्धनं विहाय कुलकुशलशीलविकलेऽपि धनिनः कल्पतराविव नित्यमनुरक्ता भवन्ति जननिवहाः ।

इह संसारे पूर्वसुकृतं विकलम् । न किमपि प्रत्युपकारकं भवेत् । यतः विद्यावन्तः कुलसमुद्भूताः अपि जनाः केनापि पूर्वमुपकृता यस्य यदा सम्पत् स्यात्, तदा तस्य अनुपकारकस्यापीति दासतां यान्ति । अकृतज्ञतया क्षयितधनं स्वोपकारिणमपि विहाय धनवन्तं सेवन्ते ।

जनः कामं यथेच्छं गर्जन्तमपि वृथाडम्बरपूर्णवाक्यप्रयोगपरमपि अनेन असौ अन्तः सारशून्य इति ध्वन्यते पयसां पतिं रत्नाकरत्वात् धनिनमिति ध्वनिः । अयं लघुः इति न आह, धनवान् वृथा भाषी अपि लघुप्रकृतिरयमिति न लोकैः उपेक्ष्यते इति भावः । परिपूर्णाः धनवन्तः इह संसारे यत् कुर्वन्ति न्यायमन्यायं वा यत् विदधति तत् सर्वं तु अलज्जकरम् । सुप्रचुरधनत्वात् रत्नाकरोपमाः धनिनः यदेव कुर्वन्ति तदेव शोभते। धनमेवात्र सकलगुणाधानहेतुः ।

सुपरीक्षितं कर्तव्यम् (should do after proper observation)

अपरीक्ष्य न कर्त्तव्यं किमपि कार्यम् सुपरीक्षितं कार्यं कर्त्तव्यम् । अपरीक्ष्य कृतं चेत् पश्चात् सन्तापः भवति।

संस्पर्शः चन्दनादतिरिच्यते (a touch that is more pleasing than sandal paste)

दुर्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी खलः ईदृशः कुपुत्रोऽपि पुंसां हृदयानन्दकारकः भवेत् । अपत्यस्नेहस्य सर्वस्नेहोत्कर्षवत्वेन सर्वेषामेव दोषाणां विस्मारकत्वात् । पुत्रो यादृश एव भवतु । तस्य अनिष्टशङ्कया चित्तं सदैव उद्विजते पित्रोः इति तात्पर्यम् । लोकः चन्दनं शीतलं किल । एवञ्च भाषते कथयति किन्तु पुत्रगात्रस्य संस्पर्शः चन्दनात् अतिरिक्तः शीतलो भवति इति । पुत्रस्य स्नेहबन्धनं सर्वबन्धनात् दुश्छेद्यम् ।

अतिलोभः न कर्त्तव्यः (excess greediners is bad)

लोभं नैव परित्यजेत् । अतिलोभाभिभूतस्य मस्तके चक्रं भ्रमति ।

न बन्धुमध्ये धनहीनजीवितम् (one shouldn't be poor , while living among relatives)

व्याघ्रगजादिसेवितं शार्दूलहस्त्यादिभिः अध्युषितं जनेन हीनं बहुकण्टकावृतं वनं, तथा तृणानि शय्यापरिधानवल्कलं वरम् । किन्तु बन्धूनां मध्ये धनहीनजीवितं न वरम् । सधनबान्धवसमीपे दरिद्रात्मीयानामादराभावस्यातीवासहनीयत्वात् इति भावः।

निर्धनतायाः दुःखहेतुता (poverty is the cause for sorrow)

येषां हि धनं न स्यात्, सुसेवितोऽपि स्वामी नाद्रियते तान् । कदाचित् सेवां त्यक्ष्यतीति धिया प्रभुः धनवन्तं भृत्यमाद्रियते । निर्धनत्वात् लुब्धश्चौरोऽयमिति मत्वा द्वेष्टि । साधवः अपि ज्ञातयः सहसा त्यजन्ति । नाद्रियन्ते । गुणाः दयादाक्षिण्यादयः न राजन्ते तेषाम् तनुजाः त्यजन्ति तान् । आपदः विस्तारं गच्छन्ति । सुवंशजापि भार्या साधु न सेवते तान् । नीतिमार्गेण आरोपितविक्रमाण्यपि मित्राणि च यान्ति तेभ्यः । निर्धनता हि सर्वापदामास्पदमिति निष्कर्षः ।

अर्थं विना नैव प्राप्नोति (doesn't get without money)

अत्र मनुष्यलोके संसारे मानवः शूरः सुरूपः सुभगः तथा वाग्मी भवतु । शस्त्राणि शास्त्राणि च विदाङ्करोतु । किन्तु अर्थं विना यशः मानञ्च नैव प्राप्नोति। धनमेव कीर्तिमानयोः निदानमिति भावः।

जीवन्नपि दरिद्रः मृत एव (a poorman , though alive , is dead)

तानि सम्पत्काले यथा अवस्थितानि इन्द्रियाणि अविकलानि अधुना दरिद्रदशायामपि तथैव अविकृतानि तिष्ठन्ति । तदेव नाम वर्तते। नाम अपि न परिवर्तितम् । सा पूर्वकालिकी । बुद्धिः अपि अप्रतिहता अस्ति । तदेव च वचनमस्ति। किन्तु स एव पुरुषः धनजनिततेजसा विरहितः चेत् क्षणेन बाह्यः मृत इव बहिरवस्थानयोग्यः सर्वेषां त्याज्यः । वाह्यः एव भवतीति एतत् विचित्रम् । धनिनः विकलेन्द्रिया जडबुद्धयः पुरुषभाषिणः यदेव भवन्तु सर्वत्र समाद्रियन्ते, न तु अविकलेन्द्रियग्रामाः तीक्ष्णधियः प्रियंवदाः ख्यातनामानोऽपि क्षयितधना इति निष्कर्षः । दारिद्र्यदोषो गुणराशिनाशी इति हृदयम् ।

शीघ्रं विदेशं गच्छति (goes abroad immediately)

अत्र संसारे दरिद्रः अर्थानां चिन्तया आकुलीकृतामतिः सन् सत्यं परित्यजति, मिथ्या साक्ष्यादिकं ददाति । बन्धुवर्गं त्यजति । तथा जननीं, स्वदेशमपि विहाय प्रियजनं सन्त्यज्य शीघ्रं विदेशं गच्छति ।

बहूनि च लभ्यन्ते (attains a lot)

साहसिकपुरुषाणां यथा समये तुलिताभिः ईदृशो मे तनुः कथमहमीदृशं कर्म कर्त्तुं न शक्नोमि ? इत्येवं विविच्य चेष्टिताभिः शरीरैः दुर्लभानि बहूनि वाच्छितानि च द्रविणानि यथेष्टं लभन्ते।

दैवस्य बलवत्वेऽपि पुरुषकारस्यापि बलवत्त्वम् (even though fate is strong human effort is also very strong)

आकाशात् कदाचित् जलं पतति दैवानुकम्पया । पुष्करिण्यादौ पातालात् अपि जलमुत्तिष्ठति खननादिरूपपौरुषेण । दर्शनायोग्यतया दैवमचिन्त्यम् । अत एव बलवत् पुरुषकारः अपि बलवान् एव । दैवस्य पुरुषकारसाध्यत्वेन 'एवं पुरुषकारेण विना दैवं न सिद्ध्यति' इति स्मरणात्। नभोदेशात् जलवर्षणस्य दैवाधीनतया अनिश्चितत्वं, किन्तु पुरुषप्रयत्नरूपवरुणमन्त्रजपादिना च तत् शीघ्रमपि सिद्ध्यति । किञ्च खननादिपुरुषव्यापारमात्रसाध्ये पुष्करिण्यादौ दैवानुकूल्यं विनैव पातालादपि जलमुत्तिष्ठति। अतः दैवस्य बलवत्त्वेऽपि पुरुषकारस्यापि बलवत्त्वम् इति निष्कर्षः ।

पुरुषगुणः अदृष्टाख्यः (the qualities of man makes his fate)

पुरुषकारेण पुरुषस्याशेषा अभिमतसिद्धिः भवति । यदपि दैवमिति कथयसि सोऽपि अदृष्टाख्यः पुरुषस्य गुणः । प्राक्तनं सुकृतं दुष्कृतं हि अदृष्टं, तच्च पुरुषप्रयत्नसाध्यमिति तस्य पुरुषगुणत्वमिति भावः ।

उदाराणां चरितमद्भुतम् (the way of the magnamious is truely wonderful)

साधुसाहसिकाः जनाः गुरुलोकात् अतुलं भयं, तथा प्राणान् तृणमिव तुलयन्ति। जीवनसङ्कटे सत्कर्मणि प्रवृत्ता महान्तः गुरुजनेभ्यः प्रतिकूलताचरणादिभयं तथा प्राणनाशभयमपि तुच्छीकृत्यैव प्रवर्तन्ते इति निष्कर्षः । उदाराणामेतत् चरितमाश्चर्यम्। अत्र साधु साहसिकाः इत्यनेनैव उदारार्थं लब्धे पुनरुदारपदग्रहणात् अर्थपुनरुक्तादोषो मन्तव्यः ।

विष्णुरपि श्रममन्तरेण नैव सुखं लेभे (even Lord Vishnu doesn't get happiness without effort)

इह संसारे अङ्गहस्त्यादिकं केशस्यांशम् अदत्वा नाम क्लेशभागिनमकृत्वा ऐहिकभोग्यानि सुखानि अनायासेन नैव लभ्यन्ते कैरपि तथा हि मधुसूदनः मथनाऽय्यस्तैः बाहुभिः लक्ष्मीमालिङ्गति । 'न हि सुखं दुःखैर्विना लभ्यते' इति भावः । विष्णुरपि श्रममन्तरेण नैव सुखं लेभे । का कथा अन्येषाम् ?

पुरुषकारविहीनस्य लक्ष्मीः न तिष्ठति (Goddess Lakshmi doesn't stay with a person lacking in effort)

यः विष्णुः जलगतः सन् चतुरो मासान् आषाढादीन् सततं निद्रां सेवति । 'विष्णुः सदा आषाढे कार्त्तिके च अवबुध्यते' इति शास्त्रमत्रानुस्मर्तव्यम् । नृसिंहकस्यापि तस्य विष्णोः पत्नी लक्ष्मीः कथं चला न स्यात् ? पुरुषकारविहीनस्य लक्ष्मीः न तिष्ठति इति भावः । अलसप्रकृतेः निश्चेष्टस्य पत्नी अपि न शासने तिष्ठति इति तात्पर्यम् । पुरुषेण यावत् साहसं न कृतं , तावत् परभागः दुरधिगमः । इह जगति तुलामधिरूढः भास्वान् जलदपटलानि जयति । जलदपटलानि किं मां रोद्धुं शक्नुयुः इति प्रतिद्वन्द्विभावमागत्य अतितेजस्विना सूर्येणापि पुरुषकारमाश्रित्य तुलां गतेनैव शत्रवः मीघाः जीयन्ते । न तु विना पुरुषकारं का कथा अन्येषाम् ? इति भावः ।

महान्तः एव क्षमाः (only the great forgiveness)

महान्तः एव महतामर्थं साधयितुं क्षमाः भवन्ति । समुद्रात् विना अन्यः कः बडबानलं बिभर्ति? न कोऽपि समर्थः स्यादन्यः ।

उदारचरितानां तु वसुधैव कुटुम्बकम् (for the noble minded the world is the family)

अयमात्मीयः परः अनात्मीयः इति लघुचेतसा अनुदाराणाम् विचारः । किन्तु उदारचरितानां तु वसुधैव कुटुम्बकम् । 'आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः' इति भावः ।

मूर्खपण्डिताः (the foolish schlor)

ये शास्त्रेषु कुशलाः लोकाचारविवर्जिताः ते सर्वे मूर्खपण्डिताः । यथा तथा ते हास्यतां यान्ति ।

सः वान्धवः (he is a relatives)

उत्सवे व्यसने प्राप्ते दुर्भिक्षे शत्रुसङ्कटे राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ।

बुद्धिमतां बुद्धिः

यत्र वायोः सूर्यस्य रश्मीनाञ्च गतिः नास्ति, बुद्धिमतां बुद्धिः तत्रापि आशु सदा प्रविशति।

तत् सौख्यं स्वर्गेऽपि न स्यात् (that comfort doesnot exists even in heaven)

यस्मिन् स्थाने जन्मनः स्यात् तस्मिन् पुंसां यत् सौख्यं भवेत् दिव्यस्पर्शनशोभने मनोरमे तत् सौख्यं स्वर्गेऽपि न स्यात् ।

सङ्गीत भेदाः (division of music)

स्वराः निषादादयः सप्त । निषादरुषभगान्धार, षडज, मध्यमदैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः । ग्रामाः त्रयः । स्वराणां सन्दोहः ग्रामः। षड्जग्रामः, मध्यमग्रामः, निषादग्रामः इत्येतत् ग्रामत्रयम् । तालास्तु एकोन पञ्चाशत् । मात्राः तिस्रः । लयाः त्रयः । स्थानानां त्रयम् । यतीनां विरामाणां पञ्चस्थानानि । आस्यानि मुखानि षट् । रसाः नव । रागाः षट्त्रिंवशतिः । भावाः चत्वारिंशत् स्मृताः । एतद्धि गीतस्य अङ्गानां पञ्चाशीत्यधीकं शतं स्मृतम् । पुरा भरतेन नाट्यशास्त्रप्रणेत्रा मुनिना स्वयमेव वेदस्य उत्कृष्टमेतत् गीताङ्गं प्रोक्तम् ।

लोके देवानामपि गीतात् अन्यत् प्रियं न दृश्यते । तथा हि रावणः कठिनतपश्चरणात् नीरसाः स्नायवः वायुमय्यः वीणातन्त्राः तासां स्वराः वीणावादनपूर्वकस्तुतिगीतानि आनन्दजननात् त्रिलोचनं प्रीणयामास ।

स एव निधनं याति (he alone gets the result)

यस्य स्वयमात्मनः प्रज्ञा नास्ति , यश्च मित्रोक्तं न करोति स एव नाशमाप्नोति।

स्त्रीभिः न मन्त्रयेत् सुधीः (the wise shouldn't delibarate with women)

पण्डितः जनः नारीणामन्नवस्त्रेभूषणाद्यञ्च दद्यात् । रजो दर्शनात् त्रिदिनानन्तरं सङ्गमं कुर्यात् । किन्तु ताभिः सह न मन्त्रयेत् । यत्र स्त्री, यत्र धूर्तः वसति, यत्र बालश्च अप्रशासितः तिष्ठति, तत् गृहं क्षयमाप्नोति इति शुक्रेणोक्तम् । नार्यः केवलं स्वार्थपराः स्वसुखे रताश्च भवन्ति। स्वसुखं विना कोऽपि जनः तासां प्रियः न वल्लभः । यस्मिन् गृहे नित्यमकारणः कलहः स्यात्, तस्मात् कलहस्य अनिष्टकरत्वात् जीवितं वञ्छन् जनः तत् गृहं परिवर्जयेत् । तस्मिन् गृहे न तिष्ठेत् । हर्म्याणि कलहान्तानि । यस्मिन् हर्म्ये कलहः चलति तत् शीघ्रं क्षयं याति । हर्म्याधिकारिणः परस्परं स्वं स्वम् अंशं विभज्य,ग्रहणात् हर्म्यविनाशः वेदितव्यः । कुवाक्येन सौहार्दं नश्यति । राष्ट्राणि कुराजान्तानि । राजदोषेणैव राष्ट्रं ध्वंसं भवति। नृणां यशः कुकर्मान्तः भवति।

स्थानान्तरगमनमेव श्रेयः (it is better to go another place)

ये जनाः मित्रं विपदापन्नं स्वस्थानं स्वगृहं वा परैः पीडितं देशभङ्गं तथा कुलक्षयं न पश्यन्ति, ते पुण्यवन्तः अशक्यप्रतीकारं मित्रप्रभृतिकं परित्यज्य स्थानान्तरगमनमेव श्रेयः । न तु तत्क्षयावलोकनम् ।

सः पुरुषाधमः (he is a wretched person)

अत्र संसारे यः भयाद्वा यदि वा कामात् स्वस्य इच्छया परनिर्मितां वंशजां परिभवं क्षमेत् सः पुरुषाधमः इति ज्ञेयः ।

शठे शाठ्यं समाचरेत् (one should behave deceitfully with a deceitfully men)

कृते उपकारे अपकारे वा प्रतिकारं नाम प्रत्युपकारं प्रत्यकारं वा तथा हिंसिते प्रतिहिंसनं कुर्यात् तत्र दोषः नास्ति । यतः दुष्टे कृतापकारे जने प्रत्यपकारं समाचरेत्। शठे शाठ्यं समाचरेत् ।

असंशयं नरके याति (definitely goes to hell)

यः सुहृत् सापदं मित्रं त्यक्त्वा निष्ठुरतां गच्छति, सः कृतघ्नः तेन पापेन असंशयं नरके याति ।

विवर्धते बुद्धिः (the intellect develops)

यः जनः सततं सर्वविधकर्मसम्पादनकाले ज्ञानिसन्निधौ जिज्ञासते संशयनिर्णयार्थं श्रुणोति , तेषां सदुपदेशवचनम् अनिशं सदुपदेशं चेतसि अभिनिवेशेन धाम्यति,दिवाकरकिरणैः पद्मिनीव तस्य जनस्य बुद्धिः विशेषेणवृद्धिं गच्छति ।

जठरपिठरे सर्वे सम्भवन्ति (everything takes place in the turney)

जठरपिठरे नाम उदररूपेस्थालीविशेषे पूर्णे नाम भक्ष्यपेयादिभिः पूरिते सति प्राणिनां लज्जा अकार्यकारणजनिता स्नेहः प्रियता पुत्रादिषु वा वात्सल्यं, स्वरमधुरता, बुद्धयः, यौवनश्रीः, कान्तासङ्गमः, स्वजनममता, दुःखहानिः, विलासः धर्मः नाम धरतिलोकानिति व्युत्पत्त्या वेदविहितयागाद्यनुष्ठानं, शास्त्रं नाम हितानुशासन-ग्रन्थविशेषोक्तनियमपालनं सुरुगुरुमतिः नाम देवतागुरुजनेषु भक्तिः, यद्वा बृहस्पतिरिव मतिः, शौचं नाम पवित्रता एते सर्वे सम्भवन्ति । बुभुक्षया पीडितस्य तु विद्यमानेष्वपि लज्जादिकेषु तद्रक्षणासम्भवात् इति भावः ।

विदेशगः (the foreign returns)

अन्धो वा बधिरो वा कुष्ठरोगग्रस्तो वा अन्त्यजः स्यात् यः कोऽपि भवेत् सः विदेशगः सन् सलक्षां कन्यां स्वीकरोतु । यद्वा यः तां कन्यां प्रतिगृह्णातु सः विदेशगः स्यात् ।

यादृशी भावना तादृशी सिद्धिः (just as the thought, so is the result)

मन्त्रे,पुण्यक्षेत्रे, ब्राह्मणे देवे, दैवज्ञे, भेषजे, तथा गुरौ यस्य जनस्य यादृशी भावना तस्य तादृशी सिद्धिः भवति ।

इतिश्री विष्णुशर्मविरचिते

पञ्चतन्त्रे अपरीक्षितकारकं नाम पञ्चमं तन्त्रम्।

।। समाप्तमिदं पञ्चतन्त्रम् ।।

हितोपदेशः
मित्रलाभः

विद्याप्रशंसा (in praise of learning)

प्राज्ञः अजरामरवत् विद्यामर्थञ्च साधयेत् । मृत्युना गृहीतकेशेषु इव धर्ममाचरेत्। सर्वद्रव्येषु विद्यैवानुत्तमं द्रव्यमाहुः । कुत इत्युक्ते सर्वदा आहार्यत्वात्, अनर्घत्वात्, अक्षयत्वाच्च । नीचगापि सरित् नीचगापि समुद्रमिव विद्यैव दुर्दर्षं नृपं संयोजयति । भाग्यमतः परम् । विद्या विनयं ददाति । विनयात् पात्रतां याति । पात्रत्वात् धनमाप्नोति । धनात् धर्मं, ततः सुखमाप्नोति। शस्त्रमिति शास्त्रमिति च विद्या द्वे प्रतिपत्तये । शस्त्रविद्या वृद्धत्वे हास्याय कारणं स्यात् । शास्त्रविद्या सदा आद्रियते। शास्त्रं सर्वस्य लोचनम् ।अनेक संशयोच्छेदि । परोक्षार्थस्य दर्शकम्। यस्य नास्ति स अन्ध एव ।

अनर्थहेतवः (causes of destruction)

यौवनं, धनसम्पत्तिः, राज्याधिकारः, अविवेकिता च एकैकमपि अनर्थाय हेतुः स्यात् । यत्र चतुष्टयं तत्र किं वक्तव्यम् ?

किं प्रयोजनम् (of what use ?)

न विद्वान् न धार्मिकः यः पुत्रेण जातेन तेन कोऽर्थः ? काणेन चक्षुषा किं प्रयोजनम् ? चक्षुः पीडैव ।

मूर्खपुत्रः (foolish son)

अजातमृतमूर्खाणां पुत्राणां प्रथमः द्वितीयश्च द्वौ वरम् । अन्तिमः मूर्खस्तु पदे पदे सकृत् दुःखकरौ वरं गर्भस्रावः । वरमपि नैवाभिगमनम् । वरं जातः प्रेतः । वरमपि च कन्या अवजनिता । वरं वन्ध्या भार्या । वरमपि च गर्भेषु वसति । रूपद्रविणगणयुक्तोऽपि अविद्वान् तनयः न वरं भवति।

तस्य जन्मसफलम् (his life is worthless)

येन जातेन वंशः समुन्नतिं याति, तस्य जन्म धन्यम् ।

वन्ध्या कीदृशी ? (of what nature a barren woman ?)

गुणगणगणनारम्भे यस्य ससम्भ्रमा कठिनी न पतति, तेनाम्बा यदि सुतिनी तर्हि वन्ध्या कीदृशी भवति ?

नीचः

यस्य मनः दाने तपसि शौर्ये विद्यायाम् अर्थलाभे च न प्रथितं सः मातुः उच्चारः एव ।

वरमेको गुणीपुत्रः (better a single , but virtuous son)

गुणीपुत्रः एकः अपि वरमेव । न च मूर्खशतैरपि । एकः चन्द्रः तमो हन्ति । न च तारागणैरपि । पुण्यतीर्थे कापि अतिदुष्करं तपः कृतं येन तस्य वश्यः, समृद्धः, धार्मिकः, सुधीः पुत्रः भवेत् ।

सुखदायकाः (givers of happiness)

अर्थागमः, नित्यमरोगिता, प्रिया, प्रियवादिनी च भार्या, वश्यश्च पुत्रः, अर्थकरी च विद्या च षट् जीवलोकेषु सुखदायकाः भवन्ति ।

वरमेकः पुत्रः

आढकैः आपूरणा कुशूला बहुभिः पुत्रैः कः धन्यः ? यत्र कुलालम्बी पिता विश्रूयते वरमेकः पुत्रः ।

शत्रुचतुष्टयम् (the four enemies)

ऋणकर्ता पिता शत्रुः । माता च व्यभिचारिणी शत्रुः । भार्या रूपवती शत्रुः । अपण्डितः पुत्रः शत्रुः ।

गुणवान् पूज्यते (the virtuous is respected)

यस्य कस्य प्रसूतेऽपि गुणवान् नरः पूज्यते वंशविशुद्धोऽपि निर्गुणं धनुः किं करिष्यति ?

पशुतुल्याः (equal to animal)

आहारनिद्राभयमैथुनञ्च समानमेतत् पशुभिर्नराणाम् । मानवानामधिकः विशेषः धर्मः धर्मेण हीनाः पशुभिः समानाः ।

तस्य जन्म निरर्धकम् (his life is uselers)

यस्य धर्मार्थकाममोक्षाणामेकोऽपि न विद्यते, अजागलस्तनस्येव तस्य जन्म निरर्थकम् ।

केषाञ्चिदालस्यवचनम् (the talk of some lazy persons)

आयुः, कर्म, धनं, विद्या, मरणमेतानि पञ्चापि जीवस्य गर्भस्थस्यैव सृज्यन्ते। किञ्च महतामपि अवश्यं भाविनो भावाः भवन्ति । यथा- नीलकण्ठस्य नग्नत्वं, हरेः महाहिशयनम् । अन्यच्च- यदभावि न तद्भावि । भावि चेत् न तदन्यथा इति चिन्तानि । वारकोऽयमौषधं किमर्थं न पीयते इति कार्याक्षमाणां केषाञ्चिदालस्य वचनम् ।

पुरुषकारेण यत्नं कुर्यात् (should endeavour win enthusiasm)

पूर्वजन्मकृतं शुभाशुभरूपं कर्म एव दैवमिति कथ्यते । तस्मात् पुरुषकारेण उत्साहेन यत्नं कुर्यात् । दैवमिति सञ्चिन्त्यात्मनः प्रयत्नं न त्यजेत्। अनुद्योगेन नामाप्रयत्नेन तिलेभ्यः तैलं न सिद्ध्यति । उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः । दैवेन देयमिति कापुरुषाः नाम प्रयत्नं कर्तुमसमर्थाः वदन्ति । दैवं निहत्य आत्मशक्त्या पौरुषं करणीयम् । यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ? यथा कुलालः मृत्पिण्डतः यद्यदिच्छति तत्कुरुते तथैव मानवः आत्मकृतप्रयत्नानुरूपेण फलितमाप्नोति। अपरञ्च काकतालीयवत् अग्रतः प्राप्तं निधिं दृष्ट्वापि न स्वयं दैवमादत्ते । पुरुषार्थमपेक्षते। कार्याणि उद्यमेन हि सिद्ध्यन्ति । न मनोरथैः । सुप्तस्य सिंहस्य मुखे मृगाः न प्रविशन्ति ।

न पाठितः शत्रुः

येन बालः न पाठितः सा माता शत्रुः । स पिता वैरी । न पाठितः बालः सभामध्ये न शोभते यथा हंस मध्ये बकवत् ।

विद्याहीना न शोभन्ते (uneducated donot shine)

रूपयौवनसम्पन्नाः विशालकुलसम्भवाः अपि विद्याहीनाः निर्गन्धा किंशुका इव न शोभन्ते । पुस्तकेषु च नाधीतं, नाधीतं गुरुसन्निधौ न शोभते सभामध्ये जारगर्भ इव स्त्रियाः ।

मूर्खो याति प्रवीणताम् (the fool turns learned)

काचः काञ्चनसंसर्गात् मारकतीः द्युतीः धत्ते । तथा सत्सन्निधानेन मूर्खः प्रवीणतां याति । मतिः हीनैः सह समागमात् ह्रीयते । समैश्च विशिष्टैश्च समतां विशिष्टतां च एति ।

फलवती न भवेत् (doesn't become fruitful)

अद्रव्ये निहिता काचित् क्रिया फलवती न भवेत् । व्यापारशतेनापि बकः शुकवत् न पाठ्यते ।

याति देवत्वं महद्भिः (attains divinity by the noble)

कीटोऽपि सुमनः सङ्गात् सतां शिरः आरोहति । अश्मापि नाम शिलापि महद्भिः सुप्रतिष्ठितः देवत्वं याति ।

सत्सन्निधानेन दीप्यते (shines forth due to the association of the noble)

हीनवर्णोऽपि उदयगिरेः द्रव्यं सन्निकर्षेण यथा दीप्यते तथा हीनवर्णोऽपि सत्सन्निधानेन दीप्यते ।

गुणज्ञेषु गुणा भवन्ति (qualities become revealed in the qualified)

सत्यादिसद्गुणाः गुणज्ञेषु सद्गुणाः भवन्ति । ते एव निर्गुणं प्राप्य दोषाः भवन्ति । आस्वादतोयाः नद्यः प्रवहन्ति, समुद्रमासाद्य पेयाः भवन्ति ।

कालो गच्छति (time passes)

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । व्यसनेन निद्रया कलहेन च कालो गच्छति मूर्खाणाम् ।

साधयन्ति आशुकर्माणि (complete the works quickly)

असाधनाः नाम साधनशून्याः, वित्तहीनाः नाम धनशून्याः च बुद्धिमन्तः सुहृत्तमाः कार्याणि आशु नाम शीघ्रं साधयन्ति ।

मूढमाविशन्ति न पण्डितम् (fear enters the stupid ; not the learned)

शोकस्थानसहस्राणि भयस्थानशतानि च दिवसे दिवसे मूढमाविशन्ति, न पण्डितम्। उत्थायोत्थाय बोद्धव्यम् । महद्भयमुपस्थितं, मरणव्याधिशोकानामद्य किं निपतिष्यति इति अन्वेषणीयम् । किन्तु आत्मसन्देहे प्रवृत्तिः न विधेया ।

न गतिर्जायते शुभा

अनिष्टात् इष्टलाभेऽपि शुभागतिः न जायते । अमृतं विषसंसर्गः यत्रास्ते तदपि मृत्यवे भवेत् । सर्वत्रार्थार्जनप्रवृत्तौ सन्देह एव ।

धर्मस्याष्टविधः स्मृतः (dharma is of eight types)

इज्या नाम यज्ञः, अध्ययनं, दानं, तपः, सत्यं, धृतिः नाम इन्द्रियनिग्रहः, सहनं, लोभराहित्यमिति धर्मस्याष्टविधः स्मृतः । तत्र पूर्वचतुर्वर्गः दम्भार्थमपि सेव्यते। उत्तरस्तु चतुर्वर्गः महात्मन्येव तिष्ठति ।

गतानुगतिको लोकः (people follow the trodden path)

कुट्टनीमुपदेशिनीं, गोघ्नं द्विजमपि धर्मे न प्रमाणयति । गतानुगतिको लोकः।

सफलं दानम् (the donation becomes fruitful)

मरुस्थल्यां वृष्टिः, क्षुधार्ते भोजनं यथा तथा दानं दरिद्रे दीयते सफलं भवति।

दयां कुर्वन्ति साधवः (the goodnatured are compassionate)

आत्मनः प्राणाः यथा अभीष्टाः तथा भूतानामपि अभीष्टाः । अतः साधवः आत्मौपम्येन भूतानां दयां कुर्वन्ति ।

आत्मौपम्येन प्रमाणमधिगच्छति

पण्डितः पुरुषः प्रत्याख्याने, दाने, सुखदुःखे, प्रियाप्रिये च आत्मौपम्येन प्रमाणमधिगच्छति । अन्यच्च मातृवत्परदारेषु, परद्रव्येषु लोष्ठवत् आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः ।

सात्विकं दानम् (charity that of sattvic nature)

दरिद्रेभ्यः दातव्यम् । ऐश्वर्यसमृद्धस्य धनं मा प्रयच्छेत् । व्याधि तस्यौषधं सफलं स्यात् । नीरुजस्य औषधैः किं प्रयोजनम् ? अनुपकारिणे दातव्यमिति यत् दानं देशे काले पात्रे च तद् दानं सात्त्विकं विदुः ।

स्वभाव एवातिरिच्यते (one's nature is strongest)

धर्मशास्त्रपठनेन, वेदाध्ययनेन च दुरात्मनः स्वभावः न त्यजति । सज्जनः कदापि सद्गुणं न त्यजति । गवां पयः प्रकृत्या मधुरमेव खलु ।

ज्ञानं भारः क्रियां विना (knowledge that is not followed ,is burden only)

अवशेन्द्रियचित्तानां वेदशास्त्रादिज्ञानं सर्वं च आचरणस्य शून्यत्वात् गजस्नानमिव निरुपयोगं भवति यथा हस्तिस्नानमिव तथैव विधवायाः आभारणानि अपि भरहेतुना शोभविहीनानि भवन्ति ।

विश्वासो नैव कर्तव्यः (shouldn't beleive it)

नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां स्त्रीषु राजकुलेषु च विश्वासः नैव कर्तव्यः ।

स्वभावो मूर्ध्नि वर्तते (manners is most valued)

विज्ञानिनः सर्वेषां प्राणिनां तेषां च सर्वस्य स्वभावाः परीक्ष्यन्ते । नेतरे गुणाः । यस्मात् कारणात् सर्वान् गुणान् अतीत्य स्वभावः मूर्ध्नि वर्तते ।

ललाटे लिखितं प्रोज्झितुं समर्थः नास्ति (none is capable to overcom fate)

गगनविहारी, कल्मषध्वंसकारी, दशशतकरधारी, ज्योतिषां मध्यचारी, विधुरपि विधियोगात् राहुणा ग्रस्यते । ललाटे लिखितं प्रोज्झितुं समर्थः नास्ति खलु ।

न याति विक्रियाम् (doesn't alter)

सुजीर्णमन्नं, सुविचक्षणः सुतः, सुशासिता स्त्री, सुसेवितः नृपतिः, सुचिन्त्यचोक्तं, सुविचार्यकृतं कार्यं सुदीर्घकालेऽपि न याति विक्रियाम् ।

दुःखभागिनः (the miserable)

ईर्ष्यी, घृणी, असन्तुष्टः, क्रोधनः, नित्यशंकितः, परभाग्योपजीवी च षडेते दुःखभागिनः ।

क्लिश्यन्ते लोभमोहिताः (enamored by greed, gets into miseries)

बहुश्रुताः शास्त्राणि धारयन्तः सुमहान्तः संशयानां छेत्तारः अपि लोभमोहिताः क्लिश्यन्ते ।

लोभः पापस्य कारणम् (avarice is the cause for sin)

लोभात् प्रभवति क्रोधः । लोभात् कामः प्रजायते । लोभात् मोहश्च नाशश्च। लोभः पापस्य कारणम् ।

धियोऽपि पुंसां मलिनी भवन्ति (even the minds of the society)

असम्भवं हेममृगस्य जन्म । तथापि रामः मृगाय लुलुभे । प्रायः समासन्नविपत्तिकाले पुंसां धियोऽपि मलिनी भवन्ति ।

गणस्याग्रतः न भवेत् (shouldn't be ahead of the society)

कार्ये सिद्धे फलं समं भवति । यदि कार्यविपत्तिः स्यात् मुखरगः तत्र हन्यते। अतः न गणस्याग्रतः गच्छेत् ।

आपत्काले (in times of distress)

आपदामापतन्तीनां हितोऽपि हेतुतां याति । यस्मात् कारणात् मात्रुजङ्घाहि वत्सस्य बन्धने स्तम्भी भवति । विपन्नानामापदुद्धरणक्षमः यः सः बन्धुः । भीतपरित्राणवस्तूपलम्भपण्डितः न तु बन्धुः ।

प्रकृतिसिद्धमिदम् (obtained naturally)

विपत्काले विस्मय एव कापुरुषलक्षणम् । तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्। यतः विपदि धैर्यम् अथाभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि चाभिरुचिः, श्रुतौ व्यसनं, च प्रकृतिसिद्धमिदं महात्मनाम् ।

भुवनत्रयतिलकम् (excellent among the three worlds)

यस्य सम्पदि न हर्षः, विपदि न विषादः, रणे च न भीरुत्वं, तं भुवनत्रयतिलकं सुतं जननी विरलं जनयति ।

षट् दोषाः (six faults)

भूतिमिच्छता पुरुषेणेह हातव्याः दोषाः षट् । निद्रा, तन्द्रा, भयं, क्रोधः, आलस्यं, दीर्घसूत्रता च ।

ऐकमत्यं महाबलम् (unity has great strength)

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका । तृणैः गुणत्वमापन्नैः मत्तदन्तिनः बध्यन्ते । स्वकुलैः अल्पकैरपि पुंसां संहतिः श्रेयसी । तुषेणापि परित्यक्ताः तण्डुलाः न प्ररोहन्ति ।

हितबुद्धयः (wishing the welfare of others)

माता मित्रं पिता चेति स्वभावात् त्रितयं हितम् । अन्ये कार्यकारणतश्च हितबुद्धयः भवन्ति।

पुण्यवान् (the virtuous man)

यस्य मित्रेण सम्भाषः, यस्य मित्रेण संस्थितिः, यस्य मित्रेण संलापः ततो नास्तीह पुण्यवान्।

विधातृवशादुपैति (experiences by the decree of Brahma)

यस्मात् कारणात् येन साधनेन यथा यस्मिन् काले यत् यावत् यत्र च शुभाशुभमात्मकर्म तस्मात् तेन तथा तदा च तच्च तावच्च तत्र च विधातृवशादुपैति ।

पापवृक्षस्य फलानि (the fruits of the sinful tree)

रोगशोकपरीतापबन्धनव्यसनानि च देहिनामात्मापराधवृक्षाणां फलान्येतानि ।

नीतिवेदिनां न सम्मतम् (unacceptable for the morologists)

आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिवेदिनां सम्मतम् ।

आत्मानं सततं रक्षेत् (one should protect oneself always)

आपदर्थे धनं रक्षेत् । धनात् विशिष्य दारान् रक्षेत् । धनैरपि दारैरपि सततमात्मानं रक्षेत् ।

प्राणाः संस्थितिहेतवः

धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः । तस्मात् तान्निघ्नता किन्न हतम् ? तान् रक्षता किं न रक्षितम् ?

वरं त्यागः (better to leave it)

प्राज्ञः धनानि जीवितञ्चैव परार्थे उत्सृजेत् । धनजीवितयोः विनाशे नियते सति सन्निमिते त्यागः वरं भवति ।

यशः कायेन लभ्येत (one attains fame through the body)

अनित्येन मलवाहिना कायेन नित्यं निर्मलं यशः लभ्येत, ततः किं न लब्धं भवेत् ?

कल्पान्तस्थायिनो गुणाः (good qualities stay until the end of kalpa)

शरीरस्य गुणानाञ्च अत्यन्तमन्तरं दूरम् । शरीरं क्षणविध्वंसि । कल्पान्तस्थायिनो गुणाः ।

पाशबन्धं न पश्यति (he doesn't see the binding rope)

यो खगः अधिकात् योजनशतात् इहामिषं पश्यति । स एव प्राप्तकालस्तु पाशबन्धं न पश्यति ।

बलवान् विधिः (fate is stronger)

शशिदिवाकरयोः ग्रहपीडनं, गजभुजङ्गयोरपि बन्धनं, मतिमतां दरिद्रतां च विलोक्य, मे मतिः अहो बलवान् विधिः ।

दूरादपि गृह्णाति (accepts / takes even from a distance)

व्योमैकान्तविहारिणोऽपि विहगाः आपदं सम्प्राप्नुवन्ति । अगाध सलिलात् समुद्रादपि मत्स्याः निपुणैः बध्यन्ते । अस्मिन् प्रपञ्चे दुर्नीतं किमस्ति ? सुचरितं किमस्ति ? स्थानलाभे गुणः कः ? कालो हि व्यसनप्रसारितकरः दूरादपि गृह्णाति।

मित्राणि कर्तव्यानि (one should make friends)

यानि च मित्राणि कर्तव्यानि शतानि च । लोते बुधः यद्येन युज्यते तत् तेन योजयेत् । अज्ञातकुलशीलस्य वासः न देयः ।

यथोचितं कुर्यात् (should act according to the situation)

यावद्भयमनागतं तावत् भयस्य भेतव्यम् आगतं तु भयं वीक्ष्य नरः यथोचितं कुर्यात् ।

आतिथ्यं कार्यम् (should honour the guests)

अरावपि गृहमागते उचितमातिथ्यं कार्यम् । दृमः पार्श्वगतां छेत्तुः छायां नोपसंहरते । यद्यन्नं नास्ति तदा सुप्रीतेनापि वचसा तावदतिथिः पूज्य एव ।

नोच्छिद्यन्ते कदाचन (doesn't get separated any time)

तृणानि भूमिरुदकं वाक् सूनृता च चतुर्थी अपि एतानि सतां गेहे नोच्छिद्यन्ते कदाचन।

अभ्यागतः गुरुः (the guest is the guru)

बालो वा वृद्धो वा युवा वा गृहमागतः सर्वस्याभ्यागतः गुरुः तस्य पूजा विधातव्या ।

दयां कुर्वन्ति साधवः (the holy are compassionate)

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः । चन्द्रः चाण्डालवेश्मनः ज्योत्स्नां न हि संहरते ।

पुण्यमादाय गच्छति (goes taking away the punya)

यस्य गृहात् अतिथिः भग्नाशः प्रति निवर्तते, सः तस्मै दुष्कृतां दत्वा पुण्यमादाय गच्छति।

सर्वदेवमयो अतिथिः (the guest is of the form of all gods)

वर्णस्य उत्तमस्यापि, नीचोऽपि गृहमागतः यथायोग्यं पूजनीयः । अतिथिः सर्वदेवमयः।

स्वर्गगामिनः (these go to heaven)

ये नराः सर्वहिंसानिवृत्ताः, ये सर्वसहाश्च सर्वाश्रयभूताश्च ते नराः स्वर्गगामिनः।

एक एव सुहृद्धर्मः (the one and only dharma of friendship)

यः निधनेऽप्यनुयाति स एक एव सुहृद्धर्मः । अन्यत् सर्वं शरीरेण समं नाशं गच्छति ।

एरण्डोऽपि दृमायते (even the carter plant is treated like a huge)

यत्र विद्वज्जनः नास्ति तत्र अल्पधीरपि श्लाघ्यः । निरस्तपादपे देशे एरण्डोऽपि दृमायते ।

वसुधैव कुटुम्बकम् (the world is one family)

अयं निजः परोवेति गणना लघुचेतसाम् । उदारचरितानान्तु वसुधैव कुटुम्बकम्। न कश्चित् कस्यचिन्मित्रं, न कश्चित् कस्यचिद्रिपुः । तथा रिपवः मित्राणि व्यवहारेण जायन्ते ।

बान्धवः (relationship)

आपत्सु मित्रं, युद्धे शूरः, ऋणे शुचिः, क्षीणेषु वित्तेषु भार्या, व्यसनेषु बान्धवाः, जानीयात् । अपरञ्च उत्सवे, व्यसने, दुर्भिक्षे, राष्ट्रविप्लवे, राजद्वारे, श्मशाने च यस्तिष्ठति स बान्धवः ।

शत्रुनन्दनः (the pleasures of the enemies)

सुहृदां हितकामानां भाषितं यः न श्रुणोति तस्य विपत्सन्निहिता । स नरः शत्रुनन्दनः । गुणवतामपि भयं विद्यते ।

गतायुषः (these whose life has come to an end)

ये दीपनिर्वाणगन्धञ्च न जिघ्रन्ति ।सुहृद्वाक्यं न श्रुण्वन्ति । अरुन्धतीं न पश्यन्ति । ते गतायुषः ।

पयोमुखविषकुम्भम् (pot of milk , but mixed with poison (dilibarately)

परोक्षे कार्यहन्तारं, प्रत्यक्षे प्रियवादिनं, तादृशं मित्रं पयोमुखविषकुम्भं वर्जयेत्।

दुर्जनेन न कारयेत् (shouldn't get done by a crook)

दुर्जनेन समं सख्यं वैरञ्चापि न कारयेत् । उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ।

दुर्जनः (wicked person)

मशकः सर्वं खलस्य चरितं करोति । प्राक् पादयोः पतति । पृष्ठमांसं खादति। कर्णे किमपि कलं शनैः विचित्रं करोति । छिद्रं निरूप्य, सहसा अशंकः प्रविशति । तथा मशकसदृशः दुर्जनः । दुर्जनः प्रियवादी च । नैतत् विश्वासकारणम्। जिह्वाग्रे मधु तिष्ठति । हृदि हालाहलं विषं तिष्ठति ।

इहैव फलमश्नुते (experience here itself)

त्रिभिः वर्षैः त्रिभिः मासैः त्रिभिः पक्षैः त्रिभिः दिनैः अत्युत्कटैः पुण्यपापैः इहैव फलमश्नुते ।

स्वभावो न निवर्तते (nature of a person doesn't get altered)

पुण्यैककर्मणां तिरश्चामपि विश्वासो दृष्टः । सतां हि साधुशीलत्वात् स्वभावः न निवर्तते । प्रकोपितस्यापि साधोः मनः विक्रियां नायाति । तृणोल्कया सागराम्भः तापयितुं न हि शक्यम् ।

न कर्तव्यः (shouldn't be done)

चपलेन सह स्नेहः सर्वथा न कर्तव्यः ।

शत्रुणा न सन्दध्यात् (shouldn't have treaty / alliance with an enemy)

संश्लिष्टेनापि सन्धिना शत्रुणा न हि सन्दध्यात् । सुतप्तमपि पानीयं पावकं शमयत्येव ।

दुर्जनः परिहर्तव्यः (wicked person must be avoided)

विद्यया अलंकृतोऽपि सन् दुर्जनः परिहर्तव्यः । मणिना भूषितः सर्पः भयंकरः एव खलु ।

तदन्तं तस्य जीवितम् (his life comes to an end with that)

महताप्यर्थसारेण शत्रुषु विरक्तासु भार्यासु यः विश्वसति तस्य जीवितं तदन्तम्।

सुजनस्नेहः दुर्जनस्नेहः (friendship with a good person- friendship with a wicked)

सुजनस्नेहः कनकघटवत् दुर्भेद्यः, आशुसन्धेयश्च । दुर्जनस्नेहः मृद्घटवत् सुखभेद्यः, दुःसन्धानश्च ।

सतां दर्शनात् सङ्गतम् (friendship by more seeing of the virtuous)

द्रवत्वात् सर्वलोहानां, निमित्तात् मृगपक्षिणां, भयात् लोभात् च मूर्खाणां सतां दर्शनात् सङ्गतं सिद्ध्यति ।

सज्जनः दुर्जनः (the good and wicked person)

सुह्रज्जनाः नारिकेलसमाकारा दृश्यन्ते । दुर्जनः बदरिकाकारा बहिरेव मनोहरा। स्नेहच्छेदेऽपि साधूनां गुणाः विक्रियां नायान्ति । भङ्गेऽपि हि मृणालानामनुबध्नन्ति तन्तवः ।

सुह्रद्गुणाः (qualities of a friend)

शुचित्वं. त्यागिता, शौर्यं, सुखदुःखयोः सामान्यं, दाक्षिण्यं, अनुरक्तिश्च, सत्यता च सुह्रद्गुणाः ।

मित्रस्य दूषणम् (abusing a friend)

रहस्यभेदः, याच्ना, नैष्ठुर्यं, चलचित्तता, क्रोधः, निस्सत्यता चैतन्मित्रस्य दूषणम्।

महात्मनां त्रिकरणशुद्धित्वम् **(purity of mind -speech and act of noble persons)**

मनस्यन्यत् वचस्यन्यत् कर्मण्यन्यत् दुरात्मनाम् । मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।

धर्मे स्वीयमनुष्ठानम् **(practice of dharma by one's own self)**

परोपदेशे पाण्डित्यं, सर्वेषां नृणां सुकरम् । धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ।

तं देशं परिवर्जयेत् **(one should leave that country)**

यस्मिन् देशे न सम्मानः, न वृत्तिः, न च बान्धवः, न च विद्यागमः तं देशं परिवर्जयेत् ।

न कुर्यात् तत्र संस्थितिम् **(one shouldn't live there)**

धनिकः, श्रोत्रियः, राजा, नदी, वैद्यः पञ्च यत्र न विद्यन्ते न कुर्यात् तत्र संस्थितिम् ।

तत्र वासं न कारयेत् **(one shouldn't stey there)**

लोकयात्रा, भयं, लज्जा, दाक्षिण्यं, त्यागशीलता पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत्। ऋणदाता च वैद्यश्च श्रोत्रियः सुजला नदी चतुष्टयं यत्र नास्ति तत्र न वस्तव्यम् ।

तस्य पूजा विधातव्या **(he should be honoured)**

बालो वा यदि वा वृद्धो वा युवा वा गृहमागतः तस्य पूजा विधातव्या सर्वत्राभ्यागतो गुरुः। गुरुरग्निः द्विजातीनां वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणाम् । सर्वत्राभ्यागतो गुरुः । उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः सर्वदेवमयो अतिथिः यथायोग्यं पूजनीयः ।

अनुरक्तस्य लक्षणानि **(the qualities of a lover / affacionate)**

मुखं प्रसन्नं, विमला दृष्टिः, कथानुरागः, मधुरा वाणी, अधिकः स्नेहः, सम्भ्रमदर्शनञ्च सदानुरक्तस्य जनस्य लक्षणानि ।

विरक्तस्य लक्षणानि (the qualities of an indifferent man)

अदृष्टिदानं, कृतपूर्वनाशनं, अमाननं, दुश्चरितानुकीर्तनं, कथाप्रसङ्गेन नामविस्मृतिः, च विरक्तभावस्य जनस्य लक्षणानि ।

धनमूलं प्रभुत्वम् (authority is rooted in wealth)

धनवान् बलवान् लोके सर्वः सर्वत्र सर्वदा । प्रभुत्वं धनमूलं हि राज्ञामपि उपजायते । धनेन बलवान् लोको धनात् भवति पण्डितः । अर्थेन विहीनस्य पुरुषस्याल्पमेधसः क्रियाः सर्वाः ग्रीष्मे कुसरित इव विनश्यन्ति ।यस्यार्थाः तस्य मित्राणि । यस्यार्थाः तस्य बान्धवाः । यस्यार्थाः स लोके पुमान् । यस्यार्थाः स हि पण्डितः ।

शून्यम् (empty)

अपुत्रस्य गृहं शून्यम् । सन्मित्ररहितस्य मूर्खस्य च दिशः शून्याः । सर्वशून्या दरिद्रता ।

दारिद्र्यम्

दारिद्र्यात् मरणाद्वापि दारिद्र्यमपरं स्मृतम् ।अल्पकेशेन मरणं, दारिद्र्यमतिदुःसहम्।

विचित्रमेतत्

धनवतः इन्द्रियाणि यानि अविकलानि, अप्रतिहता बुद्धिः, वचनं आसन्, तानि इन्द्रियाणि अर्थोष्मणा विरहितः सः एव पुरुषः अन्यः क्षणेन भवति । विचित्रमेतत् ।

दरिद्रस्य कुतः सुखम् ?

दैवे अत्यन्तविमुखे यत्ने पौरुषे च व्यर्थे । मनस्विनः दरिद्रस्य वनादन्यत् कुतः सुखम् ?

नानलो याति शीतताम्

मनस्वी म्रियते कामं, कार्पण्यं न तु गच्छति । अनलः निर्वाणमपि आयाति न याति शीतताम् ।

मनस्विनः द्वे वृत्ती

कुसुमस्तबकस्येव द्वे वृत्ती मनस्विनः । मूर्ध्नि वा सर्वेषां तिष्ठेत् । अथवा वने विशीर्येत ।

न प्रकाशयेत् मतिमान्

अर्थनाशं, मनस्तापं, गृहे दुश्चरितानि च वञ्चनञ्चापमानञ्च मतिमान् न प्रकाशयेत्।

कृपणः न प्रार्थ्यते

विभवहीनेन प्राणैः सन्तर्पितोऽनलः वरम् । उपचारपरिभ्रष्टः कृपणः जनः न प्रार्थ्यते ।

निधनता सर्वापदामास्पदम्

दारिद्र्यात् ह्रियम्, एति । ह्रीपरिगतः सत्वात् परिभ्रश्यते । निस्सत्त्वः परिभूयते। परिभवात् निर्वेदमापद्यते । निर्विण्णः शुचमेति । शोकपिहितः बुद्ध्या परित्यज्यते । निर्बुद्धिः क्षयमेति । अहो निधनता सर्वापदामास्पदम् ।

वरं वरं वरम् (good , good and good)

वरं मौनं कार्यं, न च वचनमुक्तं यदनृतं, वरं क्लैब्यं पुंसां, न च परकलत्राभिगमनं, वरं प्राणत्यागः न च पिशुनवाक्येष्वभिरुचिः, वरं भिक्षाशित्वं न च परधनास्वादनसुखम्। वरं शून्या शाला न च खलु वरो दुष्टवृषभः । वरं वेश्या पत्नी न पुनरविनीता कुलवधूः। वरं वासोऽरण्ये, न पुनरविवेकाऽधिप पुरे । वरं प्राणत्यागः न पुनरधमानामुपगमः।

गुणशतमप्यर्थिता हरति (begging destorys all qualities)

सेवेव मानमखिलं, ज्योत्स्नेव तमः, जरेव लावण्यं, हरिहरकथेव दुरितं गुणशतमपि अर्थिता हरति ।

सोऽस्य विश्रामः (death is his peace)

रोगी, चिरप्रवासी, परान्नभोजी, परावसथशायी, यज्जीवति तन्मरणं, यन्मरणं सोऽस्य विश्रामः ।

दुःखमाप्नोति परत्रेह च (gets unhappy in this and the over world)

लोभेन बुद्धिः चलति । लोभः जनयते तृषाम् । तृषार्तः दुःखमाप्नोति परत्रेह च मानवः ।

सर्वा एवापदस्तस्य (he gets into all types of difficulties)

धनलुब्धः, असन्तुष्टः, अनियतात्मा अजितेन्द्रियः यस्य मानसं न तुष्टं, तस्य सर्वा एवापदः।

लब्धाः सर्वाः सम्पत्तयः (all riches are attained)

यस्य मानसं सन्तुष्टं तस्य सर्वाः सम्पत्तयः । ननु भूः चर्मवृत्तेव गूढपादस्य उपानत् । शान्तचेतसां सन्तोषामृततृप्तानां सुखं यत्, तत् धवतां चेतः मितश्चेत् धनलुब्धानां न भवति ।

तेन सर्वमनुष्ठितम् (he has performed / executed everything)

येन आशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितं, तेनाधीतं, शृतं तेन, तेन सर्वमनुष्ठितम्।

धन्यं जीवनम् (his life is blessed)

असेवितेश्वरद्वारम्, अदृष्टविरहव्यथम्, अनुक्तक्लीबवचनं कस्यापि जीवनं धन्यम्।

योजनशतं न दूरम् (even a hunderd yojanas is not a distance)

तृष्णया वाद्यमानस्य योजनशतं न दूरम् । सन्तुष्टस्य करप्राप्तेऽपि आदरः न भवति ।

पदे पदे विपदः स्युः (difficulties at every step)

को धर्मः ? भूतदया । किं सौख्यम् ? अरोगिताजगतिजन्तोः । कः स्नेहः ? सद्भावः । किं पाण्डित्यम् ? परिच्छेदः । कर्तव्याकर्तव्यनिर्णयरूपपरिच्छेदज्ञानमेव पाण्डित्यम् । तादृशेन ज्ञानेन विपत्तयः आपन्नाः नष्टाः स्युः । अपरिच्छेदकर्तृणां पदे पदे विपदः स्युः ।

आत्मार्थे पृथिवीं त्यजेत् (should abandon the country for self-protection)

कुलस्यार्थे एकं त्यजेत् । ग्रामस्यार्थे कुलं त्यजेत् । जनपदस्यार्थे ग्रामं त्यजेत्। आत्मार्थे पृथिवीं त्यजेत् ।

यत्र निर्वृतिः तत् सुखम् (where there is peace , one is happy there)

पानीयं वा निरायासं स्वादन्नं वा भयोत्तरं, विचार्य पश्यामि खलु । यत्र निर्वृतिः तत् सुखम्। भयदायक स्वाद्वन्नात् भूयशून्यं जलं श्रेष्ठम् ।

असारे त्रीणि साराणि (three worthy things in a worthless thing)

संसारविषवृक्षस्य द्वे ह्येव रसवत्फले । काव्यामृतरसास्वादः, सज्जनैः सह सङ्गमः । सत्सङ्गः, केशवे भक्तिः, गङ्गाम्भसि निमज्जनम् इति त्रीणि असारे संसारे साराणि भावयेत् ।

शोकाग्निना दह्यते (gets torm ented by the fire of greif)

अर्थाः पादरजोपमाः, गिरिनदीवेगोपमं यौवनम् । आयुष्यं हिमबिन्दुलोलचपलं, फेनोपजं जीवनम् । स्वर्गार्गलोद्घाटनं धर्मं निश्चलमतिः यः न करोति सः पश्चात्तापहतः जरापरिणतः शोकाग्निना दह्यते।

त्याग एव हि रक्षणम् (renunciation is the only protection)

तटाकोदरसंस्थानां परीवाहाम्भसामिव त्याग एव हि रक्षणम् ।

गन्तुं चक्रे पन्थानम् (path for leaving)

धनी मितम्पचः, निचखान, वित्तं क्षितौ अधोऽधः यत् तत् अधोनिलयः अग्रतः पन्थानं गन्तुं चक्रे।

क्लेशस्यैव भाजनम् (gets only misery)

निजसौख्यं निरुन्धानः यः धनार्जनमिच्छति सः परार्थभारवाहीव क्लेशस्यैव भाजनम् ।

इन्द्रियनिग्रहरहितस्य जीवनं निष्फलम् **(a life without control or senses is useless)**

यः न ददाति नाश्नुते तस्य धनेन किम् ? यः बलेन रिपून् न बाधते तेन किम्? यः श्रुतेन धर्मं नाचरेत् तेन किम् ? यः जितेन्द्रियः न भवेत् तेन किम् ? सर्वं निष्फलमेव ।

कृपणस्य धनम् योजनशतं न दूरम् **(even a hunderd yojanas is not a distance)**

न देवाय, न विप्राय, न बन्धुभ्यः, न चात्मने कृपणस्य धनम् । वह्निनस्करपार्थिवैः याति ।

दुर्लभमेतत् चतुः **(these four are difficult to get)**

दानं, प्रियवाक्यहितं, ज्ञानम्, अगर्वम्, क्षमान्वितं शौर्यं, त्यागसहितञ्च वित्तमेतत् चतुः दुर्लभम् ।

कर्तव्यः **(should do)**

कर्तव्यं सञ्चयो नित्यम् । कर्तव्यो नातिसञ्चयः । अतिसञ्चयशीलः हतो स्यात् ।

धनिनो धनम् **(the wealth of the wealthy)**

यद्दाति यदश्नाति तदेव धनिनो धनम् । अन्यत् सर्वं परैः भुज्यते । दिने दिने विशिष्टेभ्यो यद्दासि, यच्चाश्नासि, तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ।

पण्डितबुद्धयः **(the mind of scholars)**

अप्राप्यं नाभिवाञ्छन्ति । नष्टं शोचितुं नेच्छन्ति । आपत्स्वपि न मुह्यन्ति । ये ते नराः पण्डितबुद्धयः । सर्वदा सोत्साहेन भवितव्यम् । शास्त्राण्यधीत्यापि केचन मूर्खाः भवन्ति । यः पुरुषः क्रियावान् सः विद्वान् । सुचिन्तितञ्चौषधमातुराणां नाममात्रेणारोगं न करोति ।

अध्यवसायभीरुः (lacking in performance)

अध्यवसायभीरोः स्वल्पमपि विज्ञानविधिः गुणं न करोति । अन्धस्य हस्ते प्रदीपस्य सत्त्वेऽपि किमपि वस्तुं द्रष्टुं समर्थः न भवति ।

दुःखानि सुखानि च परिभ्रमन्ति (happiness and grief rotate like wheel)

सुखमापतितं सेव्यं तथा दुःखमापतितं सेव्यम् । सुखानि च दुःखानि च चक्रवत् परिवर्तन्ते।

आयान्ति विवशाः (come infactatuated)

मण्डूकाः निपानमिव, अण्डजाः सरः पूर्णमिव, विवशाः सर्वसम्पदः सोद्योगं नरमायान्ति ।

लक्ष्मीः स्वयं याति (wealth comes on its own)

उत्साहसम्पन्नम्, अदीर्घसूत्रं, क्रियाविधिज्ञं, व्यसनेषु असक्तं, शूरं, कृतज्ञं, दृढसौहृदञ्च निवास हेतोः स्वयं याति लक्ष्मीः ।

अर्थाः कथं सुखावहाः (how riches cause happiness ?)

आर्जने दुःखं जनयन्ति अर्थाः । विपत्तिषु तापयन्ति । सम्पत्तौ च मोहयन्ति । तर्हि अर्थाः कथं सुखावहाः स्युः ?

दूरादस्पर्शनं वरम् (better be far away without touching it)

धर्मार्थे यस्य वित्तेहा तस्य निरीहता वरम् । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।

सर्वत्र भक्ष्यते वित्तवान् (the rich man is being consumed eveything)

यथा हि आमिषमाकाशे पक्षिभिः, भुवि श्वापदैः, सलिले मत्स्यैः भक्ष्यते तथा सर्वत्र वित्तवान् भक्ष्यते ।

अर्थवतां नित्यं भयम् (the rich are always afraid)

मृत्योः प्राणभृतामिव सलिलादग्नेः चोरतः राजतः स्वजनादपि नित्यं भयमर्थवताम्।

इच्छा न निवर्तते (the desire doesn't go away)

इच्छा सम्पद्यतो नास्ति । यत च इच्छा न निवर्तते । जन्मनि क्लेशबहुले अतः दुःखं परं किम् ?

धनं न चिन्तयेत् (one shouldn't think of money)

धनं तावदसुलभम् । लब्धं कृच्छ्रेण पाल्यते । लब्धनाशो यथा मृत्युः तस्मात् एतत न चिन्तयेत् ।

दास्यञ्च शिरसि स्थितम् (servantship sits on the head)

धनतृष्णा परित्यक्ता चेत् कः दरिद्रः ? कः ईश्वरः ? तृष्णायाः प्रसरः दत्तश्चेत् दास्यञ्च शिरसि स्थितम् ।

प्राप्त एवार्थतः (almost attained)

यद्यदेव हि वाञ्छेत, ततो वाञ्छा प्रवर्तते । यतो वाञ्छा निवर्तते सोऽर्थः अर्थतः प्राप्त एव ।

भवन्ति हि महात्मनाम् (belongs to the virtuous)

आमरणान्ताः प्रणयाः । कोपाः तत्क्षणभङ्गुराः । परित्यागाश्च निस्सङ्गाः भवन्ति महात्मनाम् ।

आपदुद्धरणक्षमाः (capable of saving from difficulties)

सन्त एव सतां नित्यमापदुद्धरणक्षमाः । पङ्गमग्नानां गजानां धुरन्धराः गजा एव ।

स एको श्लाघ्यः भुवि (he alone is worthy of praise in this work)

अस्मिन् प्रपञ्चे यस्यार्थिनो वा शरणागता वा आशाविभङ्ग न विमुखाः प्रयान्ति सः धन्यः, सत्पुरुषः, उत्तमः, भुवि मानवानां श्लाघ्यः स एक एव ।

ब्रह्महत्यासमम् (equals to brahmahatya)

लोभात् वा भयाद्वापि शरणागतं यः त्यजेत्, तस्य ब्रह्महत्यासमं पापमाहुः मनीषिणः ।

मित्रं चतुर्विधं ज्ञेयम् (the four types of friendship)

औरसं, कृतसम्बन्धं, तथा वंशक्रमादागतं, व्यसनेभ्यश्च रक्षकं मित्रं ज्ञेयं चतुर्विधम्।

परं बलम् (givers of strength)

अम्भांसि जलजन्तूनां बलम् । दुर्गनिवासिनां दुर्गं बलम् । श्वापदादीनां स्वभूमिः बलम् । राज्ञां सैन्यं परं बलम्।

स स्वामी युज्यते भुवि (that master is worthy)

कुलाचारजनाचारैः अतिशुद्धः प्रतापवान्, धार्मिकः, नीतिकुशलः सः भुवि स्वामी युज्यते ।

दण्डभीतिः (fear of punishment)

परवशेऽस्मिन् जगति दण्डयोगात् नियतविषयवर्ती । साधुवृत्तः दुर्लभः । कृशमपि विकलं वा व्याधितं वा अधनं वा पतिमपि कुलनारी दण्डभीत्या अभ्युपैति ।

असत्सङ्गरहितः (without wrong friendship)

यदा असत्सङ्गरहितः भविष्यसि भविष्यसि । यदा असज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ।

आपत्स्वपि न मुञ्चति (doesn't leave in difficulities)

स्वभावजं तु यन्मित्रं भाग्येनैवाभिजायते । तत् अकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति ।

विश्वासः तादृशः (so much of faith)

पुंसां स्वभावजे मित्रे यादृक् विश्वासः तादृशः न चात्मजे, न सोदर्ये, न दारेषु, न मातरि ।

सर्वमुत्पादि भङ्गुरम्

कायः सन्निहितापायः, सम्पदः पदमापदाम् । समागमाः सापगमाः सर्वमुत्पादिभङ्गुरम् ।

मित्ररत्नम् (friend , who is like a jewel)

मित्रमित्यक्षरद्वयं रत्नमिदं केन सृष्टम् ? शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम्।

तत्त्वनिकषग्रावा विपत् (difficulty , testing touch-store)

नयनयोः प्रीतिरसायनं, चेतसः आनन्दं, सुखदुःखयोः समं पात्रं, यत् मित्रमिदं पुण्यात्मना लभ्यते । ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुलः ते सर्वत्र मिलन्ति । तेषां तु तत्त्वनिकषग्रावा विपत् एव ।

अधृवं नष्टमेव हि

यः धृवाणि परित्यज्य, अधृवाणि निषेवते, तस्य धृवाणि नश्यन्ति । अधृवं नष्टमेव खलु ।

सुहृद्भेदः

धनप्रभावः (the power of money)

यस्यास्ति विपुलं धनं, स नरः ब्रह्महापि पूज्यः । निर्धनः शशिनस्तुल्यवंशोऽपि परिभूयते । अव्यवसायिनम्, अलसं, दैवपरं, साहसाच्च परिहीनं, लक्ष्मीः प्रमदावृद्धपतिमिव उपगूहितुं नेच्छति ।

महत्त्वस्य व्याघाताः (obstacles / impediments to success)

आलस्यं, स्त्रीसेवा, सरोगता, जन्मभूमिवात्सल्यं, सन्तोषः, भीरुत्वं, षट् महत्त्वस्य व्याघाताः।

न वर्धयति तस्य ताम्

यः स्वल्पयापि सम्पदा सुस्थिरम्मन्यो भवति, तस्य भाग्यं न वर्धयति ।

वृद्धं तीर्थेषु निक्षिपेत् (wealth that was developed should be utilies for holy purpose)

अलब्धं चैव लिप्सेत, लब्धं रक्षेदवक्षयात्, रक्षितं वर्धयेत् सम्यक्, वृद्धं तीर्थेषु निक्षिपेत् ।

मास्म जनयेत् पुत्रमीदृशम् (let no mother give birth to such son)

निरुत्साहं, निरानन्दं, निर्वीर्यम्, अरिनन्दनम्, काचित् सीमन्तिनी ईदृशं पुत्रं मास्म जनयेत्।

अनुपभुज्यमानश्च निष्प्रयोजन एव (that which is not enjoyed, is more waste)

अलब्धमिच्छतः, अर्थयोगादर्थस्य प्राप्तिरेव । लब्धस्याप्यरक्षितस्य निधेरपि स्वयं विनाशः । अपि चावर्धमानश्च अर्थः काले स्वल्पव्ययेप्यङ्जनवत् क्षयमेति । अनुपभुज्यमानश्च निष्प्रयोजन एव।

श्वसन्नपि न जीवति (dead, inspite of alive (lit.breathing)

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः । सर्वविद्यानां धर्मस्य च धनस्य च सः हेतुः । दानोपभोगरहिताः दिवसाः यस्य यान्ति, सः कर्मकारभस्त्रेव श्वसन्नपि न जीवति ।

सफलं कुर्यात् (let it succed)

अञ्जनस्य क्षयं दृष्ट्वा, वल्लीकस्य सञ्चयं दृष्ट्वा, दानाध्ययनकर्मसु दिवसं सफलं कुर्यात्।

कः परः प्रियवादिनाम् (for the sweet speaking there are no enemies)

समर्थानामतिभारः कः ? व्यवसायिनां दूरं किम् ? सविद्यानां विदेशः कः ? सप्रियवादिनां परः कः ?

विधेः मनसि यत् स्थितं तदेव फलम् (result is that only which is in the mind of the creater)

नीतिज्ञः इतस्ततः व्यवसायं करोतु नाम । तथापि अस्य फलं विधेर्मनसि यत् स्थितं तदेवास्य फलम् ।

साध्ये सिद्धिर्विधीयताम् (should succed in the effort)

विस्मयः सर्वथा हेयः । सर्वकर्मणा प्रत्यूहः । तस्मात् विस्मयमुत्सृज्य साध्ये सिद्धिः विधीयताम्।

आयुर्मर्माणि रक्षति (life is being protected by life span)

पयोराशौ निमग्नस्य, पर्वतात् पतितस्य च तक्षकेणापि दष्टस्य आयुः मर्माणि रक्षति ।

स्वयमेव मृगेन्द्रता (naturally, the king of animals)

नाभिषेको, न संस्कारः सिंहस्य मृगैः क्रियते । विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता ।

क्रीडन्ति धनिनो अर्थिभिः (the rich play with the poor)

एहि, गच्छ, पत, उत्तिष्ठ, वद, मौनं समाचर इत्येवमाशाग्रहग्रस्तैः अर्थिभिः धनिनः क्रीडन्ति । अबुधैः अर्थलाभाय पण्यस्त्रीभिरिव स्वयमात्मा संस्कृत्य संस्कृत्य परोपकरणीकृतः । प्रकृत्यैव अशुचावपि निपतति चपला या दृष्टिः तामपि सेवकाः बहुमन्यन्ते स्वामिनः ।

योगिनामप्यगम्यः (unattainable even for the yogis)

मौनात् मूर्खः, प्रवचनपटुः वातुलो जल्पको वा क्षान्त्या भीरुः, यदि न सहते प्रायशः नाभिजातः, पार्श्वे वसति नियतं धृष्टः, दूरतश्चाप्रगल्भः सेवाधर्मः परमगहनः योगिनामपि अगम्यः ।

को मूढः सेवकादन्यः (who is more stupid than the servant ?)

उन्नतिहेतोः प्रणमति, जीवितहेतोः विमुञ्चति प्राणान्, सुखहेतोः दुःखीयति, सेवकादन्यः मूढः कः ?

सफलं तस्य जीवितम् (his life is worthwhile)

यस्य जीविते विप्राः मित्राणि बान्धवाः जीवन्ति तस्य जीवितं सफलम् । आत्मार्थं सर्वेऽपि सर्वा अपि जीवन्ति । यस्मिन् जीवति जीवन्ति बहवः, स तु जीवतु।

सेव्यसेवकयोरन्तरम् (difference between the master and the beast)

श्वा आहारदातुपुरतः लाङ्गूलचालनम्, अधश्चरणावपातं, भूमौ निपत्य वदनोदरदर्शनञ्च कुरुते । गजपुङ्गवस्तु धीरं विलोकयति, चाटुशतैश्च भुंक्ते ।

जीवितम् (life)

यज्जीव्यते क्षणमपि प्रथितं मनुष्यैः विज्ञानविक्रमयशोभिरभज्यमानम् । तन्नाम जीवितमिह प्रवदन्ति पण्डिताः । काकोऽपि जीवति चिराय बलिञ्च भुंक्ते ।

पुरुषपशोश्च भेदः कः ? (of what difference between man and the beast)

अहितहितविचारशून्यबुद्धेःश्रुतिसमयैः बहुभिः तिरस्कृतस्य उदरभरणमात्र-केवलेऽच्छोः पुरुषपशोः पशोश्च को विशेषः ?

किं तस्य जीवितफलेन (what is the use of his life ?)

येनात्मजेन गुरौ बन्धुवर्गे भृत्यवर्गे दीने च दयां न कुरुते, मनुष्यलोके तस्य जीवितफलेन किम्? काकोऽपि चिराय जीवति, बलिञ्च भुंक्ते ।

स्वचेष्टितान्येव नरं नयन्ति (man attains sta by his acts only)

लोकेऽस्मिन् न कस्यचित् कश्चिदिह स्वभावात् उदारः अभिमतः खलो वा भवति गुरुत्वं विपरीततां स्वचेष्टितान्येव नरं नयन्ति ।

आरोप्यते निपात्यते (being counted and being thrown away)

महता यत्नेन शैले शिला यथा आरोप्यते,तथात्मा गुणदोषयोः आरोप्यते क्षणेन अधः निपात्यते ।

स्वैरेव कर्मभिः व्रजति (attains due to his acts)

कूपस्य खनिता यद्वत् प्राकारस्य कारकः इव अधो याति उच्चैः व्रजति नरः स्वैरेव कर्मभिः।

परेङ्गितज्ञानफला हि बुद्धयः (the benefit of intellignce lies in understanding the mind of others)

उदीरितो अर्थः पशुनापि गृह्यते । हयाश्च नागाश्च देशिताः वहन्ति । पण्डितजनः अनुक्तमपि ऊहति । बुद्धयः परेङ्गितज्ञानफलाः खलु ।

लक्ष्यते अन्तर्गतं मनः (the intension gets expressed)

आकारैः, इङ्गितैः, गत्या, चेष्टया, भाषणेन च नेत्रवक्त्रविकारेण अन्तर्गतं मनः लक्ष्यते ।

सः पण्डितः (he is a scholar)

प्रस्तावसदृशं वाक्यं, सद्भावसदृशं प्रियं, आत्मशक्तिसमं कोपं यः जानाति सः पण्डितः ।

सः दुर्मतिः (he is a fool)

यः अनाहूतः विशेत्, अपृष्टः बहुभाषते, आत्मानं भूपालस्य प्रीतं मन्यते सः दुर्मतिः ।

तत्तस्य सुन्दरम् (it is beautiful for him)

किमपि वस्तु स्वभावेन सुन्दरं वाप्यसुन्दरम् । यस्मै यदेव रोचते तत्तस्य सुन्दरं भवेत् ।

आत्मवशं नयेत् (he should be subjudgated)

मेधावी यस्य यस्य हि यो भावः तेन तेन तं नरमनुप्रविश्य क्षिप्रमात्मवशं नयेत्।

सः राजवसतौ वसेत् (he will live in royal house)

अल्पेच्छुः, धृतिमान्, प्राज्ञः, सदा छायेवानुगतः, आदिष्टः न विकल्पेत यः सः राजवसतौ वसेत् ।

कापुरुषलक्षणम् (it is the quality of a coward)

दोषभीतेः अनारम्भः तत्कापुरुषलक्षणम् । कैरजीर्णभयात् भ्रातः भोजनं परिहीयते।

पार्श्वतं परिवेष्टयन्ति (gets intimate to those who are hereby)

आसन्नमेव मनुष्यं नृपतिर्भजते । विद्याविहीनमकुलीनमसङ्गतं वा प्रायेण भूमिपतयः प्रमदाः लताश्च पार्श्वतः यः भवति तं परिवेष्टयन्ति ।

अनुरागयुक्तस्य प्रभोः चिह्नानि (the qualities / marks of a master who is pleased)

दूरादवेक्षणं, हासः, सम्प्रश्नेषु भृशमादरः, परोक्षेऽपि गुणश्लाघा, प्रियवस्तुषु स्मरणम्, असेवके चानुरक्तिः, दानं, सुप्रियभाषणम् दोषोऽपि गुणसङ्ग्रहः अनुरक्तस्य चिह्नानि ।

विरक्तेश्वरचिह्नानि (the marks of one who is unattachment)

कालयापनम्, आशानां वर्धनं फलखण्डनम्, इत्यादीनि विरक्तेश्वरचिह्नानि इति मतिमान्नरः जानीयात्।

दर्शयन्ति मेधाविनः (the intellectual display / show)

अपायसन्दर्शनजां विपत्तिम्, अपायसन्दर्शनजाञ्च सिद्धिं मेधाविनः नीतिप्रयुक्तां पुरःस्फुरन्तीमिव दर्शयन्ति ।

अवमानञ्च प्राप्नुयात् (gets insulted)

अप्राप्तकालवचनं ब्रुवन् बृहस्पतिरपि शाश्वतं बुद्ध्यवज्ञानमपमानञ्च प्राप्नुयात्।

अपृष्ठेनापि वक्तव्यम् (should tell what is good, even if not asked)

आपद्युन्मार्गगमने, कार्यकालात्ययेषु च अपृष्टेनापि हि तमिच्छता भृत्येन वक्तव्यम् ।

रक्ष्यः संवर्धनीयश्च (should be protected , as well as developed)

येन वृत्तिं कल्पयति, येन च लोके सद्भिः प्रशस्यते स गुणः तेन गुणिना च रक्ष्यः संवर्धनीयश्च ।

स्थान एव नियोज्यन्ते

भृत्याश्चाभरणानि च स्थान एव नियोज्यन्ते । न हि चूडामणिः पादे, नूपुरं मूर्ध्नि धार्यते । मुकुटे रोपितः काचः, चरणाभरणे मणिः इत्यत्र दोषः मणेः नास्ति । किन्तु साधोः अविज्ञता ।

भृत्यैः आपूर्यते नृपः (the king is complete, when equipped with attendants)

बुद्धिमान् अनुरक्तोऽयम् । अयं शूरः, इतः भयम् इति भृत्यविचारज्ञः नृपः भृत्यैः आपूर्यते।

योग्याः अयोग्याश्च (the able and the capable)

अश्वः, शस्त्रं, शास्त्रं, वीणा, वाणी, नरश्च, नारी च पुरुषविशेषं प्राप्य हि भवन्ति योग्याः अयोग्याश्च ।

विपन्नायां नीतौ सीदति जगत् **(the world gets destoryed , when morality gets destoryed)**

राज्ञः अवज्ञानात् परिजनः मतिहीनः भवति । ततः तत्प्रामाण्यात् बुधजनः न समीपे भवति । बुधैः त्यक्ते राज्ये नीतिर्गुणवती न हि भवति । नीतौ विपन्नायां सकलमवशं नश्यति नृपर्चितं जनं जनपदा नित्यमर्चयन्ति । यः नृपेणावमतः सर्वैः अवमन्यते ।

बालादपि ग्रहीतव्यम् **(should accept even from a boy)**

मनीषिभिः उक्तं युक्तं बालादपि ग्रहीतव्यम् । रवेः अविषये दीपस्य प्रकाशनं क्रियते खलु ।

नरो जानाति सारताम् **(man learns the essence of intelligence)**

बन्धुस्त्रीभृत्यवर्गस्य बुद्धेः तत्त्वस्य चात्मनः आपन्निकषपाषाणे नरो जानाति सारताम्।

सर्वतेजोमयो हि राजा **(the king is lightly resplendent)**

राज्ञः प्रसादे पद्मा आस्ते । पराक्रमे विजयश्च विद्यते । क्रोधे मृत्युश्च वसति। सर्वतेजोमयो प्रभुः। भूमिपः बालोऽपि नावमन्तव्यः मनुष्य इति । महती देवता ह्येषा नररूपेण तिष्ठति ।

अशस्त्रविहितो वधः **(killing without weapons)**

नरेन्द्राणामाज्ञाभङ्गः, ब्राह्मणानामनादरः, नारीणां पृथक् शय्या, च अशस्त्रविहितो वधः।

महान् महत्येव विक्रमं करोति **(a great man shows his strength on anther great person only)**

प्रभञ्जनः तृणानि न उन्मूलयति । तानि मृदूनि नीचैः सर्वतः प्रणतानि । समुच्छ्रितान् तरूनेव प्रबाधते । महान् महत्येव करोति विक्रमम् ।

धनहीनः (lacking in money)

अर्थैः सेव्यतामेति पुरुषः । धनहीनः स्वपत्न्यापि त्यज्यते । परैः किं वक्तव्यम्।

परिक्षीयत एवासौ

आयमनालोच्य स्ववाञ्छया क्षिप्रं व्ययमानः वैश्रवणोपमः धनी अपि परिक्षीयत एव ।

धनाधिकारे न प्रशस्यते (not advisable to be employed in of wealth)

ब्राह्मणः, क्षत्रियः, बन्धुः च धनाधिकारे न प्रशस्यते । ब्राह्मणः सिद्धमप्यर्थं कृच्छ्रेणापि न यच्छति । नियुक्तः क्षत्रियः द्रव्ये धृवं खड्गं दर्शयते । बन्धुः ज्ञातिभावतः आक्रम्य, सर्वस्वं ग्रसते ।

चिरसेवकः (long serving servant)

नियोगी चिरसेवकः अपराधेऽपि निश्शंकः सः स्वामिनमवज्ञाय निरवग्रहः चरेत्।

सर्वमेवावलुम्पति (swallows everything)

उपकर्ता अधिकारस्थः स्वाधिकारं न मन्यते । उपकारं ध्वजीकृत्य, सर्वमेवावलुम्पति।

सदा परिचयात् धृवम् (definite, because of constant interaction)

उपांशुक्रीडितः अमात्यः स्वयं राजायते । यतः सदा परिचयात् धृवं तेन अवज्ञा क्रियते ।

बुद्धिः चित्तविकारिणी (contaiminates the mind)

सर्वसमृद्धः अमात्यः सदा न साध्यः स्यादेव। यस्मात् कारणात् नीतिशास्त्रविदामयमादेशः बुद्धिः चित्तविकारिणी इति ।

अमात्यस्य दोषाः (faults of the minister)

प्राप्तार्थग्रहणं, द्रव्यपरिवर्तः, अनुरोधनम्, उपेक्षा, बुद्धिहीनत्वं, भोग अमात्यस्य दोषाः ।

राज्ञः कर्तव्यानि (duties of the king)

नियोग्यर्थग्रहोपायः, नित्यपरीक्षणं, प्रतिपत्तिप्रदानं, कर्मविपर्ययः राज्ञा करणीयाः।

नियोगिनः (the employees)

प्रायः दुष्टव्रणा इव भवन्ति नियोगिनः । महीपतेः उच्चैः निपीडितारमन्ति अन्तः सारम् । वस्तुधारानियोगिनः मुहुः बाध्याः । स्नानवस्त्रं सकृतपीडितं धृतं पयः मुञ्चेत् । एतत्सर्वं यथावसरं ज्ञात्वा व्यवहर्तव्यम् ।

न क्षमेत् (shouldn't pardon)

राजा आज्ञाभङ्गकरान् स्वसुतानपि न क्षमेत् ।

नश्यन्ति (are getting destoryed)

स्तब्धस्य यशः, विषमस्य मैत्री, नष्टेन्द्रियस्य कुलम्, अर्थपरस्य धर्मः, व्यसनिनः विद्याफलं कृपणस्य सौख्यं, प्रमत्तसचिवस्य नराधिपस्य राज्यं च नश्यन्ति ।

पितेव रक्षेत् प्रजाः (should protect the people like a failer)

तस्करेभ्यः नियुक्तेभ्यः, शत्रुभ्यः नृपवल्लभात्. नृपतिः निजलोभाच्च प्रजाः पितेव रक्षेत् ।

जानाति नरस्य वृत्तम् (they know the doings of a man)

आदित्यचन्द्रौ, अनिलः, अनलः, द्यौः, भूमि, आपः, हृदयं, यमः, अहः, रात्रिः, उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ।

न तृप्यन्ति (are not satiafied)

काष्टानामग्निः न तृप्यन्ति । आपगानां महोदधिः न तृप्यति । सर्वभूतानां यमः न तृप्यति । युवतयः पुरुषैः न तृप्यति । दानेन, मानेन, आर्जवेन, सेवया, शस्त्रेण, शास्त्रेण सर्वथा विषमाः स्त्रियः । गुणाश्रयं, कीर्तियुतं, रतिज्ञं, सधनं, युवानं पतिं विहाय वनिताः शीलगुणादिहीनं नरान्तरं व्रजन्ति । दूर्वादिविकीर्णभूमौ परकान्तसङ्गात् यथा सौख्यं प्रयाति तादृशीं कामं प्रीतिं विचित्रशय्याशयितापि न उपैति नारी। स्त्रीणां आहारो द्विगुणः, बुद्धिः चतुर्गुणा, व्यवसायः षड्गुणः, कामश्चाष्टगुणः

स्मृतः।

बुद्धिबलम् (strength of intelligence)

उपायेन हि यच्छक्यं, न तच्छक्यं पराक्रमैः । यस्य बुद्धिः बलं, निर्बुद्धेस्तु कुतो बलम् ?

कल्याणवचनं ब्रूयात् (should tell good words)

आपदि उन्मार्गगमने कार्यकालात्ययेषु च कल्याणवचनं ब्रूयात्, अपृष्टोऽपि हितो नरः ।

मूलमुद्धरणं सुखम् (rooting out completely is dest)

विषमिश्रमन्नं,चलितं दन्तं, दुष्टामात्यं च मूलमुद्धरणं सुखम् ।

रम्यां सादरं कः नेक्षते ? (who doesn't enjoy looking)

लोकेऽस्मिन् यः श्रियं न कामयते सः नास्ति । परस्य युवतिं रम्यां सादरं कः नेक्षते ?

कायः कस्य न वल्लभः (or whem is not body dear ?)

कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः । अशेषदोषदुष्टोऽपि कायः कस्य न वल्लभः?

वह्नौ कस्यानादरः (nobody takes fire lightly)

अप्रियाण्यपि कुर्वाणः यः प्रियः प्रिय एव सः । दग्धमन्दिरसारेऽपि कस्य वह्नौ अनादरः ?

लक्ष्म्या आश्रीयते जनः (man is being taken refuge by lakshmi)

पार्थिवः यस्मिन्नेवाधिकं चक्षुरारोहयति सुते अमात्ये उदासीनेऽपि सः जनः लक्ष्म्या आश्रीयते।

रमन्ते तत्र सम्पदः (wealth and riches abound there)

अप्रियस्यापि पथ्यस्य परिणामः सुखावहः । वक्ता श्रोता च यत्रास्ति रमन्ते

तत्र सम्पदः ।

नातः परतरो दोषः

मूलभृत्यान् परित्यज्य, आगन्तून् प्रतिमानयेत् । यतः सः राज्यभेदकरः । ततः परदोषो नास्ति ।

दुर्जनो नार्जवं याति (the crooked doesn't get straightened)

नित्यशः सेव्यमानोऽपि दुर्जनः आर्जवं न याति । स्वेदनाभ्यञ्जनोपायैः श्वपुच्छमिव नामितम्। स्वेदितो मर्दितश्चैव रज्जुभिः परिवेष्टितः द्वादशभिः वर्षैः मुक्तः श्वपुच्छः प्रकृतिं गतः ।

खलानां प्रीतये कुतः (where is affaction for the wicked ?)

वर्धनं वाथ सम्मानं खलानां प्रीतिदायकाः न भवन्ति । अमृतसेकेऽपि विषदृमाः पथ्यानि न फलन्ति ।

एष एव सतां धर्मः (this verily is the dharma of the virtuous)

यस्य पराभवं नेच्छेत्, अपृष्टोऽपि हितं ब्रूयात् । एष एव सतां धर्मः । अतो अन्यथा विपरीतम् ।

विज्ञाः वदन्ति (the learned)

यः अकुशलात् निवारयति सः स्निग्धः यन्निर्मलं तत्कर्म । या अनुविधायिनी सा स्त्री । यः सद्भिः अभ्यर्च्यते सः मतिमान् । या न मदं करोति सा श्रीः । यः तृष्णया मुच्यते स सुखी । यदकृत्रिमं तन्मित्रम् । यः इन्द्रियैः न खिद्यते सः पुरुषः इति विज्ञाः वदन्ति ।

आत्मनावगतमावश्यकम् (should comprehend oneself)

परस्यापराधेन परेषां दण्डं नाचरेत् । आत्मना अवगतं कृत्वा बध्नीयात् पूजयेत् वा ।

कालः पिबति तद्रसम् (the essence is sucked away by time)

आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः क्षिप्रमक्रियमाणस्य कालः पिबति

तद्रसम् ।

कृच्छ्रेणापि न सीदति (doesn't greive inspite of difficulty)

पराभवं परिच्छेत्तुं योग्यायोग्यञ्च यः वेत्ति, अस्तीह यस्य विज्ञानं, कृच्छ्रेणापि न सीदति ।

मृत्योः द्वाराणि चत्वारि (the four doors of death)

अनुचितकार्यारम्भः, स्वजनविरोधः, बलीयसा स्पर्धा, प्रमदाजनविश्वासः चत्वारि मृत्युद्वाराणि।

राजसेवकाः (the king's servants)

ये राजसेवकाः तेषां स्वजीवितेऽपि अविश्वासः । सदा चित्तमनिर्वृतम् । सम्पत्तयः पराधीनाः।

आश्रयसौन्दर्यम् (the beauty of the lotus)

कश्चित् आश्रयसौन्दर्यात् शोभां दत्ते असज्जनः । कथमित्युक्ते

प्रमदालोचनन्यस्त मलीयसमिवाञ्जनम् ।

कथं परितोषयिष्यति ? (how can he please ?)

निमित्तमुद्दिश्य यः प्रकृप्यति स तस्यापगमे प्रसीदति धृवम् । यस्य मनः अकारणद्वेषि तं जनः कथं परितोषयिष्यति ?

योगिनामप्यगम्यः (is not understandable)

विज्ञैः स्निग्धैः उपकृतमपि कैश्चित् द्वेष्यतामेति । साक्षादन्यैः अपकृतमपि प्रीतिमेवोपयाति। नैकभावाश्रयाणां चरितं चित्रं चित्रम् । सेवाधर्मः परमगहनः, योगिनामपि अगम्यः ।

नष्टं नष्टं नष्टम् (lose-lose)

असत्सु कृतशतं नष्टम् । अबुधेषु सुभाषितशतं नष्टम् । अवचनकरे वचनशतं

नष्टम् । अचेतने बुद्धिशतं नष्टम् ।

सुखानि न अविघ्नानि

चन्दनतरुषु भुजङ्गाः, जलेषु कमलानि तत्र च ग्राहाः, भोगे गुणघातिनश्च खलाः । न च सुखानि अविघ्नानि ।

अपूर्वनाटकविधिः (the strange dramatic method)

दूरादुच्छ्रितपाणिः, आर्द्रनयनः, प्रोत्सारितार्धासनः, गाढालिङ्गनतत्परः, प्रियकथाप्रश्नेषु दत्तादरः, अन्तर्भूतविषो बहिर्मधुमयश्चातीव मायापटुः कोनामायमपूर्वनाटकविधिः दुर्जनैः यः शिक्षितः।

धातापि भग्नोद्यमः (even Lord Brahma also fails in the efforts)

दुस्तरवारिराशितरणे पोतः, अन्धकारागमे दीपः, निर्वाते व्यजनं, मदान्धकरिणां दर्पोपशान्त्यै सृणिः, इत्थं विधिना उपायचिन्ता कृता । दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः ।

विरोधसम्भवः (enmity takes place)

ययोरेव समं वित्तं, ययोरेव समं बलं, तयोर्विवादे मन्तव्यः । न क्वचित् उत्तमाधमयोः ।

युद्धस्य कालम् (war time)

यत्रायुद्धे मृत्युः ध्रुवम्, युद्धे जीवितसंशयः, तमेव युद्धस्य कालं मनीषिणः प्रवदन्ति ।

का चिन्ता मरणे रणे

जये च लभते लक्ष्मीं, मृते चापि सुराङ्गनाम् । क्षणविध्वंसिनः कायाः । रणे मरणे चिन्ता का ?

निस्तेजाः अभिभवास्पदो भवति (man without internal strength is liable for insult)

बलवानपि निस्तेजाः कस्य नाभिभवास्पदम् ? पश्य ! लोकैः भस्मचये पदं

निश्शंकं दीयते।

परैः सम्भुज्यते राज्यम् **(others enjoy the kingdom)**

सिंहो हस्तिवधादिव धर्मातिक्रमतः राजा स्वयं पापस्य भाजनम् । राज्यं तु परैः सम्भुज्यते।

नष्टापि भूमिः सुलभा न भृत्याः **(kingdom that is lost can be regained , not the servants)**

गुणान्वितस्य एकदेशस्य भूमेः, बुद्धिमतः भृत्यस्य प्रणाशः वा भृत्यप्रणाशः नृपाणां मरणम् । नष्टापि भूमिः सुलभसाध्या । भृत्याः न साध्याः ।

हन्तव्या भूतिमिच्छता **(should be killed by those derious of wealth)**

पिता वा यदि वा भ्राता, पुत्रो वा यदि वा सुहृत् प्राणच्छेदकरा राज्ञा भूतिमिच्छता हन्तव्या।

नैकान्तकरुणो भवेत् **(shouldn't be comparisionate)**

धर्मार्थकामतत्त्वज्ञः नैकान्तकरुणः भवेत् । हस्तस्थमप्यन्नं क्षमावान् भक्षितुं न क्षमः ।

नृपाणां सैव दूषणम् **(that is dishonor for the kings)**

शत्रौ च मित्रे च क्षमा यतीनामेव भूषणम् । अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम् ।

प्रायश्चित्तः जीवोत्सर्गः **(atonement is verily death)**

राज्यलोभात् अहंकारात् स्वामिनः पदमिच्छतः प्रायश्चित्तस्तु तस्य जीवोत्सर्गः। न चापरम् ।

इमे त्याज्याः **(one should leave them)**

घृणी राजा, सर्वभक्षी ब्राह्मणः, अवशा स्त्री, दुष्प्रकृतिः सहायः, प्रतीपः प्रेष्यः, प्रमादी अधिकृतः, यश्च कृतं न वेत्ति इमे त्याज्याः ।

नृपनीतिः अनेकरूपा **(the doctrine of ruling has many forms)**

सत्या, अनृता च, परुषा प्रियवादिनी च हिंस्रा, दयालुरपि, अर्थपरा, वदान्या च, नित्यव्ययी, प्रचुररत्न धनागमा च वाराङ्गनेव नृपनीतिः अनेकरूपा ।

विग्रहः

विप्लवेतेह नौरिव (sinks like a boat)

सम्यक् नेता नरपतिः यदि न स्यात्, प्रजा अकर्णधारा नौरिव जलधौ इह विप्लवेत ।

वर्धनात् रक्षणं श्रेयः (better to protect than develop)

नृपः प्रजां संरक्षति, सा पार्थिवं वर्धयति । वर्धनात् रक्षणं श्रेयः । तदभावे सदप्यसत् ।

मूर्खाणामुपदेशः प्रकोपाय

भुजङ्गानां पयः पानं केवलं विषवर्धनम् । मूर्खाणामुपदेशः प्रकोपाय स्यात् न शान्तये । विद्वानेव उपदेष्टव्यः । न अविद्वांस्तु कदाचन ।

क्षमा-लज्जा (patience and shame)

योषितः लज्जा इव पुंसः क्षमा भूषणम् । अन्यदा स्त्रीणां सुरतेषु वैयात्यमिव पुरुषाणां परिभवे पराक्रमः शोभदायकः ।

तिरस्क्रियते अरिभिः (turned away by the enemies)

आत्मनश्च परेषां च बलाबलं समीक्ष्य ज्ञातव्यम् । यः अन्तरं नैव जानाति सः अरिभिः तिरस्क्रियते।

कर्तव्यो महदाश्रयः (should take refuge in the great)

हीनसेवा न कर्तव्या, कर्तव्यो महदाश्रयः । पयोऽपि शौण्डिकी हस्ते वारुणीत्यभिधीयते ।

महानप्यल्पतां याति (even the great is being looked down as small)

आधाराधेयभावेन दर्पणे गजेन्द्र इव निर्गुणे गुणविस्तरः, महानपि अल्पतां याति ।

व्यपदेशेऽपि सिद्धिः स्यात् **(work gets accomplished merely by taking the name)**

सिंहप्रसादेन अजा वने निर्भयं चरति । विभीषणः राममासाद्य लङ्कायां राज्यं लेभे । अतिशक्ते नराधिपे व्यपदेशेऽपि सिद्धिः स्यात् । शशिनः व्यपदेशेन शशकाः सुखमासते ।

हन्ति **(kills)**

स्पृशन्नपि गजः हन्ति । जिघ्रन्नपि भुजङ्गमः हन्ति । पालयन्नपि भूपालः हन्ति । प्रहसन्नपि दुर्जनः हन्ति ।

यथार्थस्य हि वाचकः **(speaks the truth)**

उद्यतेष्वपि शस्त्रेषु दूतो नान्यथा वदति । सदैव अवध्यभावेन यथार्थस्य हि वाचकः ।

मन्त्रिणं विदध्यात् **(should be appointed as ministers)**

स्वदेशजं, कुलाचारविशुद्धम् उपधा शुचिं, मन्त्रज्ञम्, अव्यसनिनं, व्यभिचारविवर्जितम्, अधीतव्यवहारार्थं, मौलं, ख्यातं, विपश्चितम्, अर्थस्य समुत्पादकं नृपः मन्त्रिणं विदध्यात्।

अप्राप्यमपि वाञ्छन्ति **(desire even that which cannot be attained)**

राजा, मत्तः, शिशुः, प्रमदा, धनगर्वितः, अप्राप्यमपि वाञ्छन्ति । यत् लभ्यतेऽपि पुनः किम् ?

दूतस्य लक्षणानि **(the qualities of an emissary)**

भक्तः, गुणी, शुचिः, दक्षः, प्रगल्भः, अव्यसनी, क्षमी, ब्राह्मणः, परमर्मज्ञः, प्रतिभानवान् दूतः स्यात् । न स्यातव्यं, न गन्तव्यं, दुर्जनेन समं क्वचित् ।

भयं सञ्जनयन्ति **(causes fear)**

दुर्जनैः उच्यमानानि सम्मतानि प्रियाण्यपि अकालकुसुमानीव भयं सञ्जयन्ति खलु ।

मूर्खः सान्त्वेन तुष्यति (the fool becomes happy with words)

प्रत्यक्षेऽपि कृते दोषे मूर्खः सान्त्वेन तुष्यति ।

नार्याः भूषणं भर्ता (for a woman, husband is her ornament)

परुषाण्यपि प्रोक्ता, क्रोध चक्षुषा दृष्टा भर्तुः सुप्रसन्नमुखी या सा नारी धर्मभाजनम्। नगरस्थो वनस्थो वा पापो वा यदि वा शुचिः यासां स्त्रीणां प्रियो भर्ता तासां पुण्यसुखानि सिद्ध्यन्ति । भूषणैर्विना नार्याः भर्ता हि परमं भूषणम् । भर्तृरहिता न भूषणार्हा न शोभते । तिस्रः कोट्यो अर्धकोटी च यानि लोमानि मानवे भर्तारं योऽनुगच्छति तावत्कालं स्वर्गे वसेत् । व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् तद्वत् भर्तारमादाय स्वर्गलोके महीयते । विचेतनं पतिं चितौ परिष्वज्य या प्रिया आत्मनः देहं मुञ्चति, असौ शतलक्षमपि पापं कृत्वापि पतिं गृहीत्वा सुरलोकमाप्नुयात्। पिता, पितुः अनुमते भ्राता वा एनां यस्मै दद्यात् तं जीवन्तं शुश्रूषेत । संस्थितञ्च न लङ्घयेत् ।

मूर्खस्य लक्षणम् (the qualities of a fool)

शतं दद्यात् न विवदेत् इति विज्ञस्य सम्मतम् । विना हेतुमपि द्वन्द्वमेतत् मूर्खस्य लक्षणम् ।

अभ्यूहन्ति मनो धीराः (the discerning grasp)

वर्णाकारप्रतिध्वानैः नेत्रवक्त्रविकारतः धीराः मनः अभ्यूहन्ति । तस्मात् रहसि मन्त्रयेत् ।

जीवनम् (life)

वैद्यानामातुरः जीवनम् । नियोगिनां यो व्यसनी श्रेयान्, विदुषां जीवनं मूर्खः, सतां जीवनं सद्वर्णः ।

अन्ध एव सः (he is verily a blind man)

स्वपरराष्ट्राणां कार्याकार्यावलोकने महीभर्तुः चक्षुः चार एव । यस्य चारः नास्ति सः अन्धः भवेत् ।

स्वचरैः सह संवसेत् **(one should live with one's own people)**

तीर्थाश्रमसुरस्थाने शास्त्रविज्ञानहेतुना तपस्विव्यञ्जनोपेतैः स्वचरैः सह संवसेत्।

कार्यो मन्त्रः **(one should conplate)**

षट्कर्णः मन्त्रः तथा प्राप्तश्च वार्तया भिद्यते । इति आत्मना द्वितीयेन मन्त्रः कार्यः ।

नीतिविदां मतम् **(the opinion of the moralogist)**

मन्त्रभेदे ये दोषाः भवन्ति, समाधातुं ते न शक्याः इति नीतिविदां मतम् ।

साधितुं प्रयतेत **(should strive to achieve it)**

साम्ना दानेन भेदेन समस्तैः अथवा पृथक् अरीन् साधितुं प्रयतेत । न कदाचन युद्धेन ।

महत् मन्त्रफलम् **(the effect of mantra is great)**

यथा प्राणिभिः दारुणा ग्रावा उत्थाप्यते तथा अल्पोपायात् महासिद्धिः एतन्मन्त्र महत्फलम्।

चिरात् फलति न क्षणात् **(gives result after long time not immediately)**

यथा कालकृतोद्योगात् कृषिः फलवती भवेत् तद्वत् नीतिरियं चिरात् फलति, न क्षणात् ।

महान् धीरत्वमधिगच्छति **(great man takes recourse in valor)**

दूरे भीरुत्वमासन्ने शूरता महतो गुणः । लोके विपत्तौ च महान् धीरत्वमधिगच्छति। बलिना सह योद्धव्यमिति निदर्शनं नास्ति । तद्युद्धं हस्तिना सार्धं नराणां मृत्युमावहेत्।

नीतिज्ञः **(one who knows morals)**

आपत्प्राप्तकाले नीतिज्ञः कूर्मवत् संकोचमास्थाय प्रहारमपि मर्षयेत् । प्राप्तकाले क्रूरसर्पवत् उत्तिष्ठेत् ।

उपायज्ञः (one who is good at expediants)

उपायज्ञः महत्यल्पेऽपि सममेव भवेत् । नदीरयः वृक्षान् तृणानीव समूलमुन्मूलयितुं क्षमः ।

तस्मात् दुर्गं विशिष्यते (therefore, the fort is glorified, landed)

प्राकारस्थः धनुर्धरः एकः शतं योजयति । शतं शतसहस्राणि । तस्मात् दुर्गं विशिष्यते । अदुर्गो विषयः कस्य वारेः परिभवास्पदम् । पोतच्युत मनुष्यवत् राजा अदुर्गः अनाश्रयः । महाखातम् उच्चप्राकारसंयुतं समन्त्रं सजलं शैलसरिन्मरुपवनाश्रयं दुर्गं कुर्यात् । विस्तीर्णता, अतिवैषम्यं, धनधान्ये ध्मसंग्रहः, प्रवेशश्च, अपसारश्च सप्तैता दुर्गसम्पदः । यत्र कार्ये कुशलः यः तं तत्र विनियोजयेत् । यः कर्मसु अदृष्टकर्मा, शास्त्रज्ञोऽपि विमुह्यति ।

सर्वसंग्रहादुत्तमः (better than the collection)

धान्यानां संग्रहः सर्वसंग्रहात् उत्तमः । रत्नं मुखे निक्षिप्तं हि प्राणधारणं न कुर्यात् ।

लवणो उत्तमरसः (the salt is the best of all tastes)

सर्वरसानां ख्यातः उत्तमरसः लवणः । तेन विना गृहीतं व्यञ्जनं गोमयायते।

निजरिपुः (one's enemy)

छिद्रं मर्मं वीर्यञ्च सर्वं यः वेत्ति सः निजरिपुः । अन्तर्गतश्चैव अनलः शुष्कं वृक्षमिव दहति।

न तत् सत्यम्

यत्र वृद्धाः न सन्ति सा सभा न । ये धर्मं न वदन्ति ते न वृद्धाः । यत्र सत्यं नास्ति न सो धर्मः । यच्छलमभ्युपैति न तत् सत्यम् ।

दूतः सर्वं हि जल्पति (the emissery speaks / takes about everything)

म्लेच्छोऽपि अवध्यः दूतः । यतः राजा दूतमुखो स्यात् । उद्यतेष्वपि शस्त्रेषु दूतः नान्यथा वदति । स्वापकर्षं, परोत्कर्षं, दूतोक्तैः कः मन्यते ? सदैव अवध्यभावेन दूतः सर्वं हि जल्पति ।

नष्टाः भवेयुः (they are destoryed)

असन्तुष्टाः द्विजाः, सन्तुष्टाः महीभुजः, सलज्जा गणिका, निर्लज्जाः कुलाङ्गनाः नष्टाः भवेयुः ।

कर्तव्या विग्रहः (battel should be done)

मित्रामात्यसुहृद्वर्गाः यदा दृढभक्तयः स्युः, शत्रूणां विपरीताश्च तदा विग्रहः कर्तव्यः । भूमिः, मित्रं, हिरण्यञ्च विग्रहस्य त्रयं फलम् । यदा एतत् त्रितयं भावि तदा विग्रहः कर्तव्यः ।

लभन्ते ते सुनिश्चितम् (they attain surely)

ये द्विषद्बलमविचार्य मूढाः सहसा विशन्ति ते सुनिश्चितं खड्गधारापरिष्वङ्गं लभन्ते ।

अनुष्ठानं मुख्यम् (its performance is important)

बहुराजनीतिज्ञेनापि अननुष्ठाने केवलमन्त्रेण प्रयोजनं न लभेत । केवलौषधिपरिज्ञानात् औषधिस्वीकरणाभावेनैव व्याधेः शान्तिः न भवति खलु ।

राजता (loyality)

यत्र राजा तत्र कोशः । विना कोशं न राजता । ततो सुभटेभ्यः दद्यात् । न दातुः कोऽपि न युध्यते ।

धनाधननिबन्धनम् (having and not having money)

नरः नरस्य दासः न । अर्थस्य दासः । गौरवं लाघवं चापि धनाधननिबन्धनम् ।

अष्टायुधः स्मृतः (it is described as astayudha)

बलेषु प्रमुखो हस्ती, न तथान्यो महीपतेः । निजैः अवयवैः एव मातङ्गः अष्टायुधः स्मृतः ।

अश्वाधिको राजा विजयी (king having more horses is the winner)

सैन्यानां बलमश्वश्च प्राकारः जङ्गमः । यतः तस्मात् अश्वाधिको राजा स्थलनिग्रहे विजयी स्यात् । युध्यमाना हयारूढा देवानामपि दुर्जयाः । दूरस्थिताः अपि वैरिणः तेषां हस्तवर्तिनः ।

श्रेष्ठतमं बलम् (the best strength)

स्वभावशूरम् अस्त्रज्ञं तु अविरक्तं जितश्रमं, प्रसिद्धक्षत्रियप्रायं बलं श्रेष्ठतमं विदुः ।

दायादमुत्थापयेत् (should encourge the kin's men)

दायादादपरो यस्मात् नास्ति भेदकरो द्विषाम् । तस्मात् तस्य विद्विषः दायादमुत्थापयेत् ।

अन्तः प्रकोपणं कुर्यात् (should internal compromise)

युवराजेन यदि वा मुख्यमन्त्रिणा सन्धाय स्थिरात्मनः अभियोक्ता अन्तः प्रकोपणं कुर्यात् । क्रूरामित्रं रणे चापि भङ्गं कृत्वा विघातयेत् । अथवा गोग्रहाकृष्ट्या तन्मुख्याश्रितबन्धनात्, परदेशापहारणात् स्वराज्यं वासयेत् । अथवा दानमानाभ्यां वासितं तत् हि धनदम् ।

वाचस्पत्यं प्रतायते (they pronounce the scholarship)

आत्मोदयः परग्लानिः द्वयं नीतिरितीयते । तद्दूरीकृत्य कृतिभिः वाचस्पत्यं प्रतायते ।

परोऽपि हितवान् बन्धुः (even an outsider, who takes care, is a relative)

बन्धुरपि अहितः परः । परोऽपि हितवान् बन्धुः । देहजः व्याधिः अहितः। हितमारण्यमौषधम्।

त्यागः वरम् (its renunciation is best)

धनानि जीवितञ्चैव परार्थे प्राज्ञः उत्सृजेत् । विनाशे नियते सति तन्निमित्तो त्यागः वरम् । जायन्ते म्रियन्ते च बहवः क्षुद्रजन्तवः । त्यागसदृशः लोके न भूतो न भविष्यति ।

महापुरुषलक्षणम् (the qualities of a great man)

अकृपणः प्रियं ब्रूयात् । शूरः अविकत्थनः स्यात् । दाता न अपात्रवर्षी । प्रगल्भः अनिष्ठुरः स्यात् । एतन्महापुरुषलक्षणम् ।

वरं स्वामिमनोदुःखम् (it is good, if the master's heart pains)

यः अकार्यं कार्यवत् शास्ति सः दुष्टमन्त्री । स्वामिमनोदुःखं तन्नाशः । न तु अकार्यतः ।

क्षिप्रं सः परिहीयते (he perishes immediately)

वैद्यः, गुरुः, मन्त्री च यस्य राज्ञः प्रियं वदाः, शरीरधर्मकोशेभ्यः क्षिप्रं सः परिहीयते ।

रिपुः सुखच्छेद्यः स्मृतः (the enemy can be conquered easily)

लुब्धः, क्रूरः, अलसः, असत्यः, प्रमादी, भीरुः, अस्थिरः, मूढः, योधावमन्ता च रिपुः सुखच्छेद्यः स्मृतः ।

परसैन्यं विघातयेत् (can win over the enemys army)

शत्रुसैन्यं दीर्घवर्त्मपरिश्रान्तं, नद्यद्रिवनसङ्कुलम्, घोराग्निभयसन्त्रस्तं, क्षुत्पिपासार्दितं तथा प्रमत्तं, भोजनव्यग्रं, व्याधिदुर्भिक्षपीडितं, असंस्थितम्, अभूयिष्ठं, वृष्टिवातसमाकुलं, पङ्कपा सुजलाच्छन्नं, सुव्यस्तं, दस्युविद्रुतम् एवं भूतं महीपालः परसैन्यं विघातयेत् । अवस्कन्धभयात् राजा प्रजागरकृतश्रमं, दिवा सुप्तं, निद्राव्याकुलसैनिकं समाहन्यात् । अतः तस्य प्रमादिनः बलं गत्वा यथावकाशं दिवानिशं घन्तु ।

श्रियं हि अविनयो हन्ति (lack of obedience, destorys the wealth)

असाम्प्रतं न राज्यं प्राप्तमित्येव वर्तितव्यम् । जरा उत्तमं रूपमिव अविनयः श्रियं हन्ति ।

दक्षः श्रियमधिगच्छति (the able attains wealth)

पथ्याशीकल्यतां, अरोगी सुखम्, उद्युक्तः विद्यान्तं, विनीतः धर्मार्थयशांसि दक्षः श्रियमधिगच्छति ।

अविद्वानपि श्रियमवाप्नोति (even an unscholarly person is also attains wealth)

भूपालः अविद्वानपि विद्यावृद्धोपसेवया अविद्वानपि जलासन्नतरुः यथा तथा परां श्रियमवाप्नोति।

महीभुजां व्यसनानि (the addictions of the kings)

पानं, स्त्री, मृगया, द्यूतम्, अर्थदूषणम्, वाग्दण्डयोश्च पारुष्यं च महीभुजां व्यसनानि ।

सम्पदः वसन्ति (the riches stay)

साहसैकान्तरसानुवर्तिना, उपयोपहतान्तरात्मना च ऊर्जिताः विभूतयः अवाप्तुं न शक्यम् । नये च शौर्ये च सम्पदः वसन्ति ।

प्रज्ञाहीनः (one who lacks intellegnce)

राजा प्रज्ञाहीनश्चेत् नीतिशास्त्रकथाकौमुदीं वागुल्काभिः न तिमिरयति । यस्य स्वयं प्रज्ञा नास्ति, तस्य शास्त्रं किं करोति ? लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ?

सदा कोपो नियन्तव्यः (anger should always be controlled)

देवतासु गुरौ गोषु राजसु ब्राह्मणेषु बालवृद्धातुरेषु च कोपः सदा नियन्तव्यः ।

सुस्थे को वा न पण्डितः (in an ordinary situation who is not a scholar ?)

भिन्नसन्धाने मन्त्रिणां, सान्निपातके भिषजां, कर्मणि प्रज्ञा व्यज्यते । सुस्थे को वा न पण्डितः ?

कृतधियः (the wise people)

अज्ञाः अल्पमेवारभन्ते कामं, व्यग्रा भवन्ति च । कृतधियः निराकुलास्तिष्ठति महारम्भाः ।

न जहाति लक्ष्मीः (laksmi willnot leave)

यः अपथप्रपन्नां निष्कसहस्रतुल्यां काकिणीमपि समुद्धरेत्, कालेषु कोटिष्वपि मुक्तहस्तः तं राजसिंहं लक्ष्मीः न जहाति ।

अतिव्ययः नास्ति (not an extravagant person)

क्रतौ, विवाहे, व्यसने, रिपुक्षये, यशस्करे, कर्मणि, मित्रसंग्रहे, प्रियासु नारीषु अधनेषु बान्धवेषु अतिव्ययः नास्ति । मूर्खः स्वल्पव्ययत्रासात् सर्वनाशं करोति । शुल्कस्यैव अतिसाध्वसात् कः सुधीः भाण्डं सन्त्यजेत् ? आपदर्थे धनं रक्षेत् ।

सम्यक् विजयन्ते (can win easily)

परस्परज्ञाः, संदृष्टाः, प्राणान् त्यक्तुं सुनिश्चिताः, कुलीनाः, पूजिताः, द्विषद्बलं सम्यक् विजयन्ते । सुभटाः, शीलसम्पन्नाः, संहताः, कृतनिश्चयाः, पञ्चशतं शूराः अपि रिपुवाहिनीं निघ्नन्ति ।

महागुणाः (great qualities)

सत्यं, शौर्यं, दया, त्यागः, एते नृपस्य महागुणाः । एतैः त्यक्तः महीपालः वाच्यतां प्राप्नोति खलु ।

विश्वस्तो नियोक्तव्यः (should be appointed, after having confidence)

यो येन प्रतिबद्धः स्यात् तेन सह उदयी व्ययी । प्राणेषु धनेषु च सः विश्वस्तः नियोक्तव्यः।

सः निमज्जति (he gets drowned)

यस्य महीपतेः धूर्तः, स्त्री, शिशुर्वा मन्त्रिणः स्युः, सः कार्याब्धौ अनीतिपवनक्षिप्तः निमज्जति।

धनदा धरा (the earth is the bestower of wealth)

हर्षक्रोधौ यस्य यतौ तथा शास्त्रार्थे प्रत्ययः नित्यभृत्यानुपेक्षा च तस्य धरा धनदा स्यात् ।

नावमन्येत् कदाचन (should never insult)

येषां राज्ञा सह उच्चयापचयौ धृवं स्याताम्, तान् राजा अमात्या इति कदाचन न अवमन्येत्।

सुशिष्टैरेव दीयते (is given by venerable ministers)

मदान्धस्य दन्तिनः इव महीभुजः स्थलतो हि करावलम्बः सुशिष्टैः अमात्यैः एव दीयते ।

स्थानबलम् (streangth of the location)

विषमोऽपि नक्रः सलिलात् निःसृतः वशः भवति । सिंहः शूरोऽपि वनाद्विनिर्गतः शृगालवत् स्यात् ।

श्वापि सिंहायते (even dog behaves like a lion)

राजा बलं पुरस्कृत्यावलोक्यन् योधयेत् । स्वामिनाधिष्ठितः अपि श्वा सिंहायते धृवम् ।

यथाशक्तिकुर्यात् (should perfrom as per one's capabilities)

सुमन्त्रितं, सुविक्रान्तं, सुयुद्धं, सुपलायितं, कार्यकाले यथाशक्ति कुर्यात् । न तु विचारयेत्।

स्वामी-भृत्यः (master and the servant)

दाता, क्षमी, गुणग्राही, स्वामी दुःखेन लभ्यते । शुचिः, दक्षः, अनुरक्तश्च भृत्योऽपि दुर्लभः।

परार्थे जीवितव्ययः (spending life for other's sake)

पठनोद्भ्रान्तवीचिविभ्रमभङ्गुरे संसारे अस्मिन् परार्थे जीवितव्ययः पुण्ययोगेन जायते ।

राज्याङ्गानि (the components of kingdom)

स्वामी, अमात्यः, राष्ट्रं, दुर्गं, कोशः, बलं, सुहृत्, पौराणां, श्रेणयः, प्रकृतयः राज्याङ्गानि इत्युच्यन्ते ।

ते नराः स्वर्गगामिनः (those persons go to heaven)

ये शूराः आहवेषु स्वाम्यर्थे त्यक्तजीविताः भर्तृभक्ताः कृतज्ञाश्च ते नराः स्वर्गगामिनः भवन्ति । शत्रुभिः परिवेष्टितः शूरः यत्र तत्र हतः यदि क्लैब्यं न गच्छति

अक्षयान् लोकान् लभते ।

गिरिगह्वरं संश्रयन्तु (let them take refuge in mountain-caves)

करितुरङ्गपत्तिभिः विग्रहः महीभुजां न कदापि भवता । नीतिमन्त्रपवनैः समाहताः द्विषः गिरिगह्वरं संश्रयन्तु ।

हितोपदेशे सन्धिः

दैवयोगात्विनश्यति (destoryed by God's will)

अपराधः न दैवस्य पुनः न मन्त्रिणाम् । क्वापि कार्यं सुचरितं दैवयोगात् विनश्यति ।

नैव जानाति अपण्डितः (the stupid donot realise it)

विषमां दशं प्राप्य दैवं गर्हयते नरः । आत्मनः कार्यदोषांश्च नैव जानात्यपण्डितः।

भ्रष्टो भविष्यति (he gets destoryed)

सुहृदां हितकामानां वाक्यं यः नाभिनन्दति स कूर्म इव दुर्बुद्धिः काष्ठात् भ्रष्टो भविष्यति ।

बुद्धिमान् (the intelligent)

उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान् ।

प्रार्थयन्ते नवं नरम् (they desire a young man)

स्त्रीणामप्रियः न कश्चित् । प्रियो वापि न विद्यते । गावः तृणमिवारण्ये नवं नरं प्रार्थयन्ते ।

अष्टगुणः स्मृतः (it is eight times of that)

स्त्रीणां पुरुषेभ्यः आहारः द्विगुणः, बुद्धिः चतुर्गुणा, व्यवसायश्च षड्गुणः, कामश्चाष्टगुणः स्मृतः ।

चिन्तानिवारकमौषधम् (the medicine that destorys sorrow)

यदभावि, न तद्भावि, भावि चेत् न तदन्यथा । इति चिन्ता विषम्नोऽयमगदः किं न पीयते?

फलेन प्रहर्षयेत् (should make him the result)

कृतकृतस्य भृत्यस्य कृतं नैव प्रणाशयेत् । फलेन मनसा वाचा दृष्ट्या चैनं प्रहर्षयेत् ।

उपकारापकारौ (help and harm)

उपकर्त्रा अरिणा सन्धिः करणीया न तु अपकारिणा मित्रेण । उपकारापकारौ हि एतयोः लक्ष्यं लक्षणम्।

प्रहर्तव्यमभीतवत् (should strike without fear)

यावद्भयमनागतं, तावत् भयेन भेतव्यम् । आगतन्तु भयं दृष्ट्वा अभीतवत् प्रहर्तव्यम् ।

म्रियेत रिपुणा सह (killed along with the ememy)

प्राज्ञः अभियुक्तो यदा पश्येत् न किञ्चिद् गतिमात्मनः तदा रिपुणा सह युध्यमानः म्रियते ।

स तिरस्कारमाप्नोति (he gets insult he is being turned away)

अनागतवतीं चिन्तां कृत्वा यस्तु प्रहृष्यति, स तिरस्कारमाप्नोति ।

तेन राजा सहायवान्

यो हि धर्मं पुरस्कृत्य भर्तुः प्रियाप्रिये हित्वा, पथ्यानि अप्रियाण्याह तेन राजा

सहायवान् ।

न हि संशयितं कुर्यात् (that which is doubtful shouldn't be away)

युधि विजयो सन्दिग्धो समेनापि सन्धिमिच्छेत् । न हि संशयितं कुर्यात् इति बृहस्पतिः उवाच ।

तुल्यबलौ नष्टौ (persons of equal strength get destoryed)

कदाचित् उभयोरपि तुल्यबलौ अन्योन्यं नष्टौ । युद्धे विनाशो भवति ।

श्रेष्ठः पूज्यः (the vertuous should be adored)

ज्ञानश्रेष्ठो द्विजः पूज्यः । बलवान् क्षत्रियो पूज्यः। धनधान्याधिको वैश्यो पूज्यः । द्विजसेवया शूद्रस्तु पूज्यः ।

सन्धेयाः सप्तकीर्तिताः (seven people with whom allience should be done)

सत्यार्यौ धार्मिको अनार्यो, भ्रातृसङ्घातवान्, बली, अनेकयुद्धविजयी सन्धेयाः सप्तकीर्तिताः।

एतैः सन्धिं न कुर्वीत (no allience with these should be done)

बालः, वृद्धः, दीर्घरोगी, ज्ञातिबहिष्कृतः, भीरुकः, भीरुकजनः, लुब्धः, लुब्धजनः, विरक्तः, प्रकृतिः, विषयेषु अतिसक्तिमान्, अनेकचित्तमन्त्रः, देवब्राह्मणनिन्दकः, दैवोपहतकः, दैवपरायणः, दुर्भिक्षे व्यसनोपेतः, बलव्यसनसंकुलः, अदेशस्थः, बहुरिपुर्युक्तः, कालेन यश्च न, सत्यधर्मव्यपेतश्च इमे विंशति पुरुषाः । एतैः सन्धिं न कुर्वीत । केवलं विगृह्णीयात् । एते विगृह्यमाणाः क्षिप्रं रिपोर्वशं यान्ति ।

षाड्गुण्यं राजनीतिः (six qualities of polity)

सन्धि-विग्रह-यान-आसन-संश्रय-द्वैधीभावाः षाड्गुण्यम् ।

मन्त्राङ्गाः पञ्चविधाः (the five types of mantrangas)

कार्यारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपातप्रतीकारः, कार्यसिद्धिः इति ।

उपायाः चत्वारः (the four methods)

सामोपायः, दानोपायः, भेदोपायः, दण्डोपायः चेति ।

शक्तिः त्रिविधा (strength is of three types)

उत्साहशक्तिः, मन्त्रशक्तिः, प्रभुशक्तिः चेति ।

राज्यलक्ष्मी (wealth in the form of kingdom)

या राज्यलक्ष्मी प्राणपरित्यागमूल्येनापि न लभ्यते सा श्रीः चञ्चलापि नीतिविदं प्रधावति ।

स पृथिवीं प्रशास्ति (he commands the world)

यः वित्तं सदा यस्य समं विभक्तिं गूढश्चरः मन्त्रः सन्निभृतश्च प्राणिषु न चाप्रियं ब्रवीति, सः सागरान्तां पृथिवीं प्रशास्ति ।

तप्तेन सन्धानमुपैति (joins by burning)

वीरः सुगुप्तिमादाय सुसंहतेन बलेन विचरन्नरातिं येन समं सुतप्तः सन्तापयेत्, तप्तः तप्तेन सन्धानमुपैति ।

धूर्तैः वञ्च्यते (deceived by the crooks)

सत्यवादिनं दुर्जनं यः आत्मौपम्येन वेत्ति सः तथा वञ्च्यते ।

क्षीणा नरा निष्करुणा भवन्ति (those who are becoming weak, become pitilers)

क्षुधार्ता महिला स्वपुत्रं त्यजेत् । क्षुधार्तभुजगी स्वमण्डं खादेत् । बुभुक्षितः किं पापं न करोति ? क्षीणाः नराः निष्करुणा भवन्ति ।

न धर्मवित् (doesnot understand dharma)

मत्तः, प्रमत्तः, उन्मत्तः, श्रान्तः, क्रुद्धः, बुभुक्षितः, लुब्धः, भीरुः, त्वरायुक्तः, कामुकः च न धर्मवित् ।

अभयप्रदानम् (bestow of abhaya / fearlershers)

न भूप्रदानं, न सुवर्णदानं, न गोप्रदानं, न तथा अन्नदानम् । यथा इह सर्वेषु दानेषु महाप्रदानम् अभयप्रदानम् इति वदन्ति ।

अश्वमेधफलम् (the effect of performing aswamedha sacrifice)

सर्वकामसमृद्धस्य अश्वमेधस्य फलं यत् तत्फलं लभते शरणागते सम्यक् रक्षिते।

स बान्धवः (he is a relative)

उत्सवे व्यसने युद्धे दुर्भिक्षे राष्ट्रविप्लवे राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः। दिने दिने जीवस्य मृत्युः आसन्नतरतामेति ।

पण्डितः न मुह्येत् (the schlor dosen't get infactuated)

अनित्यं, यौवनं, रूपं, जीवितं, द्रव्यसञ्चयः, ऐश्वर्यं, प्रियसंवासः अनित्याः । पण्डितः तत्र न मुह्येत्।

भूतसमागमः (meeting of the entities)

महोदधौ यथा काष्ठञ्च काष्ठञ्च समेयातां, समेत्य च व्यपेयातां तद्वत् भूतसमागमः। कश्चित् पथिकः यथा छायामाश्रित्य तिष्ठति, विश्रम्य च पुनः गच्छेत् तद्वत् भूतसमागमः ।

का परिवेदना ? (why worry ?)

पञ्चभिः भूतैः निर्मिते पाञ्चभौतिकदेहे पञ्चत्वं च पुनर्गते स्वां स्वां योनिमनुप्राप्ते तत्र का परिवेदना ?

हृदये शोकशंकवः (canse pain to the heart)

मानवः सम्बन्धात् मानसः प्रियान् यावतः कुरुते, तावन्तोऽस्य निश्वन्यन्ते हृदये शोकशंकवः।

अत्यन्तसंवासः (long time association)

अस्मिन् प्रपञ्चे चिरकालसहवासः येन केनचित् न लभ्यते । स्वेन शरीरेणापि असम्भवः । अन्येन केनचित् उत किम् ?

मृत्योरिवागमम् (remainder of death)

संयोगः वियोगस्य सम्भवं संसूचयति । अनतिक्रमणीयस्य जन्ममृत्योरिवागमम्।

परिणामः अतिदारुणः (the result is horrible)

प्रियैः सह संयोगानाम् आपातरमणीयानाम् अपथ्यानामन्नानामिव परिणामः अतिदारुणः ।

आयुरादाय न निवर्तन्ते (decrease the life span)

सरितां स्रोतांसि यथा व्रजन्ति न निवर्तन्ते तथा रात्र्यहनी सदा मर्त्यानामायुरादाय व्रजन्ति न निवर्तन्ते ।

सज्जनस्नेहः (association of the vertious)

संसारे सत्समागमः सुखास्वादपरः वियोगावसानत्वात् सः दुःखानां धुरि युज्यते। अत एव साधवः सत्समागमं नेच्छन्ति । यद्वियोगासि लूनस्य मनसः भेषजं नास्ति।

प्रलयं गताः (destoryed)

सुकृतान्यपि कर्माणि राजभिः सगरादिभिः अथ तान्येव कर्माणि ते चापि प्रलयं गताः ।

मृत्युसमीपमेति (they are nearing death)

विचक्षणस्य मनुष्यस्य तमुग्रदण्डं मृत्युं सञ्चिन्त्य सञ्चिन्त्य वर्षाम्बुसिक्ता इव चर्मबन्धाः सर्वे प्रयत्नाः शिथिली भवन्ति । यामेव रात्रिं गर्भे निवासं प्रथमामुपैति । ततः प्रभृति अस्खलितप्रयाणः स प्रत्यहं मृत्युसमीपमेति ।

दुःखस्य कारणम् (cause of sorrow)

दुःखस्य कारणं वियोगश्चेत्, दिनेषु गच्छत्सु किर्थं वर्धतामपयाति ? शनैः शनैः दुःखं क्षीयते । अतः अज्ञानमेव दुःखस्य कारणम् ।

महौषधम् (the best medicine)

अकाण्डपातजातानां गात्राणां मर्मभेदिनां गाढाशोकप्रहाराणां महौषधं

दुःखानामचिन्तनमेव ।

गृहं तपोवनम् (house itself is the pernance grove)

अनुरागिणां वनेऽपि दोषाः प्रभवन्ति । गृहेऽपि पञ्चेन्द्रियनिग्रहः तपः । आकुत्सिते कर्मणि यः प्रवर्तते निवृत्तरागस्य तस्य गृहं तपोवनम् । यत्र कुत्राश्रमे रतः दुःखितोऽपि धर्मं चरेत् । समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ।

दुर्गाण्यपि तरन्ति ते (they cross over the obstacles)

येषां वृत्त्यर्थं भोजनं, सन्तानार्थं च मैथुनं, सत्यवचनार्थाय वाक्, दुर्गाण्यपि तरन्ति ते महात्मानः ।

न वारिणा शुध्यति अन्तरात्मा (the innerself isn't purified by water)

आत्मा नदी, संयमपुण्यतीर्था, सत्योदका, शीलघटा, दया ऊर्मिः । तत्र स्नानेन अन्तरात्म पवित्रं भवति । न तु वारिणा ।

असारं त्यजतः सुखम् (abdoning the worthlers leads to happiness)

जन्ममृत्युजराव्याधिवेदनाभिरुपहतं संसारमिममत्यन्तमसारं त्यजतः सुखम् ।

सुखसंज्ञा (is called happiness)

दुःखमेवास्ति । न सुखम् । यस्मात् तदुपलक्ष्यते । दुःखार्तस्य प्रतीकारे सुखसंज्ञा विधीयते।

सतां सङ्गो हि भेषजम् (association of noble is good medicine)

सङ्गः सर्वात्मना त्याज्यः । न चेत् त्यक्तुं न शक्यते । सङ्गः सद्भिः सह कर्तव्यः । सतां सङ्गो हि भेषजम् ।

भार्यैव भेषजम् (wife is the medicine)

कामः सर्वात्मना हेयः । न चेत् दातुं न शक्यते । स्वभार्यां प्रति कर्तव्यः । सैव तस्य हि भेषजम् ।

तप्यते मूढः (the fool gets tormented)

यः अर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः सः मूढः तप्यते ।

षड्वर्गमुत्सृजेत् (six blemishes that one must leave)

कामः, क्रोधः, तथा मोहः, लोभः, मानः, मदः षड्वर्गमुत्सृजेत् ।

मन्त्रिणः परमो गुणः (the high virtue of a minister)

स्मृतिः, कार्यतत्परता, कार्यपरिशीलनाज्ञानं, निश्चयज्ञानं, दृढता, मन्त्ररक्षणम् इति षट्गुणाः मन्त्रिणः परमो गुणः ।

स्वयमेव सम्पदः वृणते (wealth comes on its own)

सहसा क्रियां न विदधीत । अविवेकः परमापदां पदम् । विमृश्यकारिणं गुणलुब्धाः सम्पदः स्वयमेव वृणते ।

सिद्धिः साम्नि व्यवस्थिता (accomplishment of an action lies in annicableness)

साध्यसाधने उपायाः यद्यपि चत्वारः निर्दिष्टाः । तेषां फलं संख्यामात्रम् । सिद्धिः साम्नि व्यवस्थिता ।

सुजनः दुर्जनः (the good and the bad)

कनकघटवत् दुर्भेद्यः, आशुसन्धेयः सुजनः । दुर्जनः मृद्घटवत् सुखभेद्यः, दुःसन्धानः ।

ब्रह्मापि न रञ्जयति (even Lord Brahma cannot convince)

अज्ञः सुखमाराध्यः । विशेषज्ञः सुखतरमाराध्यते । ज्ञानलवदुर्विदग्धं ब्रह्मापि न रञ्जयति ।

कर्मानुभाव्यते (the action is guessed)

परोक्षगुणवृत्तयः सर्वत्र कर्मानुमेयाः । तस्मात् परोक्षवृत्तीनां फलैः कर्मानुभाव्यते।

मन्दमतिः (the dull headed)

मन्दमतीनां स्थितिरयम् । कदाचित् शंकैव न क्रियते । कदाचित् सर्वत्र

शंका।

दध्यपि पूत्कृत्य भक्षयति (eats curd also by blowing it)

दुर्जनदूषितमनसः सुजनेष्वपि विश्वासः नास्ति । बालः पायसदग्धः दध्यपि पूत्कृत्य भक्षयति खलु ।

वशीकरणोपायाः (methods of bringing the other under control)

लुब्धमर्थेन गृह्णीयात् । स्तब्धमञ्जलिकर्मणा, मूर्खं छन्दानुरोधेन याथातथ्येन पण्डितं, सद्भावेन हरेन्मित्रं, सम्भ्रमेण बान्धवान् स्त्रीभृत्यौ दानमानाभ्यां दाक्षिण्येनेतरान् जनान् गृह्णीयात्।

सन्धिमन्विच्छेत् (should make a treaty / allience)

बलीयसा अभियुक्तस्तु नृपः नान्यप्रतिक्रियः आपन्नः कालयापनं कुर्वाणः सन्धिमन्विच्छेत् ।

सन्धिः षोडशकं प्राहुः (allience / treaty of sixteen type)

कपालः, उपहारः, सन्तानः, सङ्गतः, उपन्यासः, प्रतीकारः, संयोगः, पुरुषान्तरः, अदृष्टनरः, आदिष्टः, आत्मादिष्टः, उपग्रहः, परिक्रियः, उच्छिन्नः, परभूषणः, स्कन्धोपनेयः, सन्धिश्च एते षोडशैते प्रकीर्तिताः । सन्धिविचक्षणाः सन्धिं षोडशकमिति प्राहुः ।

कपालसन्धिः (kapala sandhi)

कपालद्वयसंयोगेन घटवत् समानबलयोः सन्धितः कपालसन्धिः इत्युच्यते ।

उपहारसन्धिः (upahara sandhi)

शुक्लबहुमनादिभिः सम्प्रदानात् भवति यः सः उपहारः उच्यते ।

सन्तानसन्धिः (santana sandhi

दारिकादानपूर्वकः सन्तानसन्धिः विज्ञेयः ।

सङ्गतसन्धिः (sangata sandhi)

सद्भिस्तु मैत्रीपूर्व उदाहृतः सङ्गतः सन्धिः भवति । यावदायुः प्रमाणस्तु

समानार्थप्रयोजनः, सम्पत्तौ वा विपत्तौ वा कारणैः यः न भिद्यते सुवर्णवत् प्रकृष्टत्वात् अयमेव सङ्गतः सन्धिः । तथान्यैः सन्धिकुशलैः काञ्चनः समुदाहृतः।

उपन्याससन्धिः (upanyasa sandhi)

आत्मकार्यस्य सिद्धिस्तु समुद्दिश्य उपन्यासकुशलैः यः क्रियेत सः उपन्यासः उदाहृतः ।

प्रतीकारसन्धिः (pratikar sandhi)

पूर्वं मयास्योपकृतम् । ममापि एषः उपकरिष्यति । इति यः क्रियते सः प्रतीकारसन्धिः उच्यते उपकारं करोम्यस्य । ममाप्येष करिष्यति रामसुग्रीवयोरिव । अयञ्चापि प्रतीकारसन्धिः ।

संयोगसन्धिः (sanyoga sandhi)

एकार्थं सम्यगुद्दिश्य क्रियां यत्र हि गच्छति सुसंहितप्रयाणस्तु स च संयोगसन्धिः उच्यते ।

पुरुषान्तरसन्धिः (purusantara sandhi)

आवयोः योधमुख्यैस्तु मदर्थः साध्यतामिति यस्मिन् पणस्तु क्रियते सः पुरुषान्तरसन्धिः भवति ।

अदृष्टपुरुषसन्धिः (adrustapurusa sandhi)

त्वयैकेन मदीयोऽर्थः सम्प्रसाध्यन्तु असौ इति यत्र शत्रुः पणं कुर्यात् सः अदृष्टपुरुषः स्मृतः।

आदिष्टसन्धिः (adistacandhi)

यत्र भूम्येकदेशेन पणे स रिपुः ऊर्जितः सन्धिविद्भिः सन्धीयते स च आदिष्ट इतीरितः ।

आत्मादिष्टसन्धिः (atmadista sandhi)

स्वसैन्येन तु सन्धानं क्रियते आत्मादिष्टसन्धिः इत्युदाहृतः ।

उपग्रहसन्धिः (apagraha sandhi)

प्राणरक्षणार्थं सर्वदानात् उपग्रहसन्धिः इत्युच्यते ।

परिक्रियसन्धिः (parakriya sandhi)

कोशांशेन अर्धकोशेन सर्वकोशेन वा पुनः शिष्टस्य प्राणरक्षार्थमुदाहृतः परिक्रियसन्धिः इति।

उच्छिन्नसन्धिः (ucchinnasandhi)

भुवां सारवतीनां तु दानात् उच्छिन्नसन्धिः उच्यते ।

परभूषणसन्धिः (parabhusana sandhi)

भूम्युत्थफलदानेन सर्वेण सन्धिः परभूषणसन्धिः उच्यते ।

स्कन्धोपनेयसन्धिः (sandhopaneya sandhi)

परिच्छिन्नं फलं यत्र प्रतिस्कन्धे न दीयते तं सन्धिं सन्धिविचक्षणाः स्कन्धोपनेयमित्याहुः ।

चत्वारः सन्धयः (four types of treaties)

परस्परोपकारः, मैत्री, सम्बन्धकः, उपहारश्च चत्वारः सन्धयः विज्ञेयाः । मैत्रिविवर्जिताः सर्वे उपहारविभेदाः एव । एक एव उपहारसन्धिः । अभियोक्ता बलीयस्त्वात् अलब्ध्वा न निवर्तते । तस्मात् उपहारादृते अन्यः सन्धिः न विद्यते ।

सखा धर्मः (dharma is friend)

वाताभ्रविभ्रममिदं वसुधाधिपत्यम् । आपातमात्रमधुरः विषयोपभोगः । प्राणाः तृणाग्रजलबिन्दुसव्यानलोला । परमहो परलोकयाने धर्म एव सखा ।

शश्वत् कल्याणमाचरेत् (always only good actions should be performed)

देहिनां जीवितं जलान्तः चन्द्रचपलम् । तथाविधमिति ज्ञात्वा सर्वदा कल्याणमेवाचरेत् ।

सज्जनैः सङ्गतं कुर्यात् (should have friendship him good people)

मृगतृष्णासमं वीक्ष्य, संसारं क्षणभङ्गुरम् । धर्माय सुखाय च

सज्जनैः सङ्गतं कुर्यात् ।

सत्यमेवातिरिच्यते (truth alone wins)

अश्वमेधसहस्राणि सत्यञ्च तुलया धृतम् । अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते। अतः सत्याभिधानदिव्यपुरस्सरमनयोः भूपालयोः काञ्चनाभिधानः सन्धिः विधीयताम्।

भूयान्महानुत्सवः (attainment of great joy)

विजयिनां सर्वमहीभुजां सन्धिः सदा प्रमोदः अस्तु सन्तः सन्तुनिरापदः, सुकृतिनां कीर्तिः चिरं वर्धताम्। नीतिः वारविलासिनीव सततं वक्षःस्थले संस्थिता । मन्त्रिणामहरहः भूयान्महानुत्सवः वक्त्रं चुम्बतु । ❀ ❀ ❀

प्रचरतु हितोपदेशः (may Hitopadesh live altime)

प्रालेयाद्रेः सुतायाः प्रणयनिवसतिश्चन्द्रमौलिः यावत्, यावत् लक्ष्मीः मुरारेः जलद इव तटिवान्मानसे विस्फुरन्ती, यावत् स्वर्णाचलोऽयं दवदहनसमो सूर्यः यस्य स्फुलिङ्गः तावत् नारायणपण्डितेन रचितः हितोपदेशः प्रचरतु । वासवः इष्टां वृष्टिं विसृजन् उर्वीमुद्दामसस्यां जनयतु ।